K.K. Sharma
22.9-80

बुलन्दशहर (उ०प्र०)

श्रीशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयिनां

नित्य-नैमित्तिककर्मसमुच्चयः।

(ब्रह्मकर्मसमुच्चयः)

(अमृतवर्षिण्या टिप्पण्या समलङ्कृतः)

★

सङ्गृहीता–संशोधकश्च,

शास्त्री अमृतलाल त्रिकमजी आचार्य,

(जामनगर - निवासी).

अध्यापकः—श्रीमुंबादेवीसंस्कृतवैदिकपाठशाला, मुंबई २

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३६४
बुलन्दशहर (उ०प्र०)

★

शकाब्दाः १८७४ सनाब्दाः १९५२

निर्णयसागर मुद्रणालयम्, मुंबई २

मूल्यम्— ५॥ सार्धपञ्चरूप्यकाः

S. Book Prakash.
12-00

अस्य ग्रन्थस्य पुनर्मुद्रणाधिकारो राजकीयाधिकारानुसारेण
निर्णयसागरेण स्वायत्तीकृतः ।

मुद्रकः प्रकाशकश्च
श्रीमती लक्ष्मीबाई नारायण चौधरी,
निर्णयसागर प्रेस, २६–२८ कोलभाट स्ट्रीट, मुंबई. २

॥ श्रीसिद्धारूढाय नमः ॥

कै. श्रीमत्या भवत्याः सत्यभामाबाई पाण्डुरङ्ग चौधरी-त्यभिख्याया यच्छ्रुतं तच्चारित्र्यं स्मर्यते ॥

कार्येषु मन्त्री करणेषु दासी ।
धर्मेषु लक्ष्मीः क्षमया धरित्री ॥
स्नेहेषु माता शयनेषु रम्भा ।
रङ्गे सखी लक्ष्मण ! सा प्रिया मे ॥ १ ॥

स्वपत्नीं सतीं सीतामुद्दिश्य साक्षात्परमेश्वरस्य श्रीजगन्नाथस्य रामचन्द्रप्रभोः लक्ष्मणं प्रत्युक्तिरियम् । गुणगणैर्युक्तां स्वधर्मचारिणीं भगवतीं जगज्जननीं प्रतिक्षणं लक्षीकृत्य सदुक्तीरिव स्वहृदये तस्या लिखिताँस्ताँस्ताँश्च गुणान्संस्मृत्य संस्मृत्य भगवता रामेण असकृत् एवं प्रजल्पितम् ।

सीताया विशुद्धौ विशङ्केनापि रामेण केवलं "जनाराधनं नृपतेर्धर्म एव" इति राजधर्ममङ्गीकृत्य जनाराधनायैव सीतया सह स्वसुखं परित्यज्याऽऽजीवं दुःखानले स्वदेहं प्रक्षिप्याऽऽमरणं सीतावियोगः स्वीकृतः ।

परित्यक्तापि सीता जगति स्वाचरणेन स्वजन्मना च कृतकृत्यजनिर्जातेति सर्वैर्ज्ञातमेव । त्रैलोक्ये केवलम् एवंविध एको भारतनामा एव देशो वर्तते । यत्रैतादृशौ पुरन्ध्रीपुरुषौ जायेते ।

भवती पूर्वोक्तैर्गुणगणैर्युक्तेति श्रुतम् । भवत्या ठाणाप्रान्ते मुरबाडतालुकायां माजगांवाख्ये खेटग्रामे कृतनिवासस्य दुन्दाजीनाम्नः श्रीमतो गृहे जनिरभूत् ।

पूर्वत एव भवत्याः पितृवंशो वर्णाश्रमधर्मैर्युतः परोपकाराद्यैरनेकैर्गुणगणैश्च परिवृतः प्रसिद्ध आसीत् ।

जन्मतो भवत्याः सद्वर्तनं, सच्चारित्र्यं, सद्धर्मपरायणत्वं, सद्भावनाप्लावितं मानसं रागद्वेषादिरहितं स्वच्छान्तःकरणत्वञ्च समवलोक्येदं पूर्वजन्मोपार्जितस्य पुण्यकर्मण एव फलम् इति सर्वे मनस्यमन्यन्त ।

पं० प्रे[illegible] शास्त्री

भवत्या विवाहः परमेश्वरस्य महेच्छयैव निर्णयसागरस्य सीसकाक्षर (टाईप फौन्ड्री) यन्त्रालयस्य च संस्थापकानां कै. जावजी दादाजीनाम्ना सुप्रसिद्धानां कनिष्ठेन सत्पुत्रेण श्री. पाण्डुरङ्गनाम्ना सह भगवतो निःश्वासभूतानां भगवन्वाङ्मयस्वरूपाणां वेदानां वेदाङ्गानाञ्च प्रकाशनद्वारा संरक्षणाय भगवन्वाङ्मूर्तेः सपर्यायै सहेतुको जात इति कथने नासत्यप्रशस्तिः किन्तु सत्योक्तिरेव ।

अपरञ्च कै. जावजी दादाजी महोदयानां वंशेऽप्यौदार्यं, स्वधर्माचरणं, कार्यकौशल्यं, पावित्र्यं, सहृदयत्वञ्च स्वाभाविकमासीत् । तत्र भवत्या गुणप्रवाहो गङ्गायमुनयोः प्रवाह इव तेषां गुणौघैः सह मिलित्वा द्विधात्वं परित्यज्य सम्मिलितैकरस एव जातः ।

भवत्या शनैः शनैरत्रत्यानां सर्वेषां मनांसि नम्रत्वादिभिः स्वायत्तीकृत्य भर्तुरपि प्राचीनसंस्कारेषु धार्मिकत्वं प्रतिदिनं संवृद्ध्य स्वयमपि तेषां हृदयाधिष्ठात्री भूत्वा स्वस्या अर्धाङ्गनात्वं सार्थीकृतम् ।

तीर्थयात्रायां हुबलीग्रामे कृतनिवासानाम् आध्यात्मिकज्ञानेन पवित्रीकृतचेतसां श्रीसिद्धारूढस्वामिमहोदयानां परिचयं लब्ध्वा तेभ्य आध्यात्मिकज्ञानवल्ले रसामृतं पीत्वा तेषां शिष्यात्वञ्च स्वीकृत्य सद्गुरोराराधनाय स्वगृहे (भागिरथीबाई बिल्डिंग ग्रँटरोड) बंगलोरमठाधिकारिणां शिवानन्द (अप्पा) स्वामिनां श्रीमत्या आउबाईदेव्याश्च प्रेरणयैव तयोः सान्निध्येन भवत्या प्रतिवर्षं सप्ताहमहोत्सवः प्रारब्धः ।

एकस्मिन्नहनि भवत्या भगवत आराधनाय द्रव्यप्राप्त्यर्थं परस्परं यतमानेषु भक्तवृन्देषु द्रव्यतः “परमैकश्रद्धैव यथाशक्ति पत्रं, पुष्पं, जलकणञ्च सन्तोषाय भवति” इति स्वोक्तिसमर्थने “रुक्मिण्या स्वकीयानन्यप्रेम्णैव श्रीकृष्णस्य तुलाकरणवेलायां केवलमेकेनैव तुलसीपत्रेण तं तोलयित्वा तुलसीपत्रतोऽपि श्रीकृष्णस्य भारो लघुः कृतः” इति उदाहरणेन सर्वे संतोषिता इति प्रसंगः भवत्याश्चारित्र्यमौक्तिकानां गणनाप्रसंगे कथं विसर्तुं शक्यः ।

कै. जावजी दादाजी महोदयानां ज्येष्ठपुत्राः श्रीमन्तस्तुकाराममहोदया एव निर्णयसागरस्य सीसकाक्षर (टाईप फौन्ड्री) यंत्रालयस्य कार्यवोढार आसन् । तेषां

कैलासवासादनन्तरं निर्णयसागरस्य प्रकाशनविभागो भवत्या गृहीतः । सीसकाक्षरयंत्रालयस्य च निरीक्षणं तेषां पत्न्या श्रीमत्या जिजाबाई देव्या च गृहीतम् । तस्या जिजाबाईदेव्या अपि कैलासवासानन्तरम् उभयोर्निरीक्षणं सुव्यवस्थया सञ्चालनञ्च भवत्यैवाङ्गीकृत्य स्वबुद्धिचातुर्येण तत्रत्यान्सर्वान्स्वकीयान्कृत्वा निर्णयसागरस्य मॅनेजर इति पदवीं प्राप्तस्य एकनिष्ठभक्तस्य कै. रामभाऊ महोदयस्य तथाऽन्येषाञ्च सहायेनैकादशवर्षपर्यन्तं मुद्रणालयस्यातीव काठिन्ययुक्ते कालेऽपि न केवलं सञ्चालनं किन्तु वाङ्मयमूर्तेः प्रभोः संरक्षणाराधनं कृतमित्युक्ते नातिशयोक्तिः ।

कै. रामभाऊ महोदयेन सह मदीयः परिचयः पुस्तकप्रकाशनद्वाराऽऽसीत् । भवत्या सह तु स्वामिचक्रचूडामणिभिः सर्वतंत्रस्वतंत्रैः श्री. करपात्रिमहोदयैर्यदा (मरीन ड्राईव्ह, मुंबई) समीपस्थे स्थले लक्षचण्डीमहायागः कृतस्तदैव प्रथमः सञ्जातः । तस्मिन्महायागे सर्वोपद्रष्टृपदेऽहमासम् । तत्र भवती श्रीमतां योगिराजानां स्वामिमहोदयानां यज्ञस्य च दर्शनाय तेभ्यः शाङ्करभाष्यप्रभृतीन् ग्रन्थान् दातुं तत्र वृतेभ्यो ब्राह्मणेभ्यश्च चैत्रपञ्चाङ्गानि दातुं कै. रामभाऊ महोदयेन सह सम्प्राप्ता । भवत्याः प्रेम्णा नम्रभावेन च विनम्रं मुखं दृष्ट्वा भवतीं तत्र स्वामिपादानामग्रे नीत्वा मया भवत्याः तैः सह परिचयः कारितस्तदा तेऽतीव प्रसन्ना जाता भवत्या अपि मनःसङ्कल्पः पूर्णोऽभवत् ।

भवती "कालो जगद्भक्षकः" इति नियमेन स्वगृहे आरब्धस्य सद्गुरोरुत्सवस्य षष्ठेऽह्नि १८७३ शके कार्तिकमासे कृष्णपञ्चम्यां (ता. १८-११-५१) रात्रौ सार्धैकवादनसमये पञ्चमहाभूतोत्पन्नं नश्वरमिमं देहं भगवन्नामस्मरणपूर्वकं त्यक्त्वा अक्षरब्रह्मणि ब्रह्मीभूतत्वाय कृतप्रस्थानाऽभवत् ।

प्रचलिते गुरोरुत्सवे सर्वेषु कीर्तनकथाभिराप्लावितेषु भक्तवृन्देषु सच्चिदानन्दस्वरूपे परब्रह्मणि जीवस्य क्रमेण लयभावं भवतीसदृशो भगवद्भक्तो योगारूढः कश्चिद्योग्येव तत्तत्पञ्चमहाभूतेषु देहभावमाप्लाव्य तत्पदं प्राप्नोति ।

यद्यजामिलेन कृतानामनेकानां पापानां भगवन्नामधारिणः स्वपुत्रस्य नारायणस्यैकवारमेवाह्वानरूपभगवत्स्मरणे कृते दैहिकेऽकृतेऽपि प्रायश्चित्ते सर्वे प्रणष्टाः

पापौघाः सँल्लब्धञ्च शाश्वतं नारायणपदम् ॥ तर्हि भवत्यै सद्गुरोरुत्सवस्यान्तिमदिवसपर्यन्तं सश्रद्धया कृतस्य नारायणस्मरणस्य सायुज्यपर्यन्ते मुक्तिफले कदाचिदप्रदत्ते किं भगवता विशषं प्रदत्तम् ।

सद्गुरोरुत्सवस्यान्तिमे दिवसे प्रातः समागतानां सर्वेषां मनांसि दुःखेन आनन्देन च प्लावितानि कृतानि भवत्या ब्रह्मीभूतया । "अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् । यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः । श्रीमद्भगवद्गीताया अयं श्लोकोऽपि भवत्या स्वानुभवार्थीकृतः ।

पूर्वत एव नित्य-नैमित्तिककर्मसु भवत्या अपूर्वा श्रद्धाऽऽसीत्तत्र किं कथनीयम् । अयं नित्य-नैमित्तिककर्मणां बोधको मया संगृहीतो "नित्य-नैमित्तिककर्मसमुच्चयः (ब्रह्मकर्मसमुच्चयापरनामा)" अक्षरब्रह्मणि विलीनायाः कै. श्रीमत्या भवत्याः सत्यभामाबाई पाण्डुरङ्ग चौधर्याः अक्षरस्वरूपाञ्जलौ श्रद्धाञ्जलिपूर्वकं समर्प्यते । भवत्याऽऽजीवं कृतस्य वेदवेदाङ्गाद्यनेकवाङ्मयशास्त्रस्वरूपस्य भगवतः श्रीपरमेश्वरस्य समर्चायाः फलस्वरूपेणेति दिक् ।

कै. पाण्डुरङ्गश्रेष्ठिनां पूर्वपत्न्या शङ्कर-शान्तारामनाम्नोर्द्वयोः पुत्रयोर्मध्ये शान्तारामनामानं सुपुत्रं कै. श्री. तुकारामश्रेष्ठिनां पत्न्या जिजाबाईदेव्या स्वपुत्रत्वेन स्वीकृत्य तस्य नारायणेत्यभिधानं दत्तम् । सोऽप्यचिरेण कालेन कैलासवासं प्राप्तः ।

अधुना कै. श्री. नारायणश्रेष्ठिनां पत्नी श्रीमती लक्ष्मीबाईदेवी तथा च कै. शङ्करश्रेष्ठिनां सुपुत्रो राजेन्द्रनामा तथा च कै. श्रीमत्याः सत्यभामाबाईदेव्या जामाता ठाकरेत्युपनामधारी श्री. शान्तारामश्रेष्ठी एते त्रयो वर्तन्ते ।

एते प्रतिदिनं निर्णयसागरस्य, सीसकाक्षर (टाईपफौन्ड्री) यंत्रालयस्य च" कार्यं वहन्तः स्वकीयपूर्वजानां मार्गमनुसन्तो वेदादिवाङ्मयमूर्तेः परमेश्वरस्याऽऽजीवं सेवां कुर्वन्तः सर्वेषां परमश्रद्धास्पदाः सन्तो मोदन्तामित्याशीर्वादः ।

निवेदकः,

शास्त्री अमृतलाल त्रिकमजी आचार्य,

(जामनगर-निवासी).

॥ श्रीः ॥

प्रास्ताविकं द्वित्राक्षरम् ।

अस्मिन्भारते लब्धजनिभिर्न केवलं त्रैवर्णिकैरुत शूद्रसमन्वितैश्चातुर्वर्ण्यैर्विदितमेव मनुवाक्यमिदम् ॥

"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥
यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥
श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः ।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥
श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥
योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥" [म. अ. २]

धर्मे सर्वं प्रतिष्ठितम् ॥

ऋग्यजुःसामाथर्वलक्षणो वेदः । तस्य च विध्यर्थवादमन्त्रात्मकत्वेन धर्मे मूलं—(प्रमाणं) स्वीकृतं सर्वैः ॥ वेदविहितधर्म-कर्मणां प्रतिपादकत्वेन तन्मूलकत्वेन च मन्वादिस्मृतिग्रन्थानामपि प्रामाण्यं प्रतिपादितं तज्ज्ञैर्विद्वद्भिः ॥

"वेदोऽखिलो धर्ममूलम्" इति श्लोके "स्मृतिशीले च तद्विदाम्" इति पदेन च वेदानुकूलस्मृत्युक्तधर्माणां तथैव शीलस्यापि ब्रह्मण्यता (वेदवत्व)-स्वरूपमनुवितं मनुना । तथा च हारीतः—"ब्रह्मण्यता, देव-पितृभक्तता, सौम्यता, मैत्रता, प्रियवादित्वम्, कृतज्ञता, शरण्यता, अपरोपतापिता, अनसूयता, मृदुता, अपौरुष्यम्, कारुण्यम्, प्रशान्तिः" इति त्रयोदशविधं शीलम् इति । अन्ये गोविन्दराजप्रभृतयस्तु—"रागद्वेषयोः परित्याग एव शीलम्" इति वदन्ति ॥

ते च शीलस्येदमेव लक्षणम् इति कथयन्ति ॥ नात्र विरोधः कस्यापि उपरिनिर्दिष्टानां ब्रह्मण्यतादिशीलधर्माणामन्तर्हितत्वं तयो रागद्वेषयोः परित्यागे सर्वेषाम् ॥ सुप्रसिद्धमेव रागद्वेषयोः परित्यागेऽन्येषां ब्रह्मण्यतादिशीलधर्माणां समाप्तिः शीले, रागद्वेषौ तु शीलधर्मविरोधिनावेवेति स्पष्टतरं नात्र वैमत्यं केषाञ्चित् ॥

तथा च वैकल्पिकपदार्थविषयत्वेन "आचारस्यापि धर्मे प्रमाणम् । कम्बलवल्कलवस्त्रादीनां धारणम् । साधूनां—धार्मिकाणाम् आत्मतुष्टेरपि धर्मत्वेन स्वीकृतिः" ॥

एवञ्च वेदविहितधर्मकर्मणां प्रतिपादनं तत्परिपालनञ्च सर्ववर्णानां क्षेमकरं स्वस्वजातिधर्मकर्मपरिपालनद्वारा ऊर्ध्वगमनञ्च सर्वेषां धूम इवेतो गमनानन्तरम् ॥

अनेन प्रतिपाद्यते, स्वस्य परस्य च प्रत्यहं कल्याणाय यतमानानां ज्ञानचक्षुषा श्रुतिस्मृतिप्रतिपादितं वेदार्थागमोक्तं, विहितानां कर्मणां शुद्धाशुद्धौ निर्णायकत्वेन मीमांसा—व्याकरणोदितञ्च ज्ञानं सम्प्राप्तानां तद्द्वारा वेदोदितानि तत्तत्कर्माणि धर्मांश्चानुतिष्ठतां विदुषां केवलं "धर्म एव हितकरः" इति ॥

तेन प्रत्यहं लोके श्रुतिस्मृत्युक्तानां धर्माणां तद्विहितकर्मणाञ्च स्वोद्धारकत्वेनानुतिष्ठन्तो मानवा धर्माचरणेनेहानुषङ्गिकीं महतीं कीर्तिं, परलोके च स्वर्गापवर्गजन्यं परमं सौख्यमनायासेन प्राप्नुवन्ति दुस्तरेऽप्यस्मिन् कलिकाले ॥

अत एव सर्वैः कर्मक्षेत्रेऽप्यस्मिन् भारते पुण्येन सम्प्राप्तजन्मभिश्चतुर्वर्णैः स्वक्षमाय परमेश्वरस्य निःश्वासभूतानां वेदानां श्रुतित्वेन, तथैव वेदोदितकर्मणां प्रतिपादकत्वेन मन्वादिधर्मशास्त्राणाञ्च स्मृतित्वेन प्रामाण्यं स्वीकृतं, तथापि मन्वादिस्मृतीनां श्रुतिविरोधेऽप्रामाण्यं वेदार्थविद्भिर्विद्वद्भिरुक्तमेव । अतः कोऽर्थस्तत्र तत्र तद्विरोधकर्तॄणामाधुनिकानां प्रतिक्षणं मण्डूकप्लुत्या इतस्ततो भ्रमतां भ्राम्यमाणानां स्वकल्पनाकल्पितानाम् आपातरमणीयानां शब्दाडम्बरत्वेनैवोपादेयत्वप्रतिपादकानां "हिन्दुकोड" नाम्ना प्रसिद्धानां स्वच्छन्दप्रदानेन नीतेरपि विध्वंसकानां "ऐहिक एव सुखे" नित्यं प्रवर्तमानानां वचसां प्रामाण्ये ॥

ननु तर्क एवाङ्गीकार्यो धर्मे इति चेन्न । "तर्कोऽप्रतिष्ठः" इति श्रवणात् । नात्र वेदोदिते धर्मे तर्कस्योपादानं किन्तु तस्य हेयत्वमेवाङ्गीकृतात् ॥ यथा—

"मलमूत्रत्यागे त्रैवर्णिकैर्यज्ञोपवीतं दक्षिणकर्णे धार्यम् इति श्रुतिस्मृत्युक्तो धर्मः"। अत्र किमन्यथा मलमूत्रयोस्त्यागो न स्यादयं कुतर्कः । स च मलमूत्रयोस्त्यागे दक्षिणकर्णे यज्ञोपवीतं धार्यमिति वेदोक्तविधिवाक्यस्य विरोधात्त्याज्य एवेत्युक्तत्वाच्च ॥ तथैव यः कश्चिदेवं वदति "वेदवाक्यम् अप्रमाणम्"। वाक्याश्रयात् विप्रलम्भकवाक्यवत् । इति प्रतिकूलतर्काविष्टेन मनसा वेदवाक्यमवमन्येत । तं वेदनिन्दकं मत्वा साधुभिर्बहिष्कार्य एवेति कथयन्ति वेदमर्मज्ञाः । नात्र कापि क्षतिरेतादृशस्य वेदविरोधिनो बहिर्गमनेन । धर्मशास्त्रप्रणेतारो मन्वादयोऽपि धर्मशास्त्रे तथैव प्रतिपादयन्ति ते तु सर्वथा "त्याज्या" एवेति ॥

धर्मे वेदानां प्रमाणं क्वचित्प्रत्यक्षतया, क्वचिच्च स्मृत्यानुमितयैवेति तात्पर्यं स्वीकृत्य "श्रुतिस्मृत्युदितो धर्मः" इति श्लोके श्रुतिस्मृत्योर्द्वयोरेव स्वीकारः कृतः । तथैव सदाचारस्य-(शिष्टाचारस्य) स्वस्यात्मनः प्रियस्य च धर्मे प्रमाणत्वेन स्वीकृतिः। परञ्चोभौ धर्माविरुद्धावेव चेत् । अन्यथाऽव्याप्तेः प्रसङ्गः स्यात् ॥

एतेन श्रुतेः स्मृतेः सदाचारस्य आत्मनः प्रियस्य च धर्मे प्रमाणत्वेन स्वीकाराद्धर्मस्य "चतुर्विधं धर्मलक्षणम्" फलितम् ॥

चातुर्वर्ण्येषु स्वधर्मे कलहो माभूदिति विचार्य सर्ववर्णानामाजीविकाप्रधाना धर्मा विभिन्ना एव कृताः ॥ ब्राह्मणानाम्— "अध्यापनम्, अध्ययनम्, यजनम्, याजनम्, दानम्, प्रतिग्रहश्च" ॥

क्षत्रियाणाम्— "प्रजारक्षणम्, दानम्, यजनम्, अध्ययनम्, विषयेषु गीत-नृत्य-वनितोपभोगादिष्वप्रसक्तिश्च (अनासक्तिरित्यर्थः)" ॥

वैश्यानाम्— पशुरक्षणम्, दानम्, यजनम्, अध्ययनम्, वणिक्पथम् स्थलजलादिना वाणिज्यम्, वृद्ध्या धनप्रयोगः, कृषिः, क्षेत्रादिषु धान्यवपनम्, ॥

शूद्राणाम्— "ब्राह्मणादित्रैवर्णिकानां परिचर्यात्मकं कर्मैवैको धर्मः ॥ तेन सह दानादिः, अनसूया, गुणानामनिन्दया च वर्तनम्" इति विशेषधर्मः ॥

व्यष्टिरूपेण वर्तमानानां ब्राह्मणादिचतुर्वर्णानां ये ये धर्माः कथितास्ते तेषामाजीविकाप्रधाना एव बोध्याः ॥

सर्वेऽपि वर्णाः स्वजन्मानुसारेण तत्तद्धर्मानाश्रित्योपनयनादिसंस्कारान्प्राप्य वेदं वेदाङ्गानि च गुरोरधीत्य स्वस्य समावर्तनसंस्कारानन्तरं गृहस्थाश्रमार्थे वर्णक्रमेण त्रयो वर्णाः स्वजातीयाम्– सवर्णाम्, असपिण्डाम्, अनिन्दितकुलोत्पन्नाम्, अलोमिकाम्, नातिलोमाम्, न वाचाटाम्, नाधिकाङ्गीम्, न रोगिणीम्, न पिङ्गलाम्, किन्तु सौम्यनाम्नीम्, हंसवारणगामिनीम्, तनुलोमकेशदशनाम्, मृद्वङ्गीम्, अन्यङ्गाङ्गीम्, कन्यां यथासमयं ब्राह्म-दैव-आर्ष-प्राजापत्य-आसुर-गान्धर्व-राक्षस-पैशाचाद्यन्यतमेन विवाहविधिना उदूह्य निन्दितकालं विहाय स्वपत्न्या ऋतुकालं सम्पाद्य दारोपगमेन धर्मप्रजामुत्पाद्य धर्मशास्त्रानुसारमाजीवं स्वधर्ममाचरेयुः ॥

न केवलं प्रजोत्पत्तिद्वारा मानवः स्वकीयं शं साधयति, किन्तु, अध्ययनद्वारा ब्रह्मयज्ञम्, तर्पणद्वारा पितृयज्ञम्, अग्नौ होमद्वारा देवयज्ञम्, भूतानां बलिदानद्वारा भूतयज्ञम्, अतिथिसत्कारैर्मनुष्ययज्ञम्, पञ्चसूनादोषपरिहारार्थं वैश्वदेवम्, एवञ्चेमानि नित्यकर्माणि कृत्वेह सुखमनुभूय परलोकेऽपि मोदत एव ॥

बहवो नित्यकर्मणा आत्मनो विग्रहस्य च शुद्धिं जनयन्ति। अधुना त्वेतादृशा एव दृष्टिपथम् आयान्ति, य उपनयनसंस्कारं प्राप्यापि जातिभेदं विहायैव विहरन्ति । केचनोपनयनसंस्कारमपि नेच्छन्ति। तेषामग्रे का वार्ता नित्यकर्मणो जातिधर्मस्य वा । उत तेत्वधिक्कृतया सम्पत्त्या देहेन गेहेन च परिबृंहिता प्रत्यहं कर्तुमयोग्यान्यपि कर्माणि कुर्वन्तो नृपतितुल्यमतुल्मपरिमेयञ्च सुखमनुभवन्ति ॥ तथैव प्रत्यहं धार्मिकाणां नोपहासं किन्तु निन्दामेव कुर्वन्ति । तान् दृष्ट्वा धर्ममार्गे सञ्चरन्तो जना अपि स्वमनसि तेषामुन्नतिञ्च वीक्ष्य धर्माऽऽचरणेऽश्रद्धां प्राप्नुवन्ति ॥ नात्र दोषस्तेषाम् । अपि तु कालस्यैवैतादृशी कृतिः । पूर्वकृतपुण्यकर्माणस्तेऽधुना मनःपूतं कुर्वन्तु स्वपुण्यक्षयाय विहारं विलासञ्च ॥ क्षीणे पुण्ये त एव गर्ह्यं जन्म प्राप्यानुभविष्यन्त्यकृतपुण्यकर्मणां कृतपापपुञ्जानां फलमिहैव लोके इति तु निर्बाध एव शास्त्रसिद्धान्तः ॥

अत एव मानवो दुर्लभं मानुषं जन्म लब्ध्वा शरीरादिशुद्ध्यर्थं स्वजात्यानुसारेण नित्यकर्माणि कृत्वा सच्चिदानन्दस्वरूपस्य परमेश्वरस्योपकारस्मृत्यै न तूप-

कृत्यै तच्चरणारविन्दमकरन्दप्राप्त्यै च वेदोक्तानि नैमित्तिकानि च कर्माण्यवश्यं कर्तव्यानीति न विस्मरेत् ॥

अनेनावगम्यत एव स्वधर्मस्याचरणानाचरणाभ्यामेव मानवा ऊर्ध्वमधो वा जिगमिषन्ते। इह लोके परं श्रेयःसाधनं परं प्रेयःसाधनञ्च स्वजात्यनुकूलो धर्म एव। स च नित्य-नैमित्तिक-काम्यकर्मणां नित्यानुष्ठानेनैव प्राप्यते।

मन्वादिधर्मशास्त्रप्रणेतृभिर्याज्ञवल्क्यादिमहर्षिभिर्वेदानधीत्य तपश्चर्याद्वारा तदर्थान्सम्पाद्य लोकोपकाराय तमसि "दीपा इव" धर्मशास्त्रग्रन्था रचिताः ॥

कात्यायनाद्यृषिभिरपि वेदोदितेभ्यो नित्य-नैमित्तिककर्मभ्यस्त्रैवर्णिकानां सुखाय कर्मकाण्डविषयान् संगृह्य तत्तत्कर्मबोधका अनेके ग्रन्था विरचिताः ॥

केचन प्राचीना न्यासशापोद्धारादिसमन्वितानि प्राचीनपरम्परया प्राप्तानि सर्वाणि कर्माणीच्छन्ति, केचन केवलं वेदानुसारं संक्षेपेण नित्यकर्मानुष्ठानमेवेच्छन्ति। ततोऽप्याधुनिकास्तु केवलां वैदिकीं सन्ध्योपासनां वैदिकान् पञ्चमहायज्ञान् एव संक्षेपेण कर्तुं स्वशक्ति दर्शयन्ति ॥ देशकालानुरोधेन सर्वेषां मनःसमाराधनाय ज्ञातारोऽप्यसमर्था वैदिककर्मकाण्डमहोदधेस्तथाविधान्प्रयोगमौक्तिकान् बहिरानेतुम् ॥ तत्र का शक्तिः परिमितज्ञानस्य मे ॥

तथाप्येवायं ग्रन्थो नित्य-नैमित्तिककर्मबोधको निःश्रेयःसाधनभूतो श्रुतिस्मृत्युक्तधर्मप्रतिबोधकान्श्रुतिस्मृतिग्रन्थांश्चालोक्य नातिदीर्घो नातिह्रस्वो "ब्रह्मकर्मसमुच्चयापरनामा नित्य-नैमित्तिककर्मसमुच्चयः" संगृह्य भवतां श्रीमतां कराञ्जलौ विविधपुष्पाणां निकर इव "अमृतवर्षिण्या टिप्पण्या" परामृतेन च प्लावितः प्रस्थाप्यते सर्वेषां भूत्यै मयेति ॥

ये तु नैमित्तिकानि विष्णुयागादिसर्वस्मार्तकर्माणि कर्तुं कारयितुमिच्छन्तस्तत्तच्छास्त्रविदो विद्वांसोऽनेनैवैकेन ग्रन्थेन मण्डपाद्बहिः क्रियमाणं मण्डपप्रवेशान्तं कर्म समाप्य मण्डपप्रवेशानन्तरं वास्तुपूजनत आरभ्य अवभृथस्नानान्तमासमाप्ति सर्वं शक्नुवन्त्येव याज्ञिककर्म ॥

तथा च मण्डपाद्बहिः क्रियमाणं गणपतिपूजनादिमण्डपप्रवेशान्तकर्मबोधकः "स्मार्तकर्माङ्गगणपतिपूजनादिमण्डपप्रवेशान्तकर्मप्रयोगः" मया संगृहीतो

निर्णयसागरमुद्रणालयेन प्रथममेव मुद्रापितः ॥ तत्र विष्णुयागादिस्मार्तकर्मणां सर्वेषां पृथक् पृथक् प्रदत्ताः तत्तत्प्रधानसङ्कल्पाः ॥

अयमपि सामान्यतया कर्मकाण्डविषयज्ञानां वैदिकानां वैदिकपौराणिकेषु सर्वयागेषु तत्तत्कर्मप्रबोधकेभ्योऽन्येभ्यो ग्रन्थेभ्योऽप्यधिकतया सरलः शास्त्रार्थेन च परिबृंहितो वैदिकैः संग्रहीतुं योग्य एवेति कथने नाऽऽत्मनः ख्यातिः किन्तु वितथोक्तिरेव विदांकुर्वन्तु विद्वज्जना राजहंसाः ॥

अस्य ग्रन्थस्य मुद्रापयितुः "निर्णयसागरस्य" विषये किमपि वक्तुं न शक्नोमि। यथा परमेश्वरस्य निःश्वासभूतैर्वेदैस्तत्तद्विषयप्रबोधकैः स्मृतिग्रन्थविरचयितृभिर्ऋषिमहर्षिभिश्च महोपकारः कृतः । ततोऽप्यधिकांशेन निर्णयसागरेण तत्तद्ग्रन्थप्रकाशनद्वारा कृतो वैदिकज्ञानक्षीरमहोदधेर्गङ्गातुल्यः पुण्यजनकः प्रवाहितो ज्ञानप्रवाहः कथं विस्मर्तुं शक्यते पूर्वोक्तमहोपकारादपि तस्य महोपकारो भारतीयैः ॥

वैदिक-व्याकरणादिविषयाणां हिन्दीभाषाया मराठीभाषाया अपि ग्रन्थानां प्रकाशनद्वारा सर्वत्र ज्ञानगङ्गायाः प्रवाहं प्रवहन्तो "निर्णयसागरस्य" जनयितारो दिवङ्गताः ॥ तथैव सम्प्रत्येव पूर्वजानां मार्गमेवानुसरन्तः स्वधर्मचारिणी श्रीमती सत्यभामाबाई, मॅनेजर रामभाऊ प्रभृतयो महोदया अपि क्रमेण दिवङ्गतास्तद्वैदिकज्ञानेच्छूनां महद्दुर्भाग्यमेव मन्ये, मन्यन्ते तैः साकं समागमं प्राप्ता अन्येऽपि ॥

अधुनाऽवशिष्टा अपि लक्ष्मीमानुषङ्गिकं फलं मत्वा वैदिकादिग्रन्थमुद्रापणविषयां किञ्चिद् द्रव्यहानिमविगणय्य परम्परया स्वकीयपूर्वजैः प्रवाहितस्य प्रवाहस्य प्रकाशनद्वारा मार्गं मा प्रतिरोधयन्तूत, तस्य प्रकाशनद्वारा रक्षणं "स्वधर्म एव" इति तेऽङ्गीकुर्वन्तु इति प्रार्थये परमेश्वरीं त्रिपुरां पराम् ॥

पुनश्चाहं पितॄन् विद्यागुरून्नमस्कृत्यास्य ग्रन्थसमर्पणावसरे पुनः स्मृत्वा कृतकृत्यं मन्य आत्मानम् इति शिवम् ॥

ग्रन्थसंयोजकः संशोधकश्च—

शास्त्री अमृतलाल त्रिकमजी आचार्य,

(जामनगर-निवासी).

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३६४
बुलन्दशहर (उ०प्र०)

श्रीशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयिनां

नित्य-नैमित्तिककर्मसमुच्चयः ।

(ब्रह्मकर्मसमुच्चयः)

विषयानुक्रमणिका ।

क्रमाङ्काः-	विषयाः-	पत्राणि
१	अथ कर्तुर्मङ्गलाचरणम् ॥	१
२	अथ परिभाषाप्रकरणम् ॥	१
३	अथ प्रातरुत्थानकालोऽनुत्थाने प्रायश्चित्तम् ॥	२
४	अथ प्रातःकाले दर्शनीयादर्शनीयपदार्थनिरूपणम् ॥	३
५	अथ भूमिस्पर्शनम् ॥	४
६	अथ प्रातःस्मरणम् ॥	
	१ अथ पौराणिकं प्रातःस्मरणम् ।	४-६
	२ ,, वैदिकं प्रातःस्मरणम् ।	६
७	अथ मूत्रपुरीषोत्सर्गे कालभेदेन दिक्प्रदर्शनं मौनं क्रमेण च दक्षिणवामकर्णयोर्यज्ञोपवीतधारणं तच्चाकृते प्रायश्चित्तम् ॥	७
८	अथ दन्तधावने ग्राह्यवृक्ष-निषिद्धाहपरिगणनवर्णक्रमानुसारिदन्तधावनकाष्ठाङ्गुलप्रमाणदिङ्नियमदन्तकाष्ठाभावद्वादशगण्डूषविधिवनस्पतिप्रार्थनाभिमन्त्रणादीनां दिग्दर्शनम् ॥	८
९	अथ प्रातःस्नाने गुणः कालः स्नानाभावेऽनर्हत्वं शीतोष्णवारिषु नद्यां स्नाने देवपूजने च विशेषनियमाः ॥	११
१०	अथ गृहे तीर्थे वा सङ्क्षिप्तस्नानविधिः ॥	१२
	१ अथ संवत्सरनामानि । (टिप्पण्याम्)	,,
	२ ,, नक्षत्रनामानि । ,,	१३
	३ ,, विष्कुम्भादियोगनामानि । ,,	,,

क्रमाङ्काः-	विषयाः-		पत्राणि
	४ अथ करणनामानि ।	(टिप्पण्याम्)	१३
	५ ,, राशिनामानि ।	,,	,,
	इति स्नानविधिः ॥		
११	**अथ नद्यादौ नित्यस्नानविधिः ॥**		**१५**
	१ अथ कात्यायनस्नानसूत्रम् ॥	(टिप्पण्याम्)	१६
	२ ,, तीर्थप्रार्थना ।		,,
	३ ,, सङ्कल्पः ।		१७
	४ ,, तीर्थाभिमन्त्रणम् ।		१८
	५ ,, जलावर्तनम् ।		,,
	६ ,, तीर्थतटे जलप्रक्षेपः ।		,,
	७ ,, मृत्तिकास्नानम् ।		१९
	८ ,, गोमयस्नानम् ।		,,
	९ ,, भस्मस्नानम् ।		२०
	१० ,, कुम्भमुद्रया शरीरमार्जने मन्त्राः ।		,,
	११ ,, अपामार्गमार्जनम् ।		२४
	१२ ,, दूर्वामार्जनम् ।		,,
	१३ ,, अघमर्षणम् ।		,,
	१४ ,, स्नानाङ्गं देवतर्पणम् ।		,,
	१५ ,, मनुष्यतर्पणम् ।		२५
	१६ ,, ऋषितर्पणम् ।		,,
	१७ ,, पितृतर्पणम् ।		,,
	१८ ,, यक्ष्मतर्पणम् ।		,,
	इति नद्यादिस्नानविधिः ॥		,,
१२	**अथ हेमाद्रिकृतः स्नानसङ्कल्पः ॥**		**२६**
१३	**अथ दशविधिस्नानानि ॥**		**३४**
	१ अथ भस्मस्नानम् ।		,,
	२ ,, मृत्तिकास्नानम् ।		,,
	३ ,, गोमयस्नानम् ।		,,
	४ ,, पञ्चगव्यस्नानम् ।		,,

क्रमाङ्काः–	विषयाः–	पत्राणि
	५ अथ गोरजःस्नानम् ।	३६
	६ ,, धान्यस्नानम् ।	,,
	७ ,, फलस्नानम् ।	,,
	८ ,, सर्वौषधीस्नानम् ।	,,
	९ ,, कुशोदकस्नानम् ।	,,
	१० ,, हिरण्यस्नानम् ।	,,
	इति दशविधस्नानम् ॥	,,
१४	**अथ प्रातःसन्ध्याप्रयोगः ॥**	**३७**
	१ अथ भस्मधारणम् ।	३८
	२ ,, शिखाबन्धनम् ।	३९
	३ ,, रुद्राक्षमालाधारणम् ।	,,
	४ ,, कुशपवित्रधारणम् ।	४०
	५ ,, आचमनम् ।	४१
	६ ,, विष्ण्वादिनामजपः ।	,,
	७ ,, हृदि पवित्रकरणार्थं न्यासाः ।	४२
	८ ,, भूमिप्रार्थना ।	४३
	९ ,, भूतशुद्धिः ।	,,
	१० ,, भैरवनमस्कारः ।	,,
	११ ,, मार्जनम् ।	,,
	१२ ,, प्राणायामः ।	,,
	१३ ,, प्रातःसन्ध्यासङ्कल्पः ।	४४
	१४ ,, अम्बुप्राशनम् ।	४५
	१५ ,, मार्जनम् ।	४६
	१६ ,, अघमर्षणम् ।	,,
	१७ ,, सूर्यार्घ्यप्रदानम् ।	,,
	१८ ,, प्रायश्चित्तसङ्कल्पः ।	४७
	१९ ,, सूर्योपस्थानम्	,,
	२० ,, गायत्रीमन्त्रजपसङ्कल्पः ।	४८
	२१ ,, गायत्र्यावाहनम् ।	४९
	२२ ,, गायत्र्युपस्थानम् ।	,,

क्रमाङ्काः- विषयाः- पत्राणि
२३ अथ गायत्रीशापविमोचनम् । ४९
२४ ,, गायत्र्यस्त्रोपाहरणं गायत्रीजपः । ,,
२५ ,, गायत्रीस्वरूपम् । ५१
२६ ,, ब्रह्मशापविमोचनम् । (टिप्पण्याम्) ,,
२७ ,, वसिष्ठशापविमोचनम् । ,, ,,
२८ ,, विश्वामित्रशापविमोचनम् । ,, ,,
२९ ,, गायत्रीजपः । ,,
३० ,, ॐकारव्याहृतिसहितगायत्रीमंत्रन्यासाः । ५१
३१ ,, गायत्रीध्यानम् । ५२
३२ ,, गायत्रीमंत्रजपादौ चतुर्विंशतिमुद्राप्रदर्शनम् । ५३
३३ ,, गायत्रीमंत्रः । (टिप्पण्यां क्षत्रियवैश्ययोर्मन्त्रः) ५५
३४ ,, षडङ्गन्यासाः । ५६
३५ ,, जपान्ते मुद्राप्रदर्शनम् । ५७
३६ ,, प्रदक्षिणामन्त्रः । ५८
३७ ,, दिग्देवतानां सन्ध्यायाश्च नमस्कारः । ,,
३८ ,, जपनिवेदनम् । ५९
३९ ,, गायत्र्या विसर्जनम् । ,,
४० ,, गोत्रोच्चारपूर्वकमभिवादनम् । ,,
४१ ,, आचमनम् । ६०
४२ ,, शिखामुक्तिः । ,,
४३ ,, प्रातःसन्ध्याङ्गभूतगायत्रीतर्पणम् । ६१
इति प्रातःसन्ध्याप्रयोगः ॥ ,,

१५ अथ कातीयानां परिशिष्टोक्तः प्रातःसन्ध्याप्रयोगः ॥ ६१
१ अथ भस्माभिमन्त्रणम् । ,,
२ ,, भस्मधारणम् । ६२
३ ,, प्राणायामः । ,,
४ ,, आचमनम् । ,,
५ ,, न्यासाः । ,,
६ ,, शिखाबन्धनम् । ,,

क्रमाङ्काः–		विषयाः–	पत्राणि
	७	अथ आचमनम्।	६२
,,	८	,, स्वपरितः प्रादक्षिण्येन जलप्रक्षेपः।	,,
,,	९	,, सङ्कल्पः।	६३
,,	१०	,, अम्बुप्राशनम्।	,,
,,	११	,, मार्जनम्।	,,
,,	१२	,, अघमर्षणम्।	,,
,,	१३	,, सूर्यार्घ्यः।	,,
,,	१४	,, सूर्योपस्थानम्।	६४
,,	१५	,, गायत्रीजपः।	,,
,,	१६	,, जपनिवेदनम्।	,,
,,		इति कातीयपरिशिष्टोक्तः प्रातःसन्ध्याप्रयोगः॥	,,
१६		**अथ शिवपञ्चायतनपूजनप्रयोगः॥**	
	१	अथ श्रीशिवपञ्चायतनस्थापनप्रकारः।	६५
,,	२	,, शिखाबन्धनम्।	६६
,,	३	,, कुशपवित्रधारणम्।	६७
,,	४	,, त्रिपुण्ड्रधारणम्।	,,
,,	५	,, आचमनम्।	६८
,,	६	,, प्राणायामः।	,,
,,	७	,, शान्तिसूक्तम्।	६९
,,	८	,, देवतानमस्काराः।	७०
,,	९	,, सङ्कल्पः।	७१
,,	१०	,, दिग्रक्षणम्।	७३
,,	११	,, कलशार्चनम्।	७४
,,	१२	,, मार्जनम्।	७६
,,	१३	,, शङ्खपूजनम्।	७७
,,	१४	,, घण्टापूजनम्।	,,
,,	१५	,, दीपपूजनम्।	,,
,,	१६	,, शिवपञ्चायतनध्यानम्।	,,
,,	१७	,, षोडशोपचारैः पूजनम्।	९६

क्रमाङ्काः:-	विषयाः:-	पत्राणि
	१८ अथ मंत्रपुष्पाञ्जलिः ।	९६
	१९ ,, प्रदक्षिणा ।	,,
	२० ,, मूलमंत्रजपः ।	,,
	२१ ,, जपनिवेदनम् ।	,,
	२२ ,, विशेषार्घः ।	,,
	२३ ,, स्तुतिपाठः ।	,,
	२४ ,, पूजानिवेदनम् ।	,,
	२५ ,, शङ्खभ्रामणम् ।	,,
	२६ ,, देवनिर्माल्यग्रहणम् ।	,,
	२७ ,, विष्णुस्मरणम् ।	,,
	२८ ,, श्रीशङ्कराचार्यविरचितं मानसपूजास्तोत्रम् । टिप्पण्याम् ।	,,
	इति शिवपञ्चायतनपूजनप्रयोगः समाप्तः ॥	,,
१७	अथ मध्याह्नसन्ध्याप्रयोगः ॥	९७
	१ अथ भस्मधारणादि सर्वं प्रातःसन्ध्यावत् ।	,,
	२ ,, सङ्कल्पः ।	,,
	३ ,, आचमनम् ।	९८
	४ ,, सूर्यार्घः ।	,,
	५ ,, गायत्रीमन्त्रजपविधिः ।	,,
	६ ,, सूर्योपस्थानम् ।	,,
	७ ,, गायत्र्युपस्थानादि० नमस्कारान्तं पूर्ववत् ।	९९
	८ ,, जपनिवेदनम् ।	,,
	९ ,, गायत्रीविसर्जनादि० पूर्ववत् ।	,,
	१० अर्पणम् ।	,,
	इति मध्याह्नसन्ध्याप्रयोगः ॥	,,
१८	अथ सूर्योपस्थानम् ॥	९९
	१ अथ सूर्योपस्थानमंत्राः ।	,,
	२ ,, विभ्राड् ।	,,
	३ ,, पुरुषसूक्तम् ।	,,
	४ ,, यज्जाग्रतः ।	,,

क्रमाङ्काः- विषयाः- पत्राणि

५ अथ मण्डलब्राह्मणम् । १०४
६ ,, निवेदनम् । ,,
इति सूर्योपस्थानम् ॥ ,,
१९ अथ ब्रह्मयज्ञप्रयोगः ॥ ,,
१ अथ आचमनम् । ,,
२ ,, प्राणायामः । ,,
३ ,, सङ्कल्पः । १०५
४ ,, द्वितीयसङ्कल्पः । ,,
५ ,, न्यासाः । ,,
६ ,, ब्रह्मयज्ञारम्भः । ,,
७ ,, अर्पणम् । १०८
इति ब्रह्मयज्ञप्रयोगः ॥
२० अथ देवर्षिमनुष्यपितृतर्पणप्रयोगः ॥ १०८
१ अथ आचमनम् । ,,
२ ,, प्राणायामः । ,,
३ ,, कुशपवित्रधारणम् । १०९
४ ,, सङ्कल्पः । ,,
५ ,, विश्वेदेवावाहनम् । ११०
६ ,, देवतर्पणम् । १११
७ ,, मनुष्यतर्पणम् । ११७
८ ,, पितृतर्पणम् । ११८
९ ,, षड्दलेषु ब्रह्मादीनां पूजनम् । ११९
१० ,, सूर्योपस्थानम् । ,,
११ ,, दिग्देवतानां नमस्काराः । ,,
१२ ,, मुखविमार्जनम् । ,,
१३ ,, निवेदनम् । ,,
इति देवर्षिमनुष्यपितृतर्पणम् ॥ ,,
२१ अथ वैश्वदेवप्रयोगः ॥ १२०
१ अथ आचमनं, प्राणायामः कुशपवित्रधारणम् ॥ ,,

क्रमाङ्काः-	विषयाः-	पत्राणि
	२ अथ सङ्कल्पः ।	१२०
	३ ,, पञ्चभूसंस्कारपूर्वमग्निस्थापनम् ।	,,
	४ ,, अग्निध्यानम् ।	१२१
	५ ,, होमः ।	,,
	६ ,, भूतादयो यज्ञाः । मण्डले बलिदानम् ।	१२२-१२३
	७ ,, गृहदेवतानां नैवेद्यम् ।	,,
	८ ,, गोग्रासः ।	,,
	९ ,, वायसबलिः ।	,,
	१० ,, श्वभ्यो बलिः ।	,,
	११ ,, देवादिभ्यो बलिः ।	,,
	१२ ,, भस्मधारणम् ।	,,
	१३ ,, गन्धेन भाले त्रिपुण्ड्रधारणम् ।	,,
	१४ ,, अग्निविसर्जनम् ।	,,
	१५ ,, अर्पणम् ।	,,
	इति वैश्वदेवः ॥	१२७
२२	**अथ गृहदेवतानां नैवेद्यार्पणम् ॥**	१२७-१२८
	१ अथ नैवेद्यस्थापनम् ।	,,
	२ ,, नैवेद्यप्रोक्षणम् ।	,,
	३ ,, पञ्च प्राणाहुतयः ।	,,
	४ ,, अर्पणम् ।	
	इति गृहदेवतानैवेद्यार्पणम् ॥	
२३	**अथ संक्षिप्तभोजनविधिः ॥**	१२८
	१ अथ भस्मना जलेन वा चतुरस्रं मण्डलं कार्यम् ॥	,,
	२ ,, पङ्क्तिवारणम् ।	,,
	३ ,, अन्नस्तुतिः ।	,,
	४ ,, अन्नप्रोक्षणम् ।	,,
	५ ,, भूमौ बलिदानम् ।	,,
	६ ,, पञ्च प्राणाहुतयः ।	१२९
	७ ,, शिखामोचनम् ।	,,

क्रमाङ्काः—	विषयाः—	पत्राणि
	८ अथ उदरालम्भनम्।	१२९
	९ ,, ताम्बूलभक्षणम्।	,,
	इति संक्षिप्तभोजनविधिः॥	
२४	**अथ सायंसन्ध्याप्रयोगः॥**	१३०
	१ अथ भस्मधारणादि० सर्वं प्रातःसन्ध्यावत्।	,,
	२ ,, सङ्कल्पः।	,,
	३ ,, आचमनम्।	,,
	४ ,, मार्जनम्।	,,
	५ ,, अघमर्षणम्।	,,
	६ ,, सूर्यार्घ्यः।	,,
	७ ,, सरस्वत्या आवाहनम्।	१३१
	८ ,, गायत्र्युपस्थानादि० नमस्कारान्तं पूर्ववत्।	,,
	९ ,, जपनिवेदनम्।	,,
	१० ,, अभिवादनादिदिग्देवतानमस्कारान्तं पूर्ववत्।	१३२
	११ ,, अर्पणम्।	,,
	इति सायंसन्ध्याप्रयोगः॥	,,
२५	**अथ सायाह्ने गृहदेवानां पञ्चोपचारैः पूजनम्॥**	१३२
२६	**अथ रात्रौ शयनात्प्रागिष्टदेवतास्मरणपूर्वकं रात्रिसूक्तपठनम्॥**	१३३
	१ अथ ब्रह्मदेवकृतं रात्रिसूक्तम्॥ (टिप्पण्याम्)	,,
	२ ,, वैदिकं रात्रिसूक्तम्।	
	३ ,, शयने स्मरणयोग्यदेवताः।	१३४
२७	**अथ रुद्राष्टाध्यायीप्रारम्भः॥**	१३५
	१ अथ रुद्राभिषेकप्रकाराः। (टिप्पण्याम्)	,,
	२ ,, रूपकाख्यो रुद्रप्रकारः। ,,	,,
	३ ,, अथैकादशिनी रुद्रः। (षडङ्गपक्षे) ,, पञ्चाङ्गपक्षे चमकपक्षे च।	,,
	४ ,, मुख्ये पञ्चाङ्गपक्षे। (टिप्पण्याम्)	,,
	५ ,, चमकानुवाकसमन्वितो रुद्रः। ,,	,,

क्रमाङ्काः— विषयाः— पत्राणि

६ अथ षडङ्गन्यासाः। १३५
७ ,, रुद्राष्टाध्याय्यां प्रथमोऽध्यायः। १३९
८ ,, शिवसङ्कल्पसूक्तम्। १४०
९ ,, द्वितीयोऽध्यायः। (पुरुषसूक्तम्) १४१-१४२
१० ,, उत्तरनारायणसूक्तम्। १४२-१४३
११ ,, तृतीयोऽध्यायः (अप्रतिरथसूक्तम्) १४३-१४४
१२ ,, चतुर्थोऽध्यायः। (अथ मैत्रसूक्तम्) १४५-१४६
१३ ,, पञ्चमोऽध्यायः। (शतरुद्रियम्) १४६-१५३
१४ ,, षष्ठोऽध्यायः। (महच्छिरः) १५४- ,,
१५ ,, सप्तमोऽध्यायः। (रुद्रजटा) १५५-१५६
१६ ,, अष्टमोऽध्यायः। (अथ चमकानुवाकः) १५६-१६०
१७ ,, शान्त्यध्यायः। १६१-१६३
१८ ,, स्वस्तिप्रार्थनामन्त्राध्यायः।
इति रुद्राष्टाध्यायी समाप्ता॥ १६३-१६४
२८ अथ वेदोक्तनवग्रहमन्त्रन्यासा मन्त्राश्च॥ १६५-१६७
१ अथ सूर्यमन्त्रस्य न्यासाः। ,, ,,
२ ,, चन्द्रमन्त्रस्य न्यासाः। १६७-१७०
३ ,, भौममंत्रस्य न्यासाः। १७०-१७२
४ ,, बुधमंत्रस्य न्यासाः। १७३-१७५
५ ,, बृहस्पतिमंत्रस्य न्यासाः। १७५-१७७
६ ,, शुक्रमन्त्रस्य जपविधिः। १७७-१८०
७ ,, शनिमंत्रस्य जपविधिः। १८०-१८२
८ ,, राहुमंत्रस्य न्यासाः। १८२-१८४
९ ,, केतुमंत्रस्य जपविधिः। १८४-१८६
१० ,, पुराणोक्तं नवग्रहस्तोत्रम्। १८६-१८७
११ ,, श्रीमहामृत्युञ्जय (मृतसंजीवन) जपविधिः। १८७-१८९
१२ ,, श्रेयोदानम्। १८९-१९१
१३ ,, गोपालसन्तानमंत्रजपविधिः। १९१-१९२
इति मन्त्रन्यासाः॥ ,,

क्रमाङ्काः- विषयाः- पत्राणि
२९ अथ महिम्नस्तोत्रम् ॥ १९३-१९८
१ अथ पुराणोक्तं पुरुषसूक्तम् । १९९-२००
२ ,, गणेशाथर्वशीर्षम् । २०१-२०३
३ ,, नारायणाथर्वशीर्षम् । २०३-२०५
४ ,, शिवाथर्वशीर्षम् । २०५-२०६
५ ,, सूर्याथर्वशीर्षम् । २०६-२०८
६ ,, देव्यथर्वशीर्षम् । २०८-१११
७ ,, श्रीसूक्तम् ॥ २११-२१३
८ ,, जनन्यपराधक्षमायाचनास्तोत्रम् । २१४
इति स्तोत्राणि ॥

अथ नैमित्तिको द्वितीयो भागः ॥

३० अथ श्रावणीप्रयोगः ॥ २१५
१ अथ आचमनं प्राणायामः । ,, ,,
२ ,, सङ्कल्पः । ,, २१६
३ ,, गुरोरभिवादनम् । २१६
४ तीर्थाभिमन्त्रणादिनद्यादावुक्तो नित्यस्नानप्रयोगः ।
१५ पृष्ठे हेमाद्रिसङ्कल्पः २६ पृष्ठे सूर्योपस्थानं १०४,
ब्रह्मयज्ञप्रयोगः तर्पणप्रयोगश्च १०८ द्रष्टव्यः ॥
५ ,, अरुन्धतीसहितसप्तर्षिपूजनप्रयोगः । २१७-२२७
३१ अथ नूतनयज्ञोपवीतधारणप्रयोगः ॥ २२७-२२८
१ अथ आचमनं प्राणायामः । ,, ,,
२ ,, सङ्कल्पः । ,, ,,
३ ,, सूत्रत्रिगुणीकरणम् । ,, ,,
४ ,, यज्ञोपवीतप्रक्षालनम् । ,, ,,
५ ,, गायत्र्या अभिमन्त्रणम् । ,, ,,
६ ,, तन्तुदेवतानामावाहनम् । ,, ,,
७ ,, ग्रन्थिदेवतानामावाहनम् । २२८-२२९
इति नूतनयज्ञोपवीतधारणम् ॥ ,, ,,

क्रमाङ्काः– विषयाः– पत्राणि
८ अथ उत्सर्गतर्पणम् । २३०-२३१
९ ,, वंशानां ब्रुवणम् । २३१-२४६
३२ अथ ऋषिश्राद्धम् ॥ २४६-२४७
इति श्रावणीपद्धतिः ॥ ,,
३३ अथ पारस्करगृह्यसूत्रे अध्यायोपाकर्मसूत्रम् ॥ २४७-२४८
३४ अथ उपाकर्मप्रयोगः ॥ २४८
१ अथ आचमनं प्राणायामः । ,,
२ ,, सङ्कल्पः । २४९
३ ,, अग्निस्थापनम् । ,,
४ ,, ऋषिच्छन्ददेवतास्मरणम् । ,,
५ ,, देवताभिध्यानम् । ,,
६ ,, आघारावाज्यभागहोमः । २५०
७ ,, ऋग्यजुर्वेदसामाथर्वाहुतयः । २५१
८ ,, धानाहोमः । ,,
९ ,, धानाभक्षणम् । २५२
१० ,, दधिभक्षणम् । ,,
११ ,, आकर्षकफलहोमः । ,,
१२ ,, भूराद्या नवाहुतयः । २५३-२५४
१३ ,, शिष्याणां सावित्र्यादीनामुपदेशः । ,,
इत्युपाकर्मप्रयोगः ॥ ,,
३५ अथ नवरात्रघटस्थापनविधिः ॥ २५५
१ अथ आचमनं प्राणायामः । ,,
२ ,, प्रधानसङ्कल्पः । २५६
३ ,, द्वितीयसङ्कल्पः– गणपतिपूजनाद्याचार्यवरणान्तं कार्यम् । ,,
४ ,, कलशस्थापनप्रयोगः । २६०
५ ,, कलशे दुर्गास्थापनम् । २६१
६ ,, आवाहनादिमुद्राप्रदर्शनम् । ,,

क्रमाङ्काः–		विषयाः–	पत्राणि
	७	अथ षोडशोपचारैः पूजनम् ।	२६१
	८	,, नवरात्रनियमग्रहणम् ।	,,
	९	,, नवरात्रनियमविसर्जनम् ।	२६२
	१०	,, घटविसर्जनम् ।	,,
	११	,, अभिषेकः ।	,,
		इति नवरात्रघटस्थापनम् ।	,,
३६		**अथ वास्तुमण्डलदेवतापूजनप्रयोगः ॥**	२६३
		(वैदिकैः पौराणिकैश्च मन्त्रैः समन्वितं ब्रह्मादिवास्तुस्थापनम्)	
	१	अथ आचमनं प्राणायामः ।	,,
	२	,, प्रधानसङ्कल्पः ।	,,
	३	,, आग्नेयादिविदिक्षु शंकुरोपणं बलिदानञ्च ।	२६४
	४	,, नवरेखाकरणं पूजनम् । (गृहवास्तौ दश)	,,
	५	,, चतुःषष्टिकोष्टात्मके वास्तुमण्डले देवतास्थापनम् ।	२६६
	६	,, एकाशीतिपदे गृहवास्तावपि ब्रह्मादीनामावाहनम् । (टिप्पण्याम्)	२६६-२७५
	७	,, वास्त्वादिमूर्तीनामग्न्युत्तारणम् ।	२८८
	८	,, प्राणप्रतिष्ठाप्रयोगः ।	,,
	९	,, षोडशोपचारैः पूजनम् ।	,,
	१०	,, वास्तुदेवानां बलिदानम् ।	२९०-२९१
		इति वास्तुपूजनम् ॥	,,
३७		**अथ चतुःषष्टियोगिनीनां स्थापनम् ॥** (रुद्रकल्पद्रुमोक्तक्रमेण)	२९२-२९३
३८		**अथैकपञ्चाशत्क्षेत्रपालदेवतापूजनप्रयोगः ॥**	२९४-३०८
		(रुद्रकल्पद्रुमोक्तः)	३०९-३१९
३९		**अथ जलयात्राप्रयोगः ॥** (रुद्रकल्पद्रुमानुसारी)	३२०
	१	अथ कलशस्थापनार्थं कृते मण्डले भूमिपूजनम् ।	३२०-३२२
	२	,, कलशस्थापनप्रयोगः ।	३२२-३२५
	३	,, जल-जीव-स्थलमातृकाणां सागराणाञ्च स्थापन-पूजनप्रयोगः ।	३२६-३२८

क्रमाङ्काः— विषयाः— पत्राणि

४ अथ सक्षेत्रपालेन्द्रादीनां बलिदानम् । ३२९-३३०
५ ,, (एकतन्त्रेणेन्द्रादीनां बलिदानम्) (टिप्पण्याम्) ,,
६ ,, जलाशयस्थिते जले वरुणावाहनं पूजनञ्च । ३३०-३३१
७ ,, जलाशयस्थिते वरुणे घृताहुतयः । ३३१-३३२
८ ,, जलमातृकाद्यावाहितदेवतानां विसर्जनम् । ३३२-३३३
९ ,, कलशानामुत्थापनम् । ,,
१० ,, अर्धमार्गे बलिदानम् । ३३४-३३५
११ ,, सपत्नीकस्य यजमानस्य नीराजनम् । ,,
१२ ,, यजमानस्याभिषेकः । ,,
इति जलयात्राप्रयोगः ॥

४० अथ कुण्डस्थदेवतापूजनपूर्वकाग्निस्थापनप्रयोगः ॥ ३३६-३३६
१ अथ कुण्डसम्मार्जनम् । ,,
२ ,, कुण्डावाहनम् । ,,
३ ,, कुण्डमध्ये विश्वकर्मपूजनम् । ,,
४ ,, मेखलादेवतावाहनम् । ३३७-३३७
५ ,, योन्यावाहनम् । ,,
६ ,, कण्ठदेवतावाहनम् । ३३८
७ ,, नाभ्यावाहनम् । ३३९
८ ,, कुण्डमध्ये नैर्ऋत्यकोणे वास्तुपुरुषावाहनम् । ,, ,,
९ ,, आवाहितानां देवतानां पूजनम् । ,, ३४०
१० ,, बलिदानम् । ,,
इति कुण्डस्थदेवतावाहनपूजनम् ॥ ,,

४१ अथ कुण्डेऽग्निस्थापनम् ॥ ३४०
१ अथ कुण्डे पञ्चभूसंस्काराः । ,,
२ ,, अग्निस्थापनम् । ,,
३ ,, अग्नावावाहनादिमुद्राप्रदर्शनम् । ३४२
४ ,, अग्निपूजनम् । ३४३-३४४

क्रमाङ्काः— विषयाः— पत्राणि
४२ अथ कुशकण्डिकाप्रयोगः॥ ३४४-३४६
१ अथ आघारावाज्यभागहोमः। ३४६-३४७
२ ,, यजमानस्य द्रव्यत्यागसङ्कल्पः। ,,
३ ,, अग्निपूजनम्। ,,
४ ,, वराहुतिः। ३४७-३४७
इति कुशकण्डिकाप्रयोगः॥
४३ अथ नवग्रहादिस्थापनपूजनप्रयोगः॥
१ अथ नवग्रहाणां स्थापनम्। ३४८-३५०
२ ,, अधिदेवतानां स्थापनम्। ३५०-३५२
३ ,, प्रत्यधिदेवतानां स्थापनम्। ३५२-३५३
४ ,, पञ्चलोकपालदेवतानां स्थापनम्। ३५४-३५५
५ ,, वास्तोष्पतेः क्षेत्राधिपतेर्दशदिक्पालानाञ्च स्थापनम्। ३५५-३५८
इति नवग्रहदेवतास्थापनम्॥
४४ अथ हरिहरात्मके त्रयश्चत्वारिंशद्रेखात्मके द्वादशलिङ्गतोभद्रे सर्वतोभद्रदेवतास्थापनपूर्वकद्वादशलिङ्गतोभद्रदेवतास्थापनप्रतिष्ठापूजनप्रयोगः॥ ३५८- ,,
१ अथ सर्वतोभद्रदेवतास्थापनम्। ३५९-३६५
२ ,, मण्डलबाह्ये श्वेतपरिधौ उत्तरादिक्रमेणाऽऽयुधानि। ३६५-३६६
३ ,, मण्डलबाह्ये रक्तपरिधौ उत्तरादिक्रमेण गौतमादीन्। ३६६-३६७
४ ,, मण्डलबाह्ये कृष्णपरिधौ पूर्वादिक्रमेण ऐन्द्यादीन्। ३६७-३६८
इति सर्वतोभद्रदेवतास्थापनम्।
४५ अथ द्वादशलिङ्गतोभद्रदेवतावाहनम्॥ ३६८
१ अथ पूर्वस्यां क्रमेणेशानतः त्रिषु लिङ्गेषु। ,,
२ ,, दक्षिणस्यामाग्नेयकोणतः त्रिषु लिङ्गेषु। ३६८-३६९

क्रमाङ्काः— विषयाः— पत्राणि

३ अथ पश्चिमस्यां नैर्ऋत्यकोणतः क्रमेण त्रिषु लिङ्गेषु । ३६९-३७०
४ ,, उत्तरस्यां वायव्यकोणतः क्रमेण त्रिषु लिङ्गेषु । ,,
५ ,, पूर्वस्याम् ईशानतः क्रमेण चतसृषु वापीषु । ३७०-३७१
६ ,, दक्षिणस्यामाग्नेयतः क्रमेण चतसृषु वापीषु । ३७०-३७१
७ ,, पश्चिमस्यां नैर्ऋत्यतः क्रमेण चतसृषु वापीषु । ३७१-३७२
८ ,, उत्तरस्यां वायव्यतः क्रमेण चतसृषु वापीषु ।
९ ,, पूर्वस्यां दिशि द्वयोर्भद्रयोः क्रमेण । ,,
१० ,, दक्षिणस्यां दिशि द्वयोर्भद्रयोः क्रमेण । ,,
११ ,, पश्चिमस्यां दिशि द्वयोर्भद्रयोः क्रमेण । ३७३
१२ ,, उत्तरस्यां दिशि द्वयोर्भद्रयोः क्रमेण । ,,
१३ ,, ईशानकोणे द्वे वल्लीदेवते । ,,
१४ ,, आग्नेयकोणे द्वे वल्लीदेवते । ,,
१५ ,, नैर्ऋत्यकोणे द्वे वल्लीदेवते । ३७४
१६ ,, वायव्यकोणे द्वे वल्लीदेवते । ,,
१७ ,, ईशानकोणे सप्त शृङ्खलाः । ३७४-३७५
१८ ,, आग्नेयकोणे सप्त शृङ्खलाः । ,,
१९ ,, नैर्ऋत्यकोणे सप्त शृङ्खलाः । ३७५-३७६
२० ,, वायव्यकोणे सप्त शृङ्खलाः । ३७७
२१ ,, चतुर्विदिक्षु खण्डेन्दौ ईशानतो वायव्यपर्यन्तम् । ,,
२२ ,, बहिः सत्वपरिधौ पूर्वतः प्रादक्षिण्येन इन्द्रादीन् । ३७७-३७८
२३ ,, बहिः रजःपरिधौ पूर्वादिक्रमेणायुधानि । ३७८-३७९
२४ ,, बहिः तमःपरिधौ पूर्वादिक्रमेणाष्टर्षीन् । ,,
२५ ,, षोडशोपचारैः पूजनम् । ,,

इति द्वादशलिङ्गतोभद्रदेवताः ॥

४६ अथ वास्तुमण्डलदेवतानां होमः ॥ ३८०-३८१
४७ अथ महाकालीमहालक्ष्मीमहासरस्वतीसमन्वित-गजाननादिचतुःषष्टियोगिनीनां होमः ॥ ३८१-३८२
४८ अथ एकपञ्चाशत्क्षेत्रपालदेवतानां होमः ॥ ३८२-३८३
४९ अथ सर्वतोभद्रमण्डलदेवतानां होमः ॥ ३८३-३८४

क्रमाङ्काः—	विषयाः—	पत्राणि
५०	**अथ द्वादशलिङ्गतोभद्रदेवतानां होमः ॥**	३८४-३८६
५१	**अथ आचारात्फलहोमः ॥**	३८६-३८८
५२	**अथ स्थापितदेवतानामुत्तरपूजनम् ॥**	३८९-३९१
५३	**अथ ब्रह्मणः प्रायश्चित्ताहुतिः ॥**	३९२-३९३
५४	**अथ सर्वप्रायश्चित्ताहुतयः ॥**	३९३-३९४
५५	**अथ दिक्पालादिस्थापितदेवतानां बलिदानम् ॥**	३९४-४०४
५६	**अथ वसोर्धारासमन्वितपूर्णाहुतिहोमः ॥**	४०६-४०८
	१ अथ वाजश्चम० इति चमकानुवाकः ।	४०९-४०९
	२ ,, अग्निसूक्तम् ।	४१०-४११
	३ ,, विष्णुसूक्तम् ।	४११
	४ ,, नमस्ते० इति शतरुद्राध्यायः ।	४११-४१३
	५ ,, इन्दुसूक्तम् ।	४१३-४१३
	६ ,, भस्मधारणम् ।	४१४
	७ ,, ब्रह्मणे पूर्णपात्रदानम् ।	,, ,,
	८ ,, ब्राह्मणभोजनसङ्कल्पः ।	,, ,,
५७	**अथ श्रेयःसम्पादनादिकम् ॥**	४१५
	१ अथ दक्षिणादानम् ।	४१५
	२ ,, दानानि। सुवर्णदानं। भूमिदानं। तिलदानम्।	,, ,,
५८	**अथ यज्ञान्तो महाभिषेकः ॥**	४१७
	१ अथ अभिषेकमन्त्राः ।	४१८
	२ ,, वैदिकाः ।	४१९-४२०
	३ ,, पौराणिका मन्त्राः ।	४२१-४२२
५९	**अथ अवभृथस्नानप्रयोगः ॥**	४२४
	१ अथ अर्धपथे बलिदानम् ।	,, ,,
	२ ,, तीर्थभूमिप्रोक्षणम् ।	,, ,,
	३ ,, आचमनं प्राणायामः ।	,, ,,
	४ ,, सङ्कल्पः ।	,, ,,

क्रमाङ्काः-	विषयाः-	पत्राणि
५	अथ गणपतिपूजनम् ।	४२४
६	,, पुण्याहवाचनार्थं कलशस्थापनम् ।	,, ,,
७	,, कलशे मत्स्यादिदेवतावाहनम् ।	४२५-
८	,, तीर्थे वरुणपूजनम् ।	,, ,,
९	,, तीर्थजले घृतेन द्वादशाहुतयः ।	,, ,,
१०	,, यन्त्राधिष्ठितदेवतापूजनम् ।	,, ,,
११	,, तीर्थे प्रधानकलशजलं प्रक्षेपः ।	,, ,,
१२	,, तीर्थे भस्मप्रक्षेपः ।	४२६
१३	,, तीर्थे स्नानम् । स्नानमन्त्रः ।	,,
१४	,, नूतनवस्त्राणि धृत्वा मण्डपे गमनम् ।	,,
	इति अवभृथस्नानविधिः ॥	,,
६०	अथ घृतपात्रदानादिकम् ॥	४२६
१	अथ आज्ये मुखावलोकनम् ।	,,
२	,, सङ्कल्पो दानञ्च ।	,,
६१	अथ देवताविसर्जनं पीठदानञ्च ॥	४२८
१	अथ स्थापितदेवतानां विसर्जनम् ।	,,
२	,, अग्निविसर्जनम् ।	,,
३	,, आचार्याय यज्ञमण्डपादिदानम् ।	,,
४	,, कर्मणः सम्पूर्णतावाचनम् ।	४२९
६२	अथ प्रैषात्मकं पुण्याहवाचनम् ॥	४२९
१	अथ कलशस्थापनम् ।	४३०
२	,, पुण्याहवाचनम् ।	,,
६३	अथ कर्मान्ते श्रीमहाविष्णोः स्मरणम् ॥	,,
	अथ परिशिष्टम् ॥	
१	अथ श्रीभगवत्स्तवनम् । श्री अमृतलालशास्त्रिविरचितम् ।	४३१
२	,, पशुपतिक्षमायाचनास्तोत्रम् । ,,	४३२

इति नित्य-नैमित्तिककर्मसमुच्चयानुक्रमणिका समाप्ता ॥

अधोनिर्दिष्टा ग्रन्था अमृतलालशास्त्रिणा सङ्गृहीताः संशोधिताश्च ॥

एतेषां ग्रन्थानां प्रकाशनाधिकारो निर्णयसागरमुद्रणालयाय प्रदत्तः ।

श्रीशुक्लयजुर्वेदसंहिता ।

वेदपारायणविध्यनुवाकसूत्राध्यायाष्टविकृतियाज्ञवल्क्यशिक्षाप्रतिज्ञासूत्रसर्वानुक्रमसूत्रपारस्करगृह्यसूत्रादिसमन्विता ।

इयं याज्ञवल्क्यशिक्षानुसारेण यजुःप्रातिशाख्यानुसारेण च तत्र तत्र "अमृतवर्षिण्या टिप्पण्या" समलंकृत्य द्वित्वादिकानां संशोधनं कृत्वा मुद्रापिता । अस्या अद्यावधि न केनाप्येतादृशं संशोधनं टिप्पण्या समन्वितं प्रकाशनं कृतम् ।

मूल्यम् रू. १०-०-०

अथ सर्वसामान्यो देवपूजनप्रयोगः । (वैदिकः पौराणिकश्च)

अयं शान्तिसूक्तत आरभ्य पूजानिवेदनान्तो वैदिकैर्मन्त्रैः पौराणिकैश्च युतो वर्तते । तत्र तत्र "अमृतवर्षिण्या टिप्पण्या"च विभूषितः । अनेनैवैकेन ग्रन्थेन द्विजानां द्विजेतराणाञ्च गृहे पूजा कर्तुं शक्या । मूल्यम् रू. ०-८-०

अथ श्रीसत्यनारायणकथा (गुर्जरभाषानुवादसहिता) ।

इयं तत्र तत्र सम्बन्धप्रदर्शकैर्नवीनैः श्लोकैरुपबृंहिता विशुद्धया गुर्जरभाषया सत्यनारायणस्यार्चायः सर्वैः श्लोकैर्वैदिकैर्मन्त्रैश्च समन्विता वर्तते ।

मूल्यम् रू. १-१२-०

अथ दीपोत्सवीपूजनप्रयोगः । (श्रीलक्ष्मीपूजनप्रयोगः)

प्रतिवर्षे सर्वैर्व्यापारिभिः आश्विनस्य कृष्णपक्षे अमावास्यायां श्रीमहाकालीमहालक्ष्मीमहासरस्वतीनां चित्रलेखिन्याश्च पूजनं क्रियते । अयं प्रयोगो वैदिकैर्मन्त्रैर्नवीनैः पौराणिकैः श्लोकैः समुज्ज्वलितः । अपूर्वप्रकाशनमस्य द्रष्टव्यमेव ।

मूल्यम् रू. १-०-०

अथ स्मार्तकर्माङ्गगणपतिपूजनादिमण्डपप्रवेशान्तकर्मप्रयोगः ।

कर्मकाण्डकर्तॄणां श्रीशुक्लयजुःशाखिनां ब्राह्मणानामुपयोगार्थे पौराणिको वैदिकश्च नातिदीर्घो नातिह्रस्वः "अमृतवर्षिणीटिप्पणीसहितः" सर्वस्मार्तयागानां विष्णुयागादीनां प्रधानसङ्कल्पेन संयुक्तः प्रकाशितः । सर्वत्र यागारम्भे मण्डपाद्बहिरिदं मण्डपप्रवेशान्तं कर्म निर्वर्त्यते । मूल्यम् रू. २-०-०

अथ और्ध्वदैहिककर्मपद्धतिः। (आसन्नमरणप्रायश्चित्तत आरभ्य श्रवणीकर्मपर्यन्ता परिशिष्टेन युक्ता)

अस्मिन्विषयेऽद्यावधि प्राचीना अर्वाचीना अनेके ग्रन्थाः प्रकाशिता अप्रकाशिताश्च वर्तन्ते, अपि तु सरलाः संशुद्धाः केचन तु व्याकरणादिदोषरहिताः प्रायो दुर्लभा एवेति कथने न क्षतिः। इयं पद्धतिः विश्वनाथेन विद्वद्वरेण विरचितायाः श्रीविश्वनाथीनाम्न्याः प्रसिद्धायाश्छायां समाश्रित्य सर्वत्र नवीनमेव स्वरूपं दत्त्वा मूलमनुसृत्य शोधितवर्धिता कृत्वा प्रकाशिता।

मूल्यम् रु. ०-०-०

अथ पुराणोक्तविवाहपद्धतिः।

वेदानधिकारिणां विवाहविधिं कर्तुं वैदिकविवाहविधेः सूत्राण्यालोक्य गीर्वाणभाषायां तत्तत्सूत्राणामनुवादं विधाय सरलैस्तत्तद्भाववाहिभिः श्लोकैः समलंकृत्यापूर्वप्रकाशना पद्धतिः प्रकाशिता। मूल्यम् रु. ०-०-०

अथ वैदिकविवाहकर्मपद्धतिः।

त्रैवर्णिकानां मधुपर्कत आरभ्य चतुर्थीकर्मपर्यन्तकर्मणां प्रदर्शिकेयं विशुद्धा सरला पद्धतिः। लाजाहोमेऽग्निपरिक्रमणे च वरवध्वोर्मध्ये कस्य कर्तृत्वम्। अग्निपरिक्रमणे चोभयोर्मध्ये कस्याग्रे गमनम्, इत्यादिविषये अमृतवर्षिणीटिप्पण्यां प्रतिपादितम्। सप्तपद्याः श्लोका अपि मूलसूत्रार्थानुसारिणो नवीना एव रचिताः। परिशिष्टे-बृहस्पतिशान्तिः, कन्यामातृरजोदोषे श्रीशान्तिः, कन्यायाः कुम्भविवाहः, कन्याया अपि विवाहे वितते रजोदोषेऽप्यावश्यको होमः, अर्कविवाहः, परिणेतुर्वृषलीत्वदोषपरिहारार्थं कूष्माण्डीहोमः, वैधव्यहरो विष्णुप्रतिमादानप्रयोगः, वाग्दानविधिः, कर्मप्रतिबन्धकनिर्णयश्चोक्तः। मूल्यम् रु. ०-०-०

अथ जातकर्मादिसमावर्तनसंस्कारान्त उपनयनसंस्कारप्रयोगः।

अयं प्रयोगः तत्तत्संस्काराणां स्वस्वकालाकरणजनितप्रत्यवायपरिहारार्थम् अनादिष्टप्रायश्चित्तहोमकर्मणा सहितः। अस्मिन् तत्तत्संस्काराणामेकतंत्रेण सत्वेऽपि पृथक् पृथक् स्वसमयेऽपि तत्तत्संस्काराः कर्तुं शक्यन्त एव। तत्र तत्र शास्त्रार्थप्रदर्शिका अमृतवर्षिणी टिप्पणी प्रदर्शिता। मूल्यम् रु. ०-०-०

श्रीः ॥

श्रीशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयिनां

नित्य-नैमित्तिककर्मसमुच्चयः।

(ब्रह्मकर्मसमुच्चयः)

(अमृतवर्षिणीटिप्पणीसमन्वितः)

संयोजकः—**शास्त्री अमृतलाल त्रिकमजी आचार्य.**

(जामनगरनिवासी)

अध्यापकः—श्रीमम्मादेवीसंस्कृतवैदिकपाठशाळा—मुंबई.

तत्र नित्यकर्मणः प्रथमो भागः ।

मङ्गलाचरणम्—प्रणौमि देवं गणनायकं तं विघ्नेश्वरं विघ्नहरं गणेशम् । देवीमुमां देवमुमापतिञ्च श्रीशारदां शारदमेघवर्णाम् ॥ १ ॥ गुरुं नृसिंहं पितरं त्रिविक्रमं देवीं मयाम्बां कुलदेवताञ्च । विद्यागुरून्व्याकरणादिशास्त्रप्रबोधकान्तान्प्रणमामि नित्यम् ॥ २ ॥ आलोक्यान्यान्यशास्त्राणि यथामति यथाश्रुतम् । ग्रन्थेभ्यस्तेभ्य उद्धृत्य विविधैर्विषयैर्युतम् ॥३॥ माध्यन्दिनीयशाखानां द्विजानां कर्म दर्शकम्। कुर्वेऽहं विदुषां प्रीत्यै ब्रह्मकर्मसमुच्चयम् ॥४॥

अथ परिभाषाप्रकरणम् ।

(१) अथ कर्मकाले कस्यां दिशि मुखं कृत्वा कर्म कर्तव्यम् ॥

कर्तुर्दिङ्नियमः ॥ यत्र दिङ्नियमो न स्याज्जपहोमादिकर्मसु। तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री[1] सौम्या[2]ऽपराजिता[3] ॥

---

१ ऐन्द्री-पूर्वा ।   २ सौम्या-उदीची ।   ३ अपराजिता ऐशानी ।

यत्रोपदिश्यते कर्म कर्तुरङ्गं न तूच्यते। दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ॥ इति कर्मप्रदीपे ॥ तथैव-तिथितत्त्वे गौतमः—रात्रावुदङ्मुखः कुर्याद्दैवं कार्यं सदैव हि । शिवार्चनं सदाप्येवं शुचिः कुर्यादुदङ्मुखः ॥ तन्त्रान्तरे विशेषः—यत्रैव भानुस्तु वियत्युदेति प्राचीं तु तां वेदविदो वदन्ति । ततोऽपरां पूजकपूज्ययोश्च सदागमज्ञाः प्रवदन्ति तां तु ॥ इयं प्राच्यागमोक्तपूजायामेव ॥ अन्यत्र सूर्योदयैव ज्ञेया। तथैव-देवस्य मुखमारभ्य दिशं प्राचीं प्रकल्पयेत् । तदादिपरिवाराणामङ्गाद्यावरणस्थितिः ॥ अन्यच्च—होतुः पूर्वं पूर्वभागं प्रदिष्टं सव्यं भागं दक्षिणं त्वागमज्ञैः । दक्षं विद्यादुत्तरं भागमग्र्यं प्रज्ञावद्भिः पश्चिमं भागमुक्तम् ॥ अन्यच्च-देवाग्रे स्वस्य चाप्यग्रे प्राची प्रोक्ता तु देशिकैः । प्राच्यैव प्राची चोद्दिष्टा मुक्त्वा तु देवतार्चनम् ॥ गौतमः—तिष्ठन्नासीनः प्रह्वो वा नियमो यत्र नेदृशः । तदाऽऽसीनेन कर्तव्यं न [1]प्रह्वेण न तिष्ठता ॥

(२) अथ प्रातरुत्थानकालोऽनुत्थाने प्रायश्चित्तम् ॥

मनुः—ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयेत् । कायक्लेशांश्च तन्मूलान्[2]वेदतत्त्वार्थमेव च ॥ ब्राह्मो मुहूर्तः रात्रेरुपान्त्यो मुहूर्तः । अस्य लक्षणं विष्णुपुराणे । रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयकः। स ब्राह्म इति विज्ञेयो

---

[1] प्रह्वेण नम्रेणेत्यर्थः ॥

[2] वेदतत्त्वार्थ ईश्वरः ।

विहितः स प्रबोधने ॥ पञ्च पञ्च उषःकालः सप्तपञ्चोरुणोदयः । अष्ट पञ्च भवेत्प्रातस्ततः सूर्योदयः स्मृतः ॥ तथैव—अन्त्ययामात्मको रात्रेरुपान्त्यमुहूर्तो ब्राह्मो मुहूर्तः ॥ तथा च प्रयोगपारिजाते पुराणे रात्रिगतमुहूर्तपञ्चदशकं प्रक्रम्य-ब्राह्मो नाभस्वतश्चैव मुहूर्तः क्रमशो निशि । रात्रेस्तु पश्चिमो यामो मुहूर्तो ब्राह्म उच्यते इति ॥ ब्राह्मे मुहूर्तेऽनुत्थाने स्मृतिरत्नावल्यां प्रायश्चित्तम् । ब्राह्मे मुहूर्ते या निद्रा सा पुण्यक्षयकारिणी । तां करोति द्विजो मोहात्पादकृच्छ्रेण शुद्ध्यति ॥

(३) अथ प्रातःकाले दर्शनीयादर्शनीयपदार्थनिरूपणम् ॥

आचारप्रदीपे—कराग्रे वसति लक्ष्मीः करमध्ये सरस्वती । करमूले स्थितो ब्रह्मा प्रभाते करदर्शनम् ॥ कात्यायनः—श्रोत्रियं सुभगां गाञ्च ह्यग्निमग्निचितिं तथा । प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते । रोचनं चन्दनं गन्धं मृदङ्गं दर्पणं मणिम् । गुरुमग्निं रविं पश्येन्नमस्येत्प्रातरेव हि ॥ भारद्वाजमयूराणां चाषस्य नकुलस्य च । प्रभाते दर्शनं श्रेष्ठं वामपृष्ठे विशेषतः ॥ दर्शनानर्हपदार्थाः—पापिष्ठं दुर्भगं चान्धं नग्न[1]मुत्कृत्तनासिकम् । प्रातरुत्थाय यः पश्येत्तत्कलेरुपलक्षणम् ॥ भल्लातकं कर्षफलं काकमार्जारमूषकान् । क्लीबं च गर्दभं चैव न पश्येत्प्रातरेव हि ॥

---

[1] "बालकव्यतिरिक्तम्" इति नृसिंहः ।

(४) अथ भूमिस्पर्शनम् ॥

मदनपारिजाते—समुद्रवसने देवि पर्वतस्तनमण्डले । विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता । उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥

इति परिभाषाप्रकरणम् ।

(५) अथ प्रातःस्मरणम् ॥

भारतसावित्रीपाठः—महर्षिर्भगवान्व्यासः कृत्वेमां संहितां पुरा । श्लोकैश्चतुर्भिर्धर्मात्मा पुत्रमध्यापयच्छुकम् ॥१॥ मातापितृसहस्राणि पुत्रदारशतानि च । संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ॥ २ ॥ हर्षस्थानसहस्राणि भयस्थानशतानि च । दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ ३ ॥ ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ॥ धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥ ४ ॥ न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः । धर्मो नित्यः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः ॥ ५ ॥ इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् । स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥ ६ ॥ यो गोशतं कनकशृङ्गमयं ददाति विप्राय वेदविदुषे च बहुश्रुताय । पुण्यां च भारतकथां शृणुयाच्च नित्यं तुल्यं फलं भवति तस्य च तस्य चैव ॥ ७ ॥ प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै नारायणं गरुडवाहनमब्जनाभम् । ग्राहाभिभूतवर-

वारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥ ८ ॥ प्रातः स्मरामि गणनाथमनाथबन्धुं सिन्दूरपूरपरिशोभितगण्डयुग्मम् । उद्दण्डविघ्नपरिखण्डनचण्डदण्डमाखण्डलादिसुरनायकवृन्दवन्द्यम् ॥ ९ ॥ प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं रूपं हि मण्डलमृचोऽथ तनूर्यजूंषि । सामानि यस्य किरणाः प्रभवादिहेतुं ब्रह्माहरात्मकमलक्ष्यमचिन्त्यरूपम् ॥ १० ॥ प्रातर्भजामि शरदिन्दुकरोज्ज्वलाभां सद्रत्नवन्मकरकुण्डलहारभूषाम् । दिव्यायुधोर्जितसुनीलसहस्रहस्तां रक्तोपलाभचरणां भवतीं परेशाम् ॥ ११ ॥ प्रातर्भजामि शिवमेकमनन्तमाद्यं वेदान्तवेद्यमनघं पुरुषं महान्तम् । नामादिभेदरहितं षडभावशून्यं संसाररोगहरमौषधमद्वितीयम् ॥ १२ ॥ प्रातः श्रये श्रुतिनुतां रघुनाथमूर्तिं नीलाम्बुदोत्पलसितेतररत्ननीलाम् । आमुक्तमौक्तिकविशेषविभूषणाढ्यां ध्येयां समस्तमुनिभिर्जनमुक्तिहेतुम् ॥ १३ ॥ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥ १४ ॥ पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः । पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥ १५ ॥ अश्वत्थामा बलिर्व्यासो हनुमाँश्च विभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः ॥ १६ ॥ सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयमथाष्टमम् । जीवेद्वर्षशतं सोऽपि सर्वव्याधिविवर्जितः ॥ १७ ॥ अहल्या द्रौपदी सीता

तारा मन्दोदरी तथा । पञ्चकं ना[1] स्मरेन्नित्यं महापातकनाशनम् ॥ १८ ॥ विश्वेशं माधवं धुण्ढिं दण्डपाणिञ्च भैरवम् । वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥ १९ ॥ ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् । एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ २० ॥ नमो गुरुभ्यो गुरुपादुकाभ्यो नमः परेभ्यः परपादुकाभ्यः । आचार्यसिद्धेश्वरपादुकाभ्यो नमोऽस्तु लक्ष्मीपतिपादुकाभ्यः ॥ २१ ॥

इति पुराणोक्तप्रातःस्मरणम् ॥

अथ वैदिकं प्रातःस्मरणम् ॥

ॐ प्रा॒तर॒ग्निम्प्रा॒तरिन्द्र॑ꣳ हवामहे प्प्रा॒तर्म्मि॒त्रावरु॑णा प्प्रा॒तर॒श्विना॑ । प्रा॒तर्भग॑म्पू॒षण॒म्ब्रह्म॑ण॒स्प्पति॑म्प्रा॒तः सोम॑मु॒त रु॒द्रꣳ हु॑वेम ॥ ३४/३४ ॥ प्रा॒त॒र्जि॒तम्भग॑मु॒ग्रꣳ हु॑वेम व्व॒यम्पु॒त्रमदि॑ते॒र्य्यो व्वि॑ध॒र्त्ता । आ॒द्ध्रश्चि॒द्यम्मन्न्य॑मानस्त्तु॒रश्चि॒द्द्राजा॑ चि॒द्यम्भग॑म्भ॒क्षीत्याह॑ ॥ ३४/३५ ॥ भग॒ प्प्रणे॑त॒र्भग॒ सत्त्य॑राधो॒ भगे॒मान्धिय॒मुद॑वा॒ दद॑न्नः ॥ भग॒ प्प्रणो॑ जनय॒ गोभि॒रश्वै॒र्भग॒ प्प्रनृ॑भि॒र्नृ॒वन्त॑ स्याम ॥ ३४/३६ ॥ उ॒तेदानी॒म्भग॑वन्तः स्यामो॒त प्प्र॑पि॒त्त्वऽउ॒त मद्ध्ये॒ऽअह्ना॑म् ॥ उ॒तोदि॑ता मघव॒न्त्सूर्य॑स्य व्व॒यन्दे॒वाना॑ꣳ सुम॒तौ स्या॑म ॥ ३४/३७ ॥ भग॑ऽए॒व भग॑वाँ२॥ऽ

---

[1] ना नरः इत्यर्थः ।

अस्तुदेवास्तेनंव्वयम्भगवन्तःस्याम ॥ तन्त्वाभगसर्व्वऽइज्जोहवीतिसनोभगपुरऽएताभवेह ॥ ३४/३८ ॥ समध्वरायोषसोनमन्तदधिक्रावेवशुचयेपदाय ॥ अर्व्वाचीनंव्वसुविदम्भगन्नोरथमिवाश्वाव्वाजिनऽआवहन्तु ॥ ३४/३९ ॥ अश्वावतीर्ग्गोमतीर्न्नऽउषासोव्वीरवतीःसदमुच्छन्तुभद्राः ॥ घृतन्दुहानाविश्वतःप्प्रपीतायूयम्पातस्वस्तिभिःसदानः ॥ ४०/३४ ॥

इति वैदिकं प्रातःस्मरणम् ॥

(६) अथ मूत्रपुरीषोत्सर्गे कालभेदेन दिक्प्रदर्शनं मौनं क्रमेण च दक्षिणवामकर्णयोर्यज्ञोपवीतधारणं तच्चाकृते प्रायश्चित्तम् ॥

पराशरः—ततः प्रातः समुत्थाय कुर्याद्विण्मूत्रमेव च । नैर्ऋत्यामिषुविक्षेपादतीत्याभ्यधिकं भुवः ॥ १ ॥ तिरस्कृत्य[1]ोच्चरेत्[2]काष्ठं पत्रं लोष्टं तृणानि वा ॥ नियम्य प्रयतो वाचं संवीताङ्गो[3]ऽवगुण्ठितः[4] ॥

यमः—प्रत्यङ्मुखस्तु पूर्वाह्णेऽपराह्णे प्राङ्मुखस्तथा ॥ उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः ॥३॥ मनुः—छायायामन्धकारे च रात्रावहनि वा द्विजः । यथासुखमुखः कुर्यात्प्राणबाधाभयेषु च ॥ ४ ॥ औशनः—शौचे च सुखासीनः प्राङ्मुखो वाप्युदङ्मुखः ॥ शिरः प्रावृत्य कर्णं वा मुक्तकच्छशिखोऽपि वा ॥ ५ ॥ तत्र मौनमपि धार्यम् ।

---

१ तिरस्कृत्य अन्तर्धाय । २ उच्चरेत् पुरीषाद्युत्सृजेत् ॥ ३ संवीताङ्गः आच्छादितशरीरः ॥ ४ अवगुण्ठितः वेष्टितशिराः ॥

मदनरत्ने हारीतः—[1]उच्चारे मैथुने चैव [2]प्रस्रावे दन्तधावने ।
श्राद्धे भोजनकाले च षट्सु मौनं समाचरेत् ॥ १० ॥
याज्ञवल्क्यः—दिवा सन्ध्यासु [3]कर्णस्थब्रह्मसूत्र उदङ्मुखः ।
कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥ ७ ॥ साङ्ख्यायनः—यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यात् इति ॥ आह्निककारिकासु-मूत्रे तु दक्षिणे कर्णे पुरीषे [4]वामकर्णके । उपवीतं सदा धार्यं मैथुने तूपवीतिवत् ॥६॥ यदि प्रमाद्यज्ञोपवीतं कर्णेऽधृत्वैव कृते विण्मूत्रे तद्यज्ञोपवीतं त्यक्त्वा नूतनं धार्यम् । तत्र प्रयोगपारिजाते—मलं मूत्रं त्यजेद्विप्रो विस्मृत्योपवीतधृक् । उपवीतं तदुत्सृज्य गृह्यादन्यन्नवं तदा ॥

इति मूत्रपुरीषोत्सर्गविधिः ॥

(७) अथ दन्तधावने ग्राह्यवृक्ष-निषिद्धाहपरिगणन-वर्णक्रमानुसारिदन्तधावनकाष्ठाङ्गुलप्रमाण-दिङ्नियम-दन्तकाष्ठाभावद्वादशगण्डूषविधि-वनस्पतिप्रार्थनाभिमन्त्रणादीनां दिग्दर्शनम् ॥

दन्तधावने ग्राह्यवृक्षास्तत्र विष्णुः—कण्टकीक्षीरवृक्षोत्थं द्वादशाङ्गुलमव्रणम् । कनिष्ठाङ्गुलिवत्स्थूलं तदग्रकृतकूर्चकम् ॥ कौर्मे—मध्याङ्गुलसमं स्थूलं द्वादशाङ्गुलसम्मितम् ।

---

[1] उच्चारे उत्सर्जने ।

[2] प्रस्रावे मूत्रोत्सर्गे ।

[3] दक्षिणकर्णे तत्र प्रमाणम् । कर्त्रङ्गानामनुक्तौ तु दक्षिणाङ्गं भवेत्तदा ॥

[4] वामकर्णे यज्ञोपवीतं धृत्वा पुरीषं कार्यमित्युक्तमपि त्वाचारस्तु प्रायो दक्षिणकर्णे एव दृश्यते ।

सत्वचं दन्तकाष्ठं स्यात्तदग्रेण तु धावयेत् ॥ तित्तिणिर्वेणुपृष्ठं च ह्याम्रनिम्बौ तथैव च । अपामार्गश्च बिल्वश्च अर्कश्चोदुम्बरस्तथा ॥ बदरी तिन्दुकस्त्वेते प्रशस्ता दन्तधावने । कोविदारः करञ्जश्च कुटजः प्लक्षमालती ॥ गर्गः—सर्ज्जे धैर्यं वटे दीप्तिः करञ्जे विजयो रणे । प्लक्षजे चार्थसम्पत्तिर्बदर्यां मधुरस्वरः ॥ खदिरे चैव सौभाग्यं बिल्वे तु विपुलं धनम् । औदुम्बरे च वाक्सिद्धिर्बन्धूके च दृढा मतिः ॥ रौध्रे च कीर्तिः सौभाग्यं पालाशे सिद्धिरुत्तमा । कदम्बे सकला लक्ष्मीराम्रे आरोग्यमेव च । अपामार्गे स्मृतिर्मेधा प्रज्ञा वाणी वपुर्धृतिः ॥

पारस्करः—औदुम्बरेण दन्तान्धावेत ॥ "अन्नाद्याय व्यूहध्वꣳसोमो राजाऽयमागमत् । समे मुखं प्रमार्क्ष्यते यशसा च भगेन च" इति ॥ अत्रिः—मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः । तदाऽऽर्द्रकाष्ठं शुष्कं वा भक्षयेद्दन्तधावनम् ॥ उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा[१] समाहितः । परिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम् ॥ हरिहरभाष्ये—औदुम्बरेण द्वादशाङ्गुलसम्मितेन कनिष्ठिकाग्रवत्स्थूलेनोदुम्बरेण काष्ठेन "अन्नाद्याय व्यूहध्वम्" इति मन्त्रेण दन्तान्धावयेत् ॥ तच्च—दन्तधावनमधो दर्शितेषु दिने (कालेषु) ष्वकार्यम् ॥ व्यासः—प्रतिपद्दर्शषष्ठीषु नवम्यां रविवासरे । दन्तानां

---

[१] शुचिर्भूत्वा विण्मूत्रोत्सर्गं कृत्वेत्यर्थः ।

काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥ कात्यायनः—नन्दासु च नवम्यां च दन्तकाष्ठं विवर्जयेत् ॥ विष्णुः—नवम्यां चैव द्वादश्यां वर्जयेद्दन्तधावनम् । श्राद्धे च जन्मदिवसे विवाहे सुखदुःखयोः । व्रते चैवोपवासे च वर्जयेद्दन्तधावनम् ॥ आचार्यः—अष्टम्योश्च चतुर्दश्योः पञ्चदश्यां त्रिजन्मसु[1] । व्यतीपाते च सङ्क्रान्त्यां दन्तकाष्ठं न भक्षयेत् ॥ वसिष्ठः—शन्यर्कशुक्रवारेषु कुजाहे व्रतवासरे । जन्माहे श्राद्धदिवसे दन्तकाष्ठं विवर्जयेत् ॥ तृणपर्णैर्मध्यमानामिकाङ्गुष्ठैर्निषिद्धाऽह्नि कुर्युः इति स्मृत्यर्थसारे ॥

वर्णक्रमेण दन्तधावनकाष्ठप्रमाणम् ॥ नागदेवः—दशाङ्गुलं तु विप्राणां क्षत्रियाणां नवाङ्गुलम् । अष्टाङ्गुलं तु वैश्यानां शूद्राणां सप्तसम्मितम् ॥ गर्गः—चतुरङ्गुलमात्रं तु नारीणां ज्ञेयमुत्तमम् ॥ दन्तधावने दिङ्नियमे विष्णुः—प्राङ्मुखस्य धृतिः सौख्यं शरीरारोग्यमेव च । दक्षिणेन तथा कष्टं पश्चिमेन पराजयः ॥ उत्तरेण गवां नाशः स्त्रीणां परिजनस्य च ॥ पूर्वोत्तरे तु दिग्भागे सर्वान्कामानवाप्नुयात् ॥ तथैव व्यासः—अलाभे दन्तकाष्ठानां निषिद्धायां तिथावपि । अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ॥ दन्तधावनकाष्ठग्रहणे मन्त्रः—आयुर्बलं यशो वर्चः प्रजाः पशून् वसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वन्नो देहि वन-

---

[1] जन्मदिवसस्याद्यन्तयोरपि दन्तधावनं न विधेयम् ।

स्पते ! ॥ दन्तधावनकाष्ठाभिमन्त्रणे श्लोकः—मुखदुर्गन्धिनाशाय दन्तानां च विशुद्धये । ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥ दन्तधावनानन्तरं गण्डूषान्कुर्यात्तत्र शौनकः—पश्चाद्द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् । स्मृत्वोङ्कारं च गायत्रीं निबध्नीयाच्छिखां ततः ॥

॥ इति दन्तधावनम् ॥

(८) अथ प्रातःस्नाने गुणाः कालः स्नानाभावेऽनर्हत्वं शीतोष्णवारिषु नद्यां स्नाने देवपूजने च विशेषनियमाः ॥

प्रातःस्नाने विशेषफलम् ॥ याज्ञवल्क्यः—गुणा दश स्नानपरस्य साधो रूपञ्च तेजश्च बलञ्च शौचम् । आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च यशश्च मेधाः ॥ अस्नात्वा नाचरेत्कर्म जपहोमादि किञ्चन । लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान् ॥ प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकृतं हि तत् । सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम् ॥ आह्निककारिकायाम्—प्रातःस्नानं स नक्षत्रं सन्ध्या नक्षत्रसंयुता ॥ होमः प्रागुदयाद्भानोर्गायत्र्यास्तु ततो जपः ॥ गार्ग्यः—कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च ॥ नित्यं यादृच्छिकं चैव यथारुचि समाचरेत् ॥ नागदेवः—वाप्यां कूपे तडागे वा नद्यां वा चोष्णवारिणा । प्रातःस्नानं सदा कुर्यादुष्णेनैव सदाऽऽतुरः ॥ अस्नातस्य क्रियाः सर्वा भवन्ति निष्फला यतः । प्रातः समाचरेत्स्नानं तच्च नित्यमुपस्थितम् ॥ याज्ञवल्क्यः—स्नानमूलाः क्रियाः सर्वाः श्रुति-

स्मृत्युदिता नृणाम् । तस्मात्स्नानं निषेवेत श्रीपुष्ट्यारोग्यवर्धनम् ॥ उष्णोदकेन स्नानं न कार्यम् । वृद्धमनुः—सङ्क्रान्त्यां रविवारे च सप्तम्यां राहुदर्शने । आरोग्ये पुत्रमित्रार्थे न स्नायादुष्णवारिणा ॥ मृते जन्मनि सङ्क्रान्तौ श्राद्धे जन्मदिने तथा । अस्पृष्टस्पर्शने चैव न स्नायादुष्णवारिणा ॥ शूद्रानीतेन जलेन स्नाने देवपूजायां पितृतर्पणे च दोषः । वाचस्पतौ—स्नानमाचमनं दानं देवतापितृतर्पणम् । शूद्रोदकैर्न कुर्वीत तथा मेघाद्विनिःसृतैः ॥ नद्यां स्नाने विशेषनियमः । स्रोतोऽभिमुखं स्नायान्नदीषु प्रवहज्जले । स्थावरे च तडागे च रवेरभिमुखं सदा ॥ रेणुः—या या समुद्रगा नद्यस्तासु स्नानं तु सम्मुखम् ॥ सर्वेषां शाखिनामेवं विना वाजसनेयिनः[1] ॥

॥ इति स्नानविधिः ॥

(९) अथ गृहे तीर्थे वा सङ्क्षिप्तस्नानविधिः ॥

स्नानकर्ता सूर्याभिमुख उपविश्य हस्तौ पादौ च प्रक्षाल्य गण्डूषान्कुर्यात् । ततो दक्षिणहस्ते जलं गृहीत्वा स्नानसङ्कल्पं[2] कुर्यात् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो महापुरुषस्य

---

[1] वाजसनेयिनां सर्वं स्नानं सूर्याभिमुखमेव न स्रोतोऽभिमुखम् ॥

[2] **संवत्सरनामानि** । प्रभवो विभवः शुक्लो प्रमोदोऽथ प्रजापतिः । अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च ॥ १ ॥ ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः । चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः ॥ २ ॥ सर्वजित्सर्वधारी च विरोधी विकृतिः खरः । नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥ ३ ॥ हेम-

विष्णोराज्ञया प्रवर्त्तमानस्य अद्य ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे (भारतखण्डे) जम्बूद्वीपे आर्यावर्त्तान्तर्गतब्रह्मावर्तैकदेशे अमुके श्रीशालिवाहनशाके अमुकनामसंवत्सरे तथा च अमुके श्रीविक्रमवर्षे अमुकनामसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे [१]अमुकनक्षत्रे [२]अमुकयोगे अमुक[३]करणे [४]अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये

लम्बी विलम्बी च विकारी शार्वरी प्लवः । शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ॥ ४ ॥ प्लवङ्गः कीलकः सौम्यः साधारणो विरोधकृत् । परिधावी प्रमादी च आनन्दो राक्षसो नलः ॥ ५ ॥ पिङ्गलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती । दुन्दुभी रुधिरोद्गारी रक्ताक्षो क्रोधनः क्षयः ॥ ६ ॥

[१] **नक्षत्रनामानि** । अश्विनी भरणी चैव कृत्तिका रोहिणी मृगः । आर्द्रा पुनर्वसुः पुष्यस्ततोऽश्लेषा मघा तथा ॥१॥ पूर्वाफाल्गुनिका तस्मादुत्तराफाल्गुनी ततः ॥ हस्तश्चित्रा तथा स्वाती विशाखा तदनन्तरम् ॥ २ ॥ अनुराधा ततो ज्येष्ठा ततो मूलं निगद्यते ॥ पूर्वाषाढोत्तराषाढे त्वभिजिच्छ्रवणस्तथा ॥ ३ ॥ धनिष्ठा शततारारव्यं पूर्वाभाद्रपदा ततः ॥ उत्तराभाद्रपाच्चैव रेवत्येतानीमानि च ॥ ४ ॥

[२] **विष्कुम्भादियोगनामानि** ॥ विष्कुम्भः प्रीतिरायुष्मान्सौभाग्यः शोभनस्तथा । अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च ॥ १ ॥ वज्रसिद्धी व्यतीपातो वरीयान्परिघः शिवः । गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥ २ ॥ सिद्धिः साध्यः शुभः शुक्लो ब्रह्मैन्द्रो वैधृतिः क्रमात् ॥ सप्तविंशतियोगास्तु कुर्युर्नाम समं फलम् ॥ ३ ॥

[३] **करणनामानि** ॥ बवश्च बालवश्चैव कौलवस्तैतिलस्तथा ॥ गरश्च वणिजो विष्टिः करणान्युक्तानि सप्त च ॥ १ ॥ अन्ते चैव चतुर्दश्यां शकुनिर्दर्शभागयोः ॥ ज्ञेयं चतुष्पदं नागं किंस्तुघ्नं प्रतिपद्दले ॥ २ ॥

[४] **राशिनामानि** । मेषो वृषोऽथ मिथुनः कर्कटः सिंहकन्यके । तुला च वृश्चिको धन्वी मकरः कुम्भमीनकौ ॥

अमुकराशिस्थिते देवगुरौ (अमुकराशिस्थिते दैत्यगुरौ) शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थम् इह जन्मनि कायिवाचिकमानसिकसांसर्गिकज्ञाताज्ञातस्पर्शास्पर्शासनभोजनशयनगमनादिकृतसकलपातकक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं मम शरीरशुद्धिसम्पादनार्थञ्च शीतोदकेन उष्णोदकेन वा (गृहे तडागे कूपे सरसि महानद्याम् अमुकतीर्थे वा) प्रातःस्नानमहं करिष्ये ॥

ततो जलेषु तीर्थागतभावनासम्पादनार्थं तीर्थप्रार्थनां कुर्यात् ॥ नमामि गङ्गे तव पादपङ्कजं सुरासुरैर्वन्दितदिव्यरूपम् । भुक्तिञ्च मुक्तिं च ददासि नित्यं भावानुसारेण सदा नराणाम् ॥ १ ॥ पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा । आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥ २ ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ ३ ॥ त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता । याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥ ४ ॥ नन्दिनी नलिनी सीता मालती च मलापहा । विष्णुपादाब्जसम्भूता गङ्गा त्रिपथगामिनी ॥ ५ ॥ भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी । द्वादशैतानि नामानि यत्र यत्र जलाशये ॥ ६ ॥ स्नानोद्यतः पठेद्यस्तु तत्र तत्र वसाम्यहम् । एतान्मन्त्रान्पठि-

त्वान्ते सर्वाङ्गे स्नानमाचरेत् ॥ ७ ॥ गोदावरि नमस्तुभ्यं नमस्ते पापहारिणि । अनुज्ञां देहि मे मातः शुद्ध्यै स्नानं करोम्यहम् ॥ ८ ॥ गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ९ ॥ एवं तीर्थानां स्मरणं कृत्वा शरीरं सर्वौषध्यादिमलापकर्षद्रव्यैः संशोध्य शुद्धजलैः स्नानं कुर्यात् ॥

इति प्रातःस्नानविधिः ॥

(१०) अथ नद्यादौ नित्यस्नानविधिः ॥

स्नानकर्ता अष्टधा विभक्तस्याह्नश्चतुर्थे भागे मृदादीनि स्नानोपकरणानि सम्पाद्य सम्भृतसम्भारः नद्यादिजलाशयं गत्वा तीरं जलैः प्रक्षाल्य मृद्गोमयप्रभृतिस्नानोपयोगीनि

---

१ **स्नानसूत्रे**–"स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि । पवित्राणां तथा जप्ये दाने च विधिचोदिते । इदं वारुणस्नानं मुख्यम् । अस्याभावे प्रशस्तभस्मना सर्वाङ्गालम्भनमाग्नेयम् । गवां खुरोत्खातरजसा शरीरेण ग्रहणं वायव्यम् । आपोहिष्ठादिभिर्द्रुपदादिव शन्नोदेवीरिदमापः प्रवहतेत्येतल्लिङ्गोक्तैर्मन्त्रैः प्रतिमन्त्रं कुशाग्रेण मूर्धनि जलाभिषेको मान्त्रम् । आर्द्रेण वाससा सर्वशरीरमार्जनं कापिलम् । आपोहिष्ठेति ब्राह्मम् । मृदालम्भनं पार्थिवम् । अद्भिरातपवर्षादिभिश्च स्नानं दिव्यम् । सच्चिदानन्दघनात्मकजगत्कारणविश्वव्यापकपरमात्म (वासुदेव) नः स्मरणं मानसम् । दक्षिणावर्त्तशङ्खेन ताम्रपात्रगतोदकस्य शिरसा प्रतिग्रहः अपरार्कोक्तेश्च विष्णुप्रतिमाशालग्रामशिलास्नानोदकेन च शिरोऽभिषिञ्चनम्" इत्येतेषां स्नानानुकल्पानामन्यतमेन नित्यकर्मानुष्ठानाधिकारसम्पत्तिः प्राप्यते ॥

२ **कात्यायनपरिशिष्टे स्नानसूत्रम्** ॥ अथाऽतो नित्यस्नानं नद्यादौ मृद्गोमयकुशतिलसुमनसऽआहृत्योदकान्तं गत्वा शौचे देशे स्थाप्य प्रक्षाल्य पाणिपादं

वस्तूनि सन्निधौ निधाय पूर्वं मृद्भिरद्भिश्च हस्तौ पादौ च प्रक्षाल्य दक्षिणकरे साग्रं प्रादेशमात्रम् अनन्तगर्भं पवित्रं धृत्वा वामकरेऽपि कुशाँश्च धृत्वा बद्धशिखो यज्ञोपवीती एकवासा प्रवाहाभिमुखः सूर्याभिमुखो वोपविश्य आचमनं प्राणायामञ्च कृत्वा तीर्थप्रार्थनां कुर्यात् ॥ तद्यथा—नमामि गङ्गे तव पादपङ्कजं सुरासुरैर्वन्दितदिव्यरूपम् । भुक्तिं च मुक्तिं च ददासि नित्यं भावानुसारेण सदा नराणाम् ॥१॥ या गतिर्योगयुक्तानां मुनीनामूर्ध्वरेतसाम् । सा गतिः सर्वजन्तूनां गौतमीतीरवासिनाम् ॥ २ ॥ पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा । आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥ ३ ॥ त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता । याचितं देहि मे तीर्थं तीर्थराज नमोऽस्तु ते ॥४॥ अपामधिपतिस्त्वं च तीर्थेषु वसतिस्तव । वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे ॥५॥

कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्योरुꣳहीति तोयमामन्त्र्यावर्तयेद्येतेशतमिति सुमित्रियानऽइत्यपोऽञ्जलिमादाय दुर्मित्रिया इति द्वेष्यं प्रति निषिञ्चेत्कटिं बस्त्यूरू जङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेदङ्गानि मृदेदं विष्णुरिति सूर्याभिमुखो निमज्जेदापो अस्मानिति स्नात्वोदिदादिभ्यऽइत्युन्मज्ज्य निमज्ज्योन्मज्ज्याचम्य गोमयेन विलिम्पेन्मानस्तोकऽ इति । ततोऽभिषिञ्चेदिमम्मेऽवरुणेति चतसृभिर्माप उदुत्तमं मुञ्चन्त्ववभृथेत्यन्ते चैतन्निमज्ज्योन्मज्ज्याचम्य दर्भैः पावयेदादोहिष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामपो देवा द्रुपदादिव शन्नोदेवीरपाꣳरसमपोदेवीः पुनन्तुमेति नवभिश्चित्पतिर्म्मेत्योङ्कारेण व्याहृतिभिर्गायत्र्या चादावन्ते चान्तर्जलेऽघमर्षणं त्रिरावर्त्तयेद् द्रुपदादिवायज्ञौरिति वा तृचं प्राणायामं वा सशिरसमोमिति वा विष्णोर्वा स्मरणम् ॥ **इति कात्यायनप्रणीतं त्रिकण्डिकास्नानसूत्रम् ॥**

अधिष्ठात्र्यश्च तीर्थानां तीर्थेषु विचरन्ति याः । देवतास्ताः प्रयच्छन्तु स्नानाज्ञां मम सर्वदा ॥ ६ ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ इति सम्प्रार्थ्य सङ्कल्पं कुर्यात् ।

सङ्कल्पः—श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्त्तमानस्याद्य ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे (भरतखण्डे) जम्बूद्वीपे (रामक्षेत्रे परशुरामाश्रमे दण्डकारण्यदेशे श्रीगोदावर्याः पश्चिमदिग्भागे श्रीमल्लवणाब्धेरुत्तरे तीरे) आर्यावर्तान्तर्गतब्रह्मावर्तैकदेशे अमुके श्रीशालिवाहनशके अमुकनामसंवत्सरे अमुके श्रीविक्रमवर्षे अमुकनामसंवत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ (अमुकराशिस्थिते दैत्यगुरौ) शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलावाप्त्यर्थं मम इह जन्मनि जन्मान्तरे वा कायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञात-

स्पर्शास्पर्शभुक्ताभुक्तपीतापीतादिसकलपातकनिरासपूर्वकमासनशयनगमनादिष्वनृतभाषणादिदोषनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं शरीरशुद्ध्यर्थञ्च अमुकतीर्थे स्नानविधिना स्नानमहं करिष्ये ॥ इति सङ्कल्प्य ।

तीर्थाभिमन्त्रणम् । तीर्थजलेषु स्वदक्षिणहस्तं न्युब्जं कुर्यात् ॥ ॐ उरुꣳहिराजावरुणश्चकारसूर्य्यायपन्थामन्वेतवाऽउ । अपदेपादाप्प्रतिधातवेकरुतापवक्ताहृदयाविधश्चित् । नमोवरुणायाभिष्ठितोवरुणस्यपाशः ॥ २३/८ ॥ इति मन्त्रेण न्युब्जेन दक्षिणहस्तेन तीर्थजलमभिमन्त्रयेत् । तीर्थजलावर्तनम् ॥ स्वदक्षिणहस्ताङ्गुलिभिर्दक्षिणावर्तं त्रिवारं जलमावर्तयेत् ॥ ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा चितता महान्तः । तेभिर्न्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः ॥ ततस्तस्मात्तीर्थादञ्जलौ जलं गृह्णीयात् ॥ तत्र मन्त्रः ॥ ॐ सुमित्रियानऽआपऽओषधयꣳसन्तु ॥ २२/६ ॥ इति मन्त्रेण अञ्जलौ गृहीतं जलं दुर्म्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टियञ्चवयंद्विष्मꣳ ॥ २२/६ ॥ इत्यनेन [1]स्वशत्रून्मनसा ध्यात्वा तेषां विनाशनार्थं (तज्जलं) तीर्थतटे स्ववामभागे निक्षिपेत् ॥

---

[1] वस्तुतस्तु "सर्वेषां मित्रमिव" इति न्यायात् मनसा वचसा कायेन च सर्वैः सह तथैव वर्तितव्यमतः स्वशरीरस्थकामादीनेव शत्रुरूपान्ध्यात्वा तेषां नाशार्थं वामभागे जलप्रक्षेपः ।

अथ मृत्तिकास्नानम्[1] ॥ मृत्तिकां स्वदक्षिणहस्ते गृह्णीयात् ॥ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके ब्रह्मपूतासि काश्यपेनाभिवन्दिता । त्वया हतेन पापेन गच्छामि परमां गतिम् । मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥ ॐइदंविष्णुर्व्विचक्क्रमेत्त्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ॥ ५/१५ ॥ इति मन्त्रेण स्वशरीरं मृत्तिकया पूर्वोक्तप्रकारेणानुलिप्य तीर्थे स्नायात् । तत्र मन्त्रः । " ॐआपोऽअस्म्मान्मातरꣳशुन्धयन्तुघृतेनंनोघृतप्प्वꣳपुनन्तु ॥ व्विश्वꣳहिरिप्प्रम्प्रवहन्ति देवीः" एतावत्पर्यन्तं मन्त्रं पठित्वोन्मज्ज्य पुनः । " ॐउदिदाभ्यःशुचिरापूतऽएमि " ॥ ३/४ ॥ (अनेनार्धमन्त्रेण द्वितीयवारं स्नायात्) पुनस्तूष्णीं निमज्ज्योन्मज्ज्य आचमनं कुर्यात् ॥ इति मृत्तिकास्नानम् ॥

अथ गोमयस्नानम् ॥ अग्रमग्रं चरन्तीनामोषधीनां वने वने ॥ तासामृषभपत्नीनां पवित्रं कायशोधनम् ॥ तन्मे रोगाँश्च शोकाँश्च पापं मे हर गोमय ! ॥ इत्यनेन गोमयं गृहीत्वा । ॐ मानस्तोकेतनये मानऽआयुषिमानो-

---

[1] ततो मृदं त्रिधा विभज्य तस्मात् प्रथमभागं वामकरेण गृहीत्वा कटिमनुलिप्याद्भिः प्रक्षाल्य तथैव पुनर्द्विवारं प्रक्षाल्य एवमेव द्वितीयभागेन वस्तिम् ऊरू जङ्घे चरणौ करौ चैकैकशः प्रक्षाल्याचम्य "ॐ उदकाय नमः" इति तीर्थोदकं नत्वा तृतीयभागेन दक्षिणहस्तगृहीतया मृदा मुखतो नाभिपर्यन्तं तथैव वामकरगृहीतया मृदा नाभितः पादतलपर्यन्तम् अङ्गानि आलिप्य नाभिमात्रं जलं प्रविश्य स्नायात् ॥

गोषुमानोऽअश्श्वेषुरीरिषꣳ ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्म्मन्तꣳसदमित्त्वाहवामहे ॥ १६/१६ ॥ इति दक्षिणपाणिस्थेन गोमयेन मुखादिनाभिपर्यन्तं वामकरस्थेन गोमयेन नाभितोऽङ्घ्रिपर्यन्तं स्वशरीरं विलिम्पेत् ॥ ततस्तीर्थे स्नायात् ॥ इति गोमयस्नानम् ॥

[1]अथ भस्मस्नानम् ॥ वामहस्ते भस्म गृहीत्वा दक्षिणहस्तेनाच्छाद्याभिमन्त्रयेत् ॥ ॐअग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वꣳह वा इदं भस्म मन एतानि चक्षूꣳषि भस्मानि ॥ तस्मिञ्जलं प्रक्षिप्य सम्मर्द्य ललाटाद्यङ्गेषु धारयेत् ॥ ॐप्रसद्यभस्म्मनायोनिमपश्चपृथिवीमग्ने । सꣳसृज्यमातृभिष्ट्वञ्ज्योतिष्म्मान्पुनरासदꣳ ॥ १२/३८ ॥ इति शिरःप्रभृतिसर्वाङ्गेषु धृत्वा तीर्थे स्नायात् ॥ इति भस्मस्नानम् ॥

ततः [2]कुम्भमुद्रया जलं गृहीत्वा स्वशरीरं मार्जयेत् ॥ ॐ इमम्मेव्वरुणश्श्रुधीहवमद्याचमृडय । त्वामवस्युराचके ॥ २१/१ ॥ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्ते यजमानोहविर्ब्भिः । अहेडमानोव्वरुणेहबोध्युरुशꣳसमानऽआयुꣳप्रमोषीꣳ ॥ २१/२ ॥ त्वन्नोऽअग्नेव्वरुणस्यव्विद्वान्देवस्यहेडोऽअवयासिसीष्ठाꣳ ॥ यजिष्ठोव्वह्नितमꣳशोशुचानोवि-

---

[1] इदं भस्मस्नानं नोक्तं कात्यायनपरिशिष्टसूत्रे । अतः क्षेपकम् ।

[2] दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु । सावकाशामेकमुष्टिं कुर्यात्सा कुम्भमुद्रिका ॥

श्वा॒द्द्वेषा॑ꣳसि॒प्प्र॑मुमुग्ग्ध्य॒स्स्मत् ॥ २१/३ ॥ ॐसत्त्वन्नो॑ऽअग्ने-
व॒मोभ॑व॒ोतीनेदि॑ष्ठोऽअ॒स्याऽउ॒षसो॒व्व्युष्टौ । अव॑यक्ष्वनो॒-
व्वरु॑ण॒ꣳररा॑णोव्वी॒हिमृ॑डी॒कꣳसु॒हवो॑नऽएधि ॥ २१/४ ॥ मापो-
मौष॑धीर्हिꣳसी॒र्द्धाम्म्नो॑धाम्म्नोराज॒ꣳस्ततो॑व्वरुणनोमुञ्च । यदु॒
हु॒रग्घ्न्याऽइति॒व्वरु॒णेति॒शपा॑महे॒ ततो॑ व्वरुणनोमुञ्च ॥ ६/२२ ॥
उदु॑त्त॒मम्व्वरु॑ण॒पाश॑म॒स्स्मदवा॑ध॒मंव्विम॑द्ध्य॒मꣳश्श्र॑थाय ।
अथा॑व्व॒यमा॑दित्त्यव्व्र॒तेतवानाग॑सो॒ऽअदि॑तयेस्याम ॥ १२/१२ ॥
मु॒ञ्चन्तु॑माशप॒त्थ्या॒दथो॑व्वरु॒ण्ण्या॒दुत । अथो॑य॒मस्य॒ पड्वी॑श॒-
त्सर्व्व॑स्म्माद्देवकिल्बिषात् ॥ १२/९० ॥ अव॑भृथनिचुम्पुणनिचे॒-
रुर॑सिनिचुम्पुणः ॥ अव॑दे॒वैर्द्दे॒वकृ॑त॒मेनो॑यासिष॒मव॒मर्त्त्यै॒-
र्म्मर्त्त्य॑कृतम्पुरु॒राव्ण्णो देवरि॒षस्प्पा॑हि ॥ ३/४८ ॥ इति मन्त्रैः
सर्वाङ्गानि मार्जयेत् ॥ पश्चात्तूष्णीं तीर्थे स्नात्वा आचमनं
कुर्यात् । [1]ततः पुनर्दर्भैर्मार्जनम् ॥ ॐ [2]आपो॒हिष्ठाम॑यो॒भुव॒-
स्तान॑ऽऊ॒र्ज्जेद॑धातन । म॒हे॒रणा॑य॒चक्ष॑से ॥ ११/५० ॥ योवः॑
शि॒वत॑मो॒रस॒स्तस्य॑भाजयते॒हनः॑ ॥ उ॒श॒तीरि॑वमा॒तरः॑
॥ ११/५१ ॥ तस्म्मा॒ऽअर॑ङ्गमामवो॒यस्य॒क्षया॑य॒जिन्व॑थ ।
आपो॑ज॒नय॑थाचनः ॥ ११/५२ ॥ इ॒दमा॑प॒ःप्रव॑हताव॒द्यञ्च॒मलं॑-
ञ्च॒यत् । यच्चा॑भिदु॒द्द्रोहानृ॑त॒ꣳयच्च॑शे॒पेऽअ॑भी॒रुण॑म् ॥ आपो॑-

---

[1] स्वदक्षिणहस्तस्थितेन कुशत्रयेण जलं गृहीत्वा स्वदक्षिणनाभिपार्श्वमारभ्य शिरो नीत्वा स्ववामनाभिपार्श्वपर्यन्तं प्रदक्षिणं प्रतिमन्त्रं मार्जनं कुर्यादेभिर्मन्त्रैः ॥

[2] कुशैः "आपोहिष्ठाम॰ इत्यारभ्य तच्छकेयम्" इत्यन्तं पुनर्मार्जयेत् ॥ कुशान्परित्यज्य "इमम्मे॰ इत्यारभ्य अवभृथ॰ इत्यन्तं" अष्टभिर्मन्त्रैश्चलुकेन शिरस्यभिषिञ्चेत् ॥

मातस्म्मादेनसः पवमानश्चमुञ्चतु ॥ १७/६ ॥ हविष्म्मतीरिमाऽआपोहविष्म्माँऽआविवासति । हविष्म्मान्देवोऽअध्वरोहविष्म्माँऽअस्तुसूर्य्यः ॥ २३/६ ॥ देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हविष्य्यऽइन्द्रियावान्मदिन्तमः । तन्देवेभ्योदेवत्रादत्तशुक्क्रपेभ्यो येषाम्भागस्थस्वाहा ॥ २७/६ ॥ कार्षिरसिसमुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि । समापोऽअद्भिरग्मत समोषधीभिरोषधीः ॥ २८/६ ॥ अपोदेवामधुमतीरगृभ्णन्नूर्ज्जस्वतीराजस्वश्चितानाः । याभिर्म्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्त्यरातीः ॥ १/१० ॥ द्रुपदादिवमुमुचानः स्विन्नः स्नातोमलादिव । पूतम्पवित्रेणेवाज्यमापः शुन्धन्तुमैनसः ॥ २०/२० ॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शँय्योरभिस्रवन्तुनः ॥ १२/३६ ॥ अपाꣳसमुद्वयसꣳसूर्य्येसन्तꣳसमाहितम् । अपाꣳरसस्ययोरसस्त्तंवोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टत्तमम् ॥ ३/९ ॥ अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्प्रजाभ्यः । तासामास्थानादुज्जिहतामोषधयःसुपिप्पलाः ॥ ३८/११ ॥ पुनन्तुमापितरःसोम्म्यासः पुनन्तुमापितामहाः पुनन्तुप्प्रपितामहाः ॥ पवित्रेणशतायुषा ॥ ३७/१९ ॥ पुनन्तुमापितामहाः पुनन्तुप्प्रपितामहाः । पवित्रेणशतायुषाविश्श्वमायुर्व्यश्नवै ॥ ३७/१९ ॥ अग्नऽआयूꣳषि पवसऽआसुवोर्ज्जमिषञ्चनः । आरेबाधस्वदुच्छुनाम्

॥ ३८/१९ ॥ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः । पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा ॥ ३९/१९ ॥ पवित्रेणपुनीहिमाशुक्क्रेणदेवदीद्यत् । अग्नेक्क्रत्वाक्क्रतूँ१रनु ॥ ४०/१९ ॥ यत्तेपवित्रमर्च्चिष्ष्यग्नेविततमन्तरा । ब्रह्मतेनपुनातुमा ॥ ४१/१९ ॥ पवमानः सोऽअद्यनः पवित्रेणविचर्षणिः । यः पोतासपुनातुमा ॥ ४२/१९ ॥ उभाभ्यान्देवसवितः पवित्रेणसवेनच । माम्पूनीहिविश्वतः ॥ ४३/१९ ॥ वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमाबह्व्यस्तन्वोवीतपृष्ठाः ॥ तयामदन्तः सधमादेषुवयꣳ स्यामपतयोरयीणाम् ॥ ४४/१९ ॥ [1]चित्पतिर्म्मापुनात्वच्छिद्रेणपवित्रेण सूर्य्यस्यरश्मिभिः । तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम् ॥ ४/४ ॥ [2]वाक्पतिर्म्मापुनात्वच्छिद्रेण पवित्रेणसूर्य्यस्यरश्मिभिः । तस्यते पवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम् ॥ ५/४ ॥ [3]देवोमासविता पुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः । तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पूनेतच्छकेयम् ॥ ४/४ ॥ पुनः कुशैर्मार्जयेत् ॥ ॐइमम्मेवरु॰ ॐपुनातु । ॐतत्त्वायामि॰ ॐभूः पुनातु ॥ ॐत्वन्नोअग्ने॰ ॐभुवः पुनातु । ॐसत्त्वन्नोऽअग्ने॰ ॐस्वः पुनातु । ॐमापोमौष॰ ॐ महः पुनातु । ॐउदुत्तमम्॰ ॐजनः पुनातु । मुञ्चन्तुमा॰ ॐतपः पुनातु । ॐअवभृथनि॰ ॐसत्यं पुनातु । ॐतत्स-

---

१ नाभेरूर्ध्वम् । २ नाभेरधः । ३ सर्वाङ्गे ।

वितुर्व्वरेण्यं० सर्वं पुनातु ॥ अपामार्गेण मार्जनम् । (क्षे[1]पकम्) ॐअपाघमपकिल्बिषमपकृत्त्यामपोरपः । अपामार्ग्गत्त्वमस्म्मदपदुःष्ष्वप्प्न्यꣳसुव ॥ $\frac{११}{३५}$ ॥ दूर्वाङ्कुरेण मार्जनम् ॥ ॐकाण्डात्त्काण्डात्त्प्ररोहन्तीपरुषःपरुषस्प्परि । एवानोदूर्व्वेप्प्रतनु सहस्रेणशतेनच ॥ $\frac{२०}{१३}$ ॥ [3]अघमर्षणम् । अन्तर्जले निमग्नः त्रिवारं जपेत् ॥ ॐ[3]द्रुपदादिव० ॥ $\frac{२०}{२०}$ ॥ इति मन्त्रं नद्या जलेऽन्तर्मग्नः सन् श्वासं नियम्य त्रिवारं पठन्नघमर्षणं कुर्यात् ॥ एवं स्नानं विधाय आचमनं कृत्वा स्नानाङ्गतर्पणं कुर्यात् । पूर्वाभिमुखो [4]यज्ञोपवीती कुशत्रयं दक्षिणहस्ते धृत्वा कुशानामग्रैः ॐकारपूर्वकं प्रथमं देवतर्पणम् । ॐ ब्रह्मादयो देवास्तृप्यन्ताम् ॥ १ ॥ ॐभूर्देवास्तृप्यन्ताम् ॥ २ ॥ ॐभुवर्देवास्तृप्यन्ताम् ॥ ३ ॥

---

१ अपामार्गैर्दूर्वाभिश्च मार्जनं नैमित्तिके श्रावण्यादावेव न तु नित्यस्नाने कार्यम् ॥ तत्तु श्रावण्यादिनैमित्तिकस्नाने एव ज्ञेयम् ॥ २ ततोऽघमर्षणं कुर्यात् ॥ (२) अपामार्गेण दूर्वाभिश्च मार्जनं स्नानसूत्रे नोक्तम् । ३ अन्तर्जले निमग्नः ऋतञ्च सत्यञ्च० (१) द्रुपदादिव० (२) आयङ्गौः (३) गायत्रीमन्त्रम् (४) सशिरस्कं प्राणायामम् (५) अव्ययं परमात्मवाचकं ॐकारं वा ध्यायेत्। (६) एवं षट्सु पक्षेष्वेकं पक्षमाश्रित्य त्रिवारं जपेत् ॥ ३ **बृहस्पतिः**—द्रुपदानाम यो मन्त्रो वेदे वाजसनेयके । अन्तर्जले त्रिरावर्त्य सर्वपापैः प्रमुच्यते ॥ ४ **व्यासः**—यज्ञोपवीती देवानां निवीती ऋषितर्पणे । प्राचीनावीती पित्र्ये तु स्वेन तीर्थेन भावितः । **भारद्वाजः**—दक्षिणं बाहुमुद्धृत्य वामस्कन्धे निवेशितम् । यज्ञोपवीतमित्युक्तं देवकार्येषु शस्यते ॥ अग्रैस्तु तर्पयेद्देवान्मनुष्यान्कुशमध्यतः । पितॄँस्तु कुशमूलाग्रैर्विधिः कौशो यथाक्रमम् ॥ **याज्ञवल्क्यः**—अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु । सव्योत्तराभ्यां पाणिभ्यामथवा तर्पणं भवेत् ॥ **याज्ञवल्क्यः**—कनिष्ठदेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥

ॐस्वर्देवास्तृप्यन्ताम् ॥ ४ ॥ ॐभूर्भुवःस्वर्देवास्तृप्यन्ताम् ॥ ५ ॥ ततो मनुष्यतर्पणम् । प्राङ्मुखो यज्ञोपवीतं कण्ठे कृत्वा दक्षिणहस्ते उदगग्रान् त्रीन् कुशान्धृत्वा प्रजापतितीर्थेन ऋषिभ्यो द्वौ द्वावञ्जली दद्यात् ॥ ॐ सनकादिद्वैपायनादयो ऋषयस्तृप्यन्ताम् ॥ १ ॥ ॐभूर्ऋषयस्तृप्यन्ताम् ॥ २ ॥ ॐभुवः ऋषयस्तृप्यन्ताम् ॥ ३ ॥ ॐस्वः ऋषयस्तृप्यन्ताम् ॥ ४ ॥ ॐभूर्भुवःस्वःऋषयस्तृप्यन्ताम् ॥ ५ ॥ पितृतर्पणम् । प्राङ्मुखो अपसव्यं कृत्वा मध्ये भुग्नान्त्रीन्कुशान्कृत्वा (मूलाग्रे एकीकृत्य) दक्षिणहस्ते धृत्वा पितृतीर्थेन पितृभ्यस्त्रींस्त्रीनञ्जलीन्दद्यात् ॥ ॐकव्यवाडनलादयः पितरस्तृप्यन्ताम् ॥ १ ॥ ॐभूः पितरस्तृप्यन्ताम् ॥ २ ॥ ॐभुवः पितरस्तृप्यन्ताम् ॥ ३ ॥ ॐस्वः पितरस्तृप्यन्ताम् ॥ ४ ॥ ॐभूर्भुवःस्वः पितरस्तृप्यन्ताम् ॥ ५ ॥ ततः सव्यं कृत्वाऽऽचम्य यक्ष्मतर्पणं कुर्यात् ॥ यन्मया दूषितं तोयं शारीरमलसम्भवात् । तस्य पापस्य शुद्ध्यर्थं यक्ष्मैतत्ते तिलोदकम् ॥ इति तीर्थतटे तिलमिश्रितं जलाञ्जलिं दद्यात् । शिखोदकत्यागः ॥ लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः । ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः शिखोदकैः ॥ इत्यनेन स्वदक्षिणभागे स्वस्य शिखां निष्पीडयेत् ॥ ततो धौते सोत्तरीये शुभेऽहते वाससी परिधाय भस्मचन्दनादिकं धृत्वा गृहं गच्छेत् ॥

॥ इति नद्यादौ नित्यस्नानविधिः ॥

अथ हेमाद्रिकृतः[1] स्नानसङ्कल्पः ॥

ॐ स्वस्ति श्रीमुकुन्दसच्चिदानन्दस्य ब्रह्मणोऽनिर्वाच्यमायाशक्तिविजृम्भिताविद्यायोगात्कालकर्मस्वभावाविर्भूतमहत्तत्त्वोदिताहङ्कारोद्भूतवियदादिपञ्चमहाभूतेन्द्रियदेवतानिर्मितेऽण्डकटाहे चतुर्दशलोकात्मके लीलया तन्मध्यवर्तिभगवतः श्रीनारायणस्य नाभिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य समस्तजगदुत्पत्तिस्थितिलयकारणस्य जगद्रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्य अच्युतानन्तवीर्यस्य श्रीमद्भगवतो महापुरुषस्य अचिन्त्यापरिमितशक्त्या ध्येयमानस्य महाजलौघमध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमेऽव्यक्तमहदङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते अस्मिन्महति ब्रह्माण्डखण्डे आधारशक्तिश्रीमदादिवाराहदंष्ट्राग्रविराजिते कूर्मानन्तवासुकितक्षककुलिककर्कोटकपद्ममहापद्मशङ्खाद्यष्टमहानागैर्ध्रियमाणे ऐरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रतीकाष्टदिग्गजप्रतिष्ठितानां अतलवितलसुतलतलातलरसातलमहातलपाताललोकानां उपरिभागे भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकाख्यसप्तलोकानामधोभागे चक्रवालशैलमहावलयनागमध्यवर्तिनो महाकालमहाफणिराजशेषस्य सहस्रफणानां मणिमण्डलमण्डिते दिग्दन्तिशुण्डोत्तम्भिते

---

[1] अयं सङ्कल्पः प्रायः प्रायश्चित्ते तीर्थस्नानादौ श्रावण्यादिनैमित्तिकस्नाने च कर्तव्यः ॥

अमरावत्यशोकवतीभोगवतीसिद्धवतीगान्धर्ववतीकाञ्च्यवन्त्यलकावतीयशोवतीतिपुण्यपुरीप्रतिष्ठिते इन्द्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशानाष्टदिक्पालप्रतिष्ठिते वरध्रुवाधरसोमपाप्रभञ्जनानलप्रत्यूषप्रभासाख्याष्टवसुभिर्विराजिते हरत्र्यम्बकरुद्रमृगव्याधापराजितकपालीभैरवशम्भुकपर्दिवृषाकपिबहुरूपाख्यैकादशरुद्रैः संशोभिते रुद्रोपेन्द्रसवितृधातृत्वष्ट्रर्यमेन्द्रेशानभगमित्रपूषाख्यद्वादशादित्यप्रकाशिते यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गनिरतवसिष्ठवालखिल्यविश्वामित्रदक्षकात्यायनकौण्डिन्यगौतमाङ्गिरसपाराशर्यव्यासवाल्मीकशुकशौनकभरद्वाजसनकसनन्दनसनातनसनत्कुमारनारदादिमुख्यमुनिभिः पवित्रिते लोकालोकाचलवलयिते लवणेक्षुरससुरासर्पिर्दधिक्षीरोदकयुक्तसप्तार्णवपरिवृते जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्कराख्यसप्तद्वीपयुते इन्द्रकांस्यताम्रगभस्तिनागसौम्यगन्धर्वचारणभारतेतिनवखण्डमण्डिते सुवर्णगिरिकर्णिकोपेतमहासरोरुहाकारपञ्चाशत्कोटियोजनविस्तीर्णभूमण्डले अयोध्यामथुरामायाकाशीकाञ्च्यवन्तिकाद्वारावतीतिसप्तपुरीप्रतिष्ठिते महामुक्तिप्रदस्थले शालग्रामशम्भलनन्दिग्रामत्रयविराजिते चम्पकारण्यबदरिकारण्यदण्डकारण्यार्बुदारण्यधर्मारण्यपद्मारण्यगुह्यारण्यजम्बुकारण्यविन्ध्यारण्यद्राक्षारण्यनहुषारण्यकाम्यकारण्यद्वैतारण्यनैमिषारण्यादीनां मध्ये सुमेरुनिषधकूटशुभ्रकूटश्रीकूटहेमकूटरजत-

कूटचित्रकूटत्रिकूटकिष्किन्धश्वेताद्रिकूटहिमविन्ध्याचलानां हरिवर्षकिम्पुरुषवर्षयोश्च दक्षिणे नवसहस्रयोजनविस्तीर्णे भरतखण्डे मलयाचलसह्याचलविन्ध्याचलानामुत्तरेण स्वर्णप्रस्थचण्डप्रस्थसूक्तिक आवन्तकरमणकमहारमणकपाञ्चजन्यसिंहललङ्काऽशोकवत्यलकावतीसिद्धवतीगान्धर्ववत्यादिपुण्यपुरीविराजिते नवखण्डोपद्वीपमण्डिते दक्षिणावस्थितरेणुकाद्वयसूकरकाशीकाञ्चीकालिकालवटेश्वरकालञ्जरमहाकालेतिनवोखरयुते द्वादशज्योतिर्लिङ्गगङ्गाभागीरथीगोदावरीगौतमीक्षिप्रायमुनासरस्वतीनर्मदातापीपयोष्णीचन्द्रभागाकावेरीमन्दाकिनीप्रवराकृष्णावेण्याभीमरथीतुङ्गभद्रामलापहाकृतमालाताम्रपर्णीविशालाक्षीवञ्जुलाचर्मण्वतीवेत्रवतीभोगावतीविशोकाकौशिकीगण्डकीवासिष्ठीप्रमदाविश्वामित्रीफल्गुनीचित्रकाश्यपीसरयूसर्वपापहारिणीकरतोयाप्रणीतावज्रावक्रगामिनीसुवर्णरेखाशोणाभवनाशिनीशीघ्रयाङ्कुशवर्तिनीब्रह्मानन्दामहितनयेत्यनेकपुण्यनदीभिर्विलसिते ब्रह्मपुत्रसिन्धुनदादिपरमपवित्रजलविराजिते हिमवन्मेरुगोवर्धनक्रौञ्चचित्रकूटहेमकूटमहेन्द्रमलयसह्येन्द्रकीलपारियात्राद्यनेकपर्वतसमन्विते मतङ्गमाल्यकिष्किन्धऋष्यशृङ्गेतिमहानगसमन्विते अङ्गवङ्गकलिङ्गकाश्मीरकाम्बोजसौवीरसौराष्ट्रमहाराष्ट्रमगधनेपालकेरलचोरलपाञ्चालगौडमालवमलयसिंहलद्रविडकर्नाटकललाटकरहाटवरहाटपानाटपाण्ड्यनिषधमागधआन्ध्रदशार्णवभोजकुरुगान्धा-

रविदर्भविदेहबाह्लीकबर्बरकैकेयकोसलविराटशूरसेनकोङ्ककैकेकटमत्स्यमद्रपारसिकखर्जूरयावनम्लेच्छजालन्धरेतिसिद्धवत्यन्यदेशविशेषभाषाभूमिपालविचित्रितेइलावृत्तकुरुभद्राश्वकेतुमालकिम्पुरुषरमणकहिरण्मयादिनववर्षाणां मध्ये भरतखण्डबकुलचम्पकपाटलाब्जपुन्नागजातिकरवीररसालकह्लारकेतक्यादिनानाविधकुसुमस्तबकविराजिते कोकन्तहिरण्यशृङ्गकुब्जार्बुदमणिकर्णीवटशालग्रामसूकरमथुरागयानिष्क्रमणलोहार्गलपोतस्वामिप्रभासबदरीतिचतुर्दशगुह्यविलसिते जम्बुद्वीपे कुरुक्षेत्रादिसमभूमध्यरेखायाः पश्चिमदिग्भागे कुलमेरोर्दक्षिणदिग्भागे विन्ध्यस्य दक्षिणे देशे श्रीशैलस्य वायव्यदेशे कृष्णावेण्योर्मध्यदेशे मत्स्यकूर्मवराहनृसिंहवामनपरशुरामरामकृष्णबुद्धकल्कीतिदशावताराणां मध्ये बौद्धावतारे गङ्गादिसरिद्भिः पाविते एवं नवसहस्रयोजनविस्तीर्णभारतवर्षे निखिलजनपावनपरमभागवतोत्तमशौनकादिनिवासिते नैमिषारण्ये आर्यावर्तान्तर्गतब्रह्मावर्तैकदेशे सूर्यान्वयभूभृत्प्रतिष्ठिते श्रीमन्नारायणनाभिकमलोद्भूतसकलजगत्स्रष्टुः परार्धद्वयजीविनो ब्रह्मणो द्वितीये परार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीये मुहूर्ते रथन्तरादिद्वात्रिंशत्कल्पानां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृतत्रेताद्वापरकलिसंज्ञकानां चतुर्णां युगानां मध्ये वर्तमाने अष्टाविंशतितमे कलियुगे तत्प्रथमे पादे श्रीमन्नृपविक्रमार्कात् श्रीमन्नृप-

शालिवाहनाद्वा यथासङ्ख्यागमेन चान्द्रसावनसौरनाक्षत्रादिप्रकारेणागतानां प्रभवादिषष्टिसंवत्सराणां मध्ये अमुकनाम्नि संवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम इह जन्मनि जन्मान्तरे वा बाल्ययौवनवार्द्धक्यावस्थासु वाक्पाणिपादपायूपस्थघ्राणरसनाचक्षुःस्पर्शनश्रोत्रमनोभिश्चरितानां ज्ञाताज्ञातकामाकाममहापातकोपपातकादिसञ्चितानां पापानां ब्रह्महननसुरापानसुवर्णस्तेयगुरुतल्पगमनतत्संसर्गरूपमहापातकानां तद्व्यतिरिक्तानां बुद्धिपूर्वकाणां च मनोवाक्कायकृतानां बहुकालाभ्यस्तानाम् उपपातकानां स्पृष्टास्पृष्टसङ्करीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरणविहिताकरणकर्मलोपजनितानां रसविक्रयकन्याविक्रयहयविक्रयगोविक्रयखरोष्ट्रविक्रयदासीविक्रयाजादिपशुविक्रयस्वगृहविक्रयनीलीविक्रयाक्रेयविक्रयपण्यविक्रयजलचरादिजन्तुविक्रयस्थलचरादिविक्रयखेचरादिविक्रयसम्भूतानां निरर्थकवृक्षच्छेदनऋणानपाकरणब्रह्मस्वापहरणदेवस्वापहरणराजस्वापहरणपरद्रव्यापहरणतैलादिद्रव्यापहरणफलादिहरणलोहादिहरणनानावस्तुहरणरूपाणां ब्राह्मणनिन्दागुरुनिन्दावेदनिन्दाशास्त्रनिन्दापरनिन्दाभक्ष्यभक्षणा-

भोज्यभोजनाचोष्यचोषणालेह्यलेहनापेयपानास्पृश्यस्पर्शनाश्राव्यश्रवणाहिंस्यहिंसनावन्द्यवन्दनाचिन्त्यचिन्तनायाज्ययाजनापूज्यपूजनरूपाणां मातृपितृतिरस्कारस्त्रीपुरुषप्रीतिभेदनपरस्त्रीगमनविधवागमनवेश्यागमनदासीगमनानृतौ भार्याभिगमनचाण्डालादिहीनजातिगमनकन्यागमनसुतवधूगमनस्वगोत्रजागमनगुदगमनरजस्वलागमनपश्वादिगमनरूपाणां कूटसाक्षित्वपैशून्यवादमिथ्यापवादम्लेच्छसम्भाषणब्रह्मद्वेषकरणब्रह्मवृत्तिहरणवृत्तिच्छेदनपरवृत्तिहरणरूपाणां मित्रवञ्चनगुरुवञ्चनस्वामिवञ्चनासत्यभाषणगर्भपातनपथिताम्बूलचर्वणहीनजातिसेवनपरान्नभोजनगणान्नभोजनलशुनपलाण्डुगृञ्जनभक्षणतालवृक्षफलभक्षणोच्छिष्टभक्षणमार्जारोच्छिष्टभक्षणपर्युषितान्नभक्षणरूपाणां पङ्क्तिभेदकरणभ्रूणहिंसापशुहिंसाबालहिंसाद्यनेकहिंसोद्भूतानां शौचत्यागस्नानत्यागसन्ध्यात्यागौपासनाग्नित्यागवैश्वदेवत्यागरूपाणां निषिद्धाचरणकुग्रामवासब्रह्मद्रोहगुरुद्रोहपितृमातृद्रोहपरनिन्दात्मस्तुतिदुष्टप्रतिग्रहदुर्जनसंसर्गरूपाणां गोयानवृषभयानमहिषीयानगर्दभयानोष्ट्रयानाजयानभृत्याभरणस्वग्रामत्यागगोत्रत्यागकुलत्यागदूरस्थमन्त्रणविप्राशाभेदनावन्दिताशीर्वादग्रहणपतितसम्भाषणरूपाणां पतितजनपङ्क्तिभोजनाहःसङ्गमवृथामनोरथादिपापानां तथाच– महापापोपपापाभ्यां नानायोनिषु यत्कृतम् । बालभावेन यत्पापं क्षुत्तृडर्थे च यत्कृतम् ॥ आत्मार्थं चैव यत्पापं परार्थे

चैव यत्कृतम् ॥ तीर्थेषु चैव यत्पापं गुर्वज्ञाकृतं च यत् ॥ रागद्वेषादिजनितं कामक्रोधेन यत्कृतम् । हिंसानिद्रादिजं पापं भेददृष्ट्या च यन्मया ॥ देहाभिमानजं पापं सर्वदा यन्मया कृतम् । भूतं भव्यं च यत्पापं भविष्यं चैव गौतमि । शुष्कमार्द्रं च यत्पापं जानताऽजानता कृतम् । महल्लघु च यत्पापं तन्मे नाशय जाह्नवि ॥ ब्रह्महा मद्यपः स्तेयी तथैव गुरुतल्पगः । महापापानि चत्वारि तत्संसर्गी तु पञ्चमः ॥ अतिपातकमन्यच्च तन्न्यूनमुपपातकम् । गोवधो व्रात्यता स्तेयमृणानां चानपक्रियाः ॥ अनाहिताग्निता पण्यविक्रयः परिवेदनम् ॥ इन्धनार्थे द्रुमच्छेदः स्त्रीहिंसौषधिजीवनम् ॥ हिंसा यात्राविधानं च भृतकाध्यापनं तथा ॥ प्रथमाश्रममारभ्य यत्किञ्चित्किल्बिषं कृतम् ॥ कृमिकीटादिहननं यत्किञ्चित्प्राणिहिंसनम् । माता पित्रोरशुश्रूषा तद्वाक्याकरणं तथा ॥ अपूज्यपूजनं चैव पूज्यानां च व्यतिक्रमः । अनाश्रमस्थताग्न्यादिदेवाशुश्रूषणं तथा ॥ परकार्यापहरणं परद्रव्योपजीवनम् । ततोऽज्ञानकृतं वापि कायिकं वाचिकं तथा ॥ मानसं त्रिविधं पापं प्रायश्चित्तैरनाशितम् । तस्मादशेषपापेभ्यस्त्राहि त्रैलोक्यपावनि । निष्पापोऽस्म्यधुना देवि प्रसादात्तव नान्यथा ॥ इत्यादिप्रकीर्णपातकानामेतत्कालपर्यन्तं सञ्चितानां लघुस्थूलसूक्ष्माणां च निःशेषपरिहारार्थं दशावरान्दशापरान् आत्मना सहितान् एकविंशतिपुरुषानुद्धर्तुं ब्रह्मलोकावधिपञ्चाशत्कोटियोजनविस्तीर्णेऽ-

स्मिन्भूमण्डले सप्तर्षिमण्डलपर्यन्तं वालुकाभिः कृतराशेर्वर्षसहस्रावसाने एकैकवालुकापकर्षक्रमेण सर्वराश्यपकर्षसम्मितकालपर्यन्तं ब्रह्मसायुज्यताप्राप्त्यर्थं कुरुक्षेत्रादिसर्वतीर्थेषु स्नानपूर्वकं सहस्रगोदानजन्यफलप्राप्त्यर्थं तथा मम समस्तपितृणां आत्मनश्च विष्ण्वादिलोकप्राप्तये [स्त्रीणां विशेषः—पाणिग्रहणमारभ्य स्वकर्मापरिपालनम् । इन्द्रियाभिरतिः पुंसु नानायोनिषु या भवेत् । कृमिकीटादिहननं पङ्क्तिभेदादिकं तथा । स्पृष्टास्पृष्टमनाचारं मनसा दोषकल्पनम् ॥ तत्सर्वं नाशय क्षिप्रं गङ्गे त्वं मम पातकम् ।] [अधीतानामध्येष्यमाणानां स्थापनविच्छेदक्रोशघोषणदन्तविवृतिदुर्वृत्तद्रुतोच्चारितवर्णानां पूर्वसवर्णानां गलोपलम्बितविवृतोच्चारितवर्णानां श्लिष्टास्पष्टवर्णविघट्टनादिभिः पठितानां श्रुतीनां यद्यातयामत्वं तत्परिहारार्थमष्टत्रिंशदनध्यायाध्ययने रथ्यासञ्चरतः शूद्रस्य शृण्वतोऽध्ययने आत्मनोऽशुचित्वेऽध्ययने अक्षरस्वरानुस्वारपदच्छेदकण्डिकाव्यञ्जनह्रस्वदीर्घप्लुतकण्ठतालुमूर्द्धन्योष्ठ्यदन्त्यनासिकानुनासिकरेफजिह्वामूलीयोपध्मानीयोदात्तानुदात्तस्वरितादीनां व्यत्ययेनोच्चारे माधुर्याक्षरव्यक्तिहीनत्वाद्यनेकप्रत्यवायपरिहारपूर्वकं सर्वस्य वेदस्य सवीर्यत्वसम्पादनद्वारा यथावत्फलप्राप्त्यर्थं] श्रीपरमेश्वरप्रीत्यर्थं देवब्राह्मणसवितृसूर्यनारायणसन्निधौ अस्मिन् (अमुकतीर्थे)स्नानविधिना स्नानमहं करिष्ये ।

॥ इति हेमाद्रिकृतः सङ्कल्पः ॥

अथ दशविधस्नानानि ॥

सङ्कल्पः—अद्येत्यादि० अस्मिन् अमुकतीर्थे मम देहशुद्ध्यर्थं प्रायश्चित्ताङ्गभूतानि दशविधस्नानान्यहं करिष्ये ॥

(१) प्रथमं भस्मस्नानम्। ॐ अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म, सर्वᳪंह वा इदं भस्म, मन एतानि चक्षूᳪंषि भस्मानि ॥ ॐ नम॑स्ते रुद्रम॒न्यव॑ऽउ॒तोत॒इष॑वे॒नम॑ः । बा॒हुभ्या॑मु॒तते॒नम॑ः ॥ १/१६ ॥ यथाग्निर्दहते भस्म तृणकाष्ठादिसञ्चयम् । तथा मे दह्यतां पापं कुरु भस्म शुचे शुचिम् ॥

(२) द्वितीयं मृत्तिकास्नानम्—ॐ इ॒दंविष्णु॒र्विच॑क्रमेत्रे॒धानिद॑धेप॒दम्। सम॑ूढमस्यपाᳪंसु॒रेस्वाहा॑ ॥ ५/१५ ॥ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । शिरसा धारयिष्यामि रक्ष मां त्वं पदे पदे ॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥ मृत्तिके ब्रह्मपूतासि काश्यपेनाभिवन्दिता । मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥

(३) तृतीयं गोमयस्नानम्—ॐमान॑स्तो॒केतन॑ये॒मान॒ऽआयु॑षि॒मानो॒गोषु॒मानो॒ऽअश्वे॑षुरीरिषः । मानो॑वी॒रान्रु॑द्रभा॒मिनो॑वधीर्ह॒विष्म॑न्तः॒सद॒मित्त्वा॑हवामहे ॥ १६/१६ ॥ गोमये वसते लक्ष्मीः पवित्रा सर्वमङ्गला ॥ स्नानार्थं संस्कृता देवी

पापं मे हर गोमय ॥ अग्रमग्रं चरन्तीनामोषधीनां वने वने । तासामृषभपत्नीनां पवित्रं कायशोधनम् ॥ यन्मे रोगं च शोकं च तन्मे दहतु गोमयम् ॥

(४) चतुर्थं पञ्चगव्यस्नानम्[1]— ॐ स॒हस्र॑शीर्षा॒पुरु॑षः-सह॒स्रा॒क्षःस॒हस्र॑पात् । सभूमि॑ꣳस॒र्वत॑स्पृ॒त्त्वात्त्यं॑तिष्ठद्दशाङ्गु॒लम् ॥ $\frac{१}{३१}$ ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिःसमन्वितम् । सर्वपापविशुद्ध्यर्थं पञ्चगव्यं पुनातु माम् ॥

(५) पञ्चमं गोरजस्नानम्— ॐ आयङ्गौःपृश्नि॑रक्क्र-मी॒दस॑दन्मा॒त॑रम्पु॒रः । पि॒त॑रञ्चप्प्र॒यन्त्स्व॑ः ॥ $\frac{६}{३}$ ॥ गवां खुरेण निर्द्धूतं यद्रेणु गगने गतम् । शिरसा तेन सँल्लेपो महापातकनाशनम् ॥

(६) षष्ठं धान्यस्नानम्— ॐ धा॒न्य॑मसिधिनु॒हिदे॒वा-न्प्रा॒णाय॑त्त्वोदा॒नाय॑त्त्वाव्या॒नाय॑त्त्वा । दी॒र्घामनु॒प्प्रसि॑ति॒-मायु॑षेधान्दे॒वोव॑ःसवि॒ताहिर॑ण्ण्यपाणि॒ः प्प्रति॑गृभ्ण॒ात्त्व-च्छि॑द्द्रेणपा॒णिना॒चक्षु॑षेत्त्वाम॒हीना॒म्पयो॑सि ॥ $\frac{२०}{१}$ ॥ धान्यौषधिर्मनुष्याणां जीवनं परमं स्मृतम् । तेन स्नानेन देवेश मम पापं व्यपोहतु ॥

(७) सप्तमं फलस्नानम्— ॐ याःफ॒लिनी॒र्याऽअ॑फ॒-

---

[1] गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एतद्धि पञ्चगव्यं स्यात् प्रणवेनाभिमन्त्रितम् ॥

लाऽअपुष्प्पायाश्चपुष्प्पिणीः । बृहस्प्पतिप्प्रसूतास्त्तानोमुञ्चन्त्वꣳहसः ॥ ६५/१२ ॥ वनस्पतिरसो दिव्यः फलपुष्पवृतः सदा । तेन स्नानेन मे देव फलं लब्धमनन्तकम् ॥

(८) अष्टमं सर्वौषधीस्नानम्[1]— ॐ ओषधयःसमवदन्तसोमेनसहराज्ञा । यस्म्मैकृणोतिब्राह्मणस्तꣳराजन्पारयामसि ॥ ९६/१२ ॥ ओषध्यः सर्ववृक्षाणां तृणगुल्मलतास्तु याः । दूर्वासर्षपसंयुक्ताः सर्वौषध्यः पुनन्तु माम् ॥

(९) नवमं कुशोदकस्नानम्— ॐ देवस्यत्त्वासवितुःप्प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्त्ताभ्याम् ॥ १०/१ ॥ कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः । कुशाग्रे शङ्करो देवस्तेन नश्यतु पातकम् ॥

(१०) दशमं हिरण्यस्नानम्— ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ण्ययेनसवितारथेनादेवोयातिभुवनानिपश्श्यन् ॥ ४३/३३ ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

इति दशविधिस्नानम् ॥

---

[1] सर्वौषध्यः—कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दनम् । वचा चम्पकमुस्तं च सर्वौषध्यो दश स्मृताः ॥

॥ अथ प्रातःसन्ध्याप्रयोगः[१] ॥

(१) अथ भस्मधारणम् ॥ कर्ता गृहे नद्यादौ वा सङ्कल्पपूर्वकं प्रातःस्नानं कृत्वा श्वेतं धौतमहतं[२] सोत्तरीयं शुद्धं

---

[१] "अहरहः सन्ध्यामुपासीत" इति श्रुतिः। **मरीचिः**–सन्ध्या येन न विज्ञाता सन्ध्या येनानुपासिता। जीवमानो भवेच्छूद्रो मृतश्च श्वाऽभिजायते॥ तथैव **दक्षः**–सन्ध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्॥ **कात्यायनः**–अनर्हः कर्मणां विप्रः सन्ध्याहीनो यतः स्मृतः। **आचारमयूखे धर्मसारे सन्ध्याकालः**–उत्तमा तारकोपेता मध्यमा लुप्ततारका। अधमा सूर्यसहिता प्रातःसन्ध्या त्रिधा मता॥ उत्तमा सूर्यसहिता मध्यमा लुप्तभास्करा। अधमा तारकोपेता सायंसन्ध्या त्रिधा मता॥ **पद्मपुराणे**–अपहाय निजं कर्म रामकृष्णेतिवादिनः। ते हरेर्द्वेषिणः पापा धर्मार्थं जन्म यद्धरेः॥

[२] **हरिहरभाष्ये**–अहतं नवं सदशं पवित्रं वास आच्छादयीत॥ तदलाभे अमौत्रेणारजकेन धौतं क्षालितं "परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि। शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये"॥ इति सौत्रमन्त्रेण वर्णानुक्रमेण च वस्त्रं धारयेत्। **मनुः**–ब्राह्मणस्य सितं वस्त्रं माञ्जिष्ठं नृपतेः स्मृतम्। पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते॥ **आह्निककारिकायां देवलः**—स्वयंधौतेन कर्तव्याः स्नानदानादिकाः क्रियाः। न तु नेजकधौतेन नाहतेन न कुत्रचित्॥ नेजको रजकः॥ आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपम्। शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपम्॥ नानारङ्गविराजितं गतदशं केशोद्भवं वासितं नीलीरङ्गसमन्वितं च समलं नैवायतं चास्ति यत्। दग्धं चैव च खण्डितं च बहुधा युद्धादिकैश्चित्रितं तद्वर्ज्यं खलु देवपूजनविधौ वस्त्रं कुसुम्भारुणम्॥ उपवस्त्रधारणविषये **विष्णुपुराणे**–होमदेवार्चनायासु क्रियासु पठने तथा। नैकवस्त्रः प्रवर्तेत द्विजो नाचमने जपे॥ उपवस्त्रस्थानेऽधिकं यज्ञोपवीतं धारयित्वापि सन्ध्यादिकर्मकरणे न दोषस्तत्र **परशुरामनिबन्धे**–उपवस्त्रं यदा न स्यात्तदा चत्वारि धारयेत्। **स्मृत्यन्तरे**–यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि। तृतीयमुत्तरीयार्थे वस्त्राभावे चतुर्थकम्। धौतवस्त्रप्रसारणेऽपि **शातातपः**–प्रागग्रमुदगग्रं वा धौतं वासः प्रसारयेत्। दक्षिणाग्रं पश्चिमाग्रं वा पुनः प्रक्षालनं भवेत्॥ **नीलीदोषस्य परिहारः**। द्रव्यस्यान्तर्गता नीली न दुष्यति कदाचन। कम्बले पट्टसूत्रे वा नीलीदोषो न विद्यते॥

वस्त्रं परिधाय कुशकम्बलाद्यास्तृते पीठे यज्ञोपवीती प्राङ्मुख उदङ्मुखो वा उपविश्य प्रातःसन्ध्यादि कर्म कुर्यात् ॥ ॐ अग्निरित्यादिभस्माभिमन्त्रणमन्त्राणां पिप्पलाद ऋषिः । गायत्रीच्छन्दः । कालाग्निरुद्रो देवता । भस्माभिमन्त्रणे विनियोगः ॥ ॐ [१]अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म, सर्वꣳ हवा इदं भस्म, मन एतानि चक्षूꣳषि भस्मानि इति ॥ ॐ आपोज्योतिरित्यस्य प्रजापतिर्ऋषिः । यजुश्छन्दः । ब्रह्माग्निवायुसूर्या देवताः । भस्मन्यप आसेचने विनियोगः ॥ ॐ आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवःस्वरोम् ॥ भस्मत्रिपुण्ड्रधारणम् ॥ ॐ त्र्यम्बकमित्यस्य वसिष्ठ ऋषिः । अनुष्टुप् छन्दः । त्र्यम्बको रुद्रो देवता । त्र्यायुषमित्यस्य

---

[१] प्रातः ससलिलं भस्म मध्याह्ने गन्धमिश्रितम् । सायाह्ने निर्जलं भस्म एवं भस्म विलेपयेत् ॥ **कात्यायनः**–श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने । धृतत्रिपुण्ड्रः पूतात्मा मृत्युं जयति मानवः ॥ **कात्यायनः**–ऊर्ध्वपुण्ड्रं मृदा कुर्याद्भस्मना तु त्रिपुण्ड्रकम् । उभयं चन्दनेनैव ह्यभ्यङ्गोत्सवरात्रिषु ॥ **भविष्यपुराणे**–सत्यं शौचं जपो होमस्तीर्थदेवादिपूजनम् । तस्य व्यर्थमिदं सर्वं यस्त्रिपुण्ड्रं न धारयेत् ॥ एतानि तानि शिवमन्त्रपवित्रितानि भस्मानि भूतदुरितक्षपणक्षमानि । भाले धृतानि हृदयस्थतमोपहानि लुम्पन्ति दैवलिखितानि दुरक्षराणि ॥ अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वꣳ हवा इदं भस्म मन एतानि चक्षूꣳषि भस्मानि तस्माद्व्रतमेतत्पाशुपतं यद् भस्मनाङ्गानि संस्पृशेत्तस्माद्व्रतमेतत्पाशुपतं पशुपाशविमोक्षाय ॥ **ध्यानम्**–याऽस्य प्रथमा रेखा सा गार्हपत्यश्चाकारो रजो भूर्लोकश्चात्मा क्रियाशक्तिर्ऋग्वेदः प्रातःसवनं महादेवो देवता । याऽस्य द्वितीया रेखा सा दक्षिणाग्निरुकारः सत्त्वमन्तरिक्षमन्तरात्मा चेच्छाशक्तिर्यजुर्वेदो माध्यन्दिनं

नारायण ऋषिः । उष्णिक्छन्दः । आशीर्देवता । भस्मना त्रिपुण्ड्रधारणे विनियोगः । ॐ त्र्यम्बकँ॒ यजामहे सु॒गन्धिम्पु॑ष्टि॒वर्द्ध॑नम् ॥ उ॒र्व्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मुक्षीय॒ माऽमृता॑त् ॥ ६०/३ ॥ त्र्या॒यु॒षं ज॒मद॑ग्नेः क॒श्यप॑स्य त्र्यायु॒षम् ॥ यद्दे॒वेषु॑ त्र्यायु॒षन्तन्नो॑ऽअस्तु त्र्यायु॒षम् ॥ ६२/३ ॥ इति भस्मना ललाटे ग्रीवायां दक्षिणवामांसयोर्हृदि च धारयेत् ॥

(२) तत्रादौ शिखाबन्धनम् ॥ ॐ मानस्तोक० इत्यस्य कुत्स ऋषिः । जगतीच्छन्दः । एको रुद्रो देवता । शिखाबन्धने विनियोगः ॥ ॐ मा न॑स्तो॒के तन॑ये॒ मा न॒ऽआयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ऽअश्वे॑षु रीरिषः ॥ मा नो॑ वी॒रान्रु॑द्र भा॒मिनो॑ वधीर्ह॒विष्म॑न्तः॒ सद॒मित्त्वा॑ हवामहे ॥ १६/१६ ॥ ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने ॥ तिष्ठ देवि शिखाबन्धे चामुण्डे चापराजिते ॥ विष्णोर्नामसहस्रैस्तु शिखाबन्धं करोम्यहम् ॥ चिद्रूपिणि महामाये दिव्यतेजःसमन्विते । तिष्ठ देवि शिखाबन्धे तेजोवृद्धिं कुरुष्व मे ॥ इति शिखां बध्नीयात् ॥

(३) अथ रुद्राक्ष[1][2][3]मालाधारणम् ॥ अस्य श्रीशिवपञ्चा-

सवनं महेश्वरो देवता । याऽस्य तृतीया रेखा सा आहवनीयो मकारस्तमो द्यौः परमात्मा ज्ञानशक्तिः सामवेदस्तृतीयं सवनं शिवो देवता इति ध्यायेत् ॥

[1] रुद्राक्षा यस्य गात्रेषु ललाटे च त्रिपुण्ड्रकम् । स चाण्डालोऽपि सम्पूज्यः सर्ववर्णोत्तमो भवेत् ॥ अभक्तो वा विभक्तो वा नीचो नीचतरोऽपि वा । रुद्राक्षान्धारयेद्यस्तु मुच्यते सर्वपातकैः ॥ सहस्रं धारयेद्यस्तु रुद्राक्षाणां धृतव्रतः ॥ तं नमन्ति सुराः सर्वे यथा रुद्रस्तथैव सः ॥

[2] शिवषडक्षरमन्त्रस्य

[3] विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरःशरीरः । अन्त्याश्रमस्थः सकलेन्द्रियाणि निरुध्य

क्षरमन्त्रस्य वामदेव ऋषिः । दैवीपङ्क्तिश्छन्दः । शिवो देवता । रुद्राक्षाणां प्रतिष्ठापूजने विनियोगः ॥ ॐ नमः शिवाय रुद्राक्षाः सुप्रतिष्ठिता वरदा भवेयुः ॥ ॐ नमः शिवाय रुद्राक्षेभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ अस्य श्रीत्र्यम्बकमन्त्रस्य वसिष्ठ ऋषिः । अनुष्टुप्छन्दः । त्र्यम्बको रुद्रो देवता । कण्ठे रुद्राक्षमालाधारणे विनियोगः ॥ ॐ त्र्यम्बकँ यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्त्योर्म्मुक्षीयमामृतात् ॥ ६०/३ ॥

(४) अथ[१] पवित्रधारणम् ॥ ॐ पवित्रेस्त्थोव्वैष्णव्यौ सवितुर्व्वः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्म्मिभिः ॥ १२/१ ॥ तस्यतेपवित्रपतेपवित्त्रपूतस्ययत्त्कामः पुनेतच्छकेयम् ॥ ४/४ ॥ इति अनामिकायां धारयेत् ॥

भक्त्या स्वगुरुं प्रणम्य ॥ हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् । तथाऽऽदिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् । उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ॥ मस्तके कर्णयोः करयोः बाह्वोः नयनयोः वक्षसि शिखायां च धारयेत् ॥ **यथा**–रुद्राक्षान्कण्ठदेशे दशन ३२ परिमितान् मस्तके विंशती द्वे ४० षट् ६ षट् ६ कर्णप्रदेशे करयुगलकृते द्वादश १२ द्वादशैव १२ । बाह्वोरिन्दोः कलाभि १६ र्नयनयुगकुते १ ह्येकमेकं शिखायां वक्षस्यष्टाधिकं यः कलयति शतकं १०८ स स्वयं नीलकण्ठः ॥ [१] **प्रयोगपारिजाते**–स्नाने होमे जपे दाने स्वाध्याये पितृकर्मणि । करौ सदर्भौ कुर्वीत तथा सन्ध्याभिवादने ॥ **आह्निककारिकायाम्**–यथा वज्रं सुरेन्द्रस्य यथा चक्रं हरेस्तथा । त्रिशूलञ्च त्रिनेत्रस्य तथा विप्रपवित्रकम् ॥ **हेमाद्रौ**–अन्यान्यपि पवित्राणि कुशदूर्वामयानि च । हेमात्मकपवित्रस्य कलां नार्हन्ति षोडशीम् ॥ **कात्यायनः**–अनन्तगर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥ **अत्रिः**–अनामिकामूलदेशे पवित्रं धारयेत्सदा ॥

(५) अथ[१] आचमनम्– ॐ केशवाय नमः स्वाहा। ॐ नारायणाय नमः स्वाहा। ॐ माधवाय नमः स्वाहा। ॐ गोविन्दाय नम इति दक्षिणकरं प्रक्षाल्य॥ ॐ विष्णवे[२] नमः। ॐ मधुसूदनाय नमः। ॐ त्रिविक्रमाय नमः। ॐ वामनाय नमः। ॐ श्रीधराय नमः। ॐ हृषीकेशाय नमः। ॐ पद्मनाभाय नमः। ॐ दामोदराय नमः। ॐ

---

[१] **आह्निककारिकायाम्**–दक्षिणेनोदकं पेयं दक्षं वामेन संस्पृशेत्। तावन्न शुद्ध्यते वारि यावद्वामो न युज्यते। गोकर्णाकृतिहस्तेन माषमात्रं पिबेदपः॥ **वृद्धपाराशरः**–त्रिधा आचमनं प्रोक्तं श्रौत-स्मार्त-पुराणतः। ब्रह्मयज्ञादिके कुर्याच्छ्रुतेराचमनं द्विजः॥ सन्ध्यायां कर्मकाले च स्मृतेराचमनं स्मृतम्। शौचाचारे तथा याने स्पृष्टास्पृष्टे च चर्वणे। पुराणाचमनं कुर्यान्नामभिः केशवादिभिः॥ आचमने बहवो भेदाः। अतस्तत्तत्कर्मणि तत्तदाचमनं कुर्यात्॥ **विश्वामित्रकल्पे**–शुद्धं स्मार्तं तथा चैव पौराणं वैदिकं तथा। तान्त्रिकं श्रौतस्मार्ते च षड्विधं श्रुतिनोदितम्। श्रौताचमनं **यथा–आह्निककारिकासु**–प्रणवं पूर्वमुच्चार्य सावित्रीं तदनन्तरम्। तथैव व्याहृतिस्तिस्रः श्रौताचमनमुच्यते। अधोनिर्दिष्टस्थलेषु आचमनमवश्यं विधेयम्। **देवलः**–रेतोमूत्रशकृन्मोक्षे भोजने च परिक्षये। उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं चापि तथाविधम्॥ **बृहस्पतिः**–अधोवायुसमुत्सर्गे आक्रन्दे क्रोधसम्भवे। मार्जारमूषकस्पर्शे प्रहासेऽनृतभाषणे॥ निमित्तेष्वेषु धर्मार्थं कर्म कुर्वन्नुपस्पृशेत्॥ **आपस्तम्बः**–मूत्रपूरीषान्नलेपान्नशेषलेपा रेतसश्च यो लेपस्तान्प्रक्षाल्य पादौ चाचम्य प्रयतो भवेत्॥ **नागदेवः**–आचमने विशेषः–संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः। मुक्ताङ्गुष्ठकनिष्ठेन शेषेणाचमनं चरेत्॥ तत्र मन्त्रः। आमागन्यशसा सꣳसृजवर्चसा। तम्माकुरुप्रियं प्रजानामपतिं पशूनामरिष्टिन्तनूनाम्॥ [२] **भरद्वाजः**–स्मार्ताचमने केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ। द्वाभ्यामोष्ठौ तु सम्मृज्य द्वाभ्यामुन्मार्जनं तथा॥ एकेन हस्तौ प्रक्षाल्य पादावपि तथैव च। सम्प्रोक्ष्यैकेन मूर्धानं ततः सङ्कर्षणादिभिः॥ आस्यनासाक्षिकर्णानि नाभ्युरसी भुजौ क्रमात्। एवमाचमनं कृत्वा साक्षान्नारायणो भवेत्॥ एतदाचमनं त्रिकालसन्ध्योपासनायामुक्तम्॥

सङ्कर्षणाय नमः । ॐ वासुदेवाय नमः । ॐ प्रद्युम्नाय नमः । ॐ अनिरुद्धाय नमः । ॐ पुरुषोत्तमाय नमः । ॐ अधोक्षजाय नमः । ॐ नारसिंहाय नमः । ॐ अच्युताय नमः । ॐ जनार्दनाय नमः । ॐ उपेन्द्राय नमः । ॐ हरये नमः । ॐ श्रीकृष्णाय नमः । इति पठित्वा दक्षिणकराङ्गुष्ठेन शिरःप्रभृतिसर्वाण्यङ्गानि स्पृशेत् ॥

ततो मुखं द्विरुन्मृज्य हृदि पवित्रकरणं कुर्यात् ॥

(६) हृदि पवित्रकरणार्थं न्यासाः— ॐ [1]वाक् वाक् । [2]प्राणः प्राणः । ॐ [3]चक्षुश्चक्षुः । ॐ [4]श्रोत्रं श्रोत्रम् । ॐ [5]नाभिः नाभिः । [6]हृदयम् । ॐ [7]कण्ठः । ॐ [8]मुखम् । ॐ [9]शिरः । [10]शिखाम् । [11]बाहुभ्यां यशोबलम् ॥ हस्ते जलं गृहीत्वा । अपवित्रः पवित्रो वेत्यस्य वामदेव ऋषिः । विष्णुर्देवता । गायत्री छन्दः । हृदयपवित्रकरणे विनियोगः ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ भूमिप्रार्थनाम् । पृथिवीतिमन्त्रस्य मेरुपृष्ठ ऋषिः । कूर्मो देवता । सूतलं छन्दः । आसने विनियोगः । पृथ्वि त्वया धृता

---

[1] कराग्रेण मुखं स्पृशेत् ॥ [2] तर्जन्यङ्गुष्ठाभ्यां नासारन्ध्रद्वयं स्पृशेत् ॥ [3] अनामिकाङ्गुष्ठाभ्यां चक्षुर्द्वयं स्पृशेत् ॥ [4] मध्यमाङ्गुष्ठाभ्यां दक्षिणकर्णं वामकर्णञ्च स्पृशेत् ॥ [5] अङ्गुष्ठकनिष्ठिकाभ्यां नाभिं स्पृशेत् ॥ [6] दक्षिणकरतलेन हृदयं स्पृशेत् ॥ [7] दक्षिणकराग्रेण कण्ठं स्पृशेत् ॥ [8] कराग्रेण मुखं स्पृशेत् ॥ [9] दक्षिणकराग्रेण शिरः स्पृशेत् ॥ [10] तेनैव शिखायां स्पृशेत् ॥ [11] कराग्रेण दक्षिणबाहुं वामबाहुञ्च स्पृष्ट्वा उभाभ्यां हस्ताभ्यां शिरःप्रभृति सर्वाण्यङ्गानि स्पृशेत् ॥

लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ अथ भूतशुद्धिः । अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामविरोधेन सन्ध्याकर्म समारभे ॥ अनेन मन्त्रेण वामपादपार्ष्णिना भूमिं त्रिवारं ताडयेत् ॥ नेत्रोदकस्पर्शः[1] ॥ भैरवनमस्कारः । तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम । भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ ततो वामहस्ते जलं गृहीत्वा दक्षिणहस्तेन मार्जनं कुर्यात् ॥ ॐ भूः पुनातु शिरसि । ॐ भुवः पुनातु नेत्रयोः । ॐ स्वः पुनातु कण्ठे । ॐ महः पुनातु हृदये । ॐ जनः पुनातु नाभ्याम् । ॐ तपः पुनातु पादयोः । ॐ सत्यं पुनातु शिरसि । ॐ खं ब्रह्म पुनातु । इति सर्वाङ्गेषु ॥

(७) [2]अथ प्राणायामः ॥ ॐकारस्य ब्रह्माऋषिर्दैवी गाय-

---

[1] सर्वत्र जलस्पर्शो दक्षिणहस्तेन कार्यः ॥ [2] "ऋषिदैवतछन्दांस्यनुक्रमिष्यामः" इति । एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयते तस्य ब्रह्म निर्वीर्यं भवत्यथान्तराश्च गर्त्तं वा पद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान् भवति ॥ अथ विज्ञायैतानि योऽधीते तस्य वीर्यवदथ योऽर्थवित्तस्य वीर्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यत इति । अथ ऋषिच्छन्दोदेवता इत्येव क्रमः ॥ तत्र प्रमाणम् । आर्षं छन्दो दैवत्यं विनियोगस्तथैव च । वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ॥ तथैव **गङ्गाधरपद्धतौ**–ऋषिमादौ प्रयुञ्जीत छन्दो मध्ये नियोजयेत् । देवतामवसाने च मन्त्रज्ञो मन्त्रसिद्धये ॥ **याज्ञवल्क्यः**–अविदित्वा तु यः कुर्याद्याजनाध्ययनं जपम् । होममन्तर्जलादीनि तस्य चाल्पफलं भवेत् ॥

त्रीच्छन्दः । परमात्मा देवता । सर्वकर्मारम्भे विनियोगः ॥ भूरादिसप्तव्याहृतीनां प्रजापतिर्ऋषिः । क्रमेण गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि । अग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवताः । तत्सवितुरित्यस्य विश्वामित्र ऋषिः । गायत्रीच्छन्दः । सविता देवता । आपोज्योतिरित्यस्य प्रजापतिर्ऋषिः । द्विपदागायत्रीच्छन्दः । ब्रह्माग्निवायुसूर्या देवताः । सर्वेषां प्राणायामे विनियोगः ॥ [1]प्राणायाममन्त्रः । ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥ ॐ तत्त्सवितुर्व्वरेण्यंभर्ग्गोदेवस्यधीमहि ॥ धियोयोनः प्प्रचोदयात् ॥ ॐ आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवःस्वरोम् ॥ एवं पूरकादिक्रमेण प्राणायामं कुर्यात् ॥

(८) अथ [2]प्रातःसन्ध्यासङ्कल्पः ॥ अत्राद्य महामाङ्ग-

---

[1] **याज्ञवल्क्यः**–सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥ **कात्यायनः**–दक्षिणे रेचयेद्वायुं वामेनापूरितोदरम् । कुम्भकेन जपं कुर्यात्प्राणायामो भवेदिति ॥ **शौनकः**–नासिकामङ्गुलीभिस्तु तर्जनीमध्यमादृते । सव्येन तु समाकृष्य दक्षिणेन विसर्जयेत् ॥ यथा पर्वतधातूनां दोषान् हरति पावकः । एवमन्तर्गतं पापं प्राणायामेन दह्यते ॥ नासापुटेनानिलमेव बाह्यमाकृष्य तेनैव शनैः समस्तम् । नाडीषु सर्वासु च पूरयेद्यः सम्पूरको नाम महान्निरोधः ॥ न रेचकं नैव तु पूरकं वा नासाग्रभागे स्थितमेव वायुम् । सुनिश्चलं धारयति क्रमेण कुम्भाख्यमेतं प्रवदन्ति तज्ज्ञाः ॥ निःसार्य नासाविवरादशेषं प्राणं बहिः शून्य इवानिलेन । निरुच्छ्वसँस्तिष्ठति चोर्ध्ववायुः स रेचको नाम महान्निरोधः ॥ पीडयेद्दक्षिणां नाडीमङ्गुष्ठेन तथोत्तराम् । कनिष्ठिकानामिकाभ्यां मध्याभ्यां तर्जनीं त्यजेत् ॥ **नागदेवः**–बाह्यवायोरन्तः प्रवेशनं "**पूरकः**", प्रवेशितस्य वायोर्धारणं "**कुम्भकः**", धृतस्य वायोर्बहिर्निःसारणं "**रेचकः**" ॥

[2] अत्र विष्णुर्विष्णुर्विष्णुः । श्रीमद्भगवतो॰ इत्यादि प्रातःस्नानोक्तसङ्कल्पोऽपि विधीयते ॥

ल्यफलप्रदमासोत्तमे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे (अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु) एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःसन्ध्योपासनमहं करिष्ये ॥

(९) अथ अम्बुप्राशनम् ॥ ॐ सूर्यश्चेत्यस्य नारायण ऋषिः । अनुष्टुप्छन्दः । सूर्यो देवता । अम्बुप्राशने विनियोगः ॥ ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु । यत्किञ्चिद्दुरितं मयि । इदमहं माममृतयो नौ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ इत्याचम्य पुनर्द्विवारं तूष्णीमाचामेत् ॥

(१०) अथ मार्जनम्[1] ॥ ॐ आपोहिष्ठेति तिसृणां सिन्धुद्वीप ऋषिः । गायत्रीच्छन्दः । आपो देवताः । मार्जने विनियोगः ॥ ॐआपो॒हिष्ठाम॑यो॒भुव॒ (१) मस्तके। स्तान॑ऽऊ॒र्ज्जेद॑धातन (२) भूमौ ॥ म॒हेरणा॑य॒चक्ष॑से (३) हृदये ॥ $\frac{११}{५०}$ ॥ योव॑÷शि॒वत॑मो॒रस॒ (४) भूमौ । स्तस्य॑भाजयते॒ह॑न÷ (५) हृदये। उ॒श॒तीरि॑वमा॒तर॑÷ (६) मस्तके ॥ $\frac{११}{५१}$ ॥

---

[1] छन्दोगपरिशिष्टे–रक्षयेद्वारिणाऽऽत्मानं परीक्षिप्य समन्ततः ॥ शिरसो मार्जनं कुर्यात्कुशैः सोदकबिन्दुभिः ॥

तस्म्मा॒ऽअरं॑ङ्गमामवो॒ (७) मस्तके । यस्य॒क्षया॑य॒जिन्वं॑थ (८) हृदये। आपो॑ज॒नयं॑थाचनः (९) भूमौ ॥ ११/५० ॥

(११) [१]अथाघमर्षणम् ॥ अस्य श्रीद्रुपदादिव० इति मन्त्रस्य कोकिलराज ऋषिः। आपो देवता। अनुष्टुप्छन्दः। अघमर्षणे विनियोगः॥ दक्षिणहस्ते जलं गृहीत्वा। ॐ[२]द्रु॒प॒दादि॑व मुमु॒चानः॒स्वि॒न्नः॒स्ना॒तोमला॑दिव ॥ पू॒तम्पु॒वि॒त्रे॑णे॒वाज्य॒मापः॑शुन्धन्तु॒मैनं॑सः ॥ २०/२० ॥ इति जलमवघ्राय स्ववामभागे निक्षिपेत् ॥

(१२) अथ सूर्यायार्घप्रदानम् ॥ ॐ प्रणवस्य परब्रह्म ऋषिः। परमात्मा देवता । दैवी गायत्री छन्दः । भूर्भुवः स्वरिति महाव्याहृतीनां परमेष्ठी प्रजापतिर्ऋषिः । अग्निवायुसूर्या देवताः। गायत्र्युष्णिगनुष्टुप्छन्दांसि । ॐ तत्सवितुरित्यस्य विश्वामित्र ऋषिः। सविता देवता। गायत्रीछन्दः। अर्घदाने विनियोगः ॥ ॐ [३]भूर्भुव॒ः स्व॒ः तत्स॑-

---

१ बृहस्पतिः–कोकिलराजपुत्रस्तु द्रुपदाया ऋषिः स्मृतः ॥ अनुष्टुप् च भवेच्छन्द आपश्चैव तु दैवतम् ॥ २ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत । ततः समुद्रोऽअर्णवः । समुद्रादर्णवादधि संवत्सरोऽअजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ॥ दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः ॥ ३ ॐ देवसवितः प्प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु व्वाचस्प्पतिर्व्वाचं नः स्वदतु ॥ इयं क्षत्रियाणां गायत्रीमन्त्रः । ॐ व्विश्श्वारूपाणिप्प्रतिमुञ्चते कविः प्प्रासावीद्भद्रन्द्विपदे चतुष्प्पदे ॥ व्विनाकमख्यत्सविताव्वरेण्ण्योऽनुप्प्रयाणमुषसोव्विराजति ॥ इयं वैश्यानां गायत्रीमन्त्रः ॥

वि॒तुर्व्वरे॑ण्यं॒भर्ग्गो॑दे॒वस्य॑धीमहि । धियो॒योनः॑प्र॒चोद॑यात् ॥ $\frac{35}{3}$ ॥ ॐ ब्रह्मस्वरूपिणे श्रीसूर्यनारायणाय इदमर्घ्यं दत्तं न मम ॥ एवं पुनर्मन्त्रं पठन् श्रीसूर्याय अर्घत्रयं दद्यात् ।

(१३) अथ प्रायश्चित्तसङ्कल्पः ॥ सङ्कल्पः—सूर्योदयात्प्राग्विहितस्य प्रातःसन्ध्याकर्मणः सूर्यार्घदानस्य चाकरणजनितप्रत्यवायपरिहारार्थं श्रीसूर्यनारायणदेवताप्रीत्यर्थम् "आकृ॒ष्णेन॒" इतिमन्त्रेण सूर्याय चतुर्थार्घप्रदानं करिष्ये ॥ ॐआकृ॒ष्णेन॒रज॑सा॒वर्त्त॑मानोनिवे॒शय॑न्न॒मृत॒म्मर्त्त्य॑ञ्च॥ हि॒र॒ण्ययेन॑सवि॒तार॒थेना॒देवो॒या॑ति॒भुव॑नानि॒पश्य॑न् ॥ $\frac{33}{43}$ ॥ ॐ ब्रह्मस्वरूपिणे श्रीसूर्यनारायणाय इदमर्घ्यं दत्तं न मम ॥ ॐ [1]असावादित्यो ब्रह्म ॥ अनेन मन्त्रेण स्वसमन्तात् प्रदक्षिणवदुदकं प्रक्षिपेत् ॥

(१४) अथ सूर्योपस्थानम्[2] ॥ ॐ उद्वयमुदुत्यमित्येतयोः प्रस्कण्वः ऋषिः । सूर्यो देवता । अनुष्टुब्गायत्र्यौ छन्दसी । चित्रमित्यस्य कुत्साङ्गिरसौ ऋषी । सूर्यो देवता । त्रिष्टुप् छन्दः । तच्चक्षुरित्यस्य दध्यङ्ङाथर्वणौ ऋषी । सविता देवता । पुर उष्णिक् छन्दः । सर्वेषां सूर्योपस्थाने विनियोगः ॥

---

[1] ॐ केशवाय नमः स्वाहा । ॐ नारायणाय नमः स्वाहा । ॐ माधवाय नमः स्वाहा । ॐ गोविन्दाय नमः इत्यनेन हस्तप्रक्षालनम् ॥ **प्राणायाममन्त्रः**—ॐ भूः ॐभुवः ॐ स्वः० इत्यादिमन्त्रेण कुर्यात् ॥ [2] **स्नानसूत्रे**—पुष्पाण्यम्बुमिश्राण्यूर्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षन्नुद्वयमुदुत्यं चित्रं तच्चक्षुरिति ॥ उद्वयन् । उदुत्यम् । चित्रम् । तच्चक्षुः ।

सूर्योपस्थानमन्त्राः ॥ ॐ उद्वयन्तमसस्प्परिस्वः पश्श्यन्तऽउत्तरम् ॥ देवन्देवत्त्रासूर्य्यमगन्मज्ज्योतिरुत्तमम् ॥ २१/२० ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः। दृशेविश्श्वायसूर्य्यम् ॥ चित्रन्देवानामुदगादनीकञ्चक्क्षुर्म्मित्रस्यव्वरुणस्याग्नेः ॥ आप्प्राद्यावापृथिवीऽअन्तरिक्क्षꣳसूर्य्यऽआत्त्माजगतस्त्तस्थुषश्च ॥ तच्चक्क्षुर्द्देवहितम्पुरस्त्ताच्छुक्क्रमुच्चरत् ॥ पश्श्येमशरदः शतञ्जीवेमशरदः शतꣳशृणुयामशरदः शतम्प्रब्ब्रवामशरदः शतमदीनाःस्यामशरदः शतम्भूयश्चशरदः शतात् ॥ २४/३६ ॥

(१५) अथ [1]गायत्रीमन्त्रजपः ॥ सङ्कल्पः– अद्येत्यादि॰ शुभपुण्यतिथौ सर्वपापक्षयार्थं श्रीसवितृसूर्यनारायणस्वरूपिण्या वेदमातुर्गायत्रीदेव्याः प्रीत्यर्थं सव्याहृतिचतुर्विंशतिवर्णात्मकस्य श्रीगायत्रीमन्त्रस्य अमुकसङ्ख्याकं जपमहं करिष्ये ॥ पुनः [2]सङ्कल्पः–तथा च गायत्रीप्रीतये गायत्र्यावाहनं गायत्र्युपस्थानं [गायत्र्या ब्रह्मवसिष्ठविश्वामित्राद्यृषीणां शापविमोचनं गायत्र्यस्त्रोपहरणं] सव्याहृतिगायत्रीमन्त्रस्य च यथाशक्तिन्यासान् गायत्रीध्यानं गायत्रीप्रार्थनां मुद्राप्रदर्शनञ्चैकतन्त्रेणाहं करिष्ये ॥

---

[1] **धर्मसिन्धौ**–"न वा कार्यो न्यासविधेरवैदिकत्वात्" इति गृह्यपरिशिष्टे स्पष्टम्। एतेनाक्षरन्यासपदन्यासादीनां मुद्राप्रदर्शनादिविधेः शापमोचनादिविधेश्च तान्त्रिकत्वेनावैदिकत्वादनावश्यकत्वं वेदितव्यम्। परञ्च मन्त्रदेवतां त्ववश्यमवबोधेत्॥ [2] अष्टोत्तरशतम्। अष्टाविंशतिः। दश। **व्यासः**–अष्टोत्तरशतं नित्यमष्टाविंशतिरेव वा ॥ विधिना दशकं वापि त्रिकालेषु जपेद्बुधः ॥

(१७) अथ गायत्र्यावाहनम् ॥ गायत्रीं त्र्यक्षरां बालां साक्षसूत्रकमण्डलुम् । रक्तवस्त्रां चतुर्हस्तां हंसवाहनसंस्थिताम् ॥ ऋग्वेदस्य कृतोत्सङ्गां सर्वदेवनमस्कृताम् । ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् ॥ आवाहयाम्यहं देवीमायान्तीं सूर्यमण्डलात् । आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ॥ गायत्रि छन्दसां मातर्ब्रह्मयोनि नमोऽस्तु ते ॥ ॐ तेजोसीत्यस्य परमेष्ठी प्रजापतिर्ऋषिः । आज्यं देवता । जगती छन्दः । यजुर्गायत्र्यावाहने विनियोगः ॥ ॐ तेजोसिशुक्क्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ $\frac{१}{३१}$ ॥

(१८) अथ [1]गायत्र्युपस्थानम् ॥ अस्य तुरीयपदस्य विमल ऋषिः । परमात्मा देवता । गायत्री छन्दः । गायत्र्युपस्थाने विनियोगः ॥ ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपद्यसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदोम् ॥

(१९) गायत्र्याः [2]शापविमोचनं [3]गायत्र्यस्त्रोपाहरणञ्च ।

---

[1] **गायत्रीस्वरूपम्** ॥ तत्सवितुरित्यस्य विश्वामित्र ऋषिः । सविता देवता गायत्री छन्दः । वायव्यं बीजम् । चतुर्थं शक्तिः । पञ्चविंशतिर्व्यञ्जनानि कीलकम् । चतुर्थं पदम् । प्रणवो मुखम् । (अग्निर्मुखम्) ब्रह्मा शरः । विष्णुर्हृदयम् । रुद्रः कवचम् । परमात्मा शरीरम् । श्वेतवर्णा साङ्ख्यायनसगोत्रा । षट्स्वराः । सरस्वती जिह्वा । पिङ्गाक्षी त्रिपदा गायत्री । अशेषपापक्षयार्थे जपे विनियोगः ॥

[2] अस्य श्रीब्रह्मशापविमोचनमन्त्रस्य ब्रह्मा ऋषिः । भुक्तिमुक्तिप्रदा ब्रह्मशापविमोचनी गायत्रीशक्तिर्देवता । गायत्री छन्दः । ब्रह्मशापविमोचनार्थे जपे विनियोगः ॥

बहुरूपिणि गायत्रि दिव्ये सन्ध्ये सरस्वति। अजरे अमरे देवि ब्रह्मयोनि नमोऽस्तु ते॥ श्रीब्रह्मशापाद्विमुक्ता भव। श्रीविश्वामित्रशापाद्विमुक्ता भव। श्रीवसिष्ठशापाद्विमुक्ता भव।

(२०) अथ गायत्रीजपः ॥ ॐ प्रणवस्य परब्रह्म ऋषिः। परमात्मा देवता। गायत्री छन्दः। व्याहृतीनां प्रजापतिर्ऋषिः। अग्निवायुसूर्या देवताः। गायत्री छन्दः।

गायत्रीं ब्रह्मेत्युपासीत यद्रूपं ब्रह्मविदो विदुः ॥ तां पश्यन्ति धीराः सुमनसा वाचामग्रतः। ॐ वेदान्तनाथाय विद्महे हिरण्यगर्भाय धीमहि॥ तन्नो ब्रह्म प्रचोदयात्॥ ॐ देवि गायत्रि त्वं ब्रह्मशापाद्विमुक्ता भव॥१॥ अस्य श्रीवसिष्ठशापविमोचनमन्त्रस्य निग्रहानुग्रहकर्ता वसिष्ठ ऋषिः। वसिष्ठानुगृहीता गायत्री शक्तिर्देवता। विश्वोद्भवा गायत्री छन्दः। वसिष्ठशापविमोचनार्थे जपे विनियोगः॥ ॐ सोऽहमर्कमयं ज्योतिरात्मज्योतिरहं शिवः। आत्मज्योतिरहं शुक्रः सर्वज्योती रसोऽस्म्यहम्॥ इत्युक्त्वा "योनिमुद्रां" प्रदर्श्य ॐ देवि गायत्रि त्वं वसिष्ठशापाद्विमुक्ता भव॥२॥ अस्य श्रीविश्वामित्रशापविमोचनमन्त्रस्य नूतनसृष्टिकर्ता विश्वमित्रानुगृहीता गायत्रीशक्तिर्देवता। वाग्देहा गायत्री छन्दः। विश्वामित्रशापविमोचनार्थे जपे विनियोगः॥ ॐ गायत्री भजाम्यग्निमुखीं विश्वगर्भां यदुद्भवाः॥ देवाश्चक्रिरे विश्वसृष्टिं तां कल्याणीमिष्टकरीं प्रपद्ये॥ यन्मुखान्निःसृतोऽखिलवेदगर्भः। शापयुक्ता तु गायत्री सफला न कदाचन॥ शापादुत्तारिता सा तु भुक्तिमुक्तिफलप्रदा॥३॥ २ **गायत्र्यस्त्रोपाहरणम्।** अस्य श्रीगायत्र्यस्त्रोपाहरणमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः। ऋग्यजुःसामानि छन्दांसि। क्रियामयवपुः परात्परशक्तिर्देवता। हं बीजम्। सं शक्तिः। सोऽहं कीलकम्। अस्त्रोपसंहरणार्थे जपे विनियोगः। ॐ ब्रह्मतेजोज्वालामालिनीं देवीं ह्रां अङ्गुष्ठाभ्यां नमः। ॐ विष्णुतेजोज्वालामालिनीं देवीं ह्रीं तर्जनीभ्यां नमः। ॐ रुद्रतेजोज्वालामालिनीं देवीं ह्रुं मध्यमाभ्यां नमः। ॐ अग्नितेजोज्वालामालिनीं देवीं ह्रैं अनामिकाभ्यां नमः। ॐ ज्ञानतेजोज्वालामालिनीं देवीं ह्रौं कनिष्ठिकाभ्यां नमः। ॐ सत्यं तेजोज्वालामालिनीं देवीं ह्रः करतलकरपृष्ठाभ्यां नमः॥ बहुरूपिणि गायत्रि दिव्ये सन्ध्ये सरस्वति। अजरे अमरे देवि ब्रह्मयोनि नमोऽस्तु ते॥

ॐ तत्सवितुरित्यस्य विश्वामित्र ऋषिः । सविता देवता । गायत्री छन्दः । सर्वपापक्षयार्थे गायत्रीमन्त्रजपे विनियोगः ।

(२१) अथ ॐकारव्याहृतिसहितगायत्रीमन्त्रन्यासाः । ओङ्कारस्य ब्रह्मा ऋषिः । अग्निर्देवता । गायत्री छन्दः । प्रथमस्वरो बीजम् । पञ्चमः स्वरः शक्तिः । शिवं कीलकम् । विद्युद्वर्णम् । न्यासे विनियोगः ॥ अथाङ्गुष्ठादिन्यासाः— ॐ गोविन्दाय नमः अङ्गुष्ठाग्रे ॥ ॐ महीधराय नमः तर्जन्यग्रे । ॐ हृषीकेशाय नमः मध्यमायाम् । ॐ त्रिविक्रमाय नमः अनामिकायाम् । ॐ विष्णवे नमः कनिष्ठिकायाम् । ॐ माधवाय नमः करमध्ये । ॐ हरये नमः करपृष्ठे । ॐ जनार्दनाय नमः मणिबन्धे ॥ अथ व्याहृतिसहितगायत्रीषडङ्गन्यासाः ॥ ॐ भूः अङ्गुष्ठाभ्यां नमः । ॐ भुवः तर्जनीभ्यां नमः । ॐ स्वः मध्यमाभ्यां नमः ॥ ॐ तत्त्सवितुर्व्वरेण्यम् अनामिकाभ्यां नमः । ॐ भर्ग्गो देवस्य धीमहि कनिष्ठिकाभ्यां नमः । ॐ धियो यो नः प्रचोदयात् करतलकरपृष्ठाभ्यां नमः ॥ ॐ भूः हृदयाय नमः । ॐ भुवः शिरसे स्वाहा । ॐ स्वः शिखायै वषट् । ॐ तत्त्सवितुर्व्वरेण्यं कवचाय हुम् । ॐ भर्ग्गो देवस्य धीमहि नेत्रत्रयाय वौषट् । ॐ धियो यो नः प्रचोदयात् अस्त्राय फट् ॥ अथ प्रणवन्यासाः ॥ ॐ अकारं नाभौ । ॐ उकारं हृदये । ॐ मकारं मूर्धनि ॥ अथ व्याहृतिन्यासाः ॥ ॐ भूः पादयोः । ॐ भुवः जान्वोः । ॐ स्वः ऊर्वोः । ॐ महः जठरे । ॐ जनः कण्ठे । ॐ तपः मुखे । ॐ

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २ २३६४

सत्यम् शिरसि ॥ अथ अक्षरन्यासाः ॥ ॐ तकारं पादाङ्गुष्ठयोः । ॐ सकारं गुल्फयोः । ॐविकारं जङ्घयोः । ॐ तुकारं जान्वोः । ॐ वकारम् ऊर्वोः । ॐ रेकारं गुदे । ॐ णिकारं लिङ्गे । ॐ यकारं कट्याम् । ॐ भकारं नाभौ । ॐ गोकारम् उदरे ॥ ॐ देकारं स्तनयोः । ॐ वकारं हृदये । ॐ स्यकारं कण्ठे । ॐ धीकारं मुखे । ॐ मकारं तालुदेशे । ॐ हिकारं नासिकाग्रे । ॐ धिकारं नेत्रयोः । ॐ योकारं भ्रुवोर्मध्ये । ॐ योकारं ललाटे । ॐनःकारं पूर्वमुखे । ॐ प्रकारं दक्षिणमुखे । ॐ चोकारं पश्चिममुखे । ॐ दकारम् उत्तरमुखे । ॐ याकारं मूर्ध्नि । ॐतूकारं व्यापकमुद्रया सर्वतो न्यसेत् ॥ अथ शिरोन्यासाः॥ ॐ आपो गुह्ये । ॐ ज्योतिश्चक्षुषि । ॐ रसो वक्त्रे । ॐ अमृतं जानुनि । ॐ ब्रह्म हृदये । ॐ भूः पादयोः । ॐ भुवः नाभौ । ॐ स्वः ललाटे । ॐकारं मूर्ध्नि ॥

(२२) [१]अथ गायत्र्या ध्यानम् ॥ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम् ॥ गायत्रीं वरदाभयाङ्कुशकशाः शुभ्रं कपालं गुणं शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥ बहुरूपिणि गायत्रि दिव्ये सन्ध्ये सरस्वति ॥ अजरे अमरे देवि ब्रह्मयोनि नमोऽस्तु ते ॥

---

[१] प्रातःसन्ध्याध्यानम् ॥ हंसारूढां शिताब्जे त्वरुणमणिलसद्भूषणां साष्टनेत्रां वेदाख्यामक्षमालां स्रुवमथ कमलं दण्डमप्यादधानाम् ॥ ध्यायेद्दोर्भिश्चतुर्भिस्त्रिभुवनजननीं पूर्वसन्ध्यादिवन्द्यां गायत्रीमृक्सवित्रीमभिनववयसं मण्डले चण्डरश्मेः ॥

(२३)[1]अथ गायत्रीमन्त्रजपादौ चतुर्विंशतिमुद्राप्रदर्शनम् ।

सुमुखं सम्पुटं चैव विततं विस्तृतं तथा। द्विमुखं त्रिमुखं चैव चतुःपञ्चमुखं तथा । षण्मुखम्


१
सुमुखम्


२
सम्पुटम्


३
विततम्


४
विस्तृतम्


५
द्विमुखम्


६
त्रिमुखम्


७
चतुर्मुखम्


८
पञ्चमुखम्


९
षण्मुखम्

---

[1] **तन्त्रसारे**–योजनात्सर्वदेवानां द्रावणात्पापसंहतेः । तस्मान्मुद्रेति सा ख्याता सर्वकामार्थसाधिनी इति मुद्राफलम् ॥

अधोमुखश्चैव व्यापकाञ्जलिकं तथा । शकटं यमपाशञ्च-ग्रथितश्चोन्मुखोन्मुखम् । प्रलम्बं मुष्टिकश्चैव मत्स्यः



२०

अधोमुखम्



२१

व्यापकाञ्जलिकम्



२२

शकटम्



२३

यमपाशम्



२४

ग्रन्थितम्



२५

उन्मुखोन्मुखम्



२६

प्रलम्बम्



२७

मुष्टिकम्



२८

मत्स्यः

कूर्मो वराहकः। सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा ।
एता मुद्रा न जानाति गायत्री निष्फला भवेत् ॥



कूर्मः



वराहकम्



सिंहाक्रान्तम्



महाक्रान्तम्



मुद्गरम्



पल्लवम्

ततो[1] वस्त्रेण करमाच्छाद्य, गोमुखीं गृहीत्वाऽनामिकामध्यपर्वत आरभ्य तर्जन्या मूलपर्यन्तं दशसु पर्वसु वा गायत्रीमन्त्रं नाभौ करं धृत्वा तिष्ठन् जपेत् ॥

गायत्रीमन्त्रः ॥ ॐ भूर्भुवः स्वः । तत्सवितुर्वरेण्यं

---

[1] वस्त्रेणाच्छाद्य तु करं दक्षिणं यः सदा जपेत् ॥ तस्य स्यात्सफलं जाप्यं तद्धीनमफलं भवेत् ॥ मध्यमादिद्वयं पर्व जपकाले तु वर्जयेत् ॥ तं वै मेरुं विजानीयात्कथितं ब्रह्मणा पुरा ॥ अङ्गुलीर्न वियुज्येत किञ्चिदाकुञ्चिते तले। अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः । आरभ्यानामिकामध्यं पर्वाण्युक्तान्यनुक्रमात् ॥

भर्गोदेवस्यधीमहि। धियो योनःप्रचोदयात् ॐ ॥ $\frac{३}{३८}$ ॥ यथाशक्ति जपं समाप्य षडङ्गन्यासान् कुर्यात् ॥

(२४) अथ षडङ्गन्यासाः ॥ ॐ भूः हृदयाय नमः ॥ ॐ भुवः शिरसे स्वाहा। ॐ स्वः शिखायै वषट् । ॐ तत्सवितुर्वरेण्यम् कवचाय हुम् । ॐ भर्गोदेवस्यधीमहि नेत्रत्रयाय वौषट् । ॐ धियोयोनःप्रचोदयात् अस्त्राय फट् । इति षडङ्गन्यासाः ॥

तर्जनीमूलपर्यन्तं जपेद्दशसु पर्वसु ॥ मध्यमाङ्गुलिमूले तु यत्पर्वद्वितयं भवेत् ॥ तं वै मेरुं विजानीयाज्जाप्ये तं नातिलङ्घयेत् ॥ अनामामूलमारभ्य कनिष्ठादित एव च ॥ तर्जनीमध्यपर्यन्तमष्टपर्वसु सञ्जपेत् ॥ अनामिकात्रयं पर्व कनिष्ठा च त्रिपर्विका ॥ मध्यमायाश्च त्रितयं तर्जनीमूलपर्वणि ॥ तर्जन्यग्रे तथा मध्ये यो जपेत्स तु पापकृत् ॥ अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च ॥ मध्यमामूलपर्यन्तमष्टपर्वसु सञ्जपेत् ॥ **याज्ञवल्क्यः**–ध्यायेत्तु मनसा मन्त्रं जिह्वौष्ठौ न विचालयेत् ॥ न कम्पयेच्छिरो ग्रीवां दन्तान्नैव प्रकाशयेत् ॥ **धर्मप्रवृत्तौ**–प्रातर्नाभौ करं धृत्वा मध्याह्ने हृदि संस्थितम् ॥ सायं जपति नासाग्रे जपस्तु त्रिविधः स्मृतः ॥ **मनुः**–पूर्वां सन्ध्यां जपँस्तिष्ठेत्सावित्रीमार्कदर्शनात्। पश्चिमां तु समासीनः सम्यगृक्षविभावनात् ॥ अयं क्षत्रियानां गायत्रीमन्त्रः–ॐदेवसवितः प्प्रसुवयज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु व्वाचस्पतिर्व्वाचन्नः स्वदतु ॥ अयं वैश्यानां गायत्रीमन्त्रः–व्विश्वारूपाणि प्प्रतिमुञ्चते कविः प्प्रासावीद्भद्रन्द्विपदेचतुष्प्पदे ॥ विनाकमक्ख्यत्सविताव्वरेण्योऽनुप्प्रयाणमुषसोव्विराजति ॥ **गायत्रीजपफलं तत्र बृहद्यमः**–न तथा वेदजपतः पापं निर्दहति द्विजः। यथा सावित्रीजपतः सर्वपापैः प्रमुच्यते ॥ **नृसिंहपुराणे**–त्रिविधो जपयज्ञः स्यात्तस्य भेदं निबोधत। वाचिकश्च उपांशुश्च मानसस्त्रिविधः स्मृतः ॥ **विश्वामित्रः**–मन्त्रमुच्चारयेद्वाचा वाचिकोऽयं जपः स्मृतः ॥ अपरैर्न श्रुतः किञ्चित्स उपांशुर्जपः स्मृतः ॥ शब्दार्थचिन्तनं भूप कथ्यते मानसो जपः ॥ ॐकारं पूर्वमुच्चार्य भूर्भुवःस्वस्तदनन्तरम् ॥ गायत्रीं प्रणवं चान्ते जप एष उदाहृतः ॥

(२५) अथ जपान्ते मुद्राप्रदर्शनम्॥ सुरभिर्ज्ञानवैराग्ये योनिः



सुरभिः



२ ज्ञानम्



३ वैराग्यम

शङ्खोऽथ पङ्कजम्। लिङ्गं निर्वाणकञ्चैव जपान्तेऽष्टौ प्रदर्शयेत्।



योनिः



शंखः



पङ्कजम



लिङ्गम्



निर्वाणम

(२६) अथ प्रदक्षिणामन्त्रः ॥ ॐ विश्वतश्चक्षुरिति मन्त्रस्य विश्वकर्मा भौवन ऋषिः । विश्वकर्मा देवता । त्रिष्टुप्छन्दः श्रीसूर्यनारायणस्य प्रदक्षिणायां विनियोगः ॥ ॐ विश्वतश्चक्षुरुतविश्श्वतोमुखोविश्श्वतोबाहुरुतविश्श्वतस्प्पात् । सम्बाहुब्भ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ ॥ १९/१७ ॥ एकचक्रो रथो यस्य दिव्यः कनकभूषितः । स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥

(२७) अथ दिग्देवतानां सन्ध्यायाश्च नमस्कारः ॥ ॐ प्राच्यै दिशे इन्द्राय नमः । ॐ आग्नेय्यै दिशे अग्नये नमः । ॐ दक्षिणायै दिशे यमाय नमः । ॐ नैर्ऋत्यै दिशे निर्ऋतये नमः । ॐ पश्चिमायै दिशे वरुणाय नमः । ॐ वायव्यै दिशे वायवे नमः । ॐ उदीच्यै दिशे सोमाय नमः । ॐ ईशान्यै दिशे ईशानाय नमः । ॐ ऊर्ध्वायै दिशे ब्रह्मणे नमः । ॐ अधो दिशे अनन्ताय नमः । ॐ सन्ध्यायै नमः । ॐ सावित्र्यै नमः । ॐ गायत्र्यै नमः । ॐ सरस्वत्यै नमः । ॐ सर्वाभ्यो देवताभ्यो नमः ॥

(२८) अथ जपनिवेदनम् ॥ ॐ देवागातुविद० इति मन्त्रस्य मनसस्पतिर्ऋषिः । वातो देवता । विराट्छन्दः । जपनिवेदने विनियोगः ॥ ॐ देवा गातुविदो गातुंवित्त्वागातुमित । मनसस्प्पतऽइमन्देवयज्ञꣳस्वाहावातेधाः ॥ २१/८ ॥

अर्पणम्— मया प्रातःसन्ध्याङ्गभूतामुकसङ्ख्याकगायत्री-

मन्त्रजपकर्मणा कृतेन भगवान् ब्रह्मस्वरूपी श्रीसूर्यनारायणः प्रीयतां न मम ॥

(२९) अथ गायत्र्या विसर्जनम् ॥ उत्तरे शिखरे इत्यस्य कश्यप ऋषिः । सन्ध्या देवता । अनुष्टुप्छन्दः । सन्ध्याविसर्जने विनियोगः ॥ उत्तरे शिखरे जाता भूम्यां पर्वतमस्तके । ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम् ॥ विसर्जिता वेदमातर्द्विजानां पापनाशिनि । सर्वकामप्रदे नित्ये गच्छ देवि नमोऽस्तु ते ॥ यदक्षरपदभ्रष्टं मात्राहीनञ्च यद्भवेत् । तत्सर्वं क्षम्यतां देवि काश्यपप्रियवादिनि ॥

(३०) [2]अथ गोत्रोच्चारपूर्वकाभिवादनम् ॥ [3]अमुकप्रवरान्वितः अमुकगोत्रोत्पन्नः शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनवाजसनेयशाखाध्यायी [3]अमुकशर्मा अहं भो आचार्य त्वाम् अभिवादयामि । भो वैश्वानर त्वाम् अभिवादयामि । भो सूर्याचन्द्रमसौ युवामभिवादयामि । भो याज्ञवल्क्यप्रभृतयः सर्वे ऋषयः युष्मान् अभिवादयामि ॥ श्रीभगवन्नमस्कारः ॥ आकाशात्पतितं तोयं यथा गच्छति सागरम् । सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥

---

[1] **मदनपारिजाते**–देवा गातुविदो मन्त्रेण कुर्याज्जपनिवेदनम् । प्रातःसंध्याङ्गभूतेन गायत्र्या जपितेन च । यथासङ्ख्येन जप्तेन ब्रह्मा मे प्रीयतां रविः ॥

[2] अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ॥ चत्वारि तस्य वर्धन्ते आयुः कीर्तिर्यशो बलम् ॥ [3] गौतमौतिथ्याङ्गिरसेतित्रिप्रवरान्वितगौतमसगोत्रोत्पन्नः शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनवाजसनेयशाखाध्यायी ईश्वरलालशर्मा अहं भो वैश्वानर त्वामभिवादयामि । एवं स्वगोत्रोच्चारपूर्वकमभिवादनं सर्वेषां विधेयम् ॥

(३१) अथाचमनम् ॥ ॐ केशवाय नमः स्वाहा ॥ ॐ नारायणाय नमः स्वाहा ॥ ॐ माधवाय नमः स्वाहा ॥ ॐ गोविन्दाय नमः इति हस्तं प्रक्षालयेत् ॥ ईश्वरस्तुतिः– यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ आसत्यलोकात्पातालादालोकालोकपर्वतात् । ये सन्ति ब्राह्मणा देवास्तेभ्यो नित्यं नमो नमः ॥ ॐ विष्णवे नमः ॥ ३ ॥

(३२) शिखामुक्तिः– ब्रह्मपाशसहस्रेण रुद्रशूलशतेन च । विष्णुचक्रसहस्रेण शिखामुक्तिं करोम्यहम् ॥ पुनस्तूष्णीं शिखां बध्नीयात् ॥ तत्तत्कर्मणि धृतान् कुशपवित्रादिदर्भान् शुद्धस्थले निक्षिपेत् ॥ हस्ते जलं गृहीत्वा । मया कृतेनानेन प्रातःसन्ध्योपासनाख्येन कर्मणा ब्रह्मस्वरूपी भगवान् श्रीपरमेश्वरः प्रीयतां न मम ॥

प्रातःसन्ध्याङ्गभूतं गायत्रीतर्पणम् ॥ ताम्रपात्रे शुद्धं जलं पूरयित्वा तस्मिन्गन्धादि प्रक्षिप्याञ्जलिभ्यां तर्पणं कुर्यात् ॥ हस्ते जलमादाय । गायत्र्या विश्वामित्र ऋषिः । गायत्री छन्दः । सविता देवता । गायत्रीतर्पणे विनियोगः ॥ ॐ भूः ऋग्वेदं तर्पयामि । ॐ भुवः यजुर्वेदं तर्पयामि । ॐ स्वः सामवेदं तर्पयामि । ॐ महः अथर्ववेदं तर्पयामि । ॐ जनः इतिहासपुराणानि तर्पयामि । ॐ तपः सर्वागमं

---

१ इदं तर्पणं कृताकृतमतः क्षेपकं बोद्धव्यम् ।

तर्पयामि । ॐ सत्यं सत्यलोकं तर्पयामि । ॐ भूः भूर्लोकं तर्पयामि । ॐ भुवः भुवर्लोकं तर्पयामि । ॐ स्वः स्वर्लोकं तर्पयामि । ॐ भूः एकपदां तर्पयामि । ॐ भुवः द्विपदां तर्पयामि । ॐ स्वः त्रिपदां तर्पयामि । ॐ भूर्भुवः स्वः चतुष्पदां तर्पयामि । ॐ उषसीं तर्पयामि । ॐ गायत्रीं तर्पयामि । ॐ सावित्रीं तर्पयामि । ॐ वेदमातरं तर्पयामि । ॐ पृथिवीं तर्पयामि । ॐ अजां तर्पयामि । ॐ कौशिकीं तर्पयामि । ॐ साङ्कृतीं तर्पयामि । ॐ सर्वजितं तर्पयामि । इति तर्पणम् ॥ मृत्तिकावन्दनम् ॥ ॐ भूर्भुवः स्वः ॐ तत्त्सवि॒तुः० स्वः भुवः भूः ॐ । ॐ विष्णवे नमः ॥ ३ ॥

॥ इति प्रातःसन्ध्याप्रयोगः समाप्तः ॥

अथ कातीयानां[1] परिशिष्टोक्तः प्रातःसन्ध्याप्रयोगः ॥

भस्मधारणम्– दक्षिणहस्ते भस्म गृहीत्वा वामहस्तेनाच्छाद्याभिमन्त्रयेत् । ॐ अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वꣳहवा इदं भस्म मन एतानि चक्षूꣳषि भस्मानि। इत्यभिमन्त्र्य जलं प्रक्षिप्य सम्मर्द्य धारयेत् ॥ भस्मधारणमन्त्रः– ॐ त्र्य॑म्बकँ-य्यजामहेसुग॒न्धिंपु॑ष्टि॒वर्द्धनम् । उ॒र्वा॒रु॒कमि॑व॒बन्ध॑नान्मृ॒त्त्योर्म्मुक्षीय॒मामृता॑त् ॥ $\frac{३}{६०}$ ॥ ॐ त्र्या॒यु॒षञ्ज॒मद॑ग्नेः क॒श्श्यप॑स्यत्र्या॒यु॒षम् । यद्दे॒वेषु॑त्र्या॒यु॒षन्तन्नो॑ऽअस्तुत्र्या॒यु॒षम् ॥ $\frac{३}{६२}$ ॥ इति ललाटे ग्रीवायां दक्षिणेंऽसे हृदि चेत्याद्यङ्गेषु धारयेत् ॥

---

[1] अस्मिन्सन्ध्याप्रयोगे मन्त्राणां विनियोगास्तत्र तत्रानिर्दिष्टास्तत्केवलं संक्षेपार्थमेक सन्ध्यायाः ॥

प्राणायाममन्त्रः–ॐभूः ॐभुवः ॐस्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् । ॐतत्त्सवितुर्व्वरेण्यम्भर्ग्गो देवस्य धीमहि । धियोयोनःप्रचोदयात् ॥$\frac{३६}{३}$॥ ॐआपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवःस्वरोम् ॥ एवं प्राणायामं कुर्यात् ॥

आचमनम्– ॐ भूः[1] । ॐ भुवः । ॐ स्वः । इति त्रिराचम्य दक्षहस्ते जलं गृहीत्वा शरीराद्यङ्गेषूपस्पर्शं कुर्यात् ॥

न्यासाः– ॐ वाङ्मऽआस्येऽस्तु इति मुखे । ॐ नसोर्मे प्राणोऽस्तु इति दक्षिणवामनासापुटयोः । ॐ अक्ष्णोर्मे चक्षुरस्तु इति दक्षिणवामनेत्रयोः । ॐ कर्णयोर्मे श्रोत्रमस्तु इति दक्षिणवामकर्णयोः । ॐ बाह्वोर्मे बलमस्तु इति दक्षिणवामबाह्वोः । ॐ ऊर्वोर्मेऽओजोऽस्तु । इति दक्षिणवामोर्वोः । ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु । इति शिरःप्रभृतिपादान्तेषु सर्वाङ्गेषु । इति उपस्पर्शः ॥

शिखाबन्धनम्–ॐ मानस्त्तोकेतनयेमानऽआयुषिमानो गोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोवधीर्हविष्म्मन्तःसदमित्त्वाहवामहे ॥$\frac{१६}{१६}$॥ इति शिखां बध्नीयात् ॥

आचमनम् । ॐ भूः स्वाहा । ॐ भुवः स्वाहा । ॐ स्वः स्वाहा ॥ इत्याचम्य हस्तं प्रक्षाल्य दक्षिणहस्ते जलं गृहीत्वा । ॐअपहताऽअसुरा रक्षाꣳसि व्वेदिषदः । इति पठित्वा स्वस्य परितः प्रादक्षिण्येन जलं निक्षिपेत् ॥

---

[1] आमागन्यशसा सꣳसृज वर्चसा । तम्मा कुरुप्रियं प्रजानामधिपतिं पशूनामरिष्टं तनूनाम् ॥ अनेनात्याचसनं क्रियते । ॐ भूः पुनातु । ॐ भुवः पुनातु । ॐ स्वः पुनातु । एतैरप्याचमनं क्रियते ।

सङ्कल्पः— अद्येत्यादि० शुभपुण्यतिथौ ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातःसन्ध्योपासनमहं करिष्ये।

अम्बुप्राशनम्— दक्षिणहस्ते जलं गृहीत्वा । ॐ सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यद्रात्र्या पापमकार्षम्। मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु । यत्किञ्चिद्दुरितं मयि । इदमहं माममृतयोनौ। सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ इत्याचम्य पुनर्द्विवारं ॐ स्वाहा इत्यनेनाचम्य मार्जनं कुर्यात् ॥

अथ मार्जनम्— ॐआपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन । महेरणाय चक्षसे ॥ ५०/११ ॥ योवः शिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः ॥ ५१/११ ॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः॥ ५२/११॥

अथाघमर्षणम्॥ दक्षिणहस्ते जलं गृहीत्वा॥ ॐ द्रुपदादिवमुमुचानःस्विन्नः स्नातोमलादिव । पूतम्पवित्रेणेवाज्ज्यमापःशुन्धन्तुमैनसः ॥ २०/२० ॥ इत्यनेन जलमाघ्राय स्ववामभागे निक्षिपेत् ॥

अथ सूर्यार्घः— एकस्मिन्पात्रे गन्धाक्षतपुष्पसहितं जलं गृहीत्वा॥ ॐभूर्भुवःस्वः। तत्सवितुर्वरेण्यंभर्गोदेवस्य धीमहि । धियोयोनःप्रचोदयात् ॥ ३५/३ ॥ ब्रह्मस्वरूपिणे सूर्यनारायणाय इदमर्घ्यं दत्तं न मम। एवमर्घत्रयं दद्यात् ॥

ततः प्रातःसन्ध्यायाः कालातिक्रमदोषपरिहारार्थं चतु-

र्थम् अर्घं दद्यात् ॥ ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्श्यन् ॥$\frac{३३}{४३}$॥ प्रातःसन्ध्यायाः कालातिक्रमजनितदोषपरिहारार्थं ब्रह्मस्वरूपिणे सूर्यनारायणाय इदमर्घ्यं दत्तं न मम ।

अथ सूर्योपस्थानम् । वामदक्षिणहस्तयोर्गन्धाक्षतपुष्पाणि गृहीत्वा ऊर्ध्वबाहुः सूर्योपस्थानं कुर्यात् ॥ ॐ उद्वयन्तमसस्परिस्वः पश्श्यन्तऽउत्तरम् । देवन्देवत्रा सूर्य्यमगन्म ज्योतिरुत्तमम् ॥$\frac{३०}{२१}$॥ उदुत्त्यञ्जातवेदसन्देवंवहन्तिकेतवः । दृशेविश्वायसूर्य्यम् ॥ $\frac{८}{४१}$ ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः । आप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यआत्माजगतस्तस्थुषश्च ॥ $\frac{४}{६}$ ॥ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् । पश्श्येमशरदः शतञ्जीवेमशरदः शतꣳशृणुयाम शरदः शतम्प्रब्रवामशरदःशतमदीनाःस्यामशरदः शतम्भूयश्चशरदः शतात् ॥ $\frac{३६}{२४}$ ॥

गायत्रीजपः—अद्येत्यादि० शुभपुण्यतिथौ श्रीसूर्यनारायणप्रीत्यर्थं सव्याहृतिचतुर्विंशतिवर्णात्मकस्य गायत्रीमन्त्रस्य अमुकसङ्ख्याकं जपमहं करिष्ये ॥ यथाशक्ति अष्टोत्तरशतम् अष्टाविंशति दशवारं वा गायत्रीमन्त्रं जपेत् । ततो हस्ते जलं गृहीत्वा । अनेन यथाशक्ति गायत्रीजपकर्मणा कृतेन ब्रह्मस्वरूपी सविता सूर्यनारायणः प्रीयतां न मम ॥

॥ इति कातीयानां परिशिष्टोक्तः प्रातःसन्ध्याप्रयोगः ॥

॥ श्रीशिवपञ्चायतनपूजाप्रयोगः ॥

अथ पञ्चायतनदेवतास्थापनप्रकारः ॥

श्रीशिवपञ्चायतन.	श्रीविष्णुपञ्चायतन.
विष्णु. २ सूर्य. ३ शिव. १ देवी. ५ गणेश. ४	शिव. ३ गणेश. २ विष्णु. १ देवी. ५ सूर्य. ४

श्रीसूर्यपञ्चायतन.	श्रीदेवीपञ्चायतन.	श्रीगणेशपञ्चायतन.
शिव. २ गणेश. ३ सूर्य. १ देवी. ५ विष्णु. ४	विष्णु. २ शिव. ३ देवी. १ सूर्य. ५ गणेश. ४	विष्णु. २ शिव. ३ गणेश. १ देवी. ५ सूर्य. ४

श्रीगणेशाय नमः ॥ कर्ता प्रातःकाले मङ्गलं स्नानं कृत्वा अहते अधरीयोत्तरीये प्रक्षालिते वा शुद्धे वस्त्रोपवस्त्रे

---

१ **नारदपुराणे**–स्नानागारं दिशि प्राच्यामाग्नेय्यामग्निमन्दिरम् ॥ अवाच्यां शयनागारं नैर्ऋत्यां वस्त्रमन्दिरम् ॥ प्रतीच्यां भोजनागारं वायव्यां पशुमन्दिरम् ॥ भाण्डकोशं तूत्तरस्यामैशान्यां देवमन्दिरम् ॥ देवानां हि मुखं कार्यं पश्चिमायां सदा बुधैः ॥ २ **बोपदेवः**–शम्भौ मध्यगते हरीनहरभूदेव्यो, हरौ शङ्करे भास्येनागसुता, रवौ हरगणेशाजाम्बिकाः स्थापिताः। देव्यां विष्णुहरैकदन्तरवयो, लम्बोदरेऽजेश्वरेनार्योः शङ्करभागतोऽतिसुखदा व्यस्तास्तु ते हानिदाः॥ **शिवपञ्चायतनम्**–मध्ये शिवः ऐशान्यां विष्णुः। आग्नेय्यां सूर्यः। नैऋत्यां गणेशः। वायव्यां दुर्गा॥ **गणेशपञ्चायतनम्**–मध्ये गणेशः। ऐशान्यां विष्णुः। आग्नेय्यां शङ्करः। नैर्ऋत्यां सूर्यः। वायव्यां दुर्गा। **विष्णुपञ्चायतनम्**–मध्ये विष्णुः। ऐशान्यां शङ्करः। आग्नेय्यां गणेशः। नैर्ऋत्यां सूर्यः। वायव्यां दुर्गा ॥ **देवीपञ्चायतनम्**–मध्ये दुर्गा। ऐशान्यां विष्णुः। आग्नेय्यां शङ्करः। नैर्ऋत्यां गणेशः। वायव्यां सूर्यः ॥

[1]श्वेते धृत्वोपलिप्ते शुद्धदेशे गृहे श्रीपर्ण्यादियज्ञियवृक्षकाष्ठनिर्मिते दारुपीठे कुशकम्बलाद्यन्यतरास्तृते शुभासने यज्ञो[2]पवीती प्राङ्मुख उदङ्मुखो वोपविश्य प्रातःसन्ध्यां कृत्वा स्वेष्टदेवस्य (अमुकपञ्चायतनदेवतानां) पूजनं कुर्यात्॥

तत्रादौ दक्षिणे शिखाबन्धनम्। हस्ते जलमादाय। मानस्तोक० इति मन्त्रस्य कुत्स ऋषिः। जगती च्छन्दः। एको रुद्रो देवता शिखाबन्धने विनियोगः॥ ॐमानस्तोकेतन

सूर्यपञ्चायतनम्–मध्ये सूर्यः। ऐशान्यां शङ्करः। आग्नेय्यां गणेशः। नैर्ऋत्यां विष्णुः। वायव्यां दुर्गा॥ एवं ते ते देवाः स्थाप्याः॥ यदि व्यत्ययेन पूजिताश्चेत् ते स्वस्वस्थानवर्जिता देवाः शोकदुःखभयप्रदा भवन्ति॥ **वाचस्पतिः**–आदित्यं गणनाथञ्च देवीं रुद्रञ्च केशवम्॥ पञ्चदैवत्यमित्युक्तं सर्वकर्मसु पूजयेत्॥ **ज्ञानमालायाम्**॥ **गणेशपञ्चायतनम्**–हेरम्बं तु यदा मध्ये ऐशान्यामच्युतं यजेत्॥ आग्नेय्यां पञ्चवक्त्रं तु नैर्ऋत्यां द्युमणिं यजेत्। वायव्यामम्बिकाञ्चैव यजेन्नित्यमतन्द्रितः। **शिवपञ्चायतनम्**–यद्वा तु शङ्करं मध्ये ऐशान्यां श्रीपतिं यजेत्॥ आग्नेय्याञ्च तथा हंसं नैर्ऋत्यां पार्वतीसुतम्॥ वायव्याञ्च सदा पूज्या भवानी भक्तवत्सला॥ **विष्णुपञ्चायतनम्**–यदा मध्ये तु गोविन्दमीशान्यां शङ्करं यजेत्॥ आग्नेय्यां गणनाथञ्च नैर्ऋत्यां तपनं तथा। वायव्यामम्बिकाञ्चैव यजेन्नित्यं समाहितः॥ **देवीपञ्चायतनम्**–भवानीं तु यदा मध्ये ऐशान्यां माधवं यजेत्॥ आग्नेय्यां पार्वतीनाथं नैर्ऋत्यां गणनायकम्॥ प्रद्योतनं तु वायव्यामाचार्यस्तु प्रपूजयेत्॥ **श्रीसूर्यपञ्चायतनम्**–सहस्रांशुर्यदा मध्ये ऐशान्यां पार्वतीपतिम्॥ आग्नेय्यामेकदन्तं च नैर्ऋत्यामच्युतं तथा॥ वायव्यां पूजयेद्देवीं भोगमोक्षैकभूमिकाम्॥ स्वस्थानवर्जिता देवाः शोकदुःखभयप्रदाः॥

[1] ब्राह्मणस्य सितं वस्त्रं माञ्जिष्ठं नृपतेः स्मृतम्। पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते इति **मनुः**॥ [2] **कात्यायनः**–सदोपवीतिना भाव्यं सदा बद्धशिखेन च। विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्॥

ये॒मान॒ऽआ॑युषि॒मानो॒गोषु॒मानो॒ऽअश्श्वे॑षुरीरिषꣳ ॥ मानो॑व्वी॒रान्न्रु॑द्रभा॒मिनो॑व्वधीर्ह॒विष्म्म॑न्त॒ꣳ सद॒मित्त्वा॑हवामहे ॥ १६/१६ ॥ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने। तिष्ठ देवि शिखाबन्धे चामुण्डे चापराजिते ॥ विष्णोर्नामसहस्रैस्तु शिखाबन्धं करोम्यहम् ॥ इति मन्त्रेण शिखां[1] बध्नीयात् ॥ ततः स्वदक्षिणवामकरयोः कुशपवित्रं धारयेत् ॥ ॐप॒वित्रे॑स्त्थो व्वैष्ण॒व्व्यौ॑सवि॒तुर्व्वः॑प्प्रस॒वऽउत्पु॑ना॒म्म्यच्छि॑द्द्रेणप॒वित्रे॑ण॒सूर्य्य॑स्यर॒श्म्मिभिः॑ ॥ १२/१ ॥ तस्य॑ते पवित्रपते प॒वित्र॑पूतस्य॒ यत्का॑मꣳपु॒नेतच्छ॑केयम् ॥ ५/४ ॥ अनामामूलदेशेऽथ वामदक्षिणहस्तयोः। पवित्रं धारयाम्यद्य कौशं वा हेमनिर्मितम् ॥ यथा वज्रं सुरेन्द्रस्य यथा चक्रं हरेस्तथा। त्रिशूलं च त्रिनेत्रस्य तथा मम पवित्रकम् ॥ इति स्वदक्षिणवामकरयोरनामिकामूलदेशे धारयेत् ॥

ततः स्वकीयभाले स्वयं त्रिपुण्ड्रम् ऊर्ध्वपुण्ड्रं वा कुर्यात् ॥ ॐ स्व॒स्त्तिन॒ऽइन्द्रो॑वृ॒द्धश्श्र॑वाꣳस्व॒स्त्तिनः॑पू॒षावि॒श्श्ववे॑दाꣳ । स्व॒स्त्तिन॒स्त्तार्क्ष्यो॒ऽअरि॑ष्टनेमिꣳस्व॒स्त्तिनो॒बृह॒स्पति॑र्द्दधातु ॥ १९/२५ ॥ स्वस्तिस्तु या विनाशाख्या धर्मकल्याणवृद्धिदा। विनायकप्रिया नित्यं ताञ्च स्वस्तिं ब्रुवन्तु

---

[1] मध्ये तु बह्वृचाश्चैव निबध्नीयुः शिखां ततः । माध्यन्दिनाश्च ये विप्राः पार्श्वे दक्षिणतः क्रमात् । वामपार्श्वे तु बध्नीयुर्ये विप्राः सामगायनाः ॥ इति **चतुर्विंशतितत्त्वे** ॥ **ग्रन्थान्तरे**—स्नाने दाने जपे होमे सन्ध्यायां देवतार्चने । शिखाग्रन्थिं विना कर्म न कुर्याद्वै कदाचन ॥

नः ॥ आचमनम्[1] । ॐ केशवाय नमः स्वाहा । ॐ नारायणाय नमः स्वाहा । ॐ माधवाय नमः स्वाहा । ॐ गोविन्दाय नमः इति हस्तं प्रक्षाल्य प्राणायामं[2] कुर्यात् ॥ हस्ते जलमादाय । ॐकारस्य ब्रह्मा ऋषिः । दैवी गायत्री च्छन्दः । परमात्मा देवता । सर्वकर्मारम्भे विनियोगः । भूरादिसप्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः । क्रमेण गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि । अग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवताः । तत्सवितुरित्यस्य विश्वामित्र ऋषिः । गायत्री च्छन्दः । सविता देवता । आपोज्योतिरित्यस्य प्रजापतिर्ऋषिः । द्विपदा गायत्री छन्दः । ब्रह्माग्निवायुसूर्या देवताः । सर्वेषां प्राणायामे विनियोगः ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥ ॐ तत्स॑वि॒तुर्व्वरे॑ण्यं॒भर्ग्गो॑दे॒वस्य॑धीमहि । धियोयो॒नः॑ प्रचो॒दया॑त् । ॐआपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् । ॐ नमो भगवते वासुदेवाय इति भगवन्नाममन्त्रेण वा पूरककुम्भकरेचकक्रमेण त्रिवारं[3] प्राणायामं कुर्यात् ॥ ततः शान्तिसूक्तं पठेत् ॥

---

[1] संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः । मुक्ताङ्गुष्ठकनिष्ठेन शेषेणाचमनं चरेत् ॥ [2] दक्षिणे रेचयेद्वायुं वामेनापूरितोदरम् । कुम्भकेन जपं कुर्यात्प्राणायामो भवेदिति **कात्यायनः** ॥ सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते इति **याज्ञवल्क्यः** ॥ [3] **प्राणायामप्रकारः**—गायत्रीं शिरसा सार्धं तथा व्याहृतिपूर्विकाम् । प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः ॥

अथ शान्तिसूक्तम् ॥ ॐ आनोभद्राःक्रतवोयन्तुविश्वतोदब्धासोऽअपरीतासऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्प्रायुवोरक्क्षितारोदिवेदिवे ॥ १ ॥ देवानाम्भद्रासुमतिर्ऋजूयतान्देवानांरातिरभिनोनिवर्त्तताम् ॥ देवानांसक्ख्यमुपसेदिमाव्वयन्देवानऽआयुःप्प्रातिरन्तुजीवसे ॥ २ ॥ तान्पूर्व्वयानिविदाहूमहेव्वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् । अर्य्यमणंव्वरुणꣳसोममश्विनासरस्वतीनःसुभगामयस्करत् ॥ ३ ॥ तन्नोव्वातोमयोभुव्वातुभेषजन्तन्माता पृथिवी तत्पिताद्यौः ॥ तद्ग्रावाणः सोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्ण्यायुवम् ॥ ४ ॥ तमीशानञ्जगतस्तस्थुषस्प्पतिन्धियञ्जिन्न्वमवसेहूव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्क्षितापायुरदब्धः स्वस्तये ॥ ५ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्प्पतिर्द्दधातु ॥६॥ पृषदश्वामरुतःपृश्निमातरःशुभँय्यावानोविदथेषुजग्ग्मयः । अग्निजिह्वामनवःसूरचक्क्षसोविश्वेनोदेवाऽअवसागमन्निह ॥ ७ ॥ भद्रङ्कर्ण्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्क्षभिर्य्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितँय्यदायुः ॥ ८ ॥ शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्राजरसन्तनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमद्ध्यारीरिषतायुर्ग्गन्तोः ॥ ९ ॥ अदितिर्द्यौरदितिरन्तरिक्ष

मदितिर्म्मातासपितासपुत्रः ॥ विश्श्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥१०॥ द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः। वनस्प्पतयःशान्तिर्व्विश्श्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्व्वꣳशान्तिःशान्तिरेवशान्तिः सामाशान्तिरेधि ॥ ११ ॥ यतोयतःसमीहसेततोनोऽअभयङ्कुरु ॥ शन्नःकुरुप्रजाभ्योऽभयन्नःपशुभ्यः ॥ १२ ॥ शान्तिः शान्तिः सुशान्तिर्भवतु ॥

ततो देवान् प्रणमेत् । श्रीमन्महागणाधिपतये नमः । इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः । स्थानदेवताभ्यो नमः । वास्तुदेवताभ्यो नमः । वाणीहिरण्यगर्भाभ्यां नमः । श्रीलक्ष्मीनारायणाभ्यां नमः । उमामहेश्वराभ्यां नमः । शचीपुरन्दराभ्यां नमः । मातापितृचरणकमलेभ्यो नमः । सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः । एतत्कर्मप्रधानदेवताभ्यो नमः । पुण्यं पुण्याहं दीर्घमायुरस्त्वति भवन्तो ब्रुवन्तु । पुण्यं पुण्याहं दीर्घमायुरस्तु । सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ॥ लम्बोदरश्च विकटो विघ्ननाशो विनायकः । धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि । विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।

प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान्मङ्गलायतनो हरिः ॥ तदेव लग्नं सुदिनं तदेव तारावलं चन्द्रबलं तदेव । विद्याबलं दैववलं तदेव लक्ष्मीपते ! तेऽङ्घ्रियुगं स्मरामि ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ सर्वेष्वारब्धकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् । सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये ॥

सङ्कल्पः—विष्णुर्विष्णुर्विष्णुः । श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे (सप्तमे) वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके भारतवर्षे (भरतखण्डे जम्बूद्वीपे रामक्षेत्रे परशुरामाश्रमे दण्डकारण्ये श्रीगोदावर्या अमुकदिग्भागे श्रीमल्लवणाब्धे अमुके तटे) आर्यावर्तान्तर्गतब्रह्मावर्तस्य अमुकैकदेशे अमुके श्रीशालिवाहनशके अमुकनामसंवत्सरे तथा च अमुके श्रीविक्रमवर्षे

अमुकनामसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ[१] शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोत्पन्नस्य अमुकशर्मणः (वर्मणः गुप्तस्य दासस्य वा) सपरिवारस्य ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्य-(पुराणोक्त) फलावाप्त्यर्थं (मम ऐश्वर्याभिवृद्ध्यर्थम् अप्राप्तलक्ष्मीप्राप्त्यर्थं प्राप्तलक्ष्म्याश्चिरकालसंरक्षणार्थं सकलमनईप्सितकामनासंसिद्ध्यर्थं लोके वा सभायां राजद्वारे वा सर्वत्र यशोविजयलाभादिप्राप्त्यर्थं तथा च मम सभार्यस्य सपुत्रस्य अखिलकुटुम्बसहितस्य सपशोः समस्तभयव्याधिजरापीडामृत्युपरिहारद्वारा आयुरारोग्यैश्वर्याद्यभिवृद्ध्यर्थं तथा च मम जन्मराशेरखिलकुटुम्बस्य वा जन्मराशेः सकाशाद्ये केचिद्विरुद्धचतुर्थाष्टमद्वादशस्थानस्थिताः क्रूरग्रहाः तैः सूचितं सूचयिष्यमाणञ्च यत्सर्वारिष्टं तद्विनाशद्वारा सर्वदा तृतीयैकादशस्थानस्थितवच्छुभफलप्राप्त्यर्थं पुत्रपौत्रादिसन्ततेरविच्छिन्नवृद्ध्यर्थम् आदित्यादिनवग्रहानुकूलतासिद्ध्यर्थम् इन्द्रादिदशदिक्पालप्रसन्नतासिद्ध्यर्थम् आधिदैविकाधिभौतिकाध्यात्मिकत्रिविधतापोपशमनार्थं धर्मार्थकाम-

---

[१] अमुकराशिस्थिते दैत्यगुरौ इत्यपि पठन्ति शिष्टाः ॥

मोक्षफलावाप्त्यर्थं यथाज्ञानेन यथामिलितोपचारद्रव्यैः [1]ध्यानावाहनादिषोडशोपचारैरन्योपचारैश्च [2]शिवपञ्चायतनदेवानां (असुकदेवस्य) पूजनं करिष्ये ॥

तत्रादौ दिग्रक्षणम् ॥ वामहस्ते सर्षपानादाय दक्षिणहस्तेनाच्छाद्य रक्षोघ्नमन्त्रान्पठेत् ॥ ॐ रक्षोहणंवलगहनं वैष्णवीमिदमहन्तंवलगमुत्त्किरामियम्मे निष्ठ्योयममात्त्यो निचखानेदमहन्तंवलगमुत्त्किरामियम्मेसमानोयमसमानो निचखानेदमहन्तं वलगमुत्त्किरामियम्मेसबन्धुर्यमसबन्धुर्न्निचखानेदमहन्तम्वलगमुत्त्किरामियम्मेसजातो यमसजातोनिचखानोत्कृत्त्यांकिरामि ॥ $\frac{२३}{५}$ ॥ रक्षोहणोवोवलगहनःप्प्रोक्षामिवैष्णवान्रक्षोहणोवोवलगहनोवनयामि

---

[1] **षोडशोपचारा ज्ञानमालायाम्**–आसनं स्वागतं चार्घ्यं पाद्यमाचमनीयकम् । मधुपर्कार्पणं स्नानं वसनाभरणानि च । सुगन्धः सुमनोधूपौ दीपो नैवेद्य एव च । माल्यानुलेपने चैव नमस्कारो विसर्जनम् ॥ **नागदेवः**–आवाहनासने पाद्यमर्घ्यमाचमनीयकम् । स्नानं वस्त्रोपवीते च गन्धमाल्यादिभिः क्रमात् । धूपं दीपं च नैवेद्यं नमस्कारं प्रदक्षिणाम् । उद्वासनं षोडशकमेवं देवार्चने विधिः ॥ वाजसनेयिनां दक्षिणाप्रदक्षिणानमस्काराणां त्रयाणाम् उपचाराणां चतुर्दश पञ्चदशषोडशपदेन क्रमेण षोडशोपचारेषु गणाना बोध्या । **पञ्चोपचारेषु जाबालिः**–ध्यानमावाहनं चैव भक्त्या यच्च निवेदनम् । नीराजनं प्रणामश्च पञ्च पूजोपचारकाः **अन्यदपि**–गन्धपुष्पे धूपदीपौ नैवेद्यः पञ्च ते क्रमात् ॥ **ज्ञानमालायाम् दशोपचाराः**–अर्घ्यं पाद्यमाचमनं स्नानं वस्त्रनिवेदनम् । गन्धादयो नैवेद्यान्ताः उपचारा दश क्रमात् ॥

[2] श्रीशिवपञ्चायतनदेवतानाम्, श्रीविष्णुपञ्चायतनदेवतानाम्, श्रीसूर्यपञ्चायतनदेवतानाम्, श्रीदेवीपञ्चायतनदेवतानाम्, श्रीगणेशपञ्चायतनदेवतानाम्, श्रीविष्णोः, श्रीगणेशस्य, श्रीशिवस्य, श्रीदेव्याः, श्रीसूर्यस्य वा ॥

व्वैष्णवान्न्रक्षोहणौँव्वोवलगहनोवस्तृणामिव्वैष्णवान्न्रक्षोहणौँव्वांव्वलगहनाऽउपदधामिव्वैष्णवीरक्क्षोहणौँ वांव्वलगहनौपर्य्यूँहामिव्वैष्णवीव्वैष्णवमसिव्वैष्णवास्त्थ ॥ २५/५ ॥ रक्क्षसांभागोसिनिरस्तꣳरक्क्षऽइदमहꣳरक्क्षोभितिष्ठामीदमहꣳरक्क्षोवबाधऽइदमहꣳरक्क्षोधमन्तमोनयामि ॥ घृतेनद्यावापृथिवीप्प्रोर्ण्णुँवाथांव्वायोव्वेस्त्तोकानामग्निराज्ज्यस्यव्वेतुस्वाहास्वाहाकृतेऽऊर्द्ध्वनभसम्मारुतङ्गच्छतम् ॥ १६/६ ॥ रक्क्षोहाव्विश्श्वचर्षणिरभियोनिमयोहते । द्रोणेसधस्त्थमासदत ॥ २६/२६ ॥ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया । अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामवरोधेन पूजाकर्म समारभे ॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः । स्थानं त्यक्त्वा तु यत्सर्वं यत्रस्थं तत्र गच्छतु ॥ भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः । स्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमि भुवं त्विमाम् ॥ भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन । ते सर्वेऽप्यपगच्छन्तु देवपूजां करोम्यहम् ॥ एतैर्मन्त्रैः सर्षपान्दिक्षु विदिक्षु च विकीर्य वामपादेन भूमिं त्रिवारं ताडयेत् ॥ ततः स्वदक्षिणहस्ते जलं गृहीत्वा शरीरशुद्ध्यर्थं स्वदक्षिणवामनेत्रयोरुदकस्पर्शं कुर्यात् ॥

अथ कलशार्चनम् ॥ स्ववामभागे अक्षतपुञ्जोपरि जलपूरितं कलशं संस्थाप्य तत्र वरुणावाहनम् ॥ ॐ तत्त्वायामी-

त्यस्य शुनःशेप ऋषिः । त्रिष्टुप् छन्दः । वरुणो देवता । वरुणावाहने विनियोगः ॥ ॐ तत्त्वा॑यामि॒ब्रह्म॑णा॒व्वन्द॑मान॒स्त्त दाशा॑स्त्ते॒यज॑मानो ह॒विर्ब्भि÷ ॥ अहे॑डमानो व्वरु॑णे॒ह॒बो॒द्ध्यु रुश ꣳस॒मान॒ऽआयु॒ःप्प्रमो॑षीः ॥ ४९/१८ ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ ॐ [१]भूर्भुवः स्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् आवाह० स्थापयामि ॥ प्रतिष्ठापनम् ॥ ॐ मनो॑जूति॑र्ज्जुषता॒माज्ज्य॑स्य॒बृह॒स्प्पति॑र्य्य॒ज्ज्ञमि॒मन्त॑नो॒त्त्व रिष्टँ॒य॒ज्ज्ञꣳसमि॒मन्द॑धातु ॥ व्विश्वे॑दे॒वास॑ऽइ॒हमा॑दयता॒मो ३ँम्प्रति॑ष्ठ ॥ १३/२ ॥ भगवन्वरुणागच्छ त्वमस्मिन् कलशे प्रभो ! । कुर्वेऽत्रैव प्रतिष्ठां ते जलानां शुद्धिहेतवे ॥ ॐ वरुणाय नमः वरुणः सुप्रतिष्ठितो वरदो भव ॥ कलशस्य चतुर्दिक्षु गन्धेन चतुर्वेदान्पूजयेत् । पूर्वे ऋग्वेदाय नमः ॥ दक्षिणे यजुर्वेदाय नमः ॥ पश्चिमे सामवेदाय नमः ॥ उत्तरे अथर्ववेदाय नमः ॥ कलशमध्ये अपाम्पतये वरुणाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥ अनामिकया कलशं स्पृशेत् ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्त द्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशाम्बुसमा-

---

[१] “ॐ भूर्भुवः स्वः” इति स्थानेऽनुपनीतानां वैश्यादीनां “ह्रीं” इति पदं देयम् । यत्र यत्र ॐकारस्तत्र सर्वत्रैवं बोद्धव्यम् ।

श्रिताः । अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ॥ आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ! । तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ कलशं प्रार्थयेत् ॥ देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ ! विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ! । सान्निध्यं कुरु मे देव ! प्रसन्नो भव सर्वदा ॥ [1]अङ्कुशमुद्रया सूर्यमण्डलात्सर्वाणि तीर्थान्यावाह्य । वम् इति [2]धेनुमुद्रया अमृतीकृत्य । हूँ इति कवचेना-[3]मत्स्यमुद्रयाऽऽच्छाद्य । वं वरुणाय नमः इत्यनेनाष्टवारमभिमन्त्र्य तस्मादुदकादुदकं गृहीत्वा ॐ आपोहिष्ठा० ॥

---

[1] दक्षमुष्टिगृहीतस्य वाममुष्टेस्तु मध्यमाम् । प्रसार्य तर्जन्याऽऽकुञ्चेत्सेयमङ्कुशमुद्रिका इति **शारदातिलके** । [2] दक्षानामासमायुक्ता वामहस्तकनिष्ठिका । वामानामासमायुक्ता दक्षपाणिकनिष्ठिका ॥ दक्षस्य मध्यमाऽऽक्रान्ता वामहस्तस्य तर्जनी ॥ वाममध्यमयाऽऽक्रान्ता दक्षहस्तस्य तर्जनी । संयुक्तौ कारयेद्विद्वानङ्गुष्ठावुभयोरपि ॥ धेनुमुद्रा निगदिता गोपिता साधकोत्तमैः ॥ [3] अधोमुखावुभौ हस्तौ स्वस्योपरि च संस्थितौ । पार्श्वद्वयगताङ्गुष्ठौ मत्स्यमुद्रेयमीरिता ॥

इति स्वात्मानं सम्प्रोक्ष्य [1]कलशमुद्रां प्रदर्शयेत् । ततो जलं गृहीत्वा पूजाद्रव्याणि भूमिञ्च प्रोक्षयेत् । अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥ शङ्खपूजनम् ॥ ॐ अ॒ग्निर्ऋषि॒ः पव॑मान॒ः पाञ्च॑जन्यः पु॒रोहि॑तः ॥ तमी॑महे महाग॒यम् ॥ ९/२६ ॥ शङ्खादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता । पृष्ठे प्रजापतिश्चैव ह्यग्रे गङ्गा सरस्वती ॥ १ ॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया । शङ्खे तिष्ठन्ति विप्रेन्द्र तस्माच्छङ्खं प्रपूजयेत् ॥ २ ॥ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे । निर्मितः सर्वदेवैश्च पाञ्चजन्य ! नमोऽस्तु ते ॥ ३ ॥ पाञ्चजन्याय विद्महे पावमानाय धीमहि । तन्नः शङ्खः प्रचोदयात् ॥ ४ ॥ ॐ भूर्भुवः स्वः शङ्खस्थदेवतायै नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥ [2]शङ्खमुद्रां प्रदर्शयेत् ॥ घण्टापूजनम् ॥ ॐ सु॒प॒र्णो॑ऽसि ग॒रुत्क्माँ॑स्त्रि॒वृत्ते॒शिरो॑गाय॒त्रञ्चक्षु॑र्बृहद्रथन्त॒रे प॒क्षौ । स्तोम॑ऽआ॒त्क्मा च्छन्दा॒ꣳस्यङ्गा॑नि॒ यजू॒ꣳषि नाम । साम॑ ते त॒नूर्वा॑मदे॒व्यँय॑ज्ञाय॒ज्ञियं॒ पुच्छं॒ धिषण्ण्या॑ शु॒फाः ॥ सु॒प॒र्णो॑ऽसि ग॒रुत्क्मा॒न्दिवं॑ ग॒च्छ स्वः पत ॥ ४/१२ ॥ आगमार्थं तु देवानां तु गमनार्थं तु रक्षसाम् ॥ घण्टानादं प्रकुर्वीत पश्चा-

---

[1] दक्षाङ्गुष्ठं पुरोऽङ्गुष्ठे (वामङ्गुष्ठे) क्षिप्त्वा हस्तद्वयेन च । सावकाशां (मध्याशून्यां) मुष्टिकाञ्च कुर्यात्सा कुम्भ (कलश) मुद्रिका । [2] वामाङ्गुष्ठं तु सङ्गृह्य दक्षिणेन तु मुष्टिना । कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठं तु प्रसारयेत् ॥ १ ॥ वामाङ्गुल्यस्तथाऽऽश्लिष्टाः संयुक्ताः सुप्रसारिताः । दक्षिणाङ्गुष्ठसंस्पृष्टा ज्ञेयैषा शङ्खमुद्रिका ॥ २ ॥

ण्टां प्रपूजयेत् ॥ ॐ भूर्भुवः स्वः घण्टास्थिताय गरुडाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥ [1]घण्टामुद्रां प्रदर्शयेत् ॥ दीप[2]पूजनम् ॥ घृतदीपं प्रज्वाल्य निर्वातस्थले अक्षतपुञ्जोपरि पात्रे वा निधाय ॥ ॐ अग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्चसा वर्चस्वान् ॥ सहस्रदाऽअसि सहस्रायत्वा ॥$\frac{४०}{१३}$॥ भो दीप देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् । यावत्कर्मसमाप्तिः स्यात्तावदत्र स्थिरो भव ॥ ॐ भूर्भुवः स्वः दीपस्थदेवतायै नमः आवाहयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥

अथ [1]शिवपञ्चायतनदेवानां ध्यानपूर्वकमावाहनम् ॥ आवाहनम् ॥ ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।

---

[1] मिथस्तर्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा । मध्यमानामिके तु द्वौ पक्षाविव विचालयेत् । एषा गरुड (घण्टा) मुद्रा स्याद्विष्णोः सन्तोषवर्धिनी ॥ [2] कार्पासवर्तिका प्रोक्ता दीपकृत्येषु सर्वदा । न चैव स्थापयेद्दीपं साक्षाद्भूमौ कदा न च ॥ इति सुदर्शने ॥

अथ (१) शिवध्यानम् ॥ ध्याये नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥ पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ ॐ नमस्ते रुद्र मन्यवऽउतोतऽइषवे नमः ॥ बाहुभ्यामुत ते नमः ॥$\frac{१}{१६}$॥ अथ (२) विष्णुध्यानम् ॥ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ॥ लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ ॐ इदं विष्णु-

सभूमिꣳसर्वतंस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम् ॥ $\frac{१}{३१}$ ॥ आगच्छ भगवन्देव स्थाने चात्र स्थिरो भव । यावत्पूजां करिष्यामि तावत्त्वं सन्निधो भव ॥ ॐभूर्भुवः स्वः शिवपं० देवेभ्यो नमः शिवपञ्चायतनंदेवान् आवा० । आवाहनार्थेऽक्षतान्सम० प्रतिष्ठापनम् ॥ ॐमनोजूतिर्जुषता० ॥ आसु मूर्तिषु शिव-

---

विंचक्क्रमेत्रेधानिदंधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ $\frac{१५}{५}$ ॥ अथ (३) सूर्यध्यानम् ॥ ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ॥ केयूरवान्मकरकुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ ॐ आकृष्ण्णेनरजंसावर्त्तमानोनिवेशयन्नमृतं मर्त्यंञ्च ॥ हिरुण्ण्ययेनसवितारथेनादेवोयातिभुवनानिपश्श्यन् ॥ $\frac{४३}{३३}$ ॥ अथ (४) गणपतिध्यानम् ॥ श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः क्षीराब्धौ रत्नदीपैः सुरतरुविमले रत्नसिंहासनस्थम् ॥ दोर्भिः पाशाङ्कुशाब्जाभयवरदधतं चन्द्रमौलिं त्रिनेत्रं ध्याये शान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥ ॐ गुणानान्त्वा गुणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहे निधीनान्त्वानिधिपतिꣳ हवामहेवसोमम । आहमंजानिगर्ब्भधमात्त्वमंजासिगर्ब्भधम् ॥ $\frac{१९}{२३}$ ॥ अथ (५) शक्ति (देवी) ध्यानम् ॥ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्रगदासिखेटविशिखाँश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकांशशिधरां दुर्गां त्रिनेत्रां भजे ॥ ॐ प्राणायस्वाहापानायस्वाहा व्यानायस्वाहा ॥ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन। ससंस्त्यकश्श्वकःसुभद्रिकांकाम्पीलवासिनीम् ॥ $\frac{१}{२३}$ ॥

पञ्चायतनदेवाः सुप्रतिष्ठिता वरदा भवत इत्यक्षतान् दद्यात् ॥ तत [१]आवाहनमुद्रां प्रदर्शयेत् ॥ आसनम् ॥ ॐ पुरुषऽएवेदꣳसर्वँय्यद्भूतँयच्चभाव्यम् । उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥ $\frac{२}{३१}$ ॥ रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् । आसनं च मया दत्तं गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः शिवपञ्चायतनदेवेभ्यो नमः आसनं सम० ॥ पाद्यम् ॥ एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ $\frac{३}{३१}$ ॥ उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम् । पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः पाद्यं सम० ॥ अर्घ्यम् ॥ ॐ धामन्तेविश्वम्भुवनमाधिश्रितमन्तः संमुद्रेहृद्यन्तरायुषि ॥ अपामनीकेसमिथेयऽआभृतस्तमश्याममधुमन्तन्तऽऊर्म्मिम् ॥ $\frac{९९}{१७}$ ॥ रौप्यपात्रे स्थितं तोयं गन्धपुष्पफलान्वितम् । सहिरण्यं ददाम्यर्घं गृहाण परमेश्वर ! ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः अर्घं सम० ॥ आचमनीयम् ॥ ॐ इमम्मेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ $\frac{१}{२१}$ ॥ सर्वतीर्थसमायुक्तं सुगन्धि निर्मलं

---

[१] हस्ताभ्यामञ्जलिं बद्ध्वाऽनामिकामूलपर्वतः । अङ्गुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहनी स्मृता ॥ आनीय तेजः स्वस्थानान्नासिकारन्ध्रनिर्गतम् । करस्थमातृकाम्भोजे चैतन्यं पुष्पसञ्चये ॥ संयोज्य ब्रह्मरन्ध्रेण मूर्तावावाहयेत्सुधीः । देवं सुषुम्णामार्गेण चानीय ब्रह्मरन्ध्रकम् ॥ वामनासापुटे ध्यात्वा निर्यान्तं स्वाञ्जलिस्थितम् ॥ पुष्पमारोप्य तत्पुष्पं प्रतिमादौ निधापयेत् । **इति शारदातिलके** ॥

जलम् । आचामार्थं मया दत्तं गृहाण परमेश्वर ! ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः आचमनीयं समर्पयामि ॥ पयःस्नानम् ॥ ॐ पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीः प्प्रदिशः सन्तुमह्यम् ॥ ३५/१८ ॥ कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् । पावनं यज्ञहेतु च पयःस्नानार्थमर्पितम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः पयःस्नानं सम० ॥ पयःस्नानान्ते शुद्धोदकस्नानं सम० ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥ दधिस्नानम् ॥ ॐ दधिक्क्राव्वणोऽअकारिषञ्जिष्ष्णोरश्श्वस्यव्वाजिनः ॥ सुरभिनोमुखाकरत्त्प्रणऽआयूꣳषितारिषत् ॥ ३२/२३ ॥ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः दधिस्नानं सम० । दधिस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० ॥ घृतस्नानम् ॥ ॐ घृतम्मिमिक्क्षेघृतमस्ययोनिर्घृतेश्श्रितोघृतम्वस्यधाम ॥ अनुष्ष्वधमावहमादयस्स्वस्वाहाकृतंवृषभव्वक्षिहव्यम् ॥ ८८/१७ ॥ नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् । घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः घृतस्नानं सम० । घृतस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥ मधुस्नानम् ॥ ॐ मधुव्वाताऽऋतायतेमधुक्क्षरन्तिसिन्धवः ॥ माद्ध्वीर्नः

स॒न्त्वोष॑धीः ॥ २७/१३ ॥ मधु॒नक्त॑मु॒तोष॒सो मधु॑म॒त्पार्थि॑व॒ꣳ रजः॑ ॥ मधु॒द्यौर॑स्तुनःपि॒ता ॥ २८/१३ ॥ मधु॑मान्नो॒व्वन॒स्पति॒र्म्मधु॑माँ २॥ अस्तु॒सूर्यः॑ ॥ माद्ध्वी॒ग्गावो॑भवन्तुनः ॥ २९/१३ ॥ तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः मधुस्नानं सम० । मधुस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० ॥ शर्करास्नानम् ॥ ॐ अ॒पाꣳरस॒मुद्व॑यस॒ꣳसूर्ये॒सन्त॑ꣳस॒माहि॑तम् ॥ अ॒पाꣳरस॑स्य॒ योरस॒स्त्तम्वो॑गृह्णाम्म्युत्त॒ममु॑पया॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वा॒जुष्ट॑ङ्गृह्णाम्म्ये॒षते॒योनि॒रिन्द्रा॑यत्त्वा॒जुष्ट॑तमम् ॥ ३/९ ॥ इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका । मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो० शर्करास्नानं सम० । शर्करास्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० ॥ गन्धोदकस्नानम् ॥ ॐ ग॒न्ध॒र्व्वस्त्त्वा॑व्वि॒श्वाव॑सुःपरि॑दधातु॒व्विश्व॒स्यारि॑ष्ट्यै॒यज॑मानस्यपरि॒धिर॑स्य॒ग्निरि॒डऽई॑डि॒तः ॥ ३/२ ॥ मलयाचलसम्भूतं चन्दनागरुसंयुतम् । चन्दनं च मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः गन्धोदकस्नानं सम० । गन्धोदकस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० ॥ उद्वर्तनस्नानम् ॥ ॐ अ॒ꣳशुना॑तेऽअ॒ꣳशुःपृ॑च्च्यता॒म्परु॑षा॒परुः॑ ॥ ग॒न्धस्त्ते॒सोम॑

मवतुमदा॑य॒रसो॒ऽअच्च्यु॑तः ॥ $\frac{२७}{२०}$ ॥ नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम् । उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः उद्वर्तनस्नानं सम० ॥ उद्वर्तनस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि । सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥ ततो निर्माल्यमुत्तरे विसृज्य पुनर्गन्धाक्षतपुष्पैरभ्यर्च्य तत्तद्देवानां पृथक् पृथक् सूक्तं पठन् गन्धमिश्रितैर्जलैरभिषेकं कुर्यात् ॥ ॐ अमृताभिषेकोऽस्तु । ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः अभिषेकस्नानं सम० ॥

अथ शुद्धोदकस्नानम् ॥ ॐ शु॒द्धवा॑लः स॒र्वशु॑द्धवालोम॒णिवा॑ल॒स्तऽआ॑श्वि॒नाः श्येतः॑ श्ये॒ता॒क्षोरु॒णस्ते रु॒द्राय॑ पशु॒पत॑येक॒र्णा या॒माऽअ॑वलि॒प्ता रौ॒द्रा नभो॑रूपाः पार्ज॒न्याः ॥ $\frac{३}{२४}$ ॥ स्नानार्थं तव देवेश पवित्रं तोयमुत्तमम् । तीर्थेभ्यश्च समानीतं गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः शिवपं० देवभ्यो नमः शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥ ततो देवं वस्त्रेण प्रोञ्छयित्वा पीठे निदध्यात् ॥ वस्त्रम् ॥ ॐ सुजा॑तो॒ज्ज्योति॑षा स॒ह शर्म॒ वरू॑थ॒मास॑दु॒त्स्वः॑ ॥ वासो॑ऽअग्ने वि॒श्वरू॑प॒ꣳ

---

१ शिवं "ॐ नमस्ते०" इति **रुद्राध्यायेन** ॥ विष्णुं "ॐ सहस्रशीर्षा०" इति **पुरुषसूक्तेन** ॥ गणपतिं **"गणपत्यथर्वशीर्षेण"** ॥ श्रीसूर्यं "ॐ विभ्राड्" इति **मैत्रेयसूक्तेन** ॥ शक्तिं "ॐ हिरण्यवर्णाम्" इति **श्रीसूक्तेन** च यथावकाशमभिषेकं कुर्यात् ॥

संव्व्ययस्वविभावसो ॥ ४०/११ ॥ सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः वस्त्रं सम० । वस्त्रान्ते आचमनीयं सम० ॥ उपवीतम् ॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् । उपवीतं मय दत्तं गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः यज्ञोपवीतं सम० । यज्ञोपवीतान्ते आचमनी० सम० ॥ गन्धम् ॥ ॐ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्प्पतिः ॥ त्वामोषधे सोमोराजाविद्वान्यक्ष्मादमुच्यत ॥ ९८/१२ ॥ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः गन्धं सम० ॥ दक्षिणहस्तेन [1]गन्धमुद्रां प्रदर्शयेत् । [2]अक्षताः ॥ ॐ अक्क्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत॥ अस्त्तोषतस्वभानवोविप्प्रान विष्ठयामतीयोजान्विन्द्रतेहरी ॥ ५१/३ ॥ अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभनाः । मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः अक्षतान्

---

[1] मध्यमानामिकाङ्गुष्ठैरङ्गुल्यग्रेण पार्वति । दद्याच्च विमलं गन्धं मूलमन्त्रेण साधकः ॥ कनिष्ठाङ्गुष्ठसंयुक्ता गन्धमुद्रा प्रकीर्तिता । इति शारदातिलके ॥ दक्षिणहस्तस्य कनिष्ठाङ्गुष्ठयोगेन गन्धमुद्रां प्रदर्शयेत्॥ [2] नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपम् । न दूर्वया यजेद्देवीं बिल्वपत्रैर्दिवाकरम् ॥

सम० ॥ पुष्पाणि ॥ ओष॑धीः॒प्प्रति॑मोदद्ध्व॒म्पुष्प्प॑वतीःप्प्र॒सू व॑रीः ॥ अश्श्वा॑ऽइवस॒जित्त्व॑रीर्व्वी॒रुध॑ꣳपारयि॒ष्ण्ण्व॒ꣳ ॥ ७७/१२ ॥ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ! । मयाऽऽनीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः पुष्पाणि सम० ॥ [1]दक्षिणहस्तेन पुष्पमुद्रां प्रदर्शयेत् ॥ (दूर्वाङ्कुरान्—काण्डा॑त्काण्डात्प्प्र॒रोह॑न्ती प॒रुष॑ःपरुष॒स्प्परि॑ ॥ ए॒वानो॑दूर्व्वे॒प्प्रत॑नुस॒हस्रे॑णश॒तेन॑च ॥ २०/१३ ॥ दूर्वे ह्यमृतसम्पन्ने शतमूले शताङ्कुरे । शतं पातकसंहन्त्री शतमायुष्यवर्धिनी ॥ विष्ण्वादिसर्वदेवानां दूर्वे त्वं प्रीतिदा सदा । क्षीरसागरसम्भूते वंशवृद्धिकरी भव ॥ ॐ भूर्भुवः स्वः शिवपं०देवेभ्यो नमः दूर्वाङ्कुरान्सम०॥) सौभाग्यद्रव्याणि ॥ ॐ अहि॑रिवभो॒गैःपर्य्येति॑बा॒हुञ्ज्या॑याहे॒तिम्प॑रि॒बाध॑मानः ॥ ह॒स्त॒घ्नोविश्श्वा॑व॒युना॑वि॒द्वान्पुमा॒न्पुमा॑ꣳस॒म्परि॑पातुवि॒श्श्वत॑ꣳ ॥ ५१/२९ ॥ हरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलान्वितम् । सौभाग्यद्रव्यमेतत्त्वं गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः शिवपञ्चा० देवेभ्यो नमः सौभाग्यपरिमलद्रव्याणि सम० ॥ धूपम् ॥ धूर॑सि॒धूर्व्व॒धूर्व्व॑न्त॒न्धूर्व्व॒तँय्यो॒स्म्मान्धूर्व्व॑ति॒तन्धूर्व्व॒यं व्व॒यन्धूर्व्वा॑मः ॥ दे॒वाना॑मसि॒वह्नि॑तम॒ꣳसस्नि॑तम॒म्पप्प्रि॑तम॒ञ्जुष्ट॑तमन्देव॒हूत॑मम् ॥ ८/१ ॥ वनस्पतिरसोद्भूतो गन्धाढ्यो

---

[1] ज्येष्ठा (मध्यमा) ङ्गुष्ठस्य पुष्पस्य युक्ता तर्जनी । दीपस्य मध्यमानामा नैवेद्यस्य प्रकीर्तिता ॥ मुद्रया यत्कृतं कर्म तदक्षय्यफलप्रदम् ॥ दक्षिणहस्तस्य मध्यमाङ्गुष्ठयोगेन पुष्पमुद्रां प्रदर्शयेत् ।

गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः धूपमाघ्राप० । ततो[1] दक्षिणहस्तेन धूपमुद्रां प्रदर्शयेत् ॥ दीपम् ॥ ॐ अ॒ग्निर्ज्योति॒र्ज्योति॑र॒ग्निः स्वाहा॒ सूर्यो॒ ज्योति॒र्ज्योति॒ः सूर्य॒ः स्वाहा॑ ॥ अ॒ग्निर्वर्च्चो॒ ज्योति॒र्वर्च्च॒ः स्वाहा॒ सूर्यो॒ वर्च्चो॒ ज्योति॒र्वर्च्च॒ः स्वाहा॑ ॥ ज्योति॒ः सूर्य॒ः सूर्यो॒ ज्योति॒ः स्वाहा॑ ॥ ९/३ ॥ साज्यञ्च वर्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः दीपं दर्शयामि ॥ ततो[2] दीपमुद्रां प्रदर्शयेत् ॥ नैवेद्यम् ॥ ॐ अन्न॑प॒तेन्न॑स्य नो देह्यनमी॒वस्य॑ शु॒ष्मिण॑ः ॥ प्रप्र॑ दा॒तार॑न्तारिष॒ ऊर्ज्ज॑न्नो धेहि द्वि॒पदे॒ चतु॑ष्पदे ॥ ८३/११ ॥ शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च । आहारं भक्ष्यभोज्यञ्च नैवेद्यं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः नैवेद्यं निवेदयामि ।

गायत्र्या नैवद्यं जलेन सम्प्रोक्ष्य तुलसीपत्रं[3] निधाय धेनुमुद्रयाऽमृतीकृत्य ग्रास[4]मुद्राः प्रदर्शयेत् ॥ ॐ प्राणाय[5]

---

[1] दक्षिणहस्तस्य तर्जन्यङ्गुष्ठयोगेन धूपमुद्रां प्रदर्शयेत् ॥ [2] दक्षिणहस्तस्य मध्यमाङ्गुष्ठेन दीपमुद्रां प्रदर्शयेत् ॥ [3] **ब्रह्मसंहितायाम्**–तुलसीगन्धपुष्पैश्च सम्पूज्यान्नं हरेः प्रियम् । सम्प्रोक्ष्यार्घजलेनैव संरक्ष्यास्त्रेण सर्वदा ॥ धेनुमुद्रां प्रदर्श्याथ ततो देवं निवेदयेत् ॥ [4] ग्रासमुद्रां वामदोष्णा विकचोत्पलसन्निभाम् । प्रदर्शयन्दक्षिणेन प्राणादीनाञ्च दर्शयेत् ॥ [5] दक्षिणहस्तस्य कनिष्ठिकानामिकेऽङ्गुष्ठेन स्पृशन् प्राणाय स्वाहा इति ॥

स्वाहा । ॐ [१]अपानाय स्वाहा । ॐ [२]व्यानाय स्वाहा । ॐ [३]उदानाय स्वाहा । ॐ [४]समानाय स्वाहा । पूर्वापोशनं सम० ॥ नैवेद्यमध्ये पानीयम् ॥ एलोशीरलवङ्गादिकर्पूरपरिचासितम् । दत्तं ते प्राशनार्थाय गृहाण सलिलं प्रभो ! ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः मध्ये पानीयं सम० । उत्तरापोशनं सम० । हस्तप्रक्षालनं सम० । मुखप्रक्षालनं सम० । आचमनीयं सम० । करोद्वर्तनार्थे गन्धं सम० ॥ मुखवासार्थे ताम्बूलम् ॥ ॐ उतस्म्मास्यद्द्रवतस्तुरण्यतः पर्ण्णन्नवेरनुवातिप्प्रगर्द्धिनः ॥ श्येनस्येवद्ध्रजतोऽअङ्कसम्परिदधिक्क्राव्ण्णः सहोर्ज्जातरित्रतः स्वाहा ॥ $\frac{१५}{९}$ ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः ताम्बूलं सम० ॥ फलम् ॥ ॐ याःफलिनीर्याऽअफलाऽअपुष्प्पायाश्चपुष्प्पिणीः ॥ बृहस्प्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहसः ॥ $\frac{८९}{१२}$ ॥ इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सुफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः फलं सम० ॥ दक्षिणाम् ॥

---

[१] दक्षिणहस्तस्य अनामामध्यमेऽङ्गुष्ठेन स्पृशन् अपानाय स्वाहा इति ॥ [२] दक्षिणहस्तस्य मध्यमातर्जन्यावङ्गुष्ठेन स्पृशन् व्यानाय स्वाहा इति ॥ [३] दक्षिणहस्तस्य तर्जनीमध्यमानामा अङ्गुष्ठेन स्पृशन् उदानाय स्वाहा इति ॥ [४] दक्षिणहस्तस्य तर्जन्याद्यङ्गुलिचतुष्टयम् अङ्गुष्ठेन स्पृशन् समानाय स्वाहा इति ॥ एताः पञ्च ग्रासमुद्राः प्रदर्शयेत् ॥

ॐ हि॒र॒ण्य॒ग॒र्भःस॒मव॑र्त्त॒ताग्रे॑ भू॒तस्य॑ जा॒तःपति॒रेक॑ऽआसीत् ॥ सदा॑धार पृथि॒वीन्द्यामु॒तेमाङ्कस्मै॑दे॒वाय॑ ह॒विषा॑ विधेम ॥ ४/१३ ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः सुवर्णपुष्पदक्षिणां समर्पयामि ॥

कर्पूरारार्तिक्यम् ॥ ॐ आरात्रि॒पार्थि॑व॒ꣳरजः॑पि॒तुर॑प्रायि॒धाम॑भिः ॥ दि॒वःसदा॑ꣳसिबृह॒तीवित॑ष्ठस॒ऽआत्वे॒

॥ अथ श्रीशिवनीराजनम् ॥

ॐ जय गङ्गाधर हर शिव, जय गिरिजाधीश (२), त्वं मां पालय नित्यं कृपया जगदीश ॥ हर हर हर महादेव ॥ कैलासे गिरिशिखरे कल्पद्रुमविपिने ॥ शिव (२) गुञ्जति मधुकरपुञ्जे (२) कुञ्जवने गहने ॥ हर हर० ॥ १ ॥ कोकिलकूजति खेलति, हंसावनललिता ॥ शिव (२) ॥ रचयति कलाकलापं (२), नृत्यति मुदसहिता ॥ हर हर० ॥ २ ॥ तस्मिंल्ललितसुदेशे शाला मणिरचिता ॥ शिव (२) तन्मध्ये हरनिकटे (२) गौरी मुदसहिता ॥ हर हर० ॥ ३ ॥ क्रीडां रचयति भूषां रञ्जितनिजमीशम् ॥ शिव (२) ब्रह्मादिकसुरवन्द्यं प्रणमति ते शीर्षम् ॥ हर हर० ॥ ४ ॥ विबुधवधू बहु नृत्यति हृदये मुदसहिता ॥ शिव (२) किन्नरगानं कुरुते (२) सप्तस्वरसहिता ॥ हर हर० ॥ ५ ॥ धिनकतथैथैधिनकतमृदङ्गवादयते ॥ शिव (२) ॥ कणकणललितावेणु (२) मधुरं नादयते ॥ हर हर० ॥ ६ ॥ रुणुरुणुचरणे रचयति नूपुरमुज्ज्वलिता ॥ शिव (२) ॥ चक्रावर्ते भ्रमयति

षंव्वर्त्ततेतमः ॥ ३२/३४ ॥ ॐ अग्निर्द्देवताव्वातोदेवतासूर्य्यो देवताचन्द्रमादेवताव्वसवोदेवतारुद्रादेवतादित्यादेवतामरुतोदेवताव्विश्वेदेवादेवताबृहस्पतिर्द्देवतेन्द्रोदेवताव्वरुणो-

---

(२) कुरुते तां धिक् ताम् ॥ हर हर० ॥ ७ ॥ तां तां तां तां लुपचुपतालं नादयते ॥ शिव (२) ॥ अङ्गुष्ठाङ्गुलिनादं (२), लास्यकतां कुरुते ॥ हर हर० ॥ ८ ॥ कर्पूरद्युतिगौरं पञ्चाननसहितम् ॥ शिव (२) ॥ त्रिनयनशशिधरमौले (२), विषधरकण्ठयुतम् ॥ हर हर० ॥ ९ ॥ सुन्दरजटाकलापं पावकयुतभालम् ॥ शिव (२) त्रिशूलडमरुपिनाकं (२), करधृतनृकपालम् ॥ हर हर० ॥ १० ॥ शङ्खनिनादं कृत्वा झल्लरि नादयते ॥ शिव (२) नीराजयते ब्रह्मा वेद ऋचां पठते ॥ हर हर० ॥ ११ ॥ इतिदुचरणसरोजे हृदि कमले धृत्वा ॥ शिव (२) अवलोकयति महेशम् (२), ईशम् अभिनत्वा ॥ हर हर० ॥ १२ ॥ रूण्डरचितउरमालपन्नगमुपवीतम् ॥ शिव(२) ॥ वामविभागे गिरिजा (२), रूपम् अतिललितम् ॥ हर हर० ॥ १३ ॥ सकलशरीरे मनसिजकृतभस्माभरणम् ॥ शिव (२) इतिवृषभध्वजरूपं (२), तापत्रयहरणम् ॥ हर हर० ॥ १४ ॥ ध्यानम् आरतिसमये हृदये इतिकृत्वा ॥ शिव (२) रामं त्रिजटानाथम् (२), ईशम् अभिनत्वा ॥ हर हर० ॥ १५ ॥ प्रतिदिनमेवं पठनं गीतं यः कुरुते ॥ शिवसायुज्यं गच्छति (२) भक्त्या यः शृणुते ॥ हर हर महादेव ॥ १६ ॥ ॐ जय गङ्गाधर० ॥

॥ इति श्रीशिवंनीराजनं समाप्तम् ॥

दे॒वता॑ ॥ २०/१४ ॥ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदा वसन्तं हृदयारविन्दे भव भवानीसहितं नमामि । कर्पूरपूरेण मनोहरेण सुवर्णपात्रान्तरसंस्थितेन । प्रदीप्तभासा सह सङ्गतेन नीराजनं ते जगदीश! कुर्वे ॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः कर्पूरारार्तिक्यं सम० ॥ आचारान्देववन्दनम् । हस्तेन (शरीरे आरोग्यताप्राप्त्यर्थम्) आत्मवन्दनम् । हस्तं प्रक्षाल्य अञ्जलौ पुष्पाण्यादाय मन्त्रपुष्पाञ्जलिर्दद्यात् ॥

मन्त्रपुष्पाञ्जलिः ॥ ॐ ग॒णाना॑न्त्वाग॒णप॑तिꣳहवामहेप्प्रि॒याणा॑न्त्वाप्प्रि॒यप॑तिꣳहवामहेनि॒धी॒नान्त्वा॑नि॒धि॒प॑तिꣳहवामहेव्वसोमम ॥ आहम॑जानिगर्भ॒धमात्त्वम॑जासिगर्भ॒धम् ॥ १९/२३ ॥ श्रीश्च॑तेल॒क्ष्मीश्च॒पत्न्या॑वहोरा॒त्रेपा॒र्श्वेनक्ष॑त्राणिरू॒पम॒श्श्विनौ॒व्यात्त॑म् ॥ इ॒ष्णन्नि॑षाण॒ामुम्म॑ऽइषाणसर्व्वलो॒कम्म॑ऽइषाण ॥ ३२/३१ ॥ अम्बे॒ऽअम्बि॒केम्बा॑लिके॒नमा॑नयति॒कश्च॒न ॥ सस॑स्त्यश्श्व॒कःसुभ॑द्रिकाङ्काम्पीलवा॒सिनीम् ॥ १८/२३ ॥ तन्त॑ऽए॒तमनु॒जोष॑म्भराम्म्ये॒षनेत्त्वद॑पचे॒तया॑ऽअ॒ग्नेःप्प्रि॒यम्पाथोपी॑तम् ॥ स॒ꣳस्र॒वभा॑गास्स्थे॒षा बृ॒हन्तः॑ प्प्रस्त्तरे॒ष्ठाःप॑रि॒धेया॑श्च दे॒वाः ॥ १७।१८/२ ॥ मू॒र्द्धान॑न्दि॒वोऽअ॑र॒तिम्पृ॑थि॒व्यावै॑श्श्वान॒रमृ॒तऽआजा॒तम॒ग्निम् ॥ क॒विꣳसम्म्रा॒जमति॑थि॒ञ्जना॑नामा॒सन्नापात्र॑ञ्जनयन्तदे॒वाः ॥ ८/३३ ॥

प्रोह्यमाणः सोमऽआगतो वरुणऽआसन्द्यामासन्नोग्निरा
ग्नीद्ध्रऽइन्द्रो हविर्द्धानेथर्व्वोपावह्रियमाणः ॥ ५६/८ ॥ विश्वे
देवाऽअꣳशुषु न्न्युप्तो विष्णुराप्प्रीतपाऽआप्प्याय्यमानो
यमः सूयमानो विष्णुः सम्भ्रियमाणो वायुः पूयमानः शुक्रः
पूतः शुक्रः क्षीरश्श्रीर्म्मन्थी सक्तुश्श्री विश्वे देवाः ॥ ५७/८ ॥
पितेवैधि सूनवऽआसुशेवा स्वावेशा तन्न्वा संविशस्वाश्विना
द्ध्वर्य्यू सादयतामिह त्त्वा ॥ ३/१४ ॥ पृथिव्याः पुरीषमस्यप्प्सो नाम
तान्त्वा विश्वेऽअभिगृणन्तु देवाः ॥ ४/१४ ॥ षोडशीस्त्तोमऽ
ओजो द्रविणञ्चतुश्चत्त्वारिꣳशस्त्तोमो वर्च्चो द्द्रविणम् ॥ अग्नेः
पुरीषमस्यप्प्सो नाम तान्त्वा विश्वेऽअभिगृणन्तु देवाः ॥ ३/१५ ॥
समिद्धेऽअग्नावधि मामहानऽउक्क्थपत्त्रऽईड्यो गृभीतः ॥
तप्प्तङ्घर्म्मम्परिगृह्यायजन्तोर्ज्जा यद्यज्ञमयजन्त देवाः ॥
॥ ५५/१७ ॥ यस्येमाः प्प्रदिशो यस्य बाहू कस्मै देवाय हविषा
विधेम ॥ यऽआत्त्मदा बलदा यस्य विश्वऽउपासते प्प्रशिषँ
यस्य देवाः ॥ १२।१३/२५ ॥ अनागास्त्त्वन्नोऽअदितिः कृणोतु
क्षत्त्रन्नोऽअश्वो वनताꣳ हविष्म्मान् ॥ इमा नु कम्भुवना
सीषधामेन्द्रश्च विश्वे च देवाः ॥ ४५।४६/२५ ॥ बृहस्प्पते सवित
र्ब्बोधयैनꣳ सꣳशितञ्चित्सन्तराꣳ सꣳशिशाधि ॥ वर्द्धयैन
म्महते सौभगाय विश्वऽएनमनु मदन्तु देवाः ॥ २७ ॥ प्रजा
पते स्त्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ॥
स्वाहाकृतेन हविषा पुरोगा याहि साद्ध्या हविरदन्तु देवाः

॥ ११/२९ ॥ सद्यो जातो व्व्यमिमीत यज्ञमग्ग्निर्द्देवानामभवत्पुरोगाः ॥ अस्य होतुः प्प्रदिश्यृतस्य व्वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ॥ ३६/२९ ॥ अस्म्मे रुद्रा मेहना पर्व्वतासो व्वृत्रहत्त्ये भरहूतौ सजोषाः ॥ यः शꣳसते स्तुवते धायि पज्र्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँ २ ॥ अवन्तु देवाः ॥ ५०/३३ ॥ नहि स्प्पशमविदन्नन्न्यमस्म्माद्वैश्श्वानरात्पुरऽएतारमग्ग्नेः ॥ एमेनमवृधन्नमृताऽअमर्त्त्यं वैश्श्वानरक्षैत्रजित्त्याय देवाः ॥ ६०/३३ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्न्यासन् ॥ ते ह नाकम्महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः ॥ ६१/३१ ॥ ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे। स मे कामान्कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय महाराजाय नमः ॥ ॐ स्वस्ति। साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्सार्वभौमः सार्वायुषऽआन्तादापरार्धात्। पृथिव्यै समुद्रपर्यन्ताया एकराडिति । तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्याऽऽवसन्गृहे। आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥ ॐ व्विश्श्वतश्चक्षुरुतव्विश्श्वतोमुखोव्विश्श्वतोबाहुरुतव्विश्श्वतस्प्पात् ॥ सम्बाहुब्भ्यान्धमतिसम्पतत्त्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ १९/१७ ॥ जानामि पूजनमहं नहि शास्त्रसिद्धं शक्तिस्तु ते परिचिता मम सर्वतश्च । पुष्पा-

ञ्जलिर्भगवतश्चरणाब्जयोस्ते सन्दीयते परिगृहाण विसृज्य दोषान् ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः मन्त्रपुष्पाञ्जलिं सम० ॥ [1]प्रदक्षिणाम् ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषम्पशुम् ॥ १५/३५ ॥ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि विनश्यन्ति प्रदक्षिणपदे पदे ॥ ॐ भूर्भुवः स्वः शिवपं० देवेभ्यो नमः प्रदक्षिणां सम० ॥ मूलमन्त्रजपसङ्कल्पः ॥ अद्येत्यादि० शुभपुण्यतिथौ शिवपं० देवानां प्रीतये [1]मूलमन्त्रजपमहं करिष्ये ॥ अर्पणम् ॥ शिवपञ्चायतनदेवानां प्रीत्यर्थं तत्तन्मन्त्राणां कृतेनानेन मूलमन्त्रजपकर्मणा शिवपञ्चायतनदेवाः प्रीयन्तां न मम ॥ विशेषार्घः ॥ अर्घपात्रे जलमादाय तस्मिन्गन्धाक्षतपुष्पाणि प्रक्षिप्य तदुपरि सहिरण्यं पूगीफलं नालिकेरादि फलं वा निधाय केवलं गन्धाक्षतपुष्पादिसहितं जलं वा गृहीत्वा विशेषार्घं दद्यात्। इदं फलं मया देव स्थापितं पुरतस्तव। तेन मे सुफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ रूपं देहि जयं देहि भाग्यं तथा प्रभो ! ॥ पुत्रान्देहि धनं देहि सर्वान्कामाँश्च देहि मे ॥ ॐ भूर्भुवः स्व शिवपञ्चायतनदेवेभ्यो नमः विशेषार्घं समर्पयामि ॥

---

[1] **शिवस्य** ॐ नमः शिवाय, ॐ नमो भगवते रुद्राय वा। **देव्याः** ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे । **विष्णोः** ॐ नमो भगवते वासुदेवाय । **गणेशस्य** ॐ वक्रतुण्डाय हुम्। **सूर्यस्य** ह्रां ह्रीं ह्रौं सः श्रीसूर्याय नमः ।

[1]स्तुतिपाठः ॥ पुष्पाणि सन्तु तव देव! ममेन्द्रियाणि धूपोऽगुरुर्वपुरिदं हृदयं प्रदीपः ॥ प्राणा हवींषि करणानि तवाक्षताश्च पूजाफलं व्रजतु साम्प्रतमेष जीवः ॥ १ ॥ वाञ्छामि नाहमपि सर्वधनाधिपत्यं न स्वर्गभूमिमचलां न पदं विधातुः ॥ भूयो भवामि यदि जन्मनि जन्मनि स्यां त्वत्पादपङ्कजलसन्मकरन्दभृङ्गी ॥ २ ॥ जन्मानि सन्तु मम देव शताधिकानि माया न मे विशतु चित्तमबोधहेतुः ॥ किञ्चित्क्षणार्धमपि ते चरणारविन्दान्नापैतु मे हृदयमीश! नमो नमस्ते ॥ ३ ॥ शिवो गुरुः शिवो देवः शिवो बन्धुः शरीरिणाम्। शिव आत्मा शिवो जीवः शिवादन्यन्न किञ्चिन्न ॥ ४ ॥ शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका। शरणं पुनरेव तावुभौ शरणं

---

[1] श्रीशङ्कराचार्यविरचितमानपूजास्तोत्रम्–रत्नैः कल्पितमासनं हिमजलैः स्नानञ्च दिव्याम्बरं नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ॥ जातीचम्पकबिल्ववपत्ररचितं पुष्पञ्च धूपं तथा दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥ १ ॥ सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पायसम् । शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥ २ ॥ छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं वीणाभेरिमृदङ्गकाहलकलागीतञ्च नृत्यं तथा। साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥ ३ ॥ आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ॥ सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ ४ ॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम् । विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे! श्रीमहादेव! शम्भो! ॥ ५ ॥

नान्यदुपैमि दैवतम् ॥ ५ ॥ आवाहनं न जानामि न जानामि तवार्चनम् । पूजां चैव न जानामि क्षमस्व परमेश्वर ! ॥ ६ ॥ गतं दुःखं गतं दारिद्र्यमेव च ॥ आगता सुखसम्पत्तिः पुण्योऽहं तव दर्शनात् ॥ ७ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन रक्ष मां परमेश्वर ॥ ८ ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ ९ ॥ यदक्षरपदभ्रष्टं मात्राहीनञ्च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ १० ॥ यद्दत्तं भक्तिभावेन पत्रं पुष्पं फलं जलम् । गृहाण कृपया देव तत्त्वं मे जगदीश्वर ॥ ११ ॥ भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ॥ त्वयिजातापराधानां त्वमेव शरणं मम ॥ १२ ॥

अर्पणम् ॥ हस्ते जलं गृहीत्वा ॥ अनेनाऽऽवाहनाऽऽसनपाद्यार्घाचमनीयस्नानवस्त्रोपवीतगन्धाक्षतपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणारार्तिक्यप्रदक्षिणामन्त्रपुष्पाञ्जलिरूपैः षोडशोपचारैरन्योपचारैश्च यथाज्ञानेन (यथामिलितोपचारद्रव्यैर्वा) कृतेनानेन पूजनकर्मणा शिवपञ्चायतनदेवाः प्रीयन्तां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ शङ्खभ्रामणम्— शङ्खमध्ये स्थितं तोयं भ्रामितं केशवोपरि । अङ्गलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ॥ ततो देवतीर्थग्रहणम्— अकालमृत्युहरणं सर्वव्याधिविनाशनम् ॥ देव (देवी)

पादोदकं पीत्वा जठरे धारयाम्यहम् ॥ ततो देवनिर्माल्येन शिरसि मार्जनम् ॥ देवनिर्माल्यतोयेन योऽङ्गानि परिमार्जयेत् । आधयस्तस्य नश्यन्ति व्याधीनां तु कथैव का ॥ ततो विष्णुस्मरणम् ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ विष्णवे नमः ॥ ॐ विष्णवे नमः ॥ ॐ विष्णवे नमः ॥

॥ इति शिवपञ्चायतनपूजाप्रयोगः समाप्तः ॥

॥ अथ[1] मध्याह्नसन्ध्याप्रयोगः ॥

मध्याह्नसन्ध्यायां भस्मधारणत आरभ्य प्राणायामान्तं सर्वं कर्म प्रातःसन्ध्यावत्कृत्वा मध्याह्नसन्ध्यायाः सङ्कल्पं कुर्यात् । मध्याह्नसन्ध्यासङ्कल्पः ॥ ॐ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो० शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु [2]एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममोपात्तदुरितक्षयद्वारा श्रीरुद्रप्रीत्यर्थं (श्रीपरमेश्वरप्रीत्यर्थं) मध्याह्नसन्ध्योपासनमहं करिष्ये ॥

अथ मंत्राचमनम् ॥ ॐ आपः पुनन्त्वित्यस्य । नारायण

---

[1] पञ्चधा विभक्तदिनतृतीयांशो **मध्याह्नः** इति **धर्मसिन्धुः** । तत्र दिनस्य पञ्चधा विभक्तस्य प्रथमो भागः **प्रातःकालो** ज्ञेयः । द्वितीयः **सङ्गवकालः** । तृतीयो **मध्याह्नकालः** । चतुर्थोऽ**पराह्णकालः** । पञ्चमः **सायाह्नः** । सूर्यास्तोत्तरं त्रिमुहूर्तं प्रदोषः ॥ [2] अत्राद्य महामाङ्गल्यफलप्रदमासोत्तमे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं मध्याह्नसन्ध्योपासनमहं करिष्ये ॥ [3] आपः पुनन्त्वित्यस्य याज्ञवल्क्योपनिषदृषिः । आपो देवता । गायत्री छन्दः । आचमने वि० ॥

ऋषिः। आपो देवता। गायत्री च्छन्दः। आचमने (अम्बुप्राशने) विनियोगः ॥ ॐ आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम्। पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम्। यदुच्छिष्टमभोज्यञ्च यद्वा दुश्चरितं मम। सर्वं पुनन्तु मामापोऽसताञ्च प्रतिग्रहं स्वाहा ॥ पुनर्द्विवारं तूष्णीमाचामेत् ॥ ततः आपोहिष्ठा० इति मार्जनम् ॥ ॐ द्रुपदादिव० ॥ इति अघमर्षणं पापपुरुषनिरसनञ्च प्रातःसन्ध्यावत्कुर्यात् ॥

[1]अथ सूर्यार्घदानम् – ॐ आकृष्णेन० इति मन्त्रस्य हिरण्यगर्भ ऋषिः। आपो देवता। त्रिष्टुप्छन्दः। सूर्यार्घदाने विनियोगः ॥ ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयाति भुवनानिपश्श्यन् ॥ $\frac{४}{३}\frac{३}{३}$ ॥ रुद्रस्वरूपिणे श्रीसूर्यनारायणाय इदमर्घ्यं दत्तं न मम ॥ दत्तार्घोदकेन स्वस्य दक्षिणनासाचक्षुःश्रोत्रस्पर्शनं कुर्यात् ॥ ततः "असावादित्यो ब्रह्म" इति मन्त्रेण प्रदक्षिणं समन्तादुदकं क्षिपेत् ॥ सूर्योपस्थानम् – ॐ उद्वयन्तमं० इत्येतैर्मन्त्रैः सूर्योपस्थानं कुर्यात् ॥

---

[1] मूलमन्त्रेण मध्याह्ने प्रक्षिपेच्च जलं बुधः। उभयोः सन्ध्ययोर्नित्यं गायत्र्या प्रणवेन वा ॥ अम्भश्च प्रक्षिपेत्तेन नान्यथा श्रुतिघातकः ॥ मध्याह्ने विशेषस्तत्रैव ॥ अथाकृष्णीयया हंसवत्या वा त्रिःसद्वार्घ्यमुत्क्षिपेत् ॥ ईषन्नम्रः प्रभाते तु मध्याह्ने ऋजुसंस्थितः। द्विजोऽर्घं प्रक्षिपेद्देव्याः सायं तूपविशन्भुवि। कराभ्यां तोयमादाय गायत्र्या चाभिमन्त्रितम्। आदित्याभिमुखँस्तिष्ठँस्त्रिरूर्ध्वं सन्ध्ययोः क्षिपेत् ॥ सकृदेव तु मध्याह्ने क्षेपणीयं द्विजातिभिः ॥

अथ गायत्रीमन्त्रजपविधिः—अद्येत्यादि० शुभपुण्यतिथौ सर्वपापक्षयार्थं मध्याह्ने सावित्रीस्वरूपिण्या गायत्रीदेव्याः प्रीत्यर्थं गायत्रीमन्त्रस्य यथाशक्ति अमुकसङ्ख्याकं जपमहं करिष्ये ॥ पुनः सङ्कल्पः—गायत्रीप्रीत्यर्थं मध्याह्नसन्ध्यायां सावित्र्या आवाहनं करिष्ये ॥ अथ सावित्र्यावाहनम्—[1]सावित्रीं युवतीं शुक्लां शुक्लवस्त्रां त्रिलोचनाम् । त्रिशूलिनीं वृषारूढां चन्द्रलेखाविभूषिताम् ॥ यजुर्वेदकृतोत्सङ्गां रुद्राणीं रुद्रदेवताम् । कैलासपिहितावासामायन्तीं सूर्यमण्डलात् । वरदां त्र्यक्षरां साक्षाद्देवीमावाहयाम्यहम् ॥ आगच्छ वरदे देवि त्र्यक्षरे रुद्रवादिनि । सावित्रि छन्दसां माता रुद्रयोने! नमोऽस्तु ते ॥ इत्यावाहयेत् ॥

ततो गायत्र्युपस्थानं, गायत्रीशापविमोचनं, गायत्र्यस्त्रोपाहरणं गायत्रीजपविनियोगं, गायत्रीन्यासान्, [2]गायत्रीध्यानं गायत्रीमन्त्रजपादौ चतुर्विंशतिमुद्राप्रदर्शनञ्च प्रातःसन्ध्यावत् कृत्वा गायत्रीजपं निवृत्य षडङ्गन्यासान् जपान्तेऽष्टमुद्राप्रदर्शनं, सूर्यप्रदक्षिणां, दिग्देवतानमस्काराँश्च प्रातःसन्ध्यावत्कृत्वा जपनिवेदनं कुर्यात् ॥

---

[1] **गायत्रीरूपाणि स्मृत्यन्तरे**—गायत्री तु भवेद्रक्ता सावित्री शुक्लवर्णिका । सरस्वती तथा कृष्णा उपास्या वर्णभेदतः ॥ **तथैव**—गायत्री ब्रह्मरूपा तु सावित्री रुद्ररूपिणी । सरस्वती विष्णुरूपा ह्युपास्या रूपभेदतः ॥ [2] **मध्याह्नसन्ध्याध्यानम्**— विश्वमातः सुराभ्यर्च्ये पुण्ये गायत्रि वैधसि । आवाहयाम्युपास्त्यर्थमेह्येनोघ्नि पुनीहि माम् ॥ वृषेन्द्रवाहना देवी ज्वलत्त्रिशिखधारिणी । श्वेताम्बरधरा श्वेतनागाभरणभूषणा ॥ श्वेतस्रगक्षमालालङ्कृता रक्ता च शङ्करा ॥ जटाधरा धरा धात्री धरेन्द्राङ्गभवाऽभवा ॥ मातर्भवानि विश्वेशि आहुतैहि पुनीहि माम् ॥

अथ जपनिवेदनम्—“ॐ देवागातु” इति मन्त्रं पठित्वा ॥ हस्ते जलं गृहीत्वा ॥ मया मध्याह्नसन्ध्याङ्गभूतेनामुकसङ्ख्याकगायत्रीजपकर्मणा कृतेन भगवान् रुद्रस्वरूपी श्रीसूर्यनारायणः प्रीयतां न मम ॥

ततो गायत्रीविसर्जनं, गोत्रोच्चारपूर्वकाभिवादनम्, आचमनं शिखामुक्तिश्च प्रातःसन्ध्यावत् कुर्यात् ॥

अर्पणम् ॥ मया कृतेनानेन मध्याह्नसन्ध्योपासनाख्येन कर्मणा भगवान् श्रीपरमेश्वरः प्रीयतां न मम ॥ ॐ विष्णवे नमः ॥ ॐ विष्णवे नमः ॥ ॐ विष्णवे नमः ॥

॥ इति मध्याह्नसन्ध्याप्रयोगः समाप्तः ॥

अथ सूर्योपस्थानप्रयोगः ॥

आचमनं प्राणायामञ्च कृत्वा अद्येत्या० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीसवितासूर्यनारायणदेवताप्रीत्यर्थं सूर्योपस्थानमहं करिष्ये ॥ ततो वामदक्षिणकरयोरनामिकायां कुशपवित्रे धृत्वा दक्षिणहस्ते गन्धाक्षतपुष्पाण्यादाय ॥“ॐ आकृ॒ष्णेन॒०” इति मन्त्रं पठित्वा सवितारं सम्पूज्य वामदक्षिणहस्तयोर्द्वौ द्वौ साग्रदर्भौ धृत्वा सूर्योपस्थानं कुर्यात् ॥

सूर्यमुदीक्षन्नुत्थाय— ॐ उद्वयन्तम॑स॒० ॥ ३ ॥ ॐ उदु॒त्यञ्जा॒० ॥ ४ ॥ ॐ चि॒त्रन्दे॒वाना॒० ॥ ५ ॥ ॐ तच्च-

क्षुर्द्दे॑० ॥ ६ ॥ ॐ तत्स॑वि॒तुः॒० ॥ ७ ॥ अनुवाकः— ॐ वि॒भ्राड्बृ॒० ॥१७॥ पुरुषसूक्तम्—ॐ स॒हस्र॑शीर्षा॒० ॥१६॥ शिवसङ्कल्पः— ॐ यज्जाग्र॑तो० इति षट् मंत्राः ॥ ६ ॥

मण्डलब्राह्मणम्—ॐ य॒दे॑तन्म॒ण्डलं त॒पति त॒न्मह॒दुक्थन्ता ऽऋ॒चः॒ स॒ ऽऋ॒चां लो॒को॒थ य॒दे॑त॒दर्च्चि॑र्द्दी॒प्यते त॒न्महाव्रन्तता॒नि सा॒मानि स सा॒म्नाँल्लो॒को॒थ य॒ऽएष॒ऽएत॒स्मिन्म॒ण्डले पु॒रुष॒ः सोग्निस्ता॒नि य॒जूꣳ॑षि स य॒जुषांल्लो॒कः॒ ॥ १ ॥ सैषा॒ त्र॒य्येव॒ व्वि॒द्या तपती त॒द्धैतद॒प्य॒विद्वाꣳ सऽ- आहुस्त्रयी वा॒ ऽएषा॒ व्विद्या त॒पती॒ति व्वा॒ग्घैव तत्प॒श्यन्ती व्वदति ॥ २ ॥ स॒ ऽएष॒ ऽएव॒ मृत्युर्य॒ ऽएष ऽएत॒स्मिन्म॒ण्डले पुरुषो॒थैत॒दमृ॒तं य॒दे॒त॒दर्च्चि॑र्द्दी॒प्यते त॒स्मान्मृत्युर्न॒ म्रियते मृ॒ते॒ ह्यन्तस्त॒स्मादु न॒ दृश्यते मृ॒ते॒र्ह्यन्तः ॥ ३ ॥ ‘त॒दे॑ष श्लो॒को भवति’—अ॒न्तरंमृत्त्यो॒रमृ॒तमित्त्य॒वर॒ꣳ ह्ये॒तन्मृत्त्यो॒रमृ॒तम्मृ॒त्यावमृ॒तमा॒हितमि॒त्त्येत॒स्मिन्हि पुरुषऽएतन्म॒ण्डलम्प्र॒तिष्ठितं त॒पति मृत्त्युर्व्विवखन्तं वस्त ऽइ॒त्त्यसौ वा॒ ऽआदित्यो व्वि॒वस्वानेष॒ह्यहोरात्त्रे॒ व्विव॒स्ते त॒मेष॒ व्वस्ते सर्व्व॒तो॒ ह्येनेन प॒रिवृतो मृत्त्यो॒रात्मा व्वि॒वस्वती॒त्येत॒स्मिन्हि म॒ण्डल ऽएत॒स्य पुरुषस्या॒त्मैत॒दे॑ष श्लो॒को भवति ॥ ४ ॥ त॒योर्व्वा॒ ऽएतयोरुभ॒योरेत॒स्य चार्च्चि॒ष ऽएत॒स्य च पु॒रुषस्यैतन्म॒ण्डलं प्रतिष्ठा त॒स्मान्मह॒दुक्थम्प॒रस्मै न शꣳसेन्नेदेता॒ं प्रतिष्ठां॒ छिन्न॒दाऽ इ॒त्येता॒ꣳह स॒ प्रतिष्ठां॒ छिन्तेऽयो॒ मह॒दुक्थं पर॒स्मै श॒ꣳसति

तस्मादुक्थशसम्भूयिष्ठं परिचक्षते प्रतिष्ठा छिन्नो हि भवतीत्यधिदेवतम् ॥ ५ ॥ 'अथाधियज्ञम्' यदेतन्मण्डलंतपत्यꣳसरुक्मोथयदेतदर्चिर्दीप्यतऽइदंतत्पुष्करपर्णमापोह्येताऽआपःपुष्करपर्णमथयऽएषऽएतस्मिन्मण्डलेपुरुषोयमेवससोयꣳहिरण्मयःपुरुषस्तदेतदेवैतत्त्रयꣳसंस्कृत्येहोपधत्तेतद्यज्ञस्यैवानुसꣳस्थामूर्द्धमुत्क्रामतितदेतमप्येतियऽएषतपतितस्मादग्निन्नाद्रियेतपरिहन्तुममुत्रह्येषतदाभवतीत्युऽएवाधियज्ञम् ॥ ६ ॥ 'अथाध्यात्मम्' यदेतन्मण्डलंतपतियश्चैषरुक्मऽइदंतच्छुक्लमक्षन्नथयदेतदर्चिर्दीप्यतेयच्चैतत्पुष्करपर्णमिदंतत्कृष्णमक्षन्नथयऽएषऽएतस्मिन्मण्डलेपुरुषोयश्चैषहिरण्मयःपुरुषोयमेवससोयंदक्षिणेक्षन्पुरुषः ॥ ७ ॥ सऽएषऽएवलोकंपृणतामेषसर्वोग्निरभिसम्पद्यतेतस्यैतन्मिथुनंयोयꣳसव्येक्षन् पुरुषोर्द्धमुहैतदात्मनोयन्मिथुनंयदावैसहमिथुनेनाथसर्वोथकृत्स्नꣳकृत्स्नतायैतद्यत्तेद्वेभवतोद्वन्द्वꣳहिमिथुनम्प्रजननंतस्माद्द्वेद्वेलोकंपृणेऽउपधीयेतेतस्मादुद्वाभ्यांद्वाभ्यांचित्तिम्प्रणयन्ति ॥ ८ ॥ सऽएषऽएवेन्द्रो योयंदक्षिणेक्षन्पुरुषोथेयमिन्द्राणीताभ्यांदेवाऽएतांविधृतिमकुर्वन्नासिकान्तस्माज्जायायाऽअन्तेनाश्नीयाद्वीर्य्यवान्हास्माज्जायतेवीर्य्यवन्तमुहसाजनयतियस्याऽअन्तेनाश्नाति ॥ ९ ॥ तदेतद्देवव्रतꣳराजन्यबन्धवोमनुष्याणामनुत्तमांगोपायन्तितस्मादुतेषुवीर्य्यवाञ्जायतेमृतवाकावयसाꣳसाक्षिप्रश्येनंजनयति ॥ १० ॥ तौ हृदयस्याकाशं प्रत्यवेत्य मिथुनीभवतस्तौ यदा मिथुन-

स्यान्तङ्गच्छतोथ है तत्पुरुषः स्वपिति तद्यथाहैवेदम्मानुषस्य मिथुनस्यान्तङ्गत्वासंविद्ऽइवभवत्येवꣳहैवैतदसंविद्ऽइव भवति दैवꣳह्येतन्मिथुनम्परमोह्येषऽआनन्दः ॥ ११ ॥ तस्मादेवंवित्स्वप्यात् ॥ लोक्यꣳहैतेऽएवतद्देव ते मिथुनेनप्रियेणधाम्नासमर्द्धयतितस्मादुहस्वपन्तंधुरेवनबोधयेन्नेदेते देव ते मिथुनी भवन्त्यौहिनसानीतितस्मादुहैतत्सुखुपुषः श्लैष्मणमिवसुखम्भवत्येतेऽएवतद्देवतेरेतःसिञ्चतस्तस्माद्रेतसऽइदꣳसर्वꣳसम्भवतियदिदंकिञ्च ॥ १२ ॥ सऽएषऽएव मृत्युर्यऽएषऽएतस्मिन्मण्डलेपुरुषोयश्चायन्दक्षिणेक्षन्पुरुषस्तस्यहैतस्यहृदयेपादावतिहतौतौहैतदाच्छिद्योत्क्रामतिसयदोत्क्रामत्यथहैतत्पुरुषोम्रियतेतस्मादुहैतत्प्रेतमाहुराच्छेद्यस्यति ॥ १३ ॥ एषऽउऽएवप्राणः । एषहीमाःसर्वाःप्रजाःप्रणयतितस्यैतेप्राणाःस्वाःसयदास्वपित्यथैनमेतेप्राणाःस्वाऽअपियतिन्तस्मात्स्वाप्ययःस्वाप्ययोहवैतꣳस्वप्नऽइत्याचक्षतेपरोक्षन्परोक्षकामाहिदेवाः ॥ १४ ॥ सऽएतैःसुप्तोनकस्यचन व्वेद न मनसासङ्कल्पयति न व्वाचान्नस्यरसंव्विजानाति न घ्राणेन गन्धं व्विजानाति न चक्षुषापश्यति न श्रोत्रेणशृणोत्येतꣳह्येतेतदापीताभवन्तिसऽएषऽएकःसन्प्रजासुबहुधा व्याविष्टस्तस्मादेकासतीलोकम्पृणासर्वमग्निमनुव्विभवत्यथयदेकऽएवतस्मादेकः ॥ १५ ॥ तदाहुः । ऽएकोमृत्युर्ब्बहवऽइत्येकश्चबहवश्चेतिहब्रूयाद्यदहासावमुत्रतेनैकोथयदिह प्रजासु बहुधा व्याविष्टस्तेनोबहवः ॥ १६ ॥ तदाहुः ।

ऽअन्तिके॒मृत्युर्दूराऽइ॒त्यन्तिके॒ च दूरे चे॒ति ह ब्रूयाद्यदु॒
हाय॒मि॒हाध्यात्मन्ते॒नान्तिके॒थय॒दसा॒वमुत्रते॒नो दूरे ॥ १७ ॥
त॒देष श्लोको भवति । अ॒न्येभात्य॒पश्रितोर॒सानाꣳसं॒क्षरे
मृ॒तऽइतिय॒देतन्म॒ण्डलंत॒पतितद॒न्नम॒थय॒ऽएष॒ऽएत॒न्म॒ण्डले
पु॒रुष॒ः सोत्ता सऽएत॒स्मिन्नन्नेपश्रितोभाती॒त्यधिदेवतम्
॥१८॥ अथाध्यात्मम्—इद॒मेवश॒रीरम॒न्नमथ॒ यो य॒न्दक्षि॒णे
क्षन्पुरुष॒ःसोत्ता स॒ऽएत॒स्मिन्नन्ने॒पश्रितो भाति ॥ १९ ॥ त॒मे
त॒मग्निरि॒त्यध्वर्य॒वऽउ॒पासते । य॒जुरि॒त्येष॒हीदꣳस॒र्वँयु॒न॒क्ति
सामे॒तिच्छन्दोगा॒ऽएत॒स्मि॒न्हीदꣳस॒र्वꣳसमान॒मुक्थमि॒तिबह्वृ
चा॒ऽएष॒हीदꣳस॒र्वँयत॒द्विषमि॒तिसर्प्पा॒ः सर्प्पऽ इ॒तिसर्प्पवि॒
दऽऊर्गि॒तिदेवा॒रयिरि॒तिमनु॒ष्यामायेत्य॒सुराःस्वधे॒तिपित॒रो
देवजनऽइ॒तिदेवजनवि॒दोरूपमि॒तिगन्धर्वा॒ गन्धऽइत्यप्सर॒
सस्तंय॒थायथोपा॒सतेत॒देव॒ भवति त॒द्धैनान्भूत्वावतित॒स्मा
देनमेवंवित्स॒र्वैरे॒वैतैरु॒पासीतस॒र्वꣳहैत॒द्भवतिस॒र्वꣳहैनमेत॒द्भू
त्वाऽवति ॥ २० ॥ स॒ऽएष॒त्रीष्टकोग्निर्ऋगे॒काय॒जुरे॒का॒सा
मै॒कातद्याङ्काञ्चा॒त्र॒र्चौपद॒धातिरुक्म॒ऽएवत॒स्याऽआय॒तनम॒थ
याँय॒जुषापुरुषऽएवत॒स्याऽआय॒तनम॒थ याꣳसा॒म्नापुष्कर
पर्ण॒मेवत॒स्याऽआय॒तनमेव॒ं त्रीष्टकः ॥२१॥ ते वा॒ऽएते॒ऽउ
भे॒ऽएष॒ च रुक्म॒ऽएत॒च्चपुष्करपर्ण॒मेतत्पु॒रुषम॒पीतऽउभे॒ऽह्यृ॒
क्सामेय॒जुर॒पीतऽएवम्वे॒केष्टकः ॥२२॥ स॒ऽएष॒ऽएव॒मृत्युः
य॒ऽएष॒ऽएत॒स्मिन्म॒ण्डलेपु॒रुषोय॒श्चायंद॒क्षिणेक्षन्पु॒रुषःस॒ऽए

ष्ऽएवंविद्ऽआत्मा भवति सयदेवंविदस्माँल्लोकात्प्रैत्त्यथैतमेवात्मानमभिसम्भवतिसोमृतो भवतिमृत्युर्ह्यस्यात्माभवति ॥२३॥ तैन वाऽइदमग्रेसदासीन्नैवसदासीत् ॥ इति मण्डलब्राह्मणम् । पाण्योर्गृहीते कुशपवित्रे पूर्वस्यां दिशि [1]त्यक्त्वोपविश्य हस्ते जलं गृहीत्वा ॥ अनेन सूर्योपस्थानकर्मणा कृतेन भगवान् सविता सूर्यनारायणः प्रीयतां न मम ॥

इति सूर्योपस्थानप्रयोगः समाप्तः ॥

[2]अथ ब्रह्मयज्ञप्रयोगः ॥

एवं सूर्योपस्थानं विधाय पूर्वाग्रदर्भासने स्थित्वा ब्रह्मयज्ञं कुर्यात् ॥ आचमनम्— ॐ केशवाय नमः स्वाहा ॥ ॐ नारायणाय नमः स्वाहा ॥ ॐ माधवाय नमः स्वाहा ॥ ॐ गोविन्दाय नमः ॥ इति हस्तं प्रक्षाल्य ॥ प्राणायाम् — ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐसत्यम् । ॐ तत्त्सवितुर्व्वरेण्यंभर्ग्गोदेवस्य धीमहि । धियोयोनः प्प्रचोदयात् । ॐ आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोम् ॥

---

[1] सूर्यं प्रदक्षिणीकृत्य नमस्कृत्योपविशेत् ॥ [2] अथ **पञ्चमहायज्ञाः**—ब्रह्मयज्ञो देवयज्ञो मनुष्ययज्ञः पितृयज्ञो भूतयज्ञ इति श्रुतेः ॥ **याज्ञवल्क्यः**— तृप्तास्तु तर्पयन्त्येनं सर्वकामफलैः शुभैः ॥ पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः । एते पञ्चमहायज्ञा ब्रह्मयज्ञादिनामकाः ॥ **मनुः**—ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्वदा । नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् ॥ एतानेके महायज्ञान्यज्ञशास्त्रविदो जनाः । अनीहमानाः सततमिन्द्रियेष्वथ जुह्वति ॥ वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा । वाचि प्राणे च पश्यन्तो यज्ञनिर्वृतिमक्षयाम् ॥ यत्फलं सोमयागेन प्राप्नोति धनवान्द्विजः । सम्यक् पञ्चमहायज्ञैर्दारिद्र्यं नश्यति क्षणात् ॥

कुशपवित्रधारणम्– ॐ पवित्रैस्त्थोव्वैष्णव्व्यौसवितुर्व्वः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्श्मिभिः ॥ तस्यन्तेपवित्रपतेपवित्रपूतस्ययत्त्कामःपुनेतच्छकेयम् ॥४॥

सङ्कल्पः– अद्येत्यादि० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थञ्च यथाशक्ति ब्रह्मयज्ञेनाहं यक्ष्ये ॥

द्वितीयसङ्कल्पः– इषेत्त्वादिषु मन्त्रेषु खंब्रह्मान्तेषु दशप्रणवसहितेषु याः क्रियास्तत्र विवस्वानृषिः । प्रजापतिर्देवता । सर्वाणि छन्दांसि । सर्वाणि सामानि प्रतिलिङ्गोक्ता देवता । ब्रह्मयज्ञे विनियोगः ॥ ब्रह्मयज्ञारम्भे यथाविधि स्नात्वा छन्दःपुरुषं शरीरे न्यसेत् ॥ तिर्यग्बिलश्चमसऽऊर्द्ध्वबुध्नः छन्दः पुरुषस्य च ॥ अथ न्यासाः– ॐ गौतमभरद्वाजाभ्यां नमो नेत्रयोः ॥ ॐ विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः ॥ ॐ वसिष्ठकश्यपाभ्यां नमो नासिकयोः ॥ ॐ अत्रये नमो वाचि ॥ ॐ गायत्र्यग्निभ्यां नमः शिरसि ॥ उष्णिक्सवितृभ्यां नमो ग्रीवायाम् । ॐबृहतीबृहस्पतिभ्यां नमोऽनूके (हनौ) ॥ ॐ बृहद्रथन्तरद्यावापृथिवीभ्यां नमो

---

१ इषेत्त्वादिषु मंत्रेषु खं ब्रह्मान्तेषु याः क्रियाः । दशप्रणवसंयुक्ता भुर्भूवःस्वरितीरिताः ॥ तत्प्रकारो द्वेधा– आदौ प्रणवमुच्चार्य व्याहृतिः प्रणवान्विता ॥ मंत्रादौ प्रणवः कार्यो मंत्रान्ते प्रणवः पुनः ॥ ततो व्याहृतिसंयुक्तस्त्वन्ते च प्रणवं पठेत् ॥ ॐ ॐ भूः ॐ भुवः ॐ स्वः ॐ 'इषेत्त्वोर्ज्जेत्त्वा०, ॐ ॐभूः ॐभुवः ॐ स्वः ॐ ॥ द्वितीयः प्रकार.– आदौ प्रणवमुच्चार्य सप्तव्याहृतयस्ततः ॥ मंत्रादौ प्रणवः कार्यो मंत्रान्ते प्रणवः पुनः ॥

बाह्वोः ॥ ॐ त्रिष्टुबिन्द्राभ्यां नमो नाभौ ॥ ॐ जगत्यादित्याभ्यां नमः श्रोण्योः ॥ ॐ अतिच्छन्दाप्रजापतिभ्यां नमो लिङ्गे ॥ ॐ यज्ञायज्ञियवैश्वानराभ्यां नमो गुदे ॥ ॐ अनुष्टुब्विश्वेभ्यो देवेभ्यो नम ऊर्वोः ॥ ॐ पङ्क्तिमरुद्भ्यो नमो जान्वोः ॥ ॐ द्विपदाविष्णुभ्यां नमः पादयोः ॥ ॐ विच्छन्दावायुभ्यां नमो नासापुटस्थप्राणेषु ॥ ॐ न्यूनाक्षराच्छन्दोभ्यो नमः सर्वाङ्गेषु ॥ [[1]एवमेवाङ्गानि योजयित्वा वेदमयः सम्पद्यते]

ततो वामहस्ते कुशजलयवाक्षतचन्दनादीनि गृहीत्वा तदुपरि दक्षिणहस्तमधोमुखं कृत्वा करसम्पुटं स्वकीयदक्षिणजानूपरि निधाय वक्ष्यमाणब्रह्मयज्ञमन्त्रान्पठेत् ॥

ॐभूर्भुव॒ꣳस्व॒ः तत्स॑वि॒तु० । ॐइ॒षेत्त्वो॒र्ज्जेत्त्वा॑व्वा॒यव॑स्त्थ दे॒वोव॑ःसवि॒ताप्प्रार्प्प॑यतु॒श्श्रेष्ठ॑तमाय॒कर्म्म॑ण॒ऽआप्प्या॑यद्ध्वम घ्न्या॒ऽइन्द्रा॑यभा॒गम्प्र॒जाव॑तीरनमी॒वाऽअ॑य॒क्ष्मामाव॑स्ते॒नऽ ईशत॒ माघश॑ꣳसोद्ध्रु॒वाऽअ॒स्मिन्न्गोप॑तौस्यातब॒ह्वीर्य॑ज मानस्यप॒शून्न्पा॑हि ॥ १/१ ॥ वसो॑ꣳप॒वित्रम् ॥ हि॒र॒ण्णमये॑न॒ पात्रे॑णस॒त्त्यस्या॑पि॑हित॒म्मुख॑म् ॥ यो॒सावा॑दि॒त्त्येपुरु॑ष॒ꣳसो॒

---

[1] "एवमेवाङ्गानि योजयित्वा वेदमयः सम्पद्यते । न कुतश्चिद्भयं विन्दते । शापानुग्रहसामर्थ्यं ब्राह्मं तेजश्च वर्धते । स्वर्गलोकं परं साधनम् । धर्मार्थकाममोक्षस्य च तस्य दारिद्र्यदुःखशोकरोगभयं न भवति । ऋषिदेवताछन्दांसि विदित्वा ऋङ्मयो यजुर्मयः साममयोऽथर्वमयोऽमृतमयः सम्भूय ब्रह्मैवाभ्येति" इत्यादि सर्वानुक्रमसूत्रम् ।

सावहम् ॥ ४० ॥ ॐ ३ म् खम्ब्रह्म । ॐ व्रतमुपैष्यन्नन्तरेणाहवनीयञ्चगार्हपत्यञ्च प्राङ्तिष्ठन्नपऽउपस्पृशति । तद्यदपऽउपस्पृशत्यमेध्यो वै पुरुषोयदनृतंवदति तेन पूतिरन्तरतो मेध्यावाऽआपो मेध्यो भूत्वा व्रतमुपायानीतिपवित्रंवाऽआपःपवित्रपूतो व्रतमुपायानीति तस्माद्वाऽअपऽउपस्पृशति। सोग्निमेवाभीक्षमाणो व्रतमुपैति ॥ [ॐपूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदुच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ खं ब्रह्म । ॐ खं पुराणम् । ॐ वायुरवे खमिति हस्माह कौरव्यायणीपुत्रो वेद यं ब्राह्मणा विदुर्वेदेन न सद्वेदितव्यम्] ॥ ॐ प्राश्नीपुत्रादासुरिवासिनः प्राश्नीपुत्रऽआसुरायणादासुरायणऽआसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्यऽउद्दालकादुद्दालकोऽरुणादरुणऽउपवेशेरुपवेशिः कुश्रेःकुश्रिर्वाजश्रवसोवाजश्रवाजिह्वावतोबाध्योगाज्जिह्वावान् बाध्योगोऽसिताद्वार्षगणादसितोवार्षगणोहरितात् कश्यपाद्धरितःकश्यपःशिल्पात्कश्यपाच्छिल्पः कश्यपःकश्यपान्नैध्रुवेःकश्यपोनैध्रुविर्वाचोवागम्भिण्यादित्यादादित्यानीमानिशुक्लानियजूꣳषिवाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥ (इत्युक्तं बृहदारण्योपनिषदि) ॐअग्निमीळे पुरोहितं यज्ञस्यदेवमृत्विजम् । होतारं रत्नधातमम् ॥ ॐ अग्नऽआयाहिवीतये गृणानोहव्यदातये । निहोता सत्सिबर्हिषि ॥ ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तुपीतये शँय्योरभिस्रवन्तुनः ॥

चतुर्वेदानन्तरम् अङ्गानि पठेत्— अथानुवाकान् वक्ष्यामि ॥ मण्डलं दक्षिणमक्षि हृदयम् ॥ अथ शिक्षां प्रवक्ष्यामि । अथातोऽधिकारः फलयुक्तानि कर्माणि । अथातो गृह्यस्थाली पाकानां कर्म ॥ वृद्धिरादैच् । समाम्नायः समाम्नातः । मयरसतजभनलगसंमितम् । पञ्चसंवत्सरमयं युगाध्यक्षम् । गौः ग्माः । अथातो धर्मजिज्ञासा ॥ अथातो ब्रह्मजिज्ञासा ॥ योगीश्वरं याज्ञवल्क्यं नारायणं नमस्कृत्य ॥ इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः । वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः ॥

[1]अर्पणम्— अनेन यथाशक्ति ब्रह्मयज्ञाख्येन कर्मणा भगवान् श्रीपरमेश्वरः प्रीयतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥

इति ब्रह्मयज्ञप्रयोगः समाप्तः ॥

---

[2]अथ देवर्षिमनुष्यपितृतर्पणप्रयोगः ॥

[3]आचमनम्— ॐ केशवाय नमः स्वाहा । ॐ नारायणाय नमः स्वाहा । ॐ माधवाय नमः स्वाहा । ॐ गोविन्दाय नमः । इति हस्तं प्रक्षाल्य प्राणायामं कुर्यात् ॥ ॐ भूः

---

[1] एवं ब्रह्मयज्ञं विधाय पाण्योर्गृहीतकुशानां कुशपवित्रस्य चोत्तरस्यां त्यागः ॥

[2] **शातातपः**—तर्पणं तु शुचिः कुर्यात् प्रत्यहं स्नातको द्विजः । देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् । **प्रयोगपारिजाते**—देवताश्च मुनींश्चैव पितॄन्यो हि न तर्पयेत् । देवादीनामृणी भूत्वा नरकं प्रतिपद्यते ॥ **सूत्रम्**—अतर्पिता देहाद्रुधिरं पिबन्ति ॥

[3] **मार्कण्डेयः**— देवार्चनादिकार्याणि तथा गुर्वभिवादनम् । कुर्वीत सम्यगाचम्य प्रयतोऽपि सदा द्विजः ॥

ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् । ॐ तत्त्सवितुर्व्वरेण्ण्यंभर्ग्गोदेवस्यधीमहि । धियोयोनः प्प्रचोदयात् ॥ ॐआपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोम् ॥

कुशपवित्रधारणम्—ॐपवित्रेस्त्थोव्वैष्णव्यौसवितुर्व्वः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥ तस्यतेपवित्रपतेपवित्रपूतस्ययत्त्कामःपुनेतच्छकेयम् ॥ ४/४ ॥

अद्येत्यादि॰ एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं देवर्षिमनुष्यपितृतर्पणमहं करिष्ये ॥

प्रथमं ताम्रादिपात्रे श्वेतगन्धपुष्पयवतुलसीदलानि प्रक्षिप्य तत्र शुद्धं जलं पूरयित्वा तस्मिन् हस्तप्रमाणान्प्रादेशप्रमाणान्वा त्रीन् कुशान्स्थापयित्वा हस्ते यवान्गृहीत्वा विश्वेदेवानावाहयेत् ॥ तत्र मन्त्रौ—ॐव्विश्वेदेवासऽआगत श्रृणुताम्मऽइमꣳहवम् । एदम्बर्हिन्निषीदत ॥ ३४/७ ॥ ॐव्विश्वेदेवाःश्रृणुतेमꣳहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवा यजत्राऽआसद्यास्म्मिन्बर्हिषिमादयद्ध्वम् ॥ ५३/३३ ॥ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ॥ ये तर्पणेऽत्र विहिताः सावधाना भवन्तु ते । (भवामः) ॐ विश्वान्देवान् ([१]भवत्सु) आवाहयिष्ये ॥ ॐआवाहय ॥

---

[१] श्राद्धे वाच्यं न तु तर्पणे ॥

स्वयं प्राङ्मुखो[1] यज्ञोपवीती[2] दक्षिणहस्ते प्रागग्र[3]धृतकुशः सव्य[4]हस्तान्वारब्धेन दक्षिणेन पाणिना सव्योत्तराभ्यां कृताञ्जलिभ्यां हस्ताभ्यां वा देव[5]तीर्थेन देवानुद्दिश्याधोलिखितैस्तैस्तैर्मन्त्रैः पात्रान्तरे[6] ब्रह्मादिदेवानेकैकाञ्जलिं सनकादीन्द्वौ द्वावञ्जली कव्यवाडनलादीन्यमादीन् पितृभ्यश्च त्रींस्त्रीन् स्त्रीणां त्वेकैकाञ्जलिं क्रमेण दद्यात् ॥

देवतर्पणम्—ॐ[8]ब्रह्मा तृप्यताम् । ॐविष्णुस्तृप्यताम् । ॐरुद्रस्तृप्यताम् । ॐप्रजापतिस्तृप्यताम् । ॐदेवास्तृप्यन्ताम् । ॐ छन्दांसि तृप्यन्ताम् । ॐ वेदास्तृप्यन्ताम । ॐ ऋषयस्तृप्यन्ताम् । ॐ पुराणाचार्यास्तृप्यन्ताम् । ॐ गन्धर्वास्तृप्यन्ताम् । ॐ इतराचार्यास्तृप्यन्ताम् ।

---

१ **दक्षः**– प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान् । उदङ्मनुष्यांस्तृप्येत्तु पितॄन् दक्षिणतस्तथा ॥ २ **व्यासः**– यज्ञोपवीती देवानां निवीती ऋषितर्पणे ॥ प्राचीनावीती पित्र्ये तु स्वेन तीर्थेन भावितः ॥ **भारद्वाजः**–दक्षिणबाहुमुद्धृत्य वामस्कन्धे निवेशितम् ॥ यज्ञोपवीतमित्युक्तं देवकार्येषु शस्यते ॥ ३ अग्रैस्तु तर्पयेद्देवान्मनुष्यान्कुशमध्यतः । पितॄंस्तु कुशमूलाग्रैर्विधिः कौशो यथाक्रमम् ॥ ४ **याज्ञवल्क्यः**– अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु । सव्योत्तराभ्यां पाणिभ्यामथवा तर्पणं भवेत् ॥ ५ **याज्ञवल्क्यः**– कनिष्ठदेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ ६ **हारितः**–पात्राद्वा जलमादाय शुभे पात्रान्तरे क्षिपेत् ॥ ७ **व्यासः**–एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः । अर्हन्ति पितरस्त्रींस्त्रीन्स्त्रिय एकैकमञ्जलिम् ॥ ८ तीर्थानि तृप्यन्ताम् । ॐतीर्थदेवास्तृप्यन्ताम् । ॐ विश्वेदेवास्तृप्यन्ताम् । ॐ मोदास्तृप्यन्ताम् । ॐ प्रमोदास्तृप्यन्ताम् । ॐसुमुखास्तृप्यन्ताम् ॥ ॐदुर्मुखास्तृप्यन्ताम् ॐ अविघ्नास्तृप्यन्ताम् । ॐ विघ्नकर्तारस्तृप्यन्ताम् ॥

ॐ संवत्सरःसावयवस्तृप्यताम् । ॐ देव्यस्तृप्यन्ताम् । ॐ अप्सरसस्तृप्यन्ताम् । ॐ देवानुगास्तृप्यन्ताम् । ॐ नागास्तृप्यन्ताम् । ॐ सागरास्तृप्यन्ताम् । ॐ पर्वतास्तृप्यन्ताम् । ॐ सरितस्तृप्यन्ताम् । ॐ मनुष्यास्तृप्यन्ताम् । ॐ यक्षास्तृप्यन्ताम् । ॐ रक्षांसि तृप्यन्ताम् । ॐ पिशाचास्तृप्यन्ताम् । ॐ सुपर्णास्तृप्यन्ताम् । ॐ भूतानि तृप्यन्ता० । ॐ पशवस्तृप्यन्ता० । ॐ वनस्पतयस्तृप्यन्ता० । ॐ ओषधयस्तृप्यन्ता० । ॐ भूतग्रामश्चतुर्विधस्तृप्यताम् ॥

मनुष्यतर्पणम्– निवीती[1] उत्तराभिमुखो भूत्वा सव्यहस्तकृतान्वारब्धस्य सपवित्रदक्षिणहस्तस्य कनिष्ठिकाया मूलस्थितेन प्रजापतितीर्थेन, दक्षिणहस्ते धृतकुशमूलाभ्यां वामहस्ते धृतकुशाग्राभ्यां दक्षिणवामहस्ताभ्याम् उभयोर्हस्तयोः कनिष्ठिकामूलस्थितेन प्रजापतितीर्थेन वा सनकादीनुद्दिश्य द्वौ द्वौ अञ्जली पात्रान्तरे दद्यात् ॥ ॐ सनकस्तृप्यतु । ॐ सनक० ॥ ॐ सनन्दनस्तृप्यतु ॥ ॐ सन० ॥ ॐ सनातनस्तृप्यतु ॥ ॐ सनात० ॥ ॐ कपिलस्तृप्यतु ॥ ॐ कपिल० ॥ ॐ आसुरिस्तुप्यतु ॥ ॐ आसु० ॥ ॐ वोढुस्तृप्यतु ॥ वोढुस्तृ० ॥ ॐ पञ्चशिखस्तृप्यतु । ॐ पञ्च० ॥

पितृतर्पणम्– [2]प्राचीनावीती (अपसव्यम्) दक्षिणाभि-

---

[1] निवीतीलक्षणम् ॥ कण्ठावलम्बितं चैव ब्रह्मसूत्रं यदा भवेत् । तान्निवीतमिख्यातं शस्ते कर्मणि मानुषे ॥ [2] उत्क्षिप्ते वामबाहौ तु दक्षिणस्कन्धमाश्रितम् । प्राचीनावीतमित्युक्तं तत्पित्र्येष्वेव कर्मसु ॥

मुखो दक्षिणहस्तस्य तर्जनीमूले कुशामूलाग्रे चैकीकृत्य धृत्वा वामहस्तकृतान्वारब्धेन दक्षिणपाणिना दक्षिणहस्तस्य तर्जनीमूले धृतकुशाग्रमूलाभ्यां वामदक्षिणहस्ताभ्यां कृताञ्जलिभ्यां वा पात्रान्तरे पितृनुद्दिश्य तिलमिश्रितेन जलेन त्रीन् त्रीन् अञ्जलीन् दद्यात् ॥

ॐकव्यवाडनलस्तृप्यताम् ॥ ॐकव्य०॥ ॐकव्य० ॥ ॐ सोमस्तृप्यताम् ॥ ॐ सोम० । सोम० ॥ ॐ यमस्तृप्यताम् ॥ ॐ यम० । ॐ यम० ॥ ॐ अर्यमा तृप्यताम् ॥ ॐ अर्यमा०। ॐ अर्यमा०॥ ॐअग्निष्वात्ताः पितरस्तृप्यन्ता०॥ ॐ अग्नि०॥ ॐ अग्नि० ॥ ॐसोमपाः पितरस्तृप्यन्ता० ॥ ॐ सोम०॥ ॐ सोम०॥ ॐबर्हिषदः पितरस्तृप्यन्ता०॥ ॐ बर्हि०। ॐ बर्हि० ॥ अथ यमतर्पणम् ॥ ॐ यमाय नमः । ॐयमाय०। ॐयमाय०॥ ॐधर्मराजाय नमः । ॐधर्मरा० । ॐ धर्मरा० ॥ ॐ मृत्यवे नमः । ॐ मृत्यवे० । ॐ मृत्यवे० ॥ ॐ अन्तकाय नमः ॥ ॐ अन्तकाय०॥ ॐ अन्तकाय० ॥ ॐवैवस्वताय नमः । ॐ वैवस्व० । ॐवैवस्व० ॥ ॐकालाय नमः ॥ ॐ कालाय०॥ ॐ कालाय० ॥ ॐ सर्वभूतक्षयाय नमः । ॐसर्वभूत० । ॐसर्वभूत०॥ ॐऔदुम्बराय नमः ॥ ॐऔदुम्ब०। ॐऔदुम्ब०॥ ॐदध्नाय नमः । ॐदध्नाय० ॥ ॐदध्नाय०॥ ॐनीलाय नमः। ॐ नीलाय०। ॐ नीलाय०॥ ॐ परमेष्ठिने नमः । ॐ परमे० । ॐ परमे० ॥ ॐ वृकोद-

राय नमः। ॐवृकोद०। ॐवृकोद०॥ ॐचित्राय नमः। ॐ चित्राय०। ॐचित्राय०॥ॐचित्रगुप्ताय नमः। ॐचित्रगु०। ॐ चित्रगु० ॥ जीवत्पितृकोऽप्येतानन्याँश्चेतरस्तर्पयेत् ॥

हस्ते तिलान्गृहीत्वा पात्रमध्ये [1]स्वकीयगोत्रोच्चारपूर्वकं पितृन् तत्तद्गोत्रोच्चारपूर्वकमन्याँश्चाह्वयेत् ॥ तत्र मन्त्रः— ॐ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि ॥ उशन्नुशत ऽआवहपितृन्हविषेऽअत्तवे ॥७०/१९॥ समस्तपितृनावाहयिष्ये (ॐआवाहय)। [2]अमुकगोत्रः अस्मत्पिता [3]अमुकशर्मा वसुरूपस्तृप्यताम् ॥ इदं जलं तस्मै स्वधा नमः। इदं जलं तस्मै०। इदं जलं तस्मै०॥ अमुकगोत्रः अस्मत्पितामहः अमुकशर्मा रुद्ररूपस्तृप्यताम् ॥ इदं जलं तस्मै स्वधा नमः। इदं जलं तस्मै०॥ इदं जलं तस्मै०॥ अमुकगोत्रः अस्मत्प्रपितामहः अमुकशर्मा आदित्यरूपस्तृप्यताम् ॥ इदं जलं तस्मै स्वधा नमः। इदं जलं तस्मै०। इदं जलं तस्मै० ॥ अमुकगोत्रा अस्मन्माता अमुकदा वसुरूपा तृप्यताम् ॥ इदं जलं तस्यै स्वधा नमः। इदं जलं तस्यै०। इदं जलं तस्यै०॥ अमुकगोत्रा अस्मत्पितामही अमुकदा रुद्ररूपा तृप्यताम् ॥ इदं

---

[1] **यथा**—वसिष्ठगोत्रानस्मत्पितृपितामहप्रपितामहान् तथा च भारद्वाजगोत्रानस्मन्मातामहप्रमातामहवृद्धप्रमातामहान् तथा च तत्तद्गोत्रानस्मत्पत्न्याद्याप्तान्तान् सर्वान्पितृनावाहयिष्ये। [2] वसिष्ठगोत्रः अस्मत्पिता जनार्दनशर्मा वसुरूपस्तृप्यताम् ॥ [3] **बौधायनः**—शर्मान्तं ब्राह्मणस्योक्तं वर्मान्तं क्षत्रियस्य तु। गुप्तान्तं चैव वैश्यस्य दासान्तं शूद्रजन्मनः ॥

जलं तस्यै स्वधा नमः। इदं जलं तस्यै०। इदं जलं तस्यै० ॥ अमुकगोत्रा अस्मत्प्रपितामही अमुकदा आदित्यरूपा तृप्यताम् ॥ इदं जलं तस्यै स्वधा नमः ॥ इदं जलं० । इदं० ॥ अमुकगोत्रा अस्मत्सापत्नमाता अमुकदा वसुरूपा तृप्यताम् ॥ इदं जलं तस्यै स्वधा नमः । इदं जलं तस्यै० । इदं जलं तस्यै० ॥ पश्चादेतान्मन्त्रान्पठन्तर्पणं कुर्यात् ॥

ॐ[१]उदी॑रता॒मव॑र॒ऽउत्परा॑स॒ऽउन्म॑द्ध्य॒माः॑पि॒तर॑ःसो॒म्म्यास॑ः ॥ असुँ॒य्यऽई॒युर॑वृ॒काऽऋ॑त॒ज्ज्ञास्ते॑नो॑ऽवन्तुपि॒तरो॒हवे॑षु ॥ $\frac{४९}{१९}$ ॥ अङ्गि॑रसोनꣳपि॒तरो॒नव॑ग्ग्वा॒ऽअथ॑र्व्वाणो॒भृग॑वꣳसो॒म्म्यास॑ः ॥ तेषां॑व॒यꣳसु॑म॒तौय॒ज्ञिया॑ना॒मपि॑भ॒द्रेसौ॑मन॒सेस्या॑म ॥ $\frac{५०}{१९}$ ॥ आय॑न्तुनꣳपि॒तर॑ःसो॒म्म्यासो॑ऽग्निष्वा॒त्ताःप॒थिभि॑र्द्देव॒यानै॑ꣳ ॥ अ॒स्मिन्य॒ज्ञेस्व॒धय॒ामद॒न्तोऽधि॑ब्रुवन्तु॒तेऽव॑न्त्व॒स्मान् ॥ $\frac{५८}{१९}$ ॥ ऊर्ज्जं॒वह॑न्तीर॒मृतं॑घृ॒तम्पय॑ःकी॒लाल॑म्परि॒स्रुत॑म् ॥ स्व॒धास्थ॑त॒र्प्पय॑तमेपि॒तॄन् ॥ $\frac{३४}{२}$ ॥ ॐपि॒तृभ्य॑ःस्वधा॒यिभ्य॑ःस्व॒धानम॑ःपिताम॒हेभ्य॑ःस्वधा॒यिभ्य॑ःस्व॒धानम॒ꣳप्रपि॑तामहेभ्यꣳस्वधा॒यिभ्य॑ःस्व॒धानम॑ः॥ अक्ष॑न्पि॒तरोऽमी॑मदन्तपि॒तरोऽती॑तृपन्तपि॒तर॒ꣳपित॑र॒ꣳशुन्ध॑द्ध्वम् ॥ $\frac{३६}{१९}$ ॥ ॐयेचे॒हपि॒तरो॒येच॒ने

---

[१] अत्र केचिदुदीरतामित्यादिकानामृचां पित्रादितर्पणे प्रतिपितरं तत्तन्मन्त्रपठनपूर्वकमञ्जलिदानकरणत्वं मन्यन्ते । तदसाम्प्रतम् ॥ सूत्रार्थपर्यालोचनेन करणताया अप्रतीतेः ॥ कथं प्रसिञ्चेदित्यत्र जपन् इति शतृप्रत्ययेन जपता सता सततं जलप्रसेकः कार्य इत्येव सूत्रार्थः प्रतीयते ॥

हयाँ॑श्च॑ व्वि॒द्म याँ॑२ऽउ॑च॒नप्प्र॑वि॒द्म ।। त्वंव्वे॑त्त्थ॒यति॒तेजा॑तवेदꣳस्व॒धाभि॑र्य॒ज्ञꣳसुकृ॑तञ्जुषस्व ।। ६७/१९ ।। ॐमधु॒वाता॑ऽऋताय॒तेमधु॑क्क्षरन्ति॒सिन्ध॑वः ।। माद्ध्वी॑र्न्नःस॒न्त्वोष॑धीः ।। ।। २७/१३ ।। ॐ मधु॒नक्त॑मु॒तोषसो॒मधु॑म॒त्पार्त्थि॑व॒ꣳ रजः॑ ।। मधु॒द्यौर॑स्तुनःपि॒ता ।। २८/१३ ।। ॐ मधु॑मान्नो॒वन॒स्प्पति॒र्म्मधु॑माँ२ऽअस्तु॒सूर्य्यः॑ ।। माद्ध्वी॒र्ग्गावो॑भवन्तुनः ।। २९/१३ ।। ॐमधु मधु मधु ।। तृप्यध्वं तृप्यध्वं तृप्यध्वम् ।। ॐ नमो॑वःपित॒रो॒रसा॑य॒नमो॑वःपित॒रः॒शोषा॑य॒नमो॑वःपितरोजी॒वाय॒नमो॑वःपितरःस्व॒धायै॒नमो॑वःपितरो॒घोराय॒नमो॑वःपितरोम॒न्यवे॒नमो॑वःपित॒रः॒पित॑रो॒नमो॑वो॒गृहान्नः॑पितरोदत्तस॒तो॑वःपितरोदेष्मै॒तद्वः॑पित॒रो॒वासः॑ ।। ३२/२ ।। आध॑त्तपित॒रो॒गर्भ॑ङ्कुमा॒रम्पुष्क॑रस्रजम् ।। यथे॒हपुरु॒षोस॑त् ।। ३३/२ ।।

अमुकगोत्रः अस्मन्मातामहः अमुकशर्मा वसुरूपस्तृप्यताम् । इदं जलं तस्मै स्वधा नमः । इदं० । इदं० ।। अमुकगोत्रः अस्मत्प्रमातामहः अमुकशर्मा रुद्ररूपस्तृप्यताम् । इदं जलं तस्मै स्वधा नमः । इदं० । इदं० ।। अमुकगोत्रः अस्मद्वृद्धप्रमातामहः आदित्यरूपस्तृप्यताम् । इदं जलं तस्मै स्वधा नमः । इदं० । इदं० ।। अमुकगोत्रा अस्मन्मातामही अमुकदा वसुरूपा तृप्यताम् । इदं जलं तस्यै स्वधा नमः । इदं० । इदं० ।। अमुकगोत्रा अस्मत्प्रमातामही अमुकदा रुद्ररूपा तृप्यताम् । इदं जलं तस्यै

स्वधा नमः । इदं० । इदं० ॥ अमुकगोत्रा अस्मद्वृद्धप्रमातामही अमुकदा आदित्यरूपा तृप्यताम् । इदं जलं तस्यै स्वधा नमः । इदं० । इदं० ॥ अमुकगोत्रा अस्मत्पत्नी अमुकदा वसुरूपा तृप्यताम् । इदं जलं तस्यै स्वधा नमः ॥ इदं० । इदं० ॥ अमुकगोत्रः अस्मत्सुतः अमुकशर्मा वसुरूपस्तृप्यताम् ॥ इदं जलं तस्मै स्वधा नमः ॥ इदं० । इदं० ॥ अमुकगोत्रा अस्मत्कन्या अमुकदा वसुरूपा तृप्य० ॥ इदं जलं तस्यै स्वधा नमः । इदं० । इदं० ॥ अमुकगोत्रः अस्मत्पितृव्यः अमुकशर्मा वसु० ॥ इदं० । इदं० । इदं० ॥ अमुकगोत्रः अस्मन्मातुलः अमुकशर्मा वसुरूपस्तृ० ॥ इदं० । इदं० । इदं० ॥ अमुकगोत्रः [1]अस्मद्भ्राता अमुकशर्मा वसु० ॥ इदं० । इदं० । इदं० ॥ अमुकगोत्रा अस्मत्पितृभगिनी अमुकदा वसु० ॥ इदं० । इदं० । इदं० ॥ अमुकगोत्रा अस्मन्मातृभगिनी अमुकदा वसु० ॥ इदं० । इदं० । इदं० ॥ अमुकगोत्रा अस्मदात्मभगिनी अमुकदा वसु० ॥ इदं० । इदं० । इदं० ॥ अमुकगोत्रः अस्मच्छ्वशुरः वसु० ॥ इदं० । इदं० । इदं० ॥ [2]अमुकगोत्रः अस्मद्गुरुः अमुकशर्मा वसु० ॥ इदं० । इदं० । इदं० ॥ अमुकगोत्रः अस्मच्छिष्यः अमुकशर्मा वसु० ॥ इदं० । इदं० । इदं० ॥ अमुकगोत्रः अस्मन्मित्रम् अमुक-

---

[1] अस्मत्सापत्नभ्राता ॥ अस्मत्सापत्नभगिनी ॥ [2] गुर्वादयोऽप्येकैकांजलिना तर्प्याः ॥

शर्मा वसु० ॥ इदं० । इदं० । इदं० ॥ अमुकगोत्रः अस्मदासः अमुकशर्मा वसुरूपस्तृप्यताम् ॥ इदं जलं तस्मै स्वधा नमः । इदं० । इदं० ॥ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ॥ तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥ आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥ येऽबान्धवा बान्धवा ये येऽन्यजन्मनि बान्धवाः । ते सर्वे तृप्तिमायान्तु मया दत्तेन वारिणा ॥ ततो वस्त्रनिष्पीडनम् । ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ॥ ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥ १ ॥ इति वस्त्रं चतुर्धा कृत्वा भूमौ वामभागे निष्पीड्य कुशपवित्रं त्यजेत् ॥ सव्येन शुद्धोदकेनाचमनं प्राणायामश्च कुर्यात् ॥ आचमनम् । ॐ केशवाय नमः स्वाहा । ॐ नारायणाय नमः स्वाहा । ॐ माधवाय नमः स्वाहा । ॐ गोविन्दाय नमः इति हस्तं प्रक्षाल्य ॥ ॐ भूः ॐ भुवः० इति प्राणायामं कुर्यात् ॥

ततस्तर्पितजलं बहिर्निष्कास्य तस्मिन्पात्रेऽनामिकया

---

१ भारद्वाजः—वस्त्रोदकमपेक्षन्ते ये मृता दासकर्मिणः । तस्मात्सर्वप्रयत्नेन जलं भूमौ निपातयेत् ॥ बृहत्पराशरः–निष्पीडयेत्स्नानवस्त्रं तिलदर्भसमन्वितम् । न पूर्वं तर्पणाद्वस्त्रं नैवांभसि न पादयोः ॥ एवं तर्पणं विधाय तदन्ते स्थले वासो निष्पीड्याचम्य "निष्पीडयति यः पूर्वं स्नानवस्त्रमतर्पिते ॥ निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम् । द्वादश्यां पञ्चदश्यां च संक्रान्तौ श्राद्धवासरे । वस्त्रं निष्पीडयेन्नैव न च क्षारेण योजयेत् ॥ यदि गृहे सांवत्सरिकश्राद्धादिकं कर्म चेत्तर्हि वस्त्रनिष्पीडनं श्राद्धात्प्राक् तस्मिन्दिने न कुर्यात् ॥

गन्धेन षड्दलं विरच्य पात्रान्तरे शुद्धजलं गृहीत्वा तस्मिन्नगन्धाक्षतपुष्पाणि प्रक्षिप्य तस्मादर्घपात्रे तज्जलमादाय पूर्वत आरभ्य प्रादक्षिण्येन तत्तन्मन्त्रेण प्रतिकोणम् अर्घं दद्याद्वा तत्तन्मन्त्रं पठन्तत्तद्देवं तत्तत्कोणे पूजयेत् ॥



पूर्वे । ॐब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥$\frac{३}{१३}$॥ ॐब्रह्मणे नमः ॥१॥ आग्नेय्याम्-ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्। समूढमस्यपाꣳसुरेस्वाहा ॥ $\frac{१}{५}$ ॥ ॐ विष्णवे नमः ॥ २ ॥ नैर्ऋत्याम्-ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवेनमः । बाहुभ्यामुततेनमः ॥ $\frac{१}{१६}$ ॥ ॐ रुद्राय नमः ॥ ३ ॥ पश्चिमायाम्- ॐ तत्सवितुः० ॥$\frac{३५}{३}$॥ ॐ सवित्रे नमः ॥ ४ ॥ वायव्याम्-ॐ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि । द्युम्नञ्चित्रश्रवस्तमम् ॥ $\frac{६२}{११}$ ॥ ॐमित्राय नमः ॥५॥ ईशान्याम्- ॐइमम्मेवरुणश्रुधीहवमद्याचमृडय । त्वामवस्युराचके ॥ $\frac{१}{२१}$॥ ॐ वरुणाय नमः ॥ ६ ॥ अर्घप्रदानानन्तरं स्ववामदक्षिणहस्तावूर्ध्वं कृत्वा सूर्योपस्थानं कुर्यात् ॥

सूर्योपस्थानम्- ॐ अदृश्रमस्यकेतवोविरश्मयोजनाँ२ऽअनु। भ्राजन्तोऽअग्नयोयथा। उपयामगृहीतोसिसूर्याय त्वाभ्राजायैषतेयोनिःसूर्यायत्वाभ्राजाय ॥ सूर्यभ्राजिष्ठभ्राजिष्ठस्त्वन्देवेष्वसिभ्राजिष्ठोहम्मनुष्येषुभूया

सम् ॥ ४०/८ ॥ ह॒ꣳसश्शु॑चि॒षद्वसु॑रन्तरिक्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दु॑रोण॒सत् । नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्जा गो॒जाऽअ॑द्रि॒जाऽऋ॒तम्बृ॒हत् ॥ २४/१० ॥ सूर्योपस्थानं कृत्वा दिग्विदिग्देवतानां नमस्कारं कुर्यात् ॥ प्राच्यै- ॐ इन्द्राय नमः ॥ आग्नेय्यै- ॐ अग्नये नमः ॥ दक्षिणायै- ॐ यमाय नमः ॥ नैर्ऋत्यै- ॐ निर्ऋतये नमः ॥ पश्चिमायै- ॐ वरुणाय नमः ॥ वायव्यै- ॐ वायवे नमः ॥ उदीच्यै- ॐ सोमाय नमः ॥ ईशान्यै- ॐ ईशानाय नमः ॥ ऊर्ध्वायै- ॐ ब्रह्मणे नमः ॥ अवाच्यै- ॐ अनन्ताय नमः ॥ (जलमध्ये) ॐ ब्रह्मणे नमः । ॐ अग्नये नमः । ॐ पृथिव्यै नमः । ॐ ओषधीभ्यो नमः । ॐ वाचे नमः । ॐ वाचस्पतये नमः । ॐ महद्भ्यो नमः । ॐ विष्णवे नमः । ॐ अद्भ्यो नमः । ॐ अपाम्पतये नमः । ॐ वरुणाय नमः ॥ मुखविमार्जनम्— ॐ सं व॒र्च्चसा॒ पय॑सा॒ सन्त॒नूभि॒रग॑न्महि॒ मन॑सा॒ सꣳ शि॒वेन॑ ॥ त्वष्टा॑ सु॒दत्रो॒ वि द॑धातु॒ रायो॒ऽनु॑मार्ष्टु त॒न्वो॒ यद्विलि॑ष्टम् ॥ १४/८ ॥ विसर्जनम्— ॐ देवा॑ गातुविदो गा॒तुं वि॒त्त्वा गा॒तुमि॑त । मन॑सस्पत ऽइ॒मन्दे॑व य॒ज्ञꣳ स्वाहा॒ वाते॑ धाः ॥ २१/८ ॥

अर्पणम्— अनेन यथाशक्ति देवर्षिमनुष्यपितृतर्पणाख्येन कर्मणा मम समस्तपितृस्वरूपी भगवान् जनार्दनवासुदेवः प्रीयतां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु । ॐ विष्णवे नमः ॥

इति तर्पणप्रयोगः समाप्तः ॥

अथ वैश्वदेवप्रयोगः[1] ॥

आचम्य प्राणानायम्य ॥ कुशपवित्रं धारयेत् । ॐ पवित्रैस्त्स्थो० ॥ अद्येत्यादि० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम गृहे पञ्चसूनाजनितदोषपरिहारार्थं नित्यानुष्ठानसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं यथाशक्ति (पञ्चमहायज्ञान्) वैश्वदेवाख्यं कर्म करिष्ये ॥ पुनः सङ्कल्पः—अस्मिन्वैश्वदेवकर्मणि कुण्डस्य पञ्चभूसंस्कारपूर्वकमग्निप्रतिष्ठां करिष्ये ॥ अथ [2]पञ्चभूसंस्काराः । दर्भैः परिसमुह्य । परिसमुह्य ॥ परिसमुह्य ॥ ३ ॥ गोमयेन उपलिप्य । उपलिप्य ॥ उपलिप्य ॥ ३ ॥ स्रुवमूलेन उल्लिख्य । उल्लिख्य । उल्लिख्य ॥ ३ ॥ अनामिकाङ्गुष्ठेन उद्धृत्य । उद्धृत्य ॥ उद्धृत्य ॥ ३ ॥ उदकेन अभ्युक्ष्य । अभ्युक्ष्य । अभ्युक्ष्य ॥ ३ ॥ ततः कांस्यादिपात्रे महानसादग्निम् आनीय कुण्डस्याग्नेय्यां दिशि निधाय तस्मात्किञ्चित् क्रव्यादांशं नैर्ऋत्यां दिशि निधाय तत्पात्रं दक्षिणहस्तेनादाय कुण्डस्य परितः प्रादक्षिण्येन त्रिवारं भ्रामयित्वा स्वात्माभिमुखमग्निं कुण्डे स्थापयेत् ॥

---

[1] बृहत्पाराशरः–यदग्नौहूयते नैव यस्य ग्रासो न दीयते । अभोज्यं तद्द्विजातीनां भुक्त्वा चान्द्रायणं चरेत् ॥ **मनुः**–पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डणी चोदकुम्भश्च वध्यते यास्तु वाहयन् ॥ अ० ३ श्लो० ६८ ॥

[2] **गृहयज्ञकल्पावलौ**– न चुल्यामायसे पात्रे न भूमौ न च खर्परे । वैश्वदेवं प्रकुर्वीत कुण्डे वा स्थंडिलेऽपि वा ॥

([1]पाकशालायमग्न्यानयने मन्त्रः—ॐअन्न्व॒ग्निरु॒षसा॒मग्र॑क्ख्य॒दन्न्वहा॑निप्प्रथ॒मोजा॒तवे॑दाः ॥ अनु॒सूर्य॑स्य पु॒रु॒त्राच॑ र॒श्मीननु॒द्यावा॑ पृथि॒वीऽआत॑तन्थ ॥ १७/११ ॥ अग्निस्थापने मन्त्रः— ॐ पृ॒ष्टोदि॒विपृ॒ष्टोऽअ॒ग्निःपृ॑थि॒व्यांपृ॒ष्टोविश्वा॒ऽओष॑धी॒रावि॑वेश । वै॒श्वा॒न॒रः सह॑सापृ॒ष्टोऽअ॒ग्निःस॒नो॒दिवा॒ सरि॒षस्प्पा॑तु॒नक्त॑म् ॥ ७३/१८ ॥ प्रज्वालने मन्त्रः— ॐ तत्स॑वि॒तुर्व्वे॰ ॥ ३५/३ ॥ ॐ ताꣳस॑वि॒तुर्व्वरे॑ण्यस्यचि॒त्रामाहं॑वृणे सु॒म॒तिंवि॒श्वज॑न्याम् । याम॑स्य॒ कण्वो॒ऽअदु॑ह॒त्प्रपी॑नाꣳ स॒हस्र॑धारा॒म्पय॑साम॒हीङ्गाम् ॥ ७४/१७ ॥ ॐविश्वा॑निदेवसवितर्दु॒रि॒ता॒नि॒परा॑सुव । सद्भ॒द्रन्तन्न॒ऽआसु॑व ॥ ३/३० ॥ इत्येतैर्मन्त्रैर्वेणुधमिन्या अग्निं प्रज्वाल्य तत्र स्थालिपाकं कृत्वा ततोऽग्निमानीय कुण्डे संस्थाप्य वैश्वदेवं कुर्यात्) ॥

ध्यानम्— ॐ च॒त्वारि॒शृङ्गा॒त्रयो॑ऽअस्य॒पादा॒द्वेशी॒र्षेस॒प्तहस्ता॑सोऽअस्य । त्रिधा॑ब॒द्धोवृ॑ष॒भोरो॑रवीतिम॒होदे॒वोम॒र्त्याँ२ऽआवि॑वेश ॥ ९१/१७ ॥ ॐ भूर्भुवः स्वः पावकनाम्ने वैश्वानराय नमः ध्यानं सम० ॥ हस्ते अक्षतान् पुष्पाणि वा आदाय ।

---

[1] अथातो धर्मजिज्ञासा केशान्तादूर्ध्वमपत्नीक उत्सन्नाग्निरनग्निको वा प्रवासी वा ब्रह्मचारी वाऽन्वग्निरिति मंत्रेण ग्रामादग्निमाहृत्य पृष्टोदिवीत्यधिष्ठाय त्रिभिश्च सावित्रैः प्रज्वाल्य ताꣳसवितुस्तत्सवितुर्विश्वानिदेवसवितरिति पूर्ववदक्षतैर्हुत्वा पाकं पचेत् ॥ तत्र वैश्वदेवो "ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृते" इत्युपस्पृश्य पूर्ववद्बलिकर्मणैवं कृते वृथा पाको न भवति ॥ इति **हरिहरभाष्ये पदार्थक्रमे** ॥

ॐ ए॒षोह॑दे॒वःप्र॒दिशो॒नुसर्वाः॒पूर्वो॑हजा॒तःसऽउ॒गर्भे॑ऽअ॒न्तः ॥ सऽए॒वजा॒तःसज॑नि॒ष्यमा॑णःप्र॒त्यङ्जना॑स्तिष्ठतिस॒र्वतो॑मुखः ॥ $\frac{४}{३२}$ ॥ ॐ भूर्भुवः स्वः पावकनाम्ने वैश्वानराय नमः आवाहनार्थेऽक्षतान् पुष्पं वा सम० । ततः पञ्चोपचारैः पूजनम् ॥ ॐ अग्ने॒नय॑सु॒पथा॑रा॒येऽअ॒स्म्मान्विश्श्वा॑निदेव व॒युना॑निवि॒द्वान् ॥ यु॒यो॒द्ध्यस्म्मज्जु॑हु॒रा॒णमेनो॒भूयि॑ष्ठान्ते॒नम॑ऽउक्तिंविधेम ॥ $\frac{३६}{५}$ ॥ ॐ भूर्भुवः स्वः पावकनाम्ने वैश्वानराय नमः गन्धं सम० ॥ ॐ भूर्भुवः स्वः पावकनाम्ने वैश्वानराय नमः धूपं सम० ॥ ॐ भूर्भुवः स्वः पावकनाम्ने वैश्वानराय नमः दीपं सम० ॥ ॐ भूर्भुवः स्वः पावकनाम्ने वैश्वानराय नमः नैवेद्यं सम० ॥ सर्वोपचारार्थे नमस्कारं सम० ॥ प्रार्थयेत्— मुखं यः सर्वदेवानां हव्यभुक् कव्यभुक् तथा ॥ पितृणाञ्च नमस्तस्मै विष्णवे पावकात्मने ॥ ॐ अग्ने शाण्डिल्यगोत्र शाण्डिल्यासितदेवलेतित्रिप्रवर अरणिमातः वरुणपितः मेषध्वज प्राङ्मुख मम सम्मुखो भव ॥ ततो जलेन प्रदक्षिणमग्निं [1]पर्युक्ष्य हस्तस्येतरथावृत्तिः कृत्वा दक्षिणं जान्वाच्य दक्षिणहस्तेन घृताक्तं द्वादशपर्वपूरकमोदनमादाय सुसमिद्धेऽग्नौ देवतीर्थेन (मध्यमानामिकाङ्गुष्ठैः) जुहुयात् ॥

---

[1] "**वैश्वदेवादन्नात्पर्युक्ष्य**" इति वैश्वदेवसूत्रे पर्युक्षणोपदेशः कुशकण्डिकेतिकर्तव्यताया निरासार्थः ॥ "**स्वाहाकारैर्जुहयात्**" इत्यत्र जुहोतिषु स्वाहाकारोपदेशोऽपि बल्यादिभ्यो निवृत्त्यर्थः संस्रवव्युदासार्थो वा बलिदानं तु नमस्कारेण कुर्यात् ॥ "पितृभ्यः स्वधा नमः" इत्यत्राचार्येण बलिदाने नमस्कारस्य दर्शितत्वात् ॥ अग्नेः पर्युक्षणं मणिकोदकेन । इत्यादिकं **हरिहरभाष्ये** द्रष्टव्यम् ॥

ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ १ ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ २ ॥ ॐ गृह्याभ्यः स्वाहा इदं गृह्याभ्यो न मम ॥ ३ ॥ ॐ कश्यपाय स्वाहा इदं कश्यपाय न मम ॥ ४ ॥ ॐ अनुमतये स्वाहा । इदम् अनुमतये न मम ॥ ५ ॥ ॐ विश्वेभ्यो देवेभ्यः स्वाहा इदं विश्वेभ्यो देवेभ्यो न मम ॥६॥ ॐ अग्नये स्विष्टकृते स्वाहा इदम् अग्नये स्विष्टकृते न मम॥७॥ इति देवयज्ञो द्वितीयः(२)

अथ भूतादयो यज्ञाः ॥



१३ उदीच्यै. । ९ वायवे. ।

५ विधा. । १० प्राच्यै. । ४—धात्रै. ।

६ वायवे.

२० भूतानां. । १८ विश्वेदे. । १६ सूर्या. ।

१७ उषसे. । १७ विश्वेभू. । १५ अन्तरिक्षा. ।

इति भूतयज्ञः (३) ॥ १४ ब्रह्मणे. ॥

निवीती भूत्वा ॥ अपसव्यं दक्षिणाभिखः

उदङ्मुखः ॥ सव्यं जान्वाच्य

२२ हन्त सनकादि. । २१ पितृभ्यः. ।

इति मनुष्ययज्ञः (४) इति पितृयज्ञः (५)

२३ सव्येन पात्रं प्रक्षाल्य तज्जलं वायव्यां ॐ यक्ष्मैतत्ते निर्णेजनम् इदं यक्ष्मणे न मम इति निनयेत् ॥

११ दक्षिणा. । ७ वायवे. ।

८ वायवे. ।

१२ प्रतीच्यै. ।

१ ॐ भूः स्वाहा इदमग्नये न मम । ॐ भुवः स्वाहा इदं वायवे न मम । ॐ

मण्डलाद्बहिः प्राक्संस्थमुदक्संस्थं वा— ॐ[1]पर्जन्याय नमः इदं पर्जन्याय न मम ॥ १ ॥ ॐअद्भ्यो नमः इदमद्भ्यो० ॥ २ ॥ ॐपृथिव्यै नमः इदं पृथिव्यै० ॥ ३ ॥ मण्डले ॥ द्वारशाखयोर्दक्षिणोत्तरयोः— ॐधात्रे नमः इदं धात्रे० ॥ ४ ॥ ॐविधात्रे नमः इदं विधात्रे० ॥ ५ ॥ प्रतिदिशम्— पूर्वस्याम्—ॐ वायवे नमः इदं वायवे० ॥६॥ दक्षिणस्याम्— ॐ वायवे नमः इदं वायवे० ॥ ७ ॥ पश्चिमायाम्— ॐ वायवे नमः इदं वायवे ॥ ८ ॥ उत्तरस्याम्— ॐ वायवे नमः इदं वायवे० ॥९॥ पूर्वतश्चतुर्दिक्षु क्रमेण— ॐ प्राच्यै दिशे नमः इदं प्राच्यै० ॥ १० ॥ ॐ दक्षिणायै दिशे नमः इदं दक्षिणायै० ॥११॥ ॐप्रतीच्यै दिशे नमः इदं प्रतीच्यै० ॥१२॥ ॐ उदीच्यै दिशे नमः इदम् उदीच्यै० ॥१३॥ अन्तराले (मध्ये) प्राक्संस्थम्—

स्वः स्वाहा इदं सूर्याय न मम । ॐ भूर्भुवः स्वः स्वाहा इदं प्रजापतये न मम ॥४॥ ॐ देवकृतस्यैनसोवयजनमसि स्वाहा इदं अग्नये० ॥१॥ ॐ मनुष्यकृतस्यैनसोवयजनमसि स्वाहा इदं अग्नये० ॥२॥ ॐपितृकृतस्यैनसोवयजनमसि स्वाहा इदं अग्नये० ॥ ३ ॥ ॐ आत्मकृतस्यैनसोवयजनमसि स्वाहा इदम् अग्नये० ॥४॥ ॐ एनसऽएनसोवयजनमसि स्वाहा इदम् अग्नये० ॥५॥ ॐ यच्चाहमेनोविद्वाँश्चकारयच्चाविद्वाँस्तस्य सर्वस्यैनसोवयजनमसि स्वाहा इदम् अग्नये० ॥६॥ ॐप्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥

[1] पर्जन्यादिभ्यो मणिकसमीपे प्राक्संस्थमुदक्संस्थं वा बलिदानमुक्तम् ॥ परञ्च निरग्निकानां मणिकाभावादुकुम्भसमीपे देयमथवा पर्जन्यादित्रिकवर्ज भूमौ बलिहरणमित्यपि च **रुद्रकल्पद्रुमे** ॥ इदम् बलित्रयं मण्डलाद्बहिः अत्र देयम् ॥

ॐ ब्रह्मणे नमः इदं ब्रह्मणे० ॥ १४ ॥ ॐ अन्तरिक्षाय नमः इदम् अन्तरिक्षाय० ॥ १५ ॥ ॐ सूर्याय नमः इदं सूर्याय० ॥ १६ ॥ तेषामुत्तरे– ॐ विश्वेभ्यो देवेभ्यो नमः इदं विश्वेभ्यो० ॥ १७ ॥ ॐ विश्वेभ्यो भूतेभ्यो नमः इदं विश्वेभ्यो० ॥ १८ ॥ तदुत्तरे– ॐ उषसे नमः इदम् उषसे० ॥ १९ ॥ ॐ भूतानां पतये नमः इदं भूतानां पत० ॥ २० ॥ इति भूतयज्ञः ॥ (३) ॥ ततः प्राचीनावीती भूत्वा दक्षिणाभिमुखः सव्यं जान्वाच्य–ॐ पितृभ्यः स्वधा नमः इदं पितृभ्यः० ॥ २१ ॥ इति पितृयज्ञः ॥ (४) ॥ ततो नीवीती भूत्वा उदङ्मुखः प्रजापतितीर्थेन–ॐ हन्त ते सनकादिमनुष्येभ्यो नमः इदं सन० ॥ २२ ॥ इति मनुष्ययज्ञः ॥ (५) ॥ सव्यं कृत्वा पात्रं प्रक्षाल्य तज्जलं वायव्यां दिशि निनयेत्– ॐयक्ष्मै तत्ते निर्णेजनम् इदं यक्ष्मणे० ॥ २३ ॥ एवं बलीन्दत्त्वा गोग्रासादिसमर्पणं कुर्यात् । [2]अत्र गृहदेवानां नैवेद्यार्पणं कार्यम् ॥ गोग्रासादिसमर्पणम् । सुरभिर्वैष्णवी माता नित्यं विष्णुपदे स्थिता । गोग्रासं तु मया दत्तं सुरभिः प्रतिगृह्यताम् ॥ इदं गोभ्यो न मम ॥ ऐन्द्रवारुणवायव्याः सौम्या वै नैर्ऋतास्तथा ॥ वायसाः प्रतिगृह्णन्तु भूमावन्नं मयाऽर्पितम् ॥ इदं वायसेभ्यो न मम । द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ । ताभ्यामन्नं प्रदास्यामि स्यातामेतावहिंसकौ ॥ इदं श्वभ्यां न

---

[2] गृहदवतानां नैवेद्यार्पणविधिः १२७ पृष्टे दृष्टव्यः ।

मम ॥ देवा मनुष्याः पशवो वयांसि सिद्धाश्च यक्षोरगदैत्यसङ्घाः । प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तम् ॥ येषां न माता न पिता न बन्धुर्न चान्नसिद्धिर्न तथाऽन्नमस्ति । तत्तृप्तयेऽन्नं भुवि दत्तमेतत्प्रयान्तु तृप्तिं मुदिता भवन्तु ॥ भूतानि सर्वाणि तथाऽन्नमेतदहं च विष्णुर्यजतोऽन्यदस्ति । तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषाम् ॥ चतुर्दशो भूतगणो य एषस्तत्र स्थिता येऽखिलभूतसङ्घाः ॥ तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते मुदिता भवन्तु ॥ इदं देवादिभ्यो न मम ॥ पिपीलिकाकीटपतङ्गकाद्या बुभुक्षिताः कर्मनिबद्धयोगाः ॥ प्रयान्तु ते तृप्तिमिदं मयाऽन्नं तेभ्योऽवसृष्टं सुखिनो भवन्तु ॥ इदं पिपीलिकादिभ्यो न मम ॥ ततो वैश्वदेविकं भस्म धारयेत् ॥ ॐ त्र्या॒यु॒षञ्ज॒मद॑ग्नेःक॒श्यप॑स्यत्र्यायु॒षम् ॥ यद्दे॒वेषु॑त्र्यायु॒षन्तन्नो॑ऽअस्तुत्र्यायु॒षम् ॥ ६२/३ ॥ भस्मना ललाटे ग्रीवायां दक्षिणांसे हृदि च ॥ ततो हस्तं प्रक्षाल्य सन्ध्यायां ललाटेऽनुलेपितं भस्म निःसार्य गन्धेन त्रिपुण्ड्रमूर्ध्वपुण्ड्रं वा यथाकुलाचारं धारयेत् ॥ तत्र मन्त्रः—ॐसुचक्षाऽअहमक्षिभ्याम्भूयासꣳ सुवर्च्चा मुखेन । सुश्रुत्कर्णाभ्यां भूयासम् ॥ ततो हस्तेऽक्षतान् गृहीत्वा अग्निविसर्जनम्—गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥ ॐ यज्ञ॑ य॒ज्ञङ्ग॑च्छय॒ज्ञप॑तिङ्गच्छ॒स्वाँऽयोनिं

ञ्च्छस्वाहा ॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकः सर्व्ववीरस्तञ्जुषस्व स्वाहा ॥ $\frac{२३}{८}$ ॥

अर्पणम्—अनेन (पञ्चमहायज्ञाख्येन) वैश्वदेवाख्येन कर्मणा भगवान् यज्ञनारायणस्वरूपी श्रीपरमेश्वरः प्रीयतां न मम ॥

इति वैश्वदेवप्रयोगः समाप्तः ॥

अथ गृहदेवतानैवेद्यार्पणम् ॥

हस्ते[1] जलं गृहीत्वा । ॐ नमो भगवते वासुदेवाय ॥ इति पठन् दक्षिणहस्तस्थितजलेन नैवेद्यपात्रस्य प्रदक्षिणक्रमेण समन्तात् पङ्क्तिवारणं कुर्यात् ॥ तुलसीदलं निधाय पुनर्जलेन गायत्रीमन्त्रं पठन् नैवेद्यं प्रोक्षयेत् ॥ ॐ नमो भगवते वासुदेवाय ॐ नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णो द्यौः समवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ २ ऽअकल्पयन् ॥ $\frac{१३}{३१}$ ॥ ततो नैवेद्योपरि धेनुमुद्रां प्रदर्श्य चक्रमुद्रया नैवेद्यं संरक्ष्य (ॐनमः शिवाय इति) मूलमन्त्रेण नैवेद्यम् अष्टवारम् अभिमन्त्र्य वामहस्तं पद्माकारं कृत्वा दक्षिणहस्तेन ग्रासमुद्राः[2] प्रदर्शयन्नैवेद्यमर्पयेत् ॥

पञ्च प्राणाहुतयः—ॐ कनिष्ठिकानामिकाङ्गुष्ठयोगने ॐ प्राणाय स्वाहा ॥ १ ॥ मध्यमानामिकाङ्गुष्ठयोगेन ॐ अपानाय स्वाहा ॥ २ ॥ मध्यमातर्जन्यङ्गुष्ठयोगेन ॐ व्यानाय

---

[1] पूर्वं देवस्य समीपे चतुरस्रं मण्डलं कृत्वा तदुपरि नैवेद्यपात्रं निदध्यात् ॥

[2] अङ्गुल्यः कुटिलीभूता विरलाग्राः परस्परम् ॥ ग्रासमुद्रा समाख्याता सव्यपाणौ नियोजिता ॥

स्वाहा ॥३॥ तर्जनीमध्यमानामिकाङ्गुष्ठयोगेन ॐ उदानाय स्वाहा ॥ ४ ॥ सर्वाङ्गुलिभिः ॐसमानाय स्वाहा ॥ ५ ॥ मध्ये पानीयं सम० । उत्तरापोशानं सम० ॥ हस्तप्रक्षालनं सम० ॥ मुखप्रक्षालनं सम० । करोद्वर्तनार्थे गन्धं सम० ॥ मुखवासार्थे पूगीफलं सम० ॥ अर्पणम्–हस्ते जलं गृहीत्वा । अनेन ॐ भूर्भुवः स्वः अमुकपञ्चायतनदेवेभ्यो नैवेद्यार्पणेन अमुकपञ्चायतनदेवाः प्रीयन्तां न मम ॥

इति गृहदेवतानैवेद्यार्पणविधिः ॥

अथ संक्षिप्तभोजनविधिः ॥

भोजनकर्ता[1] प्राङ्मुखो दक्षिणामुखः प्रत्यङ्मुखो वा पीठे स्थित्वा स्वसमीपे भूमौ भस्मना जलेन वा चतुरस्रं मण्डलं कृत्वा तदुपरि भोजनपात्रं निधाय ॐनमो भगवते वासुदेवाय ॥ इत्यनेन मन्त्रेण जलेन पङ्क्तिवारणं कुर्यात् ॥ ॐ पितुन्नुस्तोषम्महोधर्म्माणन्तविषीम् । यस्यत्रितो व्योजसावृत्रंव्विपर्व्वमर्द्दयत् ॥ ३४ ॥ इति मंत्रेणान्नं स्तुत्वाऽन्नप्रोक्षणम्–(दिवा[2]) सत्यन्त्वर्त्तेन परिषिञ्चामि ॥ इति सम्प्रोक्ष्यान्नं स्पृष्ट्वा जपेत् ॥ ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासि प्प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ ३१ ॥ ततो भूमौ बलिदानं कुर्यात् ॥ ॐभूपतये स्वाहा ॥१॥ ॐभुवनपतये

---

[1] व्यासः–पञ्चार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमाश्रितः । हस्तौ पादौ तथैवास्यमेषु पञ्चार्द्रता मता ॥ [2] रात्रौ ऋतं त्वा सत्येन परिषिञ्चामि ॥

स्वाहा ॥२॥ ॐ भूतानां पतये स्वाहा ॥३॥ आपोशानम्—ॐ अमृतोपस्तरणमसि स्वाहा ॥ इति जलं प्राश्य ॥ प्राणाहुतयः[1]—ॐप्राणाय स्वाहा ॥ १ ॥ ॐअपानाय स्वाहा ॥२॥ ॐ व्यानाय स्वाहा ॥ ३ ॥ ॐ उदानाय स्वाहा ॥ ४ ॥ ॐ समानाय स्वाहा ॥ ५ ॥ ततो वामहस्ते जलं गृहीत्वा नेत्रयोरुदकस्पर्शं कृत्वा शिखामुक्तिं कुर्यात् ॥ ब्रह्मपाशसहस्राणि रुद्रशूलशतानि च । विष्णुचक्रसहस्राणि शिखामुक्तिं करोम्यहम् ॥ इति शिखामुक्तिं कृत्वा भोजनं कुर्यात् । भोजनान्ते पात्रस्य वामभागे भूम्यां चित्राहुतिं दद्यात् । "मद्भुक्तोच्छिष्टशेषं ये भुञ्जन्ति पितरोऽधमाः । तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठतु" इति दत्त्वा हस्ते जलं-गृहीत्वा ॐ अमृतापिधानमसि स्वाहा इत्यर्धं प्राश्यार्धं चित्राहुतौ दत्त्वा हस्तं मुखञ्च प्रक्षालयेत् ॥ उदरालम्भनम्— ॐ श्वा॒त्राः पी॒ता भ॑वतयू॒यमा॑पोऽअ॒स्म्माक॑म॒न्तरु॒दरे॑ सु॒शेवाः॑ ॥ ताऽअ॒स्म्मभ्य॑मय॒क्ष्माऽअ॑न॒मी॒वाऽअना॑गसः स्वद॑न्तु दे॒वीर॒मृता॑ऽऋ॒ता॒वृधः॑ ॥ १२⁄४ ॥ अगस्त्यं वैनतेयञ्च शनिञ्च वडवानलम् ॥ अन्नस्य परिपाकार्थं स्मरेद्भीमञ्च पञ्चमम् ॥ १ ॥ आतापी मारितो येन वातापी च निपातितः । समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ॥ इत्युक्त्वा

---

[1] मुखे आहवनीयः ॥ हृदि गार्हपत्यः ॥ नाभौ दक्षिणाग्निः ॥ दक्षिणे आवसथ्यः ॥ उत्तरे सभ्यः ॥ धन्वन्तरिः—हृदि प्राणो गुदेऽपानो समानो नाभिमण्डले । उदानः कण्ठदेशे च व्यानः सर्वशरीरगः ॥

तु स्वहस्तेन परिमार्ज्य निजोदरम् । अनायासप्रदायीनि कुर्यात्कर्माण्यतन्द्रितः ॥ ततः ताम्बूलादि गृह्णीयात् ॥

इति संक्षिप्तभोजनविधिः समाप्तः ॥

[१]अथ सायंसन्ध्याप्रयोगः ॥

[२]भस्मधारणत आरभ्य प्राणायामान्तं सर्वं प्रातःसन्ध्यावत्कृत्वा सायंसन्ध्यायाः सङ्कल्पं कुर्यात् ॥ विष्णुर्विष्णुर्विष्णुः । श्रीमद्भगवतो० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममोपात्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं सायंसन्ध्योपासनमहं करिष्ये ॥

अथ मन्त्राचमनम् ॥ "अग्निश्चमा" इति मन्त्रस्य नारायण ऋषिः । अनुष्टुप्छन्दः । अग्निर्देवता । अम्बुप्राशने विनियोगः ॥ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् ॥ यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्नाऽहस्तदवलुम्पतु ॥ यत्किञ्चिद्दुरितं मयि ॥ इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥ पुनर्द्विवारं तूष्णीम् आचमनं कुर्यात् ॥ ततः "ॐ आपोहिष्ठा" इति मार्जनम् ॥ ॐ द्रुपदादि० इति अघमर्षणं प्रातःसन्ध्यावत्कुर्यात् ॥

---

[१] सायंसन्ध्याकाले यमः—रवेरस्तमयात्पूर्वं घटिकैका यदा भवेत् । सायंसन्ध्यामुपासीत कुर्याद्धोमञ्च पूर्ववत् ॥

[२] प्रयोगपारिजाते—धार्यं भस्म त्रिपुण्ड्रं तु गृहिणा जलसंयुतम् ॥ सर्वकालं भवेत्स्त्रीणां यतीनां जलवर्जितम् ॥ वानप्रस्थस्य कन्यानां दीक्षाहीननृणां तथा ॥ मध्याह्नात्प्राग्जलैर्युक्तं परतो जलवार्जितम् ॥ मध्याङ्गुलित्रयेणैव स्वदक्षिणकरस्य च । त्रिपुण्ड्रं धारयेद्विद्वान् सर्वकिल्बिषनाशनम् ॥

अथ सूर्यार्घाः— ॐ भूर्भुवः स्वः ॐ तत्सवितुः॰ विष्णुस्वरूपिणे श्रीसूर्यनारायणाय नमः इदमर्घ्यं दत्तं न मम ॥ ॐ भूर्भुवः स्वः ॐ तत्सवितुः॰ विष्णु॰ श्रीसूर्य॰ इदम॰ ॥ ॐ भूर्भुवः स्वः ॐतत्सवितुः॰ विष्णु॰ श्रीसूर्य॰ इदम॰ ॥

ततः सायंसन्ध्यायाः कालातिक्रमदोषपरिहारार्थं चतुर्थमर्घं दत्त्वा सूर्योपस्थानं गायत्रीजपसङ्कल्पादिकं सर्वं प्रातःसन्ध्यावत् कृत्वा गायत्र्यावाहनं कुर्यात् ॥

अथ सरस्वत्या आवाहनम्—वृद्धां सरस्वतीं कृष्णां पीतवस्त्रां चतुर्भुजाम् । शङ्खचक्रगदापद्महस्तां गरुडवाहिनीम् । सामवेदकृतोत्सङ्गां सर्वलक्षणसंयुताम् । वैष्णवीं विष्णुदैवत्यां विष्णुलोकनिवासिनीम् । आवाहयाम्यहं देवीमायान्तीं विष्णुमण्डलात् ॥ आगच्छ वरदे देवि त्र्यक्षरे विष्णुवादिनि । गायत्रि छन्दसां मातर्विष्णुयोने नमोऽस्तु ते ॥

ततो गायत्र्युपस्थानं, गायत्रीशापविमोचनं, गायत्र्यस्त्रोपाहरणं,गायत्रीमन्त्रस्य न्यासान् ,गायत्रीध्यानं, गायत्रीप्रार्थनां चतुर्विंशतिमुद्राप्रदर्शनं, गायत्रीजपं, गायत्रीजपान्ते षडङ्गन्यासान्, अष्टमुद्राप्रदर्शनं, सूर्यप्रदक्षिणां, दिग्देवतानमस्काराँश्च प्रातःसन्ध्यावत्कृत्वा जपनिवेदनं कुर्यात् ॥

अथ जपनिवेदनम्—मया कृतेनानेन सायंसन्ध्याङ्गीभूतेनामुकसङ्ख्याकगायत्रीजपकर्मणा भगवान् विष्णुस्वरूपी श्रीसूर्यनारायणः प्रीयतां न मम ॥ ततो गायत्रीविसर्जनं

गोत्रोच्चारपूर्वकमभिवादनम् आचमनं शिखामुक्तिं मृत्तिकाचन्दनञ्च प्रातःसन्ध्यावत् कुर्यात् ॥ अर्पणम्—मया कृतेनानेन सायंसन्ध्योपासनाख्येन कर्मणा भगवान् श्रीपरमेश्वरः प्रीयतां न मम ॥ ॐ विष्णवे नमः ३ ॥

इति सायंसन्ध्याप्रयोगः समाप्तः ॥

अथ सायह्ने गृहदेवानां पञ्चोपचारैः पूजनविधिः ॥

ॐ केशवाय नमः स्वाहा ॥ ॐ नारायणाय नमः स्वाहा ॥ १ ॥ ॐ माधवाय नमः स्वाहा ॥ ॐ गोविन्दाय नम इति हस्तं प्रक्षाल्य प्राणायामं कुर्यात् ॥ सङ्कल्पः—अद्येत्यादि०शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं सायाह्ने [1]शिवपञ्चायतनदेवानां [2]पञ्चोपचारैः पूजनमहं करिष्ये ॥ ॐ तँय॒ज्ञम्ब॒० । ॐ भुर्भुवः स्वः शिवपञ्चायतनदेवेभ्यो नमो गन्धं सम० ॥ ॐ यत्पुरु॑षं॒० ॥ ॐ भूर्भुवः स्वः शिवपञ्चायतनदेवेभ्यो नमः पुष्पं सम० ॥ ॐ ब्रा॒ह्म॒णोस्य॒० ॥ ॐ भूर्भुवः स्वः शिवपञ्चायतनदेवेभ्यो नमो धूपं सम० ॥ ॐ च॒न्द्रमा॒मन॑सो० ॥ ॐ भूर्भुवः स्वः शिवपञ्चायतनदेवेभ्यो नमो दीपं दर्शयामि ॥ ॐ नाऽभ्याऽआसी० ॥ ॐ भूर्भुवः स्वः शिवपञ्चायतनदेवेभ्यो नमो नैवेद्यं सम० ॥

---

१ षोडशोपचारैः पूजने विशेषफलम् ॥ २ श्रीविष्णुपञ्चायतनदेवता० । श्रीदेवीप० । श्रीसूर्यप० । श्रीगणपतिप० ॥ विष्णोः, दुर्गायाः, सूर्यस्य, गणेशस्य इत्यादि. ॥

अर्पणम्—अनेन सायाह्ने पञ्चोपचारैः पूजनेन शिवपञ्चायतनदेवाः प्रीयन्तां न मम ॥

इति सायाह्ने पञ्चोपचारैः पूजनविधिः ॥

रात्रौ[1] शयनात्प्रागिष्टदेवतास्मरणपूर्वकं रात्रिसूक्तपठनम् ॥

शनयात्प्राग् हस्तौ पादौ प्रक्षाल्य गण्डूषाँश्च कृत्वा शयनार्थमास्तृते शयनपीठे प्राक्शिरो[2] दक्षिणशिरो वा न तु पश्चिमशिरः उदक्शिरो वा कृत्वा कदापि शयनं कार्यम् ॥ पूर्वं स्वेष्टदेवं स्मृत्वा रात्रिसूक्तं[3] जप्त्वा स्वपेत् ॥

॥ श्रीब्रह्मदेवकृतं[3] रात्रिसूक्तम् ॥

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ १ ॥ ब्रह्मोवाच—त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ॥ २ ॥ अर्धमात्रा स्थिता नित्या याऽनुच्चार्याविशेषतः ॥ त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा ॥ ३ ॥ त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥ त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥ ४ ॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥ ५ ॥ महाविद्या महामाया महामेधा महास्मृतिः ॥ महामोहा च भवती महादेवी महेश्वरी ॥ ६ ॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥ ७ ॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥ ८ ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥

---

[1] रात्रौ भोजने तर्पणं वैश्वदेवश्च वाजसनेयिनां नास्ति ॥

[2] मार्कण्डे प्राक्शिराः शयने विन्द्याद्धनमायुश्च दक्षिणे । पश्चिमे प्रबला चिन्ता हानिर्मृत्युश्च ह्युत्तरे ॥

शयने स्मरणयोग्या देवाः—जले रक्षतु वाराहः स्थले रक्षतु वामनः । अटव्यां नारसिंहश्च सर्वतः पातु केशवः ॥ जले रक्षतु नन्दीशः स्थले रक्षतु भैरवः । अटव्यां वीरभद्रश्च सर्वतः पातु शङ्करः ॥ अर्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः । बीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः ॥ तिस्रो भार्याः कफल्लस्य दाहिनी मोहिनी सती । तासां स्मरणमात्रेण चोरो गच्छति निष्फलः ॥ अगस्तिर्माधवश्चैव मुचुकुन्दो महाबलः । कपिलो मुनिरास्तीकः पञ्चैते सुखशायिनः ॥ वैदिकं रात्रिसूक्तम् ॥ आरा॑त्रि॒पार्थि॑व॒ꣳरजः॑ पि॒तुर॑प्रायि॒धाम॑भिः । दि॒वःसदा॑ꣳसिबृह॒तीवित॑िष्ठस॒ऽ आत्वे॒षंव॑र्त्तते॒तमः॑ ॥ ३३/३४ ॥ उष॒स्तच्चि॒त्रमाभ॑रा॒स्मभ्यं॑वाजिनीवति । येनत॒ोकञ्च॒तन॑यञ्च॒धाम॑हे ॥ ३३/३४ ॥

॥ इति नित्यनैमित्तिककर्मसमुच्चये नित्यकर्मप्रयोगः समाप्तः ॥

शङ्खिनी चापिनी बाणभुशुण्डी परिघायुधा ॥ ९ ॥ सौम्यासौम्यतराऽशेषसौम्येभ्यस्त्वतिसुन्दरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥ १० ॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाऽखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥ ११ ॥ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ १२ ॥ विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥ १३ ॥ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ १४ ॥ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥ १५ ॥

॥ इति श्रीब्रह्मदेवकृत (रात्रिसूक्तं) स्तोत्रं समाप्तम् ॥

॥ अथ [१]रुद्राष्टाध्यायी प्रारभ्यते ॥

॥ अथाभिषेकारम्भादौ षडङ्गन्यासान् समाचरेत् ॥

ॐ मनोजूतिरित्यस्य आङ्गिरसो बृहस्पतिर्ऋषिः । यजुश्छन्दः । विश्वेदेवा देवताः । हृदये न्यासे विनियोगः ॥

---

[१]अथ रुद्राभिषेकप्रकाराः ॥

१ रूपकाख्ये रुद्रे एकादशिनीरुद्रपर्याये रुद्रे लघुरुद्रे महारुद्रेऽतिरुद्रे चानन्तदेवविरचिताद्रुद्रकल्पद्रुमात्प्रसङ्गानुसारं यत्किञ्चित्सारं समुद्धृत्य वाजसनेयिनां रुद्रजपेऽभिषेके होमे चावश्यकानां साङ्गमंत्राणां सङ्ख्याया निर्णय उच्यते ॥ जपाभिषेकहोमैस्त्रिविधो रुद्रः प्रत्येकं पञ्चधोक्तः । रूपं रुद्रो रुद्री महारुद्रोऽतिरुद्रश्च ॥ तदुक्तं– शृणुष्व भो महाप्राज्ञ रुद्रभेदान्वदामि ते । रुद्राः पञ्चविधाः प्रोक्ता देशिकैरुत्तरोत्तरम् ॥ साङ्गस्त्वाद्यो रूपकाख्यः सशीर्षो रुद्र उच्यते । एकादशगुणैस्तद्वद्रुद्रीसंज्ञो द्वितीयकः ॥ एकादशभिरेताभिस्तृतीयो लघुरुद्रकः । लघ्वेकादशभिः प्रोक्तो महारुद्रश्चतुर्थकः ॥ पञ्चमः स्यान्महारुद्रैरेकादशभिरन्तिमः ॥ अतिरुद्रः समाख्यातः सर्वेभ्यो ह्युत्तमोत्तमः ॥ इति **महार्णवे** ॥ षडङ्गैकादशी रुद्री रुद्रयेकादश रुद्रतः । एकादशभिरेताभिर्महारुद्रस्तु कथ्यते ॥ बृहत्पाराशरस्मृतौ– शिखा तस्य तु रुद्रस्योत्तरं नारायणं स्मृतम् । शिरः पुरुषसूक्तं च शिवसङ्कल्पकञ्च हृत् ॥ कवचं चाप्रतिरथं नेत्रं विभ्राड्बृहत्स्मृतम् । शतरुद्रियमन्त्रेषु देवस्यास्त्रं प्रकल्पयेत् ॥ एवं षडङ्गान्युक्त्वा "पञ्चाङ्गानि स्मरेदष्टप्रणवं प्रजपेद्द्विजः" इत्युक्तत्वात् ॥ अत्राङ्गानां स्मरणं तत्तन्मन्त्रजपादिरूपेण ॥ अत्र च जप्यमन्त्रस्यैव रुद्राध्यायस्यास्त्रन्यासे विनियोगादस्त्रवर्जितान्येव पञ्चाङ्गानि बोध्यानि ॥ अत एव देवयाज्ञिकैः पञ्चाङ्गमन्त्रसाहित्यमेव रुद्रजपे मुख्यत्वेनोक्तं न तु षडङ्गमन्त्रसाहित्यम् ॥ अत्र 'अष्टप्रणवं जपेत्" इति वाक्ये जपग्रहणं होमाभिषेकयोरुपलक्षणम् ॥ तेन रुद्रं जपेत् रुद्रेणाभिषिञ्चेद्रुद्रेण जुहुयात् इत्यर्थो बोध्यः ॥ स च "वयꣳसोम" इत्यष्टर्चस्य (सप्तर्चस्य) वा महच्छिरःसंज्ञकत्वात्सशीर्षः "उग्रश्च" इति जटामंत्रैश्च सहितो ज्ञेयः ॥ अनेन हृदयादिभिः पञ्चभिरङ्गमन्त्रैः शिवसङ्कल्पादिभिर्विभ्राडित्यनुवाकान्तैरुपेतो वयꣳसोममिति शिरोयुतो जटामंत्रयुतश्च रुद्राध्यायो रूपकाख्य आद्यो रुद्रः ॥

हृदयं स्पृष्ट्वा– ॐमनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टँयज्ञꣳसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ ॥ $\frac{१३}{२}$ ॥ हृदयाय नमः ॥ ॐ अबोध्यग्निरित्यस्य बुधगविष्ठिरावृषी । त्रिष्टुप्छन्दः । अग्नि-

---

अस्मिन्विषये विधानपारिजाते जाबालश्रुतिः–शिवसङ्कल्पं हृदयं सूक्तं स्यात्पौरुषं शिरः । प्राहुर्नारायणं चैव शिखां तस्योत्तराभिधम् ॥ आशुःशिशानः कवचं नेत्रं विभ्राड्बृहत्स्मृतम् । शतरुद्रियमस्त्रं स्यात्षडङ्गरूप ईरितः ॥ पूर्वमङ्गानि सञ्जप्य रुद्राध्यायं ततो जपेत् ॥ तदन्ते सप्तमन्त्राश्च वयꣳसोममहच्छिरः । उग्रश्चेति यजुर्मन्त्रं जटामाहुर्जपेदिति इत्यनेन षडङ्गा अपि रूपकाख्यादयो रुद्राः कथिताः ॥

ननु परशुरामकारिकानुसारिभिर्विधानपारिजातकारकदीक्षितादिभिरपि तथोक्तत्वात् रुद्राध्यायस्याद्योऽनुवाकः शतरुद्रियम् इति चेन्न । अपरैः "रुद्राध्याय एव शतरुद्रियम्" इत्युक्तत्वात् ॥ युक्ततममेतद्बृहत्पराशरस्मृतिसम्मतत्वात् । महार्णवकारनारायणभट्टकमलाकरभट्टादिभिरपि तथोक्तन्यासपूजापूर्वकमष्टप्रणवान्वितरुद्राध्यायस्यैव सकृदावर्तनं रूपकाख्यो रुद्र इत्युक्तत्वात् ॥ युक्तं चैतत्पूर्वोदाहृतजाबालिकैवल्यश्रुतिमिताक्षरोदाहृतात्रिबृहत्पराशरशातातपस्मृतिसंहितापुराणहेमाद्र्युदाहृतवायुकालिकापुराणादिवाक्यानां शतरुद्रियरुद्रशब्दान्यतरशब्दवाच्यरुद्राध्यायस्यैव फलार्थतया नित्यतया वा जपविधानपरत्वात् पारस्करगृह्यसूत्रकर्कभाष्यादिसंवादलाभाच्च ॥ तथाग्निपुराणे यजुर्विधाने "अग्निरुवाच" इत्युपक्रम्य "वक्ष्ये रुद्रविधानं तु पञ्चाङ्गं सर्वदं परम् । हृदयं शिवसङ्कल्पं शिरः सूक्तं तु पौरुषम् ॥ शिखाऽद्भयः सम्भृतं सूक्तमाशुः कवचमेव च ॥ वेदवादिभिराख्यातमस्त्रं वै शतरुद्रियम् ॥ शतरुद्रियसंज्ञस्य रुद्रस्याङ्गानि पञ्च हि । पञ्चाङ्गं न्यस्य तं ध्यात्वा जपेद्रुद्राँस्ततः क्रमात् ॥" इत्यनेनाप्येतदेव स्पष्टमुक्तं रुद्राध्याय एव रुद्रः ॥ एतेन च यैः कैश्चिदुक्तं "षट्षष्टिर्मूलजाप्येन षोडशर्चं पुनर्जपेत् ॥ एष ते द्वे नमस्ते द्वे नतं विद्द्वयमेव च । मीढुष्टमचतुष्कञ्च वयं सोमाष्टकं ततः ॥ वेदवादिभिराख्यातमेतद्वै शतरुद्रियम्" इत्यस्यापि पूर्वोक्तानेकस्मृतिसूत्रनिबन्धविरोधान्मुख्यत्वं वाजसनेयिनां निरस्तमेव विद्वद्भिः ॥

अथ रूपकाख्यो रुद्रप्रकारः ॥

अतः पूर्वोक्तशतरुद्रियस्याऽऽदौ पञ्चाङ्गानि षडङ्गानि वा पठित्वा मध्ये चाष्ट-

देवता । शिरसि न्यासे विनियोगः ॥ शिरः स्पृष्ट्वा– ॐ अबोध्यग्निः समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् । यह्वाऽइवप्प्रवयामुज्जिहानाः प्प्रभानवः सिस्रतेनाकमच्छ ॥२४/१५॥ शिरसे स्वाहा ॥ ॐमूर्द्धानमित्यस्य भरद्वाज ऋषिः ।

प्रणवयुक्तं शतरुद्रियवाचकं रौद्राध्यायं पठित्वा चान्ते च "वयꣳसोमम्" इति (सप्तमंत्रात्मकम्) अष्टमंत्रात्मकं (वा) महच्छिरः तदनन्तरम् "उग्रश्च" इति जटामंत्रान्पठित्वाऽन्ते च "ऋचं वाचम्" इति शान्त्यध्यायं पठित्वा त्रिवारं ॐ शान्तिरित्युच्चारणम् इति रूपकाख्य आद्यो रुद्रः समाख्यातः ॥ अपि तु रूपकाख्ये रुद्रे शिरोमंत्राणां जटामंत्राणां च पठनमयुक्तं "साङ्गस्त्वाद्यो रूपकाख्यः" इत्यनेन सह विरोधात् बृहत्पाराशरस्मृतिप्रभृतिवाक्यविरोधाच्च ॥ तथैव सर्वत्र शान्त्यध्यायात्पूर्वं नमकचमकवाचकस्यैकोनविंशतिमंत्रात्मकस्य वाजश्चेत्यस्याप्यपठनम् ॥ सर्वैर्वाजसनेयिभिरयमेव चमकवर्जं पक्षो मुख्यत्वेनादृतो जपाभिषेकहोमात्मके पञ्चविधे रुद्रे ॥

अथैकादशिनी रुद्रः ॥ षडङ्गपक्षे पञ्चाङ्गपक्षे चमकपक्षे च

"साङ्गमाद्यं जपेद्रुद्रं केवलानि नवान्तरे । साङ्गं सशीर्षकं चान्त्यं निरङ्गमिति केचन ॥" तेनादौ "यज्जाग्रतः" इत्यारभ्य "विभ्राड्बृहत्" इत्यन्तानि पञ्चाङ्गानि षडङ्गानि वा सरुद्राणि पठित्वा मध्ये चाष्टप्रणवयुक्तं रुद्राध्यायं नववारं पठित्वाऽन्ते च पुनः "यज्जाग्रत" इत्यारभ्य "विभ्राड्बृहत्" इत्यनुवाकान्तैः पूर्वोक्तैरङ्गपञ्चकमन्त्रैः षडङ्गैर्वा समन्वितस्य रुद्राध्यायस्य जपं कृत्वा वयꣳसोमेत्यष्टानां कण्डिकानाम् "उग्रश्च" इति सप्तानां रुद्रजटानाम्नीकण्डिकानां च जपं कृत्वा "ऋचं वाचम्" इति शान्त्यध्यायं जपित्वा ॐ शान्तिः इति त्रिरुच्चारणम् ॥

षडङ्गपक्षे–परशुरामकारिकाकारास्तु "यज्जाग्रतः" इत्यारभ्य "नमस्ते रुद्र" इति रुद्राध्यायान्तानां षडङ्गमंत्राणां जपं कृत्वा मध्ये चाष्टप्रणवसंयुक्तस्य रुद्राध्यायस्यैकादशवारं जपं कृत्वाऽन्ते च पूर्ववत्साङ्गं रुद्रं पठित्वा "ऋचं वाचम्" इति शान्त्यध्यायेन शान्तिकरणं चान्ते ॐशान्तिः इति त्रिरुच्चारणम् ॥

मुख्ये पञ्चाङ्गपक्षे–तु पूर्वं "यज्जाग्रतः" इत्यारभ्य पञ्चाङ्गानि सरुद्राणि पठित्वा मध्ये नववारं पूर्ववद्रौदाध्यायं पठित्वान्ते च पुनः "यज्जाग्रतः" इत्यारभ्य

त्रिष्टुप्छन्दः । वैश्वानरोऽग्निर्देवता । शिखायां न्यासे विनियोगः ॥ शिखां स्पृष्ट्वा—ॐमूर्द्धानन्दिवोऽअरतिम्पृथिव्या वैश्वानरमृतऽआजातमग्निम् ॥ कविᳫंसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ २४/७ ॥ शिखायै वषट् ॥ ॐमर्म्माणित इत्यस्य विवस्वानृषिः । त्रिष्टुप्छन्दः । लिङ्गोक्ता देवताः । कवचे न्यासे विनियोगः ॥ कवचं स्पृष्ट्वा—ॐमर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ ४९/१७ ॥ कवचाय हुम् ॥ ॐ विश्वतश्चक्षुरित्यस्य विश्वकर्मा भौवन ऋषिः । त्रिष्टुप् छन्दः । विश्वकर्मा देवता । नेत्रन्यासे विनियोगः ॥ ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहु-

---

सरुद्रं पञ्चाङ्गं सशीर्षं सजटं जप्त्वा "ऋचं वाचम्" इति शान्त्यध्यायं पठित्वा ॐ शान्तिः इति त्रिरुच्चारणम् ॥

अथ चमकानुवाकसमन्वितो रुद्रः ॥

चमकानुवाको—नाङ्गीकृतो वाजसनेयिभिः ॥ तथापि—ये चमकानुवाकान्पठितुमिच्छन्ति तैरप्येकादशिनीरुद्रपर्याये रुद्रे पूर्ववत्पूर्वं पञ्चाङ्गानि षडङ्गानि वा पठित्वा मध्ये शतरुद्रियं पठित्वा "वेद^{४}वेदा^{४}ब्धि^{४}रामा^{३}श्च रा^{३}मरा^{३}मद्वि^{२}कै^{१}कै^{१}कम् ॥ द्वौ^{२} द्वौ^{२} पृथक् च मन्त्रेण नमकाश्चमकाः स्मृताः ॥ वाजश्च (१) सत्यञ्च० (२) ऊर्क्च० (३) अश्माच० (४) अग्निश्चम इन्द्र० (५) अᳫंशुश्च० (६) अग्निश्चमेघर्म्म० (७) एकाच० (८) चतस्रश्च० (९) त्र्यविश्च० (१०) वाजायस्वाहा० (११) इति क्रमेणाष्टप्रणवसंयुक्तं रुद्राध्यायं प्रतिचमकं पठेत् ॥ चान्ते पूर्ववत्पठित्वा ॐ शान्तिः इति त्रिरुच्चारणम् ॥ "निरङ्गमिति केचन" इति पक्षे केवलं शतरुद्रियस्यैवैकादशवारं पठनं बोध्यम् ॥ एत एव मन्त्रसङ्ख्याजपहोमाभिषेकेषु वाजसनेयिनां बोध्याः ॥

पञ्चाङ्गविषयेऽपि पक्षद्वयम् । यजुर्विधानोक्तवाक्येन हृदय^{१}-शिरः^{२}-शिखा^{३}-कव^{४}चा^{५}स्त्राण्येव पञ्चाङ्गानि नेत्रवर्ज्याणि ॥ हेमाद्रौ कौशिकोऽपि-हृदये हृदयं जप्त्वा शीर्षिण

रुतविश्वतस्प्पात् । सम्बाहुब्भ्यान्धमति सम्पतत्त्रैर्द्यावाभूमींजनयन्देवऽएकः ॥ १९/१७ ॥ नेत्रत्रयाय वौषट् ॥ ॐमानस्तोक इत्यस्य कुत्स ऋषिः । जगती छन्दः । एको रुद्रो देवता। अस्त्रन्यासे विनियोगः—ॐमानस्त्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे ॥ १६/१६ ॥ अस्त्राय फट् ॥ इति षडङ्गन्यासाः ॥

॥ अथ रुद्राष्टाध्याय्यां प्रथमोऽध्यायः ॥

गणानान्त्वागणपतिꣳहवामहे प्प्रियाणान्त्वाप्प्रियपतिꣳहवामहे निधीनान्त्वानिधिपतिꣳहवामहेव्वसो मम ॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥ १ ॥ गायत्रीत्रिष्टुब्ब्जगत्त्यनुष्टुप्प्पङ्क्त्त्यासह ॥ बृहत्त्युष्णिहाककुप्प्सूचीभिः शम्म्यन्तुत्त्वा ॥ २ ॥ द्विपदायाश्चतुष्प्पदास्त्रिपदाया

सूक्तं च पौरुषम् ॥ शिखाऽस्यादुत्तरं षट्कं नारायणमनुत्तमम् ॥ कवचे प्रतिरथं तदस्त्रे तु शतरुद्रियम् ॥ अत्र पञ्चाङ्गानि नेत्रवर्जितानि ॥ प्रचारे पञ्चाङ्गानि अस्त्रवर्जितानि दृश्यते ॥ चमकजपेऽपि नमकानन्तरं चमकजपः ॥ ततः शिरोमन्त्राणां जटामंत्राणाम् ॥ अप्रतिरथं द्वादशर्चमेव। शिरोमन्त्रास्तु अष्टावेव ॥ सप्तमन्त्रास्तु काण्वशाखिनाम् ॥ "साङ्गमाद्यम्" इति रुद्रपक्षे आदावन्ते साङ्गे रुद्रजपेऽपि प्रधानभूतशतरुद्रीयस्यैकादशावृत्तिजपाभावादकिञ्चित्कर इत्यपि केचित् ॥ अतः प्रयोगदर्पणोक्तप्रकारेण "एकादशोर्ध्वरूपाणि त्वङ्गानि च सकृज्जपेत्। अङ्गान्यादौ शिरश्चान्ते रुद्रैकादशिनी स्मृता" इत्यादावङ्गानि जप्त्वा तत एकादशवारं शतरुद्रियमनन्तरं शिरोजटामंत्राः शान्त्यध्यायश्चेति । अत्रापि बहुर्षिमतं दृश्यते ॥ सम्प्रदायस्तु पूर्वोक्त एव ॥ अष्टप्रणवं जपेत्तत्र सप्रणवानां तिसृणां व्याहृतीनां रुद्राध्यायस्यादावन्ते जपः ॥

श्चषट्पदाः ॥ विच्छन्दायाश्चसच्छन्दाःसूचीभिःशम्यन्तुत्त्वा ॥ ३ ॥ सहस्तोमाःसहच्छन्दसऽआवृतःसहप्प्रमाऽऋषयःसप्तदैव्व्याः ॥ पूर्वेषाम्पन्थामनुदृश्श्यधीराऽअन्वालेभिरेरथ्थ्योनरश्श्मीन् ॥ ४ ॥

॥ अथ शिवसङ्कल्पसूक्तम् ॥

ॐ यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनःशिवसङ्कल्प्पमस्तु ॥ ५ ॥ येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः यदपूर्व्वँयक्षमन्तःप्प्रजानान्तन्मेमनःशिवसङ्कल्प्पमस्तु ।६। यत्प्रज्ज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्म्मान्नऽऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनःशिवसङ्कल्प्पमस्तु ॥ ७ ॥ येनेदम्भूतम्भुवनम्भविष्ष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेमनःशिवसङ्कल्प्पमस्तु ॥ ८ ॥ यस्म्मिन्नृचःसामयजूꣳषियस्म्मिन्प्रतिष्ठितारथनाभाविवाराः ॥ यस्म्मिँश्चित्तꣳसर्व्वमोतम्प्रजानान्तन्मेमनःशिवसङ्कल्प्पमस्तु ॥ ९ ॥ सुषारथिरश्श्वानिवयन्मनुष्ष्यान्नेनीयतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठँयदजिरञ्जविष्ठन्तन्मेमनःशिवसङ्कल्प्पमस्तु ॥ १० ॥

॥ इति शिवसङ्कल्पसूक्तं समाप्तम् ॥ प्रथमोऽध्यायः समाप्तः ॥

।। अथ रुद्राष्टाध्याय्यां द्वितीयोऽध्यायः ।। अथ पुरुषसूक्तम् ।।

हरिः ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ।। सभूमिꣳसर्वतस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम् ।। १ ।। पुरुषऽ एवेदꣳसर्वँय्यद्भूतँय्यच्चभाव्यम्।।उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ।।२।। एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः ।। पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ।। ३ ।। त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ।। ततोविष्वङ्व्यक्क्रामत्साशनानशनेऽअभि ।। ४ ।। ततोविराडजायतविराजोऽअधिपूरुषः ।। सजातोऽअत्त्यरिच्यतपश्चाद्भूमिमथोपुरः ।। ५ ।। तस्म्माद्यज्ज्ञात्त्सर्वहुतःसम्भृतम्पृषदाज्ज्यम् ।। पशूँस्ताँश्चक्क्रेवायव्यानारण्ण्याग्ग्राम्म्याश्चये ।। ६ ।। तस्म्माद्यज्ज्ञात्त्सर्वहुतऽऋचःसामानिजज्ञिरे ।। छन्दाꣳसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ।। ७ ।। तस्म्मादश्वाऽअजायन्तयेकेचोभयादतः ।। गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः ।।८।। तँय्यज्ज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ।। तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ।।९।। यत्पुरुषंव्यदधुःकतिधाव्व्यकल्पयन् ।। मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते।।१०।। ब्राह्मणोस्यमुखमासीद्बाहूराजन्न्यःकृतः ।। ऊरूतदस्ययद्वैश्यःपद्भ्याꣳशूद्रोऽअजायत ।। ११ ।। चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ।। श्रोत्राद्वायुश्चप्प्राणश्चमुखादग्निरजायत

॥१२॥नाब्भ्याँऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत॥
पद्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालोकाँ२ऽअकल्पयन् ।१३।
यत्पुरुषेणहविषादेवायज्ज्ञमतन्न्वत ॥ व्वसन्तोस्यासीदाज्ज्यं
ग्ग्रीष्म्मऽइद्ध्मःशरद्धविः॥१४॥सप्प्तास्यासन्न्परिधयस्त्रिः
सप्प्तसमिधःकृताः॥देवायद्यज्ज्ञन्तन्न्वानाऽअबद्ध्नन्न्पुरुष
म्पशुम् ॥ १५ ॥ यज्ज्ञेनयज्ज्ञमयजन्तदेवास्त्तानिधर्म्माणि
प्रथमान्न्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्रपूर्व्वे
साद्ध्याःसन्तिदेवाः ॥ १६ ॥ ॥ ॥ ॥

॥ इति पुरुषसूक्तं समाप्तम् ॥

॥ अथ उत्तरनारायणसूक्तम् ॥

अद्भ्यःसम्भृतःपृथिव्यैरसाच्चविश्श्वकर्म्मणःसमवर्त्ते-
ताग्ग्रे ॥ तस्यत्त्वष्टाव्विदधद्रूपमेतितन्न्मर्त्त्यस्यदेवत्त्वमाजान
मग्ग्रे ॥ १७ ॥ व्वेदाहमेतम्पुरुषम्महान्तमादित्त्यवर्ण्णन्त
मसःपरस्त्तात् ॥ तमेवव्विदित्त्वातिमृत्त्युमेतिनान्न्यःपन्था
व्विद्यतेयनाय ॥ १८ ॥ प्रजापतिश्च्चरतिगर्ब्भेऽअन्तरजाय
मानोबहुधाव्विजायते ॥ तस्ययोनिम्परिपश्श्यन्तिधीरास्त्त
स्मिन्न्हतस्त्थुर्ब्भुवनानिव्विश्श्वा ॥ १९ ॥ योदेवेब्भ्यऽआ
तपतियोदेवानाम्पुरोहितः ॥ पूर्व्वोयोदेवेब्भ्योजातोनमोरु
चायब्ब्राह्मये ॥ २० ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रेतद
ब्ब्रुवन्॥ यस्त्त्वैवम्ब्राह्मणोव्विद्यात्तस्यदेवाऽअसन्न्वशे ॥२१॥
श्रीश्चतेलक्ष्मीश्श्चपत्क्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्श्वि

नौभ्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽ
इषाण ॥ २२ ॥ ॥ ॥ ॥

॥ इति उत्तरनारायणसूक्तं समाप्तम् ॥ द्वितीयोऽध्यायः समाप्तः ॥

॥ अथ रुद्राष्टाध्याय्यां तृतीयोऽध्यायः ॥ अथ अप्रतिरथसूक्तम् ॥

आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणी
नाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतꣳसेनाऽअजय
त्साकमिन्द्रः ॥ १ ॥ सङ्क्रन्दनेनानिमिषेणजिष्णुनायु
त्कारेणदुश्च्यवनेनधृष्णुना ॥ तदिन्द्रेणजयततत्सहद्ध्वं
युधोनरऽइषुहस्त्तेनवृष्णा ॥ २ ॥ सऽइषुहस्त्तैःसनिष
ङ्गिभिर्व्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन ॥ सꣳसृष्टजित्सोम
पाबाहुशर्द्ध्युग्रधन्न्वाप्रतिहिताभिरस्त्ता ॥ ३ ॥ बृहस्प
तेपरिदीयारथेनरक्षोहामित्राँ२ऽअपबाधमानः ॥ प्रभञ्ज
न्त्सेनाःप्रमृणोयुधाजयन्नस्माकमेद्ध्यवितारथानाम् ॥४॥
बलविज्ञायस्त्थविरःप्रवीरःसहस्वान्वाजीसहमानऽउग्रः ।
अभिवीरोऽअभिसत्त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित्
॥ ५ ॥ गोत्रभिदङ्गोविदंवज्रबाहुञ्जयन्तमज्मप्रमृणन्त
मोजसा ॥ इमꣳसजाताऽअनुवीरयद्ध्वमिन्द्रꣳसखायोऽ
अनुसꣳरभद्ध्वम् ॥ ६ ॥ अभिगोत्राणिसहसागाहमानो
दयोवीरःशतमन्युरिन्द्रः ॥ दुश्च्यवनःपृतनाषाडयुद्ध्यो
स्माकꣳसेनाऽअवतुप्रयुत्सु ॥ ७ ॥ इन्द्रऽआसान्नेता

बृहस्पतिर्द्दक्षिणायज्ज्ञः पुरऽएतुसोमः ॥ देवसेनानाम
भिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥ ८ ॥ इन्द्रस्य
वृष्णोवरुणस्यराज्ज्ञऽआदित्त्यानाम्मरुताꣳशर्द्धऽउग्ग्रम् ॥
महामनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात्
॥९॥ उद्धर्षयमघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाꣳ
सि ॥ उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानाञ्जयताँयन्तु
घोषाः ॥ १० ॥ अस्माकमिन्द्रः समृतेषुद्ध्वजेष्वस्मा
कँयाऽइषवस्ताजयन्तु ॥ अस्माकंवीराऽउत्तरेभवन्त्व
स्माँ२ऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषांचित्तम्प्रति
लोभयन्तीगृहाणाङ्गान्यप्प्वेपरेहि ॥ अभिप्रेहिनिर्द्दहहृत्सु
शोकरन्धेनामित्त्रास्तमसासचन्ताम् ॥ १२ ॥ ४४/१७ ॥ अव
सृष्टापरापतशरव्येब्रह्मसꣳशिते ॥ गच्छामित्त्रान्प्रपद्य
स्वमामीषाङ्कञ्चनोच्छिषः ॥ १३ ॥ प्रेताजयतानरऽइन्द्रो
वः शर्म्मयच्छतु ॥ उग्ग्रावः सन्तुबाहवोनाधृष्ष्यायथासथ
॥ १४ ॥ असौयासेनामरुतः परेषामभ्यैतिनऽओजसास्प
र्द्धमाना ॥ ताङ्गूहततमसापव्रतेनयथामीऽअन्योऽअन्यन्न
जानन् ॥ १५ ॥ यत्रबाणाः सम्पतन्तिकुमाराविशिखाऽ
इव ॥ तन्नऽइन्द्रोबृहस्पतिरदितिः शर्म्मयच्छतुविश्श्वाहा
शर्म्मयच्छतु ॥ १६ ॥ मर्म्माणितेवर्म्मणाच्छादयामिसोम
स्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयोवरुणस्तेकृणोतु
जयन्तन्त्वानुदेवामदन्तु ॥ १७ ॥

॥ इति अप्रतिरथसूक्तं समाप्तम् ॥ तृतीयोऽध्यायः समाप्तः ॥

॥ अथ रुद्राष्टाध्याय्यां चतुर्थोऽध्यायः ॥ अथ मैत्रसूक्तम् ॥

हरिः ॐ वि॒भ्राड्बृ॒हत्पि॑बतुसो॒म्म्यम्मद्ध्वायु॒र्द्दध॑द्य॒ज्ञ
पता॒ववि॑हुतम् ॥ वातजू॑तो॒योऽअ॑भि॒रक्क्षति॒त्क्मना॑प्र॒जाः
पुं॑पोषपुरु॒धाविरा॑जति ॥ १ ॥ उदु॒त्त्यञ्जा॒तवे॑दसन्दे॒वंव॑हन्ति
के॒तवः॑ ॥ दृ॒शेविश्वा॑य॒सूर्य्य॑म् ॥ २ ॥ येना॑पावक॒चक्क्ष॑सा
भु॒रण्ण्यन्त॒ञ्जना॒२ऽअनु॑ ॥ त्वंव॑रु॒णपश्श्य॑सि ॥ ३ ॥ दैव्या॑
वद्ध्व॒र्य्यूऽआग॑त॒ꣳरथे॑न॒सूर्य्य॑वत्त्वचा ॥ मद्ध्वा॑य॒ज्ञꣳसम॑ञ्जाथे ॥
तम्प्र॒त्क्कथा॒यंवे॒नश्चि॒त्रन्दे॒वाना॑म् ॥ ४ ॥ तम्प्र॒त्क्नथा॑पू॒र्व्वथा॑
वि॒श्वथे॒मथा॑ज्ज्ये॒ष्ठताति॑म्बर्हि॒षद॑ꣳस्व॒र्व्विद॑म् ॥ प्र॒ती॒ची॒नंवृ॒
जन॑न्दोहसे॒धुनि॑मा॒शुञ्जय॑न्त॒मनु॒यासु॒वर्द्ध॑से ॥ ५ ॥ अ॒यंवे॒न
श्चो॑दय॒त्त्पृश्नि॑गर्ब्भा॒ज्ज्योति॑र्ज्जरायूरज॑सोवि॒माने॑ ॥ इ॒मम॒
पाꣳसं॑ङ्ग॒मेसूर्य्य॑स्य॒शिशु॒न्नविप्प्रा॑म॒तिभी॑रिहन्ति ॥ ६ ॥
चि॒त्रन्दे॒वाना॒मुद॑गा॒दनी॑क॒ञ्चक्क्षु॑र्म्मि॒त्रस्य॒वरु॑णस्या॒ग्नेः ॥
आप्प्रा॒द्यावा॑पृथि॒वीऽअ॒न्तरि॑क्ष॒ꣳसूर्य्य॑ऽआ॒त्क्माजग॑तस्त॒
स्त्थुष॑श्च ॥ ७ ॥ आन॒ऽइडा॑भिर्व्वि॒दथे॑सुश॒स्तिवि॒श्वान॑रꣳ
स॒वि॒तादे॒वऽए॑तु ॥ अपि॒यथा॑युवा॒नोमत्त्स॑था॒नो॒विश्व॒ञ्जग॑द
भि॒पि॒त्वेम॑नी॒षा ॥ ८ ॥ यद॒द्यकच्च॑वृत्रहन्नु॒दगा॑ऽअ॒भिसू॑र्य्य ॥
स॒र्व्वन्तादि॑न्द्रते॒वशे॑ ॥ ९ ॥ त॒रणि॑र्व्वि॒श्वद॑र्श॒तोज्ज्योति॒ष्कृद॑सि
सू॒र्य्य ॥ विश्व॒माभा॑सिरोच॒नम् ॥ १० ॥ तत्सूर्य्य॑स्यदे॒व
त्त्वन्तन्म॑हि॒त्त्वम्म॒द्ध्याकर्त्तो॒र्व्वित॑त॒ꣳसञ्ज॑भार ॥ य॒देदयु॑क्त
ह॒रितः॑स॒धस्त्था॒दाद्रात्री॒वास॑स्तनुतेसि॒मस्म्मै ॥ ११ ॥

बृहस्प्पतिर्द्दक्षिणायज्ज्ञः पुरऽएतुसोमः ॥ देवसेनानाम
भिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥ ८ ॥ इन्द्रस्य
वृष्ण्णो वरुणस्यराज्ञऽआदित्त्यानाम्मरुताꣳशर्द्धऽउग्ग्रम् ॥
महामनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुदस्त्थात्
॥९॥ उद्धर्षयमघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाꣳ
सि ॥ उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानाञ्जयताँऽयन्तु
घोषाः ॥ १० ॥ अस्म्माकमिन्द्रः समृतेषुद्ध्वजेष्ष्वस्म्मा
कँय्याऽइषवस्त्ताजयन्तु ॥ अस्म्माकंव्वीराऽउत्तरेभवन्त्व
स्म्माँ२ऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषाञ्चित्तम्प्रति
लोभयन्तीगृहाणाङ्गान्यप्प्वेपरेहि ॥ अभिप्प्रेहिनिर्द्दहहृत्त्सु
शोकरन्धेनामित्त्रास्त्तमसासचन्ताम् ॥ १२ ॥ $\frac{४४}{१७}$ ॥ अव
सृष्ट्वापरापतशरव्व्येब्ब्रह्मसꣳशिते ॥ गच्छामित्त्रान्प्रपद्य
स्वमामीषाङ्कञ्चनोच्छिषः ॥ १३ ॥ प्प्रेताजयतानरऽइन्द्रो
वः शर्म्मयच्छतु ॥ उग्ग्रावः सन्तुबाहवोनाधृष्ष्यायथासथ
॥ १४ ॥ असौयासेनामरुतः परेषामभ्भ्येतिनऽओजसास्प्प
र्द्धमाना ॥ ताङ्गूहततमसापव्व्रतेनयथामीऽअन्न्योऽअन्न्यन्न
जानन् ॥ १५ ॥ यत्त्रबाणाः सम्पतन्तिकुमाराविशिखाऽ
इव ॥ तन्नऽइन्द्रोबृहस्प्पतिरदितिः शर्म्मयच्छतुविश्श्वाहा
शर्म्मयच्छतु ॥ १६ ॥ मर्म्माणितेवर्म्मणाच्छादयामिसोम
स्त्वाराजामृतेनानुवस्त्ताम् ॥ उरोर्व्वरीयोवरुणस्तेकृणोतु
जयन्तन्त्वानुदेवामदन्तु ॥ १७ ॥

॥ इति अप्रतिरथसूक्तं समाप्तम् ॥ तृतीयोऽध्यायः समाप्तः ॥

॥ अथ रुद्राष्टाध्याय्यां चतुर्थोऽध्यायः ॥ अथ मैत्रसूक्तम् ॥

हरिः ॐ वि॒भ्राड्बृ॒हत्पि॑बतुसो॒म्म्यम्मद्ध्वायु॒र्द्दध॑द्य॒ज्ञप॑ता॒ववि॑ह्रुतम् ॥ वात॑जूतो॒यो॑ऽअ॒भिरक्ष॑ति॒त्त्मना॑प्प्र॒जाः पु॒पोष॑पुरु॒धाविरा॑जति ॥ १ ॥ उदु॒त्त्यञ्जा॒तवे॑दसन्दे॒वंव॑हन्ति के॒तवः॑ ॥ दृ॒शेविश्श्वा॑य॒सूर्य्य॑म् ॥ २ ॥ येना॑पावकु॒चक्क्ष॑सा भु॒रण्ण्यन्त॒ञ्जना॒ँ२ऽअनु॑ ॥ त्त्वंव॑रु॒णपश्श्य॑सि ॥ ३ ॥ दैव्या॑वद्ध्व॒र्य्यू॒ऽआग॑त॒ꣳरथे॑न॒सूर्य्य॑त्वचा ॥ मद्ध्वा॑य॒ज्ञꣳसम॑ञ्जाथे ॥ तम्प्र॒त्त्नथा॒यंवे॒नश्चि॒त्रन्दे॒वाना॑म् ॥ ४ ॥ तम्प्र॒त्त्नथा॑पू॒र्व्वथा॑ वि॒श्श्वथे॒मथा॑ज्ज्ये॒ष्ठता॑तिम्बर्हि॒षद॑ꣳस्व॒र्व्विद॑म् ॥ प्र॒ती॒ची॒नंवृ॒जन॑न्दोहसे॒धुनि॑मा॒शुञ्जय॑न्त॒मनु॒यासु॒वर्द्ध॑से ॥ ५ ॥ अ॒यंवे॒नश्चो॑दय॒त्पृश्नि॑गर्भा॒ज्ज्योति॑र्ज्जरायू॒रज॑सोवि॒माने॑ ॥ इ॒मम॒पाꣳस॑ङ्ग॒मेसूर्य्य॑स्य॒शिशु॑न्नविप्प्रा॑म॒तिभी॑रिहन्ति ॥ ६ ॥ चि॒त्रन्दे॒वाना॒मुद॑गा॒दनी॑कं॒चक्क्षु॑र्म्मि॒त्रस्य॒वरु॑णस्या॒ग्नेः ॥ आप्प्रा॒द्यावा॑पृथि॒वीऽअ॒न्तरि॑क्क्ष॒ꣳसूर्य्य॑ऽआ॒त्त्माजग॑तस्त॒स्थुष॑श्च ॥ ७ ॥ आन॒ऽइडा॑भिर्व्वि॒दथे॑सुश॒स्स्तिवि॒श्श्वान॑रः सवि॒तादे॒वऽए॑तु ॥ अपि॒यथा॑सुवानो॒मत्स॑थानो॒विश्श्व॒ञ्जग॑दभिपि॒त्त्वेम॑नी॒षा ॥ ८ ॥ यद॒द्यकच्च॑वृत्रहन्नु॒दगा॑ऽअ॒भिसू॑र्य्य ॥ सर्व्व॒न्तदि॑न्द्रतेवशे॑ ॥ ९ ॥ त॒रणि॑र्व्वि॒श्श्वद॑र्शतोज्ज्योति॒ष्कृद॑सि सूर्य्य ॥ विश्श्व॒माभा॑सिरोच॒नम् ॥ १० ॥ तत्सूर्य्य॑स्यदेव॒त्वन्तन्म॑हि॒त्त्वम्म॒द्ध्याकर्त्तो॒र्व्वित॑त॒ꣳसञ्ज॑भार ॥ य॒देदयु॑क्त ह॒रितः॑स॒धस्त्था॒दाद्रात्री॒वास॑स्तनुतेसि॒मस्मै॑ ॥ ११ ॥

तन्मित्रस्यवरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्द्योरुपस्थे ॥
अनन्तमन्न्यद्रुशदस्यपाजः कृष्णमन्न्यद्धरितःसम्भरन्ति १२
बण्णमहाँ२ऽअसिसूर्य्यबडादित्त्यमहाँ२ऽअसि ॥ महस्तेस
तोमहिमापनस्यतेद्धादेवमहाँ२ऽअसि ॥ १३ ॥ बट्सूर्य्य
श्श्रवसामहाँ२ऽअसिसत्त्रादेवमहाँ२ऽअसि ॥ मह्नादेवाना
मसुर्य्यः पुरोहितोविभुज्ज्योतिरदाभ्यम् ॥ १४ ॥ श्राय
न्तऽइवसूर्य्यंविश्वेदिन्द्रस्यभक्षत ॥ वसूनिजातेजनमानऽ
ओजसाप्प्रतिभागन्नदीधिम ॥ १५ ॥ अद्यादेवाऽउदिता
सूर्य्यस्यनिरꣳहसःपिपृतानिरवद्यात् ॥ तन्नोमित्रोवरुणो
मामहन्तामदितिःसिन्धुः पृथिवीऽउतद्यौः ॥ १६ ॥
आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च ॥ हिर
ण्ययेनसवितारथेनादेवोयातिभुवनानिपश्श्यन् ॥ १७ ॥

॥ इति मैत्रसूक्तं समाप्तम् ॥ चतुर्थोऽध्यायः समाप्तः ॥

॥ अथ रुद्राष्टाध्याय्यां पञ्चमोऽध्यायः ॥ अथ शतरुद्रियम् ॥

हरिः ॐ ॥ नमस्तेरुद्रमन्न्यवऽउतोतऽइषवेनमः ॥
बाहुब्भ्यामुततेनमः ॥ १ ॥ याते रुद्रशिवातनूरघोरापा
पकाशिनी ॥ तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाक
शीहि ॥ २ ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्ष्यस्तवे ॥
शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीःपुरुषञ्जगत् ॥ ३ ॥ शिवेन
वचसात्त्वागिरिशाच्छावदामसि ॥ यथानःसर्व्वमिज्जगदय
क्ष्मꣳसुमनाऽअसत् ॥ ४ ॥ अद्ध्यवोचदधिवक्ताप्प्रथ

मोदैव्योभिषक् ॥ अहीँश्चसर्वाञ्जम्भयन्त्सर्वाँश्चयातुधान्योधराचीःपरासुव ॥ ५ ॥ असौयस्ताम्म्रोऽअरुणऽउतबभ्रुःसुमङ्गलः ॥ येचैनꣳरुद्राऽअभितोदिक्क्षुश्श्रिताःसहस्रशोवैषाꣳहेडऽईमहे ॥ ६ ॥ असौयोवसर्प्पतिनीलग्ग्रीवोविलोहितः ॥ उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यःसदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तुनीलग्ग्रीवायसहस्राक्क्षायमीढुषे ॥ अथोयेऽअस्यसत्त्वानोहन्तेभ्योकरन्नमः ॥ ८ ॥ प्रमुञ्चधन्न्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ॥ याश्चतेहस्तऽइषवःपराताभगवोवप ॥ ९ ॥ विज्ज्यन्धनुःकपर्दिनोविशल्ल्योबाणवाँ२उत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ ७ ॥ याते। हेतिम्मीढुष्टमहस्तेबभूवतेधनुः ॥ तयास्म्मान्विश्श्वतस्त्वमयक्क्ष्मयापरिभुज ॥ ११ ॥ परितेधन्न्वनोहेतिरस्म्मान्वृणक्कुविश्श्वतः ॥ अथोयऽइषुधिस्तवारेऽअस्म्मन्निधेहितम् ॥ १२ ॥ अवतत्त्यधनुष्ट्वꣳसहस्राक्क्षशतेषुधे ॥ निशीर्य्यशल्ल्यानाम्मुखाशिवोनःसुमनाभव ।१३। नमस्तऽआयुधायानाततायधृष्ण्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यान्तवधन्न्वने ॥ १४ ॥ मानोमहान्तमुतमानोऽअर्भकम्मानऽउक्क्षन्तमुतमानऽउक्क्षितम् ॥ मानोवधीःपितरम्मोतमातरम्मानःप्प्रियास्तन्न्वोरुद्ररीरिषः ॥ १५ ॥ मानस्तोके। तनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्म्मन्तःसदमि

त्त्वाहवामहे ॥ १६ ॥ नमोहिरण्यबाहवे। सेनान्येदिशा
ञ्चपतयेनमोनमोव्वृक्षेभ्योहरिकेशेभ्यःपशूनाम्पतयेनमो
नमःशुष्पिञ्जरायत्त्विषीमतेपथीनाम्पतयेनमोनमोहरिके
शायोपवीतिनेपुष्टानाम्पतयेनमोनमोबभ्लुशाय ॥ १७ ॥
नमोबभ्लुशाय। व्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्त्यै
जगताम्पतयेनमोनमोरुद्रायाततायिनेक्षेत्राणाम्पतयेनमो
नमःसूतायाहन्त्यैवनानाम्पतयेनमोनमोरोहिताय ॥१८॥
नमोरोहिताय। स्थपतयेव्वृक्षाणाम्पतयेनमोनमोभुवन्तये
व्वारिवस्कृतायौषधीनाम्पतयेनमोनमोमन्त्रिणेव्वाणिजायक
क्षाणाम्पतयेनमोनमऽउच्चैर्घोषायाक्रन्दयतेपत्तीनाम्पत
येनमोनमःकृत्स्नायतया ॥ १९ ॥ नमःकृत्स्नायतया ॥
धावतेसत्त्वनाम्पतयेनमोनमःसहमानायनिव्याधिनऽआ
व्याधिनीनाम्पतयेनमोनमोनिषङ्गिणेककुभायस्तेनानाम्प
तयेनमोनमोनिचेरवेपरिचरायारण्यानाम्पतयेनमोनमो
व्वञ्चते ॥ २० ॥ नमोव्वञ्चते । परिवञ्चतेस्तायूनाम्पतये
नमोनमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्पतयेनमोनमः
सृकायिभ्योजिघांसद्भ्योमुष्णताम्पतयेनमोनमोसि
मद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः ॥ २१ ॥
नमऽउष्णीषिणे ॥ गिरिचरायकुलुञ्चानाम्पतयेनमोनमऽ
इषुमद्भ्योधन्वायिभ्यश्चवोनमोनमऽआतन्वानेभ्यःप्र
तिदधानेभ्यश्चवोनमोनमऽआयच्छद्भ्योस्यद्भ्यश्चवोनमो

नमोविसृजद्भ्यः ॥ २२ ॥ नमोविसृजद्भ्यो । विध्य
द्भ्यश्चवोनमोनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमःशया
नेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवो
नमोनमःसभाभ्यः ॥२३॥ नमःसभाभ्यः । सभापति
भ्यश्चवोनमोनमोश्वेभ्योश्वपतिभ्यश्चवोनमोनमऽआ
व्याधिनीभ्योविविध्यन्तीभ्यश्चवोनमोनमऽउगणाभ्य
स्तृꣳहतीभ्यश्चवोनमोनमोगणेभ्यः ॥ २४ ॥ नमोगणे
भ्यो । गणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्य
श्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरू
पेभ्योविश्वरूपेभ्यश्चवोनमोनमःसेनाभ्यः ॥ २५ ॥
नमःसेनाभ्यः । सेनानिभ्यश्चवोनमोनमोरथिभ्योऽअर
थेभ्यश्चवोनमोनमःक्षत्तृभ्यःसङ्ग्रहीतृभ्यश्चवोनमो
नमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ॥ २६ ॥ नमस्तक्ष
भ्यो । रथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्म्मारेभ्य
श्चवोनमोनमोनिषादेभ्यःपुञ्जिष्ठेभ्यश्चवोनमोनमःश्वनि
भ्योमृगयुभ्यश्चवोनमोनमःश्वभ्यः ॥ २७ ॥ नमः
श्वभ्यः । श्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमः
शर्वायचपशुपतयेचनमोनीलग्ग्रीवायचशितिकण्ठायच
मनःकपर्द्दिने ॥ २८ ॥ नमःकपर्द्दिने । चव्युप्तकेशायच
नमःसहस्राक्षायचशतधन्वनेचनमोगिरिशयायचशिपि
विष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥२९॥ नमो

ह्र॒स्वाय॑ । चवाम॒नाय॑च॒नमो॑बृह॒तेच॒वर्षी॑यसेच॒नमो॑वृ॒द्धाय॑च
स॒वृधे॑च॒नमोऽग्र्या॑यचप्प्रथ॒माय॑च॒नम॑ऽआ॒शवे॑ ॥ ३० ॥ नम॑ऽ
आ॒शवे॑ । चाजि॒राय॑च॒नम॒ःशीघ्र्या॑यच॒शीभ्या॑यच॒नम॒ऽऊ
र्म्या॑यचावस्व॒न्न्या॑यच॒नमो॑नादे॒याय॑च॒द्वीप्प्या॑यच ॥ ३१ ॥
नमो॑ज्ज्ये॒ष्ठाय॑ । चकनि॒ष्ठाय॑च॒नम॑ःपूर्व॒जाय॑चापर॒जाय॑च॒नमो॑
मद्ध्य॒माय॑चापग॒ल्भाय॑च॒नमो॑जघ॒न्न्या॑यच॒बुध्न्या॑यच॒नम॒ःसो
भ्या॑य ॥३२॥ नम॒ःसोभ्या॑य । चप्प्रतिस॒र्या॑यच॒नमो॒या
म्म्याय॑चक्षेम्म्या॑यच॒नम॒ःश्लोक्क्या॑यचावसा॒न्न्या॑यच॒नम॑
ऽउर्व॒र्या॑यच॒खल्ल्या॑यच॒नमो॒वन्न्या॑य ॥३३॥ नमो॒वन्न्या॑य ।
च॒कक्ष्या॑यच॒नम॑ःश्श्र॒वाय॑चप्प्रतिश्श्र॒वाय॑च॒नम॑ऽआ॒शुषे॑णा
यचा॒शुर॑थायच॒नम॒ःशूरा॑यचावभे॒दिने॑च॒नमो॑बि॒ल्म्मिने॑ ।३४।
नमो॑बि॒ल्म्मिने॑ । चकव॒चिने॑च॒नमो॑व॒र्म्मिणे॑चवरू॒थिने॑च॒न
म॑ःश्श्रु॒ताय॑चश्श्रुतसे॒नाय॑च॒नमो॑दुन्दु॒भ्या॑यचाहन॒न्न्या॑यच॒
नमो॑धृ॒ष्णवे॑ ॥ ३५ ॥ नमो॑धृ॒ष्णवे॑ । चप्प्रमृ॒शाय॑च॒नमो॑नि
ष॒ङ्गिणे॑चेषुधि॒मते॑च॒नम॑स्ती॒क्ष्णेष॑वेचायुधि॒ने॑च॒नम॑ःस्वायु
धाय॑चसु॒धन्व॑नेच ॥ ३६ ॥ नम॒ःस्रुत्त्या॑य । च॒पथ्थ्या॑यच॒
नम॒ःकाट्ट्या॑यच॒नीप्प्या॑यच॒नम॒ःकुल्ल्या॑यचसर॒स्या॑यच॒नमो॑
नादे॒याय॑चवैश॒न्ताय॑च॒नम॒ःकूप्प्या॑य ॥ ३७ ॥ नम॒ःकूप्प्या
य । चाव॒ट्ट्या॑यच॒नमो॒वीध्र्या॑यचात॒प्प्या॑यच॒नमो॒मेघ्या॑यच
वि॒द्द्युत्त्या॑यच॒नमो॒वर्ष्या॑यचाव॒र्ष्याय॑च॒नमो॒वात्त्या॑य।३८।
नमो॒वात्त्या॑य । च॒रेष्म्म्या॑यच॒नमो॑वास्त॒व्व्या॑यचवास्तु॒पाय॑

चनमः सोमायचरुद्रायचनमस्ताम्रायचारुणायचनमःशङ्गवे ॥ ३९ ॥ नमःशङ्गवे । चपशुपतयेचनमऽउग्ग्रायचभीमायचनमोग्ग्रेवधायचदूरेवधायचनमोहन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्ताराय ॥ ४० ॥ नमःशम्भवाय । चमयोभवायचनमःशङ्करायचमयस्करायचनमःशिवायचशिवतरायच ॥ ४१ ॥ नमःपार्य्याय । चावार्य्यायचनमःप्रतरणायचोत्तरणायचनमस्तीर्त्थ्यायचकूल्ल्यायचनमःशष्प्प्यायचफेन्न्यायचनमःसिकत्त्याय ॥ ४२ ॥ नमःसिकत्त्याय । चप्प्रवाह्यायचनमःकिꣳशिलायचक्षयणायचनमःकपर्द्दिनेचपुलस्तयेचनमऽइरिण्ण्यायचप्प्रपत्थ्यायचनमोव्व्रज्ज्याय ॥ ४३ ॥ नमोव्व्रज्ज्याय । चगोष्ठ्यायचनमस्तल्प्प्यायचगेह्यायचनमोहृदय्यायचनिवेष्प्प्यायचनमःकाट्ट्यायचगह्वरेष्ठायचनमःशुष्क्क्याय ॥ ४४ ॥ नमःशुष्क्क्याय । चहरित्त्यायचनमःपाꣳसव्व्यायचरजस्यायचनमोलोप्प्यायचोलप्प्यायचनमऽऊर्व्व्यायचसूर्व्व्यायचनमःपर्ण्णाय ॥ ४५ ॥ नमःपर्ण्णाय । चपर्ण्णशदायचनमऽउद्गुरमाणायचाभिघ्नतेचनमऽआखिदतेचप्प्रखिदतेचनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाꣳहृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः ॥ ४६ ॥ ॥ ॥ ॥

द्द्रापेऽअन्धसस्प्पतेदरिद्रनीललोहित ॥ आसाम्प्रजानामे

षाम्पशूनाम्माभेर्म्मारोङ्मोचनःकिञ्चनाममत् ॥४७॥ इमा
रुद्राय । तवसेकपर्द्दिनेक्क्षयद्वीरायप्प्रभरामतीः ॥ यथाशम
सद्द्विपदेचतुष्प्पदेविश्श्वम्पुष्टङ्ग्रामेऽअस्म्मिन्ननातुरम् ॥४८॥
याते । रुद्रशिवातनूःशिवाविश्श्वाहाभेषजी ॥ शिवारुतस्य
भेषजीतयानोमृडजीवसे ॥ ४९ ॥ परिनोरुद्रस्यहेतिर्वृण
क्त्तुपरित्त्वेषस्यदुर्म्मतिरघायोः ॥ अवस्स्थिरामघवद्भ्य
स्त्तनुष्ष्वमीढ्ढ्वस्त्तोकायतनयायमृड ॥ ५० ॥ मीढुष्टमशिव
तमशिवोनःसुमनाभव ॥ परमेवृक्क्षऽआयुधन्निधायकृत्तिं
वसानऽआचरपिनाकम्बिभ्रदागहि ॥ ५१ ॥ विकिरिद्र
विलोहितनमस्त्तेऽअस्तुभगवः ॥ यास्त्तेसहस्रꣳहेतयोन्य
मस्म्मन्निवपन्तुताः ॥ ५२ ॥ सहस्राणिसहस्रशोबाह्वो
स्त्तवहेतयः ॥ तासामीशानोभगवःपराचीनामुखाकृधि ॥
॥ ५३ ॥ असङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्म्याम् ॥
तेषाꣳसहस्रयोजनेवधन्न्वानितन्मसि ॥ ५४ ॥ अस्म्मिन्म
हत्त्यर्णवेन्तरिक्क्षेभवाऽअधि ॥ तेषाꣳसहस्रयोजनेवधन्न्वा
नितन्मसि ॥ ५५ ॥ नीलग्ग्रीवाःशितिकण्ठादिवꣳरुद्राऽ
उपश्श्रिताः ॥ तेषाꣳसहस्रयोजनेवधन्न्वानितन्मसि ॥५६॥
नीलग्ग्रीवाःशितिकण्ठाःशर्व्वाऽअधःक्क्षमाचराः ॥ तेषाꣳ
सहस्रयोजनेवधन्न्वानितन्मसि ॥ ५७ ॥ येवृक्क्षेषु ।
शष्प्पिञ्जरानीलग्ग्रीवाविलोहिताः ॥ तेषाꣳसहस्रयोजने
वधन्न्वानितन्मसि ॥ ५८ ॥ येभूतानामधिपतयोविशिखा

सःकपर्द्दिनः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ॥ ५९ ॥ येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्युधः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ६० ॥ येतीर्त्थानि । प्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ६१ ॥ येन्नेषु । विविद्ध्यन्ति पात्रेषुपिबतोजनान् ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ६२ ॥ यऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्द्रावितस्थिरे ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ६३ ॥ नमोस्तु । रुद्द्रेभ्योयेदिवियेषांवर्षमिषवः ॥ तेभ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥ ६४ ॥ नमोस्तु । रुद्द्रेभ्योयेन्तरिक्षेयेषांवातऽइषवः ॥ तेभ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥ ६५ ॥ नमोस्तु । रुद्द्रेभ्योयेपृथिव्याँय्येषामन्नमिषवः ॥ तेभ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषाअम्भेदद्ध्मः ॥ ६६ ॥

॥ इति शतरुद्रियं समाप्तम् ॥ पञ्चमोऽध्यायः समाप्तः ॥

॥ अथ रुद्राष्टाध्याय्यां षष्ठोऽध्यायः ॥ अथ महच्छिरः ॥

हरिः ॐ ॥ वयꣳसोमव्व्रतेतवमनस्तनूषुबिभ्रतꣳ ॥ प्रजावन्तꣳसचेमहि ॥ १ ॥ एषते । रुद्रभागःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ २ ॥ अवरुद्रमदीमह्य्यवदेवन्त्र्यम्बकम् । यथानोवस्यसस्करद्यथानꣳश्रेयसस्करद्यथानोव्व्यवसाययात् ॥ ३ ॥ भेषजमसि । भेषजङ्गवेश्श्वायपुरुषायभेषजम् ॥ सुखम्मेषायमेष्यै ॥ ४ ॥ त्र्यम्बकँय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्त्योर्म्मुक्षीयमामृतात् ॥ त्र्यम्बकँय्यजामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥ ५ ॥ एतत्ते । रुद्रावसन्तेनपरोमूजवतोतीहि ॥ अवततधन्वापिनाकावसꣳकृत्तिवासाऽअहिꣳसन्नꣳशिवोतीहि ॥ ६ ॥ त्र्यायुषञ्जमदग्नेꣳकश्श्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ ७ ॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीꣳ ॥ निवर्त्तयाम्म्यायुषेन्नाद्यायप्प्रजननायरायस्प्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ॥ ८ ॥ [ॐनतंविदाथयऽइमाजजानान्यद्युष्म्माकमन्तरम्बभूव ॥ नीहारेणप्प्रावृताजल्प्प्याचासुतृपऽउक्क्थशासश्चरन्ति ॥ ३१/१७ ॥ व्विश्श्वकर्म्माह्यजनिष्टदेवऽआदिद्गन्धर्व्वोऽअभवद्द्वितीयः ॥ तृतीयःपिताजनितौषधीनामपाङ्गर्भंव्यदधात्पुरुत्रा ॥ ३२/१० ॥]

॥ इति महच्छिरः समाप्तम् । षष्ठोऽध्यायः समाप्तः ॥

॥ अथ रुद्राष्टाध्याय्यां सप्तमोऽध्यायः । अथ रुद्रजटा ॥

हरिः ॐ ॥ उग्रश्च । भीमश्चध्वान्तश्चधुनिश्च ॥ सासह्वाँश्चाभियुग्वाचविक्षिपःस्वाहा ॥ १ ॥ अग्निꣳहृदयेनाशनिꣳहृदयाग्ग्रेणपशुपतिङ्कृत्स्नहृदयेनभवँयक्क्ना ॥ शर्वम्मतस्नाभ्यामीशानम्मन्युनामहादेवमन्तःपर्शव्येनोग्ग्रन्देवंव्वनिष्ठुनाव्वसिष्ठहनुःशिङ्गीनिकोश्याभ्याम् ॥ २ ॥ उग्रँल्लोहितेन । मित्रꣳसौव्व्रत्त्येन रुद्रन्दौर्व्व्रत्त्येनेन्द्रम्प्रक्क्रीडेनमरुतोबलेन साद्ध्यान्प्रमुदा ॥ भवस्य कण्ठ्यꣳरुद्रस्यान्तःपार्श्व्यम्महादेवस्य यकृच्छर्वस्यवनिष्ठुःपशुपतेःपुरीतत् ॥ ३ ॥ लोमभ्यःस्वाहा । लोमभ्यःस्वाहा त्त्वचेस्वाहा त्त्वचेस्वाहा लोहितायस्वाहा लोहितायस्वाहा मेदोभ्यःस्वाहा मेदोभ्यःस्वाहा ॥ माꣳसेभ्यःस्वाहा माꣳसेभ्यःस्वाहा स्नावभ्यःस्वाहा स्नावभ्यःस्वाहा स्त्थभ्यःस्वाहा स्त्थभ्यःस्वाहा मज्जभ्यःस्वाहा मज्जभ्यःस्वाहा ॥ रेतसेस्वाहा पायवेस्वाहा ॥ ४ ॥ आयासायस्वाहा । प्प्रायासायस्वाहा सँय्यासायस्वाहा वियासायस्वाहोद्यासायस्वाहा ॥ शुचेस्वाहा शोचतेस्वाहा शोचमानायस्वाहा शोकायस्वाहा ॥ ५ ॥ तपसेस्वाहा । तप्प्यतेस्वाहा तप्प्यमानायस्वाहा तप्तायस्वाहा घर्म्मायस्वाहा ॥ निष्कृत्त्यैस्वाहा प्प्रायश्चित्त्यैस्वाहा भेषजायस्वाहा ॥ ६ ॥ यमायस्वाहान्तकायस्वाहा मृत्त्यवेस्वाहा ॥ ब्रह्मणस्वाहा

ब्रह्महत्त्यायैस्वाहा विश्वेभ्योदेवेभ्यःस्वाहा द्यावापृथिवीभ्याᳫंस्वाहा ॥ ७ ॥

॥ इति रुद्राजटा समाप्ता ॥ सप्तमोऽध्यायः समाप्तः ॥

॥ अथ रुद्राष्टाध्याय्याम् अष्टमोऽध्यायः ॥ अथ चमकानुवाकाः[1] ॥

हरिः ॐ वाजश्च । मेप्प्रसवश्चमेप्प्रयतिश्चमेप्प्रसितिश्चमेधीतिश्चमेक्क्रतुश्चमेस्वरश्चमेश्लोकश्चमेश्श्रवश्चमेश्श्रुतिश्चमेज्योतिश्चमेस्वश्चमेयज्ञेनकल्पन्ताम् ॥ १ ॥ प्राणश्च । मेपानश्चमेव्यानश्चमेसुश्चमेचित्तञ्चमऽआधीतञ्चमेव्वाक्क्चमेमनश्चमेचक्षुश्चमेश्श्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनकल्पन्ताम् ॥२॥ ओजश्च । मेसहश्चमऽआत्त्माचमेतनूश्चमेशर्म्मचमेवर्म्मचमेङ्गानिचमेस्त्थीनिचमेपरूᳫंषिचमेशरीराणिचमऽआयुश्चमेजराचमेयज्ञेनकल्पन्ताम् ॥ ३ ॥ ज्यैष्ठ्यञ्च । मऽआधिपत्त्यञ्चमेमन्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमाचमेहिमाचमेवरिमाचमेप्प्रथिमाचमेवर्षिमाचमेद्राघिमाचमेवृद्धञ्चमेवृद्धिश्चमेयज्ञेनकल्पन्ताम् ॥४॥ [चमकविभागः ॥ १ ॥ अनुवाकः ॥ १ ॥] सत्त्यञ्च । मेश्श्रद्धाचमेजगच्चमेधनञ्चमेविश्वञ्चमेमहश्चमेक्क्रीडाचमेमोदश्चमेजातञ्चमेजनिष्ष्यमाणञ्चमेसूक्तञ्चमे सुकृतञ्चमे यज्ञेनकल्पन्ताम् ॥ ५ ॥ ऋतञ्च । मेमृतञ्चमे यक्ष्मञ्चमे नामयच्चमे जीवा

---

१ [1]वाजः[2]सत्य[3]मूर्क्चतुष्का [4]अश्माग्निस्त्रिकाव[5][6]ᳫंशुः पञ्चैका चतस्रो वाजाय द्वे इत्यष्टावनुवाकाः ॥ (अनुवाकसूत्रम्)

तुञ्चमे दीर्ग्घायुत्त्वञ्चमे नमित्रञ्चमे भयञ्चमे सुखञ्चमे शयनञ्चमेसूषाञ्चमे सुदिनञ्च मे यज्ज्ञेनकल्प्पन्ताम् ॥ ६ ॥ यन्ताच । मेधर्त्ताचमेक्षेमञ्चमेधृतिश्चमेविश्श्वञ्चमेमहश्च मेसंविच्चमेज्ञात्रञ्चमेसूश्चमेप्प्रसूश्चमेसीरञ्चमेलयश्चमेयज्ज्ञेनकल्प्पन्ताम् ॥ ७ ॥ शञ्चमे मयश्चमे प्प्रियञ्चमे नुकामश्चमे कामश्चमे सौमनसश्चमे भगश्चमे द्रविणञ्चमे भद्रञ्चमे श्रेयश्चमे वसीयश्चमे यशश्चमे यज्ज्ञेनकल्प्पन्ताम् ॥ ८ ॥ ऊर्क्च । मेसूनृताचमे पयश्चमे रसश्चमे घृतञ्चमे मधुचमे सग्ग्धिश्चमे सपीतिश्चमे कृषिश्चमे वृष्टिश्चमे जैत्रञ्चमऽऔद्भिद्यञ्चमे यज्ज्ञेनकल्प्पन्ताम् ॥ ९ ॥ रयिश्च । मेरायश्चमे पुष्टञ्चमे पुष्टिश्चमे विभुचमे प्प्रभुचमे पूर्ण्णञ्चमे पूर्ण्णतरञ्चमे कुयवञ्चमे क्षितञ्चमे न्नञ्चमेक्षुच्चमेयज्ज्ञेनकल्प्पन्ताम् ॥ १० ॥ वित्तञ्च । मेवेद्यञ्चमेभूतञ्चमे भविष्यच्चमे सुगञ्चमे पत्थ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमे मतिश्चमे सुमतिश्चमे यज्ज्ञेनकल्प्पन्ताम् ॥ ११ ॥ व्रीहयश्च । मेयवाश्चमे माषाश्चमे तिलाश्चमे मुद्गाश्चमे खल्वाश्चमे प्प्रियङ्गवश्चमेणवश्चमे श्श्यामाकाश्चमे नीवाराश्चमेगोधूमाश्चमे मसूराश्चमेयज्ज्ञेनकल्प्पन्ताम् ॥१२॥ [चमकविभागः॥३॥ अनुवाकः ॥ ३ ॥] अश्म्माच । मेमृत्तिकाचमे गिरयश्चमे पर्व्वताश्चमेसिकताश्चमेवनस्प्पतयश्चमे हिरण्ण्यञ्चमे यश्चमे श्श्यामञ्चमे लोहञ्चमे सीसञ्चमे त्रपुचमे यज्ज्ञेनकल्प्पन्ताम्

॥ १३ ॥ अग्निश्च । मऽआपश्चमेवीरुधश्चमऽओषधयश्चमे
कृष्टपच्याश्चमेकृष्टपच्याश्चमेग्राम्म्याश्चमेपशवऽआरण्या-
श्चमेवित्तञ्चमेवित्तिश्चमेभूतञ्चमेभूतिश्चयज्ञेनकल्प्पन्ताम्
॥१४॥ वसुच । मेवसतिश्चमेकर्म्मचमेशक्तिश्चमेर्थश्चमऽ
एमश्चमऽइत्याचमे गतिश्चमे यज्ञेनकल्प्पान्तम् ॥ १५ ॥
[चमकवि.,४अनु.४] अग्निश्च । मऽइन्द्रश्चमेसोमश्चमऽइन्द्र
श्चमेसविताचमऽइन्द्रश्चमे सरस्वतीचमऽइन्द्रश्चमेपूषाचमऽ
इन्द्रश्चमेबृहस्प्पतिश्चमऽइन्द्रश्चमेयज्ञेनकल्प्पन्ताम् ॥१६॥
मित्रश्च । मऽइन्द्रश्चमेवरुणश्चमऽइन्द्रश्चमेधाताचमऽइन्द्र
श्चमेत्त्वष्टाचमऽइन्द्रश्चमेमरुतश्चमऽइन्द्रश्चमेविश्वेचमेदेवाऽ
इन्द्रश्चमेयज्ञेनकल्प्पन्ताम् ॥ १७ ॥ पृथिवीच । मऽइन्द्र
श्चमेन्तरिक्षश्चमऽइन्द्रश्चमे द्यौश्चमऽइन्द्रश्चमे समाश्चमऽ
इन्द्रश्चमे नक्षत्त्राणिचमऽइन्द्रश्चमे दिशश्चमऽइन्द्रश्चमे यज्ञे
नकल्प्पन्ताम्॥१८॥ [चमकविभागः॥५॥ अनुवाकः॥५॥]
अꣳशुश्च । मेरश्मिश्चमे दाभ्यश्चमे धिपतिश्चमऽउपाꣳ
शुश्चमेन्तर्य्यामश्चमऽऐन्द्रवायवश्चमे मैत्रावरुणश्चमऽआश्वि
नश्चमे प्प्रतिप्प्रस्थानश्चमे शुक्रश्चमे मन्थीचमे यज्ञेन
कल्प्पन्ताम् ॥१९॥ आग्रयणश्च । मेवैश्वदेवश्चमे ध्रुवश्चमे
वैश्वानरश्चमऽऐन्द्राग्नश्चमे महावैश्वदेवश्चमे मरुत्त्वतीया
श्चमे निष्केवल्ल्यश्चमे सावित्रश्चमे सारस्वतश्चमे पात्नीवत
श्चमे हारियोजनश्चमे यज्ञेनकल्प्पन्ताम् ॥ २० ॥ स्रुचश्च ।

मेचमसाश्चमे व्वायव्यानिचमे द्रोणकलशश्चमे ग्ग्रावाणश्चमे धिषवणेचमे पूतभृच्चमऽआधवनीयश्चमे व्वेदिश्चमे बर्हिश्चमे वभृथश्चमे स्वगाकारश्चमे यज्ज्ञेनकल्पन्ताम् ॥ २१ ॥ [चमकविभागः ॥ ६ ॥] अग्निश्च । मेघर्म्मश्चमेर्कश्चमेसूर्य्यश्चमेप्प्राणश्चमेश्वमेधश्चमेपृथिवीचादितिश्चमेदितिश्चमेद्यौश्च मेङ्गुलयःशक्वरयोदिशश्चमे यज्ज्ञेनल्पन्ताम् ॥ २२ ॥ व्व्रतश्च । मऽऋतवश्चमे तपश्चमे संवत्त्सरश्चमेहोरात्रेऽऊर्वष्ठीवेबृहद्रथन्तरेचमे यज्ज्ञेनकल्पन्ताम् ॥ २३ ॥ [चमकविभागः ॥ ७ ॥ अनुवाकः ॥ ६ ॥] एकाच । मेतिस्रश्चमे तिस्रश्चमे पञ्चचमे पञ्चचमे सप्प्तचमे सप्प्तचमे नवचमे नवचमऽएकादशचमऽएकादशचमे त्रयोदशचमे त्रयोदशचमे पञ्चदशचमे पञ्चदशचमे सप्प्तदशचमे सप्तदशचमे नवदशच मे नवदशच मऽएकविꣳशतिश्चमऽएकविꣳशतिश्चमे त्रयोविꣳशतिश्चमे त्रयोविꣳशतिश्चमे पञ्चविꣳशतिश्चमे पञ्चविꣳशतिश्चमे सप्प्तविꣳशतिश्चमे सप्प्तविꣳशतिश्चमे नवविꣳशविश्चमेनवविꣳशतिश्चमऽएकत्रिꣳशश्चमऽएकत्रिꣳशच्चमे त्रयस्त्रिꣳशच्चमेयज्ज्ञेनल्पन्ताम् ॥२४॥ [चमकविभागः८] चतस्रश्च । मेष्टौचमे ष्टौचमे द्वादशचमे द्वादशचमे षोडशचमे षोडशचमे विꣳशतिश्चमे विꣳशतिश्चमे चतुर्विꣳशतिश्च मेचतुर्विꣳशतिश्चमेष्टाविꣳशतिश्च मेष्टाविꣳशतिश्चमे द्वात्रिꣳशच्चमे द्वात्रिꣳशच्चमे षट्त्रिꣳशच्चमे षट्त्रिꣳशच्चमे

चत्त्वारिꣳशच्च मे चत्त्वारिꣳशच्च मे चतुश्चत्त्वारिꣳशच्च मे चतुश्चत्त्वारिꣳशच्च मे ष्ट्टाचत्त्वारिꣳशच्च मे यज्ज्ञेनकल्पन्ताम् ॥२५॥ [चमकविभागः ॥ ९ ॥] त्र्यविश्च । मेत्र्यवीचमे दित्त्यवाट्चमेदित्त्यौहीचमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्त्सश्चमेत्रिवत्त्साचमेतुर्य्यवाट्चमेतुर्य्यौहीचमेयज्ज्ञेनकल्पन्ताम् ॥२६॥ पष्ठवाट्च । मेपष्ठौहीचमऽउक्षाचमेवशाचमऽऋषभश्चमेवेहच्चमेनड्वाँश्चमेधेनुश्चमेयज्ज्ञेनकल्पन्ताम् ॥२७॥ [चमकविभागः ॥१०॥ अनुवाकः ॥७॥] वाजाय स्वाहा । प्प्रसवायस्वाहा पिजायस्वाहा क्क्रतवेस्वाहा वसवे स्वाहाहर्प्पतयेस्वाहाह्ने मुग्ग्धाय स्वाहा मुग्ग्धायवैनꣳशिनायस्वाहा विनꣳशिनऽआन्त्यायनायस्वाहान्त्याय भौवनाय स्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्प्रजापतयेस्वाहा ॥ इयन्तेराण्णिमत्त्रायय्यन्तासियमनऽऊर्ज्जेत्त्वावृष्ट्यैत्त्वाप्प्रजानान्त्वाधिपत्त्याय ॥२८॥ आयुर्य्यज्ज्ञेन । कल्पताम्प्प्राणोयज्ज्ञेनकल्पताञ्चक्षुर्य्यज्ज्ञेनकल्पताꣳश्रोत्त्रँय्यज्ज्ञेनकल्पतांवाग्ग्यज्ज्ञेनकल्पताम्मनोयज्ज्ञेनकल्पतामात्त्मायज्ज्ञेनकल्पताम्ब्रह्मायज्ज्ञेनकल्पताञ्ज्योतिर्य्यज्ज्ञेनकल्पताꣳस्वर्य्यज्ज्ञेनकल्पताम्पृष्ठँय्यज्ज्ञेनकल्पताँय्यज्ज्ञोयज्ज्ञेनकल्पताम्॥स्तोमश्चयजुश्चऽऋक्चसामचबृहच्चरथन्तरञ्च। स्वर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेःप्प्रजाऽअभूमवेट् स्वाहा ॥ २९ ॥ [चमकविभागः ॥११॥ अनुवाकः ॥८॥]

॥ इति चमकानुवाकाः समाप्ताः ॥ अष्टमोऽध्यायः समाप्तः ॥

॥ अथ रुद्राष्टाध्याय्यां शान्त्यध्यायः ॥

हरि ॐ ऋचंव्वाचम्प्रपद्येमनोयजुःप्प्रपद्येसामप्प्राणम्प्रपद्येचक्क्षुःश्श्रोत्रंप्रपद्ये॥ वागोजःसहौजोमयिप्प्राणापानौ ॥ १ ॥ यन्मेछिद्रञ्चक्क्षुषोहृदयस्यमनसोव्वातितृण्णम्बृहस्प्पतिर्म्मेतद्दधातु ॥ शन्नोभवतुभुवनस्ययस्प्पतिः ॥ ॥ २ ॥ भूर्भुवःस्वः । तत्त्सवितुर्व्वरेण्ण्यम्भर्ग्गो देवस्य धीमहि ॥ धियोयोनःप्प्रचोदयात् ॥ ३ ॥ कयानश्चित्रऽआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ ४ ॥ कस्त्त्वा । सत्त्योमदानाम्मꣳहिष्ठोमत्त्सदन्धसः॥दृढाचिदारुजेव्वसु ॥ ५ ॥ अभीषुणः । सखीनामविताजरितॄणाम् ॥ शतम्भवास्यूतिभिः ॥ ६ ॥ कयात्त्वन्नऽऊत्त्याभिप्प्रमन्दसेव्वृषन् ॥ कयास्त्तोतृब्भ्यऽआभर ॥ ७ ॥ इन्द्रोव्विश्श्वस्यराजति ॥ शन्नोऽअस्तुद्द्विपदेशञ्चतुष्प्पदे ॥ ८ ॥ शन्नोमित्रःशंव्वरुणःशन्नोभवत्त्वर्य्यमा ॥ शन्नऽइन्द्रोबृहस्प्पतिःशन्नोव्विष्ण्णुरुरुक्क्रमः ॥ ९ ॥ शन्नोव्वातः । पवताꣳशन्नस्त्तपतुसूर्य्यः ॥ शन्नःकनिक्क्रदद्देवःपर्ज्जन्न्योऽअभिवर्षतु ॥ १० ॥ अहानिशम्भवन्तुनःशꣳरात्रीःप्प्रतिधीयताम् ॥ शन्नऽइन्द्राग्ग्नीभवतामवोभिःशन्नऽइन्द्रावरुणारातहव्या ॥ शन्नऽइन्द्रापूषणाव्वाजसातौशमिन्द्रासोमासुवितायशँय्योः ॥ ११ ॥ शन्नोदेवीरभिष्टयऽआपो

भवन्तुपीतये ॥ शँय्योरभिस्रवन्तुनः ॥ १२ ॥ स्योना
पृथिवि । नोभवानृक्षरानिवेशनी ॥ यच्छानꣳशर्म्मस
प्प्रथाꣳ ॥ १३ ॥ आपोहि । ष्ठामयोभुवस्तानऽऊर्ज्जेदधा
तन ॥ महेरणायचक्क्षसे ॥ १४ ॥ योवः शिवतमोरस
स्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५ ॥
तस्म्माऽअरङ्गमामवोयस्यक्क्षयायजिन्न्वथ ॥ आपोजन
यथाचनꣳ ॥ १६ ॥ द्यौःशान्तिरन्तरिक्क्षꣳशान्तिः
पृथिवीशान्तिरापꣳशान्तिरोषधयꣳशान्तिः । वनस्प्पतयꣳ
शान्तिर्व्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिꣳसर्व्वꣳशान्तिꣳशान्तिः
रेवशान्तिꣳसामाशान्तिरेधि ॥ १७ ॥ दृतेदृꣳहमामित्रस्य
माचक्क्षुषासर्व्वाणिभूतानिसमीक्क्षन्ताम् ॥ मित्रस्याहञ्च
क्क्षुषासर्व्वाणिभूतानिसमीक्क्षे ॥ मित्रस्यचक्क्षुषासमी
क्क्षामहे ॥ १८ ॥ दृतेदृꣳहमा । ज्योक्क्तेसन्दृशिजीव्यासं
ज्योक्क्तेसन्दृशिजीव्यासम् ॥ १९ ॥ नमस्तेहरसेशोचिषे
नमस्तेऽअस्त्वर्च्चिषे ॥ अन्न्याँस्तेऽअस्म्मत्तपन्तुहेतयः
पावकोऽअस्म्मभ्यꣳशिवोभव ॥ २० ॥ नमस्ते ।
अस्तुविद्द्युतेनमस्तेस्तनयित्नवे ॥ नमस्तेभगवन्नस्तु
यतःस्वःसमीहसे ॥ २१ ॥ यतोयतꣳसमीहसेततोनोऽ
अभयङ्कुरु ॥ शन्नःकुरुप्प्रजाभ्योभयन्नꣳपशुभ्यः ॥२१॥
सुमित्रियानऽआपऽओषधयꣳसन्तुदुर्म्मित्रियास्तस्मैसन्तु

सो॒स्मान्द्वे॑ष्टि॒यञ्च॑व॒यन्द्वि॒ष्मः ॥ २३ ॥ तच्चक्षु॑र्दे॒वहि॑तम्पु॒रस्ता॑च्छु॒क्रमु॒च्च॑रत् ॥ पश्श्ये॑मश॒रदः॑श॒तञ्जीवे॑मश॒रदः॑श॒तꣳशृणु॑यामश॒रदः॑श॒तम्प्रब्र॑वामश॒रदः॑श॒तमदी॑नाꣳस्यामश॒रदः॑श॒तम्भूय॑श्चश॒रदः॑श॒तात् ॥ २४ ॥ ॥

॥ इति रुद्राष्टाध्याय्यां शान्त्यध्यायः समाप्तः ॥

॥ अथ रुद्राष्टाध्याय्यां स्वस्तिप्रार्थनामन्त्राध्यायः ॥

हरिः ॐ स्व॒स्त्तिन॒ऽइन्द्रो॑वृ॒द्धश्र॑वाꣳस्व॒स्त्तिनः॑पू॒षावि॒श्ववे॑दाꣳ ॥ स्व॒स्त्तिन॒स्त्तार्क्ष्यो॒ऽअरि॑ष्टनेमिःस्व॒स्त्तिनो॒बृह॒स्प्पति॑र्द्दधा॒तु ॥ १ ॥ ॐ पयः॑पृथि॒व्याम्पय॒ऽओष॑धीषु॒ पयो॑दि॒व्युन्तरि॑क्षे॒ पयो॑धाꣳ । पय॑स्वतीꣳप्प्र॒दिशः॑सन्तु॒मह्य॑म् ॥ २ ॥ ॐ व्विष्ण्णो॑र॒राट॑मसि॒व्विष्ण्णो॒ꣳ श्नप्प्त्रे॑स्त्थो॒व्विष्ण्णो॒ꣳस्यूर॑सि॒व्विष्ण्णो॑र्ध्रु॒वो॑सि ॥ व्वै॒ष्ण्ण॒वम॑सि॒व्विष्ण्ण॑वेत्त्वा ॥ ३ ॥ ॐ अ॒ग्निर्दे॒वता॒व्वातो॑दे॒वता॒सूर्य्यो॑दे॒वता॑च॒न्द्रमा॑दे॒वता॒व्वस॑वो दे॒वता॑रु॒द्रादे॒वता॑दि॒त्यादे॒वता॑म॒रुतो॑दे॒वता॒व्विश्वे॑दे॒वादे॒वता॒बृह॒स्प्पति॑र्दे॒वतेन्द्रो॑दे॒वता॒व्वरु॑णोदे॒वता॑ ॥ ४ ॥ ॐ स॒द्योजा॒तंप्रप॑द्यामिस॒द्योजा॒ताय॒वैनमो॒नमः॑ ॥ भ॒वेभ॑वे॒नाति॑भवेभवस्व॒माम्भ॒वोद्भ॑वाय॒नमः॑ ॥ ५ ॥ वा॒मदे॒वाय॒नमो॑ज्ये॒ष्ठाय॒नमः॑श्रे॒ष्ठाय॒नमो॑रु॒द्राय॒नम॒ꣳकाला॑य॒नम॒ꣳकल॑विकरणा॒य॒नमो॒बल॑विकरणा॒य॒नमो॒बला॑य॒

न॒मो॒बल॑प्प्रमथनाय॒नम॒ꣳसर्व॑भूतदमनाय॒नमो॑म॒नोन्म॑नाय॒
नम॑ः ॥ ६ ॥ अ॒घोरे॑भ्योथ॒घोरे॑भ्यो॒घोर॒घोर॑तरेभ्यꣳ ॥
सर्वे॑भ्य॒ꣳसर्व॒शर्वे॑भ्यो॒नम॑स्तेऽअस्तु॒रुद्र॒रूपे॑भ्यꣳ ॥ ७ ॥
तत्पुरु॑षायवि॒द्महे॑ महादे॒वाय॑ धीमहि ॥ तन्नो॑ रुद्रꣳप्प्रचो॒
दया॑त् ॥ ८ ॥ ई॒शा॒न॒ꣳसर्व॑विद्या॒ना॒मीश्वरꣳसर्व॑भूता॒ना॒म् ॥
ब्रह्माधि॑पति॒र्ब्रह्म॒णोधि॑पति॒र्ब्रह्मा॑शि॒वोमे॑ऽअस्तुसदाशि॒वोम्
॥ ९ ॥ ॐ शि॒वोनामा॑सि॒स्वधि॑तिस्तेपि॒तानम॑स्तेऽ
अस्तुमामा॑हिꣳसीः ॥ निव॑र्त्तया॒म्म्यायु॑षे॒न्नाद्या॑यप्र॒जन॑ना
य॒रायस्प्पोषा॑यसुप्प्रजा॒स्त्वाय॑सु॒वीर्य्या॑य ॥ १० ॥ ॐ व्विश्वा॑
निदेवसवितर्दु॑रि॒ता॒नि॒परा॑सुव ॥ यद्भ॒द्रन्तन्न॒ऽआसु॑व ॥ ११ ॥
ॐ द्यौः शान्ति॑र॒न्तरि॑क्ष॒ꣳशान्ति॑ः पृथि॒वीशान्ति॒राप॒ꣳशा
न्ति॒रोष॑धय॒ꣳशान्ति॑ः ॥ व्वन॒स्प्पत॑य॒ꣳशान्ति॒र्व्विश्वे॑दे॒वाः
शान्ति॒र्ब्रह्म॒शान्ति॒ꣳसर्व॒ꣳशान्ति॒ꣳशान्ति॑रे॒वशान्ति॒ꣳसामा॒
शान्ति॑रेधि ॥ १२ ॥ ॐ सर्वे॑षां वा एष व्वेदाना॒ꣳरसो
यत्साम सर्वे॑षामेवैनमेतद्वेदाना॒ꣳरसेनाभिषिञ्चति ॥ १३ ॥
ॐ शान्तिः शान्तिः सुशान्तिर्भवतु ॥ सर्वारिष्टशान्तिर्भवतु ॥

॥ इति स्वस्तिप्रार्थनामन्त्राध्यायः ॥

इति रुद्राष्टाध्यायी समाप्ता ॥

अथ वेदोक्तनवग्रहमन्त्रन्यासाः मन्त्राश्च ॥

॥ अथ सूर्यमन्त्रस्य न्यासाः ॥

जपकर्ता आचमनं प्राणायामञ्च कृत्वा "श्रीमन्महागणाधिपतये नमः इत्यारभ्य सर्वकार्यार्थसिद्धये" इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम जन्मराशितो नामराशितो वा चतुर्थाष्टमद्वादशान्यतमस्थानस्थित्तस्य श्रीसूर्यस्य सर्वारिष्टशान्त्यर्थम् अमुकसङ्ख्याकं जप– (ब्राह्मणद्वारा वा) महं करिष्ये ॥ पुनर्जलं गृहीत्वा । मम "आकृष्णणेन०" इति सूर्यमन्त्रस्य (शरीरशुद्ध्यर्थम्) जपकर्तृत्वाधिकारार्थं न्यासान् करिष्ये ॥

न्यासाः—ॐआकृष्णणेन इति मन्त्रस्य हिरण्यस्तूपाङ्गिरस ऋषिः । त्रिष्टुप्छन्दः । सूर्यो देवता । सूर्यप्रीतये न्यासे विनियोगः ॥

अथ ऋष्यादिन्यासाः ॥ ॐ हिरण्यस्तूपाङ्गिरसऋषये नमः शिरसि । त्रिष्टुप्छन्दसे नमो मुखे ॥ श्रीसूर्यदेवतायै नमो हृदये ॥ सूर्यप्रीतये जपे विनियोगाय नमः सर्वाङ्गे ॥

अथ करन्यासाः ॥ "ॐआकृष्णणेन रजसा" अङ्गुष्ठाभ्यां नमः ॥ "वर्त्तमानो निवेशयन्" तर्जनीभ्यां नमः॥ "अमृतम्मर्त्त्यं च" मध्यमाभ्यां नमः॥ "हिरण्ययेन सविता रथेन"

अनामिकाभ्यां नमः ॥ "आदेवोयाति" कनिष्ठिकाभ्यां नमः ॥ "भुवनानि पश्यन्" करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादिन्यासाः ॥ "आकृष्णेन रजसा" हृदयाय नमः ॥ "वर्त्तमानो निवेशयन्" शिरसे स्वाहा ॥ "अमृतम्मर्त्त्यञ्च" शिखायै वषट् ॥ "हिरण्ययेन सविता रथेन" कवचाय हुम् ॥ "आदेवो याति" नेत्रत्रयाय वौषट् ॥ "भुवनानि पश्यन्" अस्त्राय फट् ॥

अथ पदन्यासाः ॥ "ॐ आ" (नमः) शिरसि ॥ "कृष्णेन" (नमः) भ्रुवोः ॥ "रजसा" (नमः) नेत्रयोः ॥ "वर्त्तमानः" (नमः) कर्णयोः ॥ "नि" (नमः) नासिकयोः ॥ "वेशयन्" (नमः) मुखे ॥ "अमृतं" (नमः) कण्ठे ॥ "मर्त्त्यञ्च" (नमः) बाह्वोः ॥ "हिरण्ययेन" (नमः) हृदये ॥ "सविता" (नमः) पृष्ठे ॥ "रथेन" (नमः) दक्षिणकुक्षौ ॥ "आ" (नमः) वामकुक्षौ ॥ देवः (नमः) गुह्ये ॥ "याति" (नमः) ऊर्वोः ॥ "भुवनानि" (नमः) जान्वोः ॥ "पश्यन्" (नमः) पादयोः ॥ इति पदन्यासाः ॥

अथ ध्यानम् ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः । सप्ताश्वरथसन्युक्तो द्विभुजः स्यात्सदा रविः ॥ इति ध्यात्वा मानसोपचारैः पूजयेत् । लं पृथिव्यात्मकं श्रीसूर्याय नमः गन्धं परिकल्पयामि । हं आकाशात्मकं श्रीसूर्याय नमः पुष्पं परि० । यं वाय्व्यात्मकं धूपं परि० ॥ रं वह्न्यात्मकं

दीपं परिकल्प० ॥ सं सोमात्मकं ताम्बूलं परि० ॥ इति मानसोपचारैः सम्पूज्य दक्षिणहस्ते गोमुखीं गृहीत्वा मालाया मेरुं गन्धाक्षतपुष्पैः सम्पूज्य प्रार्थयेत् ॥ मां माले महामाले सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मां सिद्धिदा भव ॥ इति प्रार्थयित्वा यजमानस्याभिष्टं चिन्तयन् वार्तालापं वर्जयित्वा सूर्यमन्त्रस्य जपं कुर्यात् ॥

अथ सूर्यमन्त्रः ॥ (ॐ ह्राँ ह्रीँ ह्रौँ सः ॐ भूर्भुवः स्वः) ॐआकृष्णेनरजंसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ (ॐ स्वः भुवः भूः ॐ सः ह्रौँ ह्रीँ ह्राँ ॐ) ॥ ४३/३३ ॥ ततः षडङ्गन्यासान् कृत्वा जपनिवदनं कुर्यात् ॥

इति सूर्यमन्त्रस्य न्यासाः ॥

अथ चन्द्रमन्त्रस्य न्यासाः ॥

जपकर्ता आचमनं प्राणायामञ्च कृत्वा ॥ “श्रीमन्महागणाधिपतये० इत्यारभ्य सर्वकार्यार्थसिद्धये” इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो महापुरुषस्य० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलावाप्त्यर्थं मम जन्मराशितो नामराशितो वा चतुर्थाष्टमद्वादशान्यतमस्थानस्थितस्य श्रीचन्द्रस्य सर्वारिष्टशान्त्यर्थम् अमुकसङ्ख्याकं जप-

(ब्राह्मणद्वारा वा) महं करिष्ये ॥ पुनर्जलं गृहीत्वा ॥ मम जपकर्तृत्वाधिकारसिद्ध्यर्थं "ॐ इमन्देवा०" इति मन्त्रस्य न्यासान् करिष्ये ॥ पुनर्जलं गृहीत्वा ॥ अस्य "ॐ इमन्देवा०" इति सोममन्त्रस्य गौतमऋषिः। अत्यष्टिच्छन्दः। सोमो देवता । सोमप्रीतये न्यासे विनियोगः ॥

अथ ऋष्यादिन्यासाः ॥ गौतम ऋषये नमः शिरसि । अत्यष्टिच्छन्दसे नमो मुखे । सोमो देवतायै नमो हृदये । सोमप्रीतये जपे विनियोगाय नमः सर्वाङ्गे ॥

अथ करादिन्यासाः ॥ "ॐइमन्देवाऽअसपत्नꣳसुवध्वम्" अङ्गुष्ठाभ्यां नमः। "महते क्षत्राय महते ज्यैष्ठ्याय" तर्जनीभ्यां नमः। "महते जानराज्याय" मध्यमाभ्यां नमः॥

"इन्द्रस्येन्द्रियाय" अनामिकाभ्यां नमः । "इमममुष्य पुत्रममुष्यै" कनिष्ठिकाभ्यां नमः । "पुत्रमस्यैऽविशऽएषवोमीराजासोमोऽस्माकं ब्राह्मणानाꣳराजा" करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादिन्यासाः ॥ " ॐ इमन्देवा असपत्नꣳसुवध्वम्" हृदयाय नमः। "महते क्षत्राय महते ज्यैष्ठाय" शिरसे स्वाहा। "महते जानराज्याय" शिखायै वषट्। "इन्द्रस्येन्द्रियाय" कवचाय हुम् । "इमममुष्यपुत्रममुष्यै" नेत्रत्रयाय वौषट् । "पुत्रमस्यैविशऽएष वोमीराजा सोस्माकं ब्राह्मणानाꣳराजा " अस्त्राय फट् ॥ इति हृदयादिन्यासाः ॥

अथ पदन्यासाः ॥ "इमं" (नमः) शिरसि । "देवा" (नमः) भ्रुवोः। "असपत्नं" (नमः) दक्षिणनेत्रे। "सुवद्ध्वं" (नमः) वामनेत्रे । "महते" (नमः) दक्षिणकर्णे । "क्षत्राय" (नमः) वामकर्णे । "महते" (नमः) दक्षिणनसि । "ज्यैष्ठ्याय" (नमः) वामनसि । "महते" (नमः) दक्षकपोले । "जानराज्याय" (नमः) वामकपोले । "इन्द्रस्य" (नमः) मुखे । "इन्द्रियाय" (नमः) कण्ठे । "इमं" (नमः) बाहुमूलयोः। "अमुष्य" (नमः) कूर्परयोः । "पुत्रं" (नमः) मणिबन्धयोः । "अमुष्यै" (नमः) हस्ताङ्गुलिमूलयोः ॥ "पुत्रं" (नमः) दक्षिणहस्ताङ्गुल्यग्रयोः । "अस्यै" (नमः) वामहस्ताङ्गुल्यग्रयोः ॥ "विशे" (नमः) हृदये। "एष" (नमः) पृष्ठे। "वः" (नमः) कुक्षौ। "अमी" (नमः) उदरे । "राजा" (नमः) गुह्ये। "सोमः" (नमः) पादमूलयोः। "अस्माकं" (नमः) जान्वोः। "ब्राह्मणानां" (नमः) गुल्फयोः । "राजा" (नमः) पादयोः ॥ इति पदन्यासाः ॥

अथ ध्यानम् ॥ श्वेतः श्वेताम्बरधरो दढाश्वः श्वेतभूषणः । गदापाणिर्द्विबाहुश्च पातु मां वरदः शशी । इति ध्यात्वा मानसोपचारैः पूजयेत् ॥ लं पृथिव्यात्मकं सोमाय नमः गन्धं परि० । हं आकाशात्मकं सोमाय नमः पुष्पं परि० । यं वाय्वात्मकं सोमाय नमः धूपं परि० ॥ रं वह्न्यात्मकं

सोमाय नमो दीपं परि० । संसोमात्मकं सोमाय नमः ताम्बूलं परि० । इति मानसोपचारैः सम्पूज्य दक्षिणहस्ते गोमुखीं गृहीत्वा मालाया मेरुं गन्धाक्षतपुष्पैः सम्पूज्य प्रार्थयेत् ॥ मां माले महामाले सर्वशक्तिस्वरूपिणि । चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मां सिद्धिदा भव ॥ इति सम्प्रार्थ्य ब्राह्मणो यजमानस्याभिष्टं चिन्तयन् वार्तालापं वर्जयित्वैकाग्रमनसा जपं कुर्यात् ।

अथ सोममन्त्रः ॥ [ॐ भूर्भुवः स्वः श्राँ श्रीँ श्रौँ सः] ॐ इमन्देवाऽअसपत्नꣳसुवद्ध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएषवोमीराजा सोमोऽस्माकं ब्राह्मणानाꣳराजा ॥४०/२९॥ [ॐस्वः भुवः भूः ॐ सः श्रौँ श्रीँ श्राँ ॐ सोमाय नमः] ततः षडङ्गन्यासान् कुर्यात् ॥

इति चन्द्रमन्त्रस्य न्यासाः ॥

अथ भौममन्त्रस्य न्यासाः ॥

जपकर्ता आचमनं प्राणायामञ्च कृत्वा ॥ "श्रीमन्महागणाधि० इत्यारभ्य सर्वकार्यार्थसिद्धये" इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भवतो० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम जन्मराशितो नामराशितो वा चतुर्थाष्टमद्वादशस्थानान्यतमस्थानस्थितस्य भौम-

ग्रहस्य सर्वारिष्टशान्त्यर्थम् अमुकसङ्ख्याकं जप (ब्राह्मणद्वारा वा) महं करिष्ये ॥ पुनर्जलं गृहीत्वा ॥ मम “ॐ अग्निर्म्मूर्द्धा०” इति मन्त्रस्य जपकर्तृत्वाधिकारशिद्ध्यर्थं न्यासान्करिष्ये ॥ पुनर्जलं गृहीत्वा—अस्य “ॐअग्निर्म्मूर्द्धा०” इति अङ्गारकमन्त्रस्य विरूपाक्ष ऋषिः ॥ गायत्रीच्छन्दः । भौमो देवता । भौमप्रीतये न्यासे विनियोगः ॥

अथ ऋष्यादिन्यासाः ॥ विरूपाक्षऋषये नमः शिरसि ॥ गायत्रीच्छन्दसे नमो मुखे ॥ भौमो देवतायै नमो हृदि ॥ भौमप्रीतये जपे विनियोगाय नमः सर्वाङ्गे ॥

अथ करादिन्यासाः ॥ “अग्निर्म्मूर्द्धा०” अङ्गुष्ठाभ्यां नमः ॥ “दिवः” तर्जनीभ्यां नमः ॥ “ककुत्पतिः” मध्यमाभ्यां नमः ॥ “पृथिव्याऽअयम्” अनामिकाभ्यां नमः ॥ “अपाꣳरेताꣳसि” कनिष्ठिकाभ्यां नमः ॥ “जिन्वति” करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादिन्यासाः ॥ “ॐ अग्निर्म्मूर्द्धा०” हृदयाय नमः ॥ “दिवः” शिरसे स्वाहा ॥ “ककुत्पतिः” शिखायै वषट् ॥ “पृथिव्याऽअयम्” कवचाय हुम् ॥ “अपाꣳरेताꣳसि” नेत्रत्रयाय वौषट् ॥ “जिन्वति” अस्त्राय फट् ॥

अथ पदन्यासाः ॥ “अग्निः” (नमः) शिरसि ॥ “मूर्द्धा” (नमः) भ्रुवोः ॥ “दिवः” (नमः) दृशोः । “ककुत्” (नमः) वक्त्रे ॥ “पतिः” (नमः) कण्ठे ॥ “पृथिव्याः” (नमः)

हृदये ॥ "अयं" (नमः) नाभौ ॥ "अपां" (नमः) ऊर्वोः ॥ "रेताꣳसि" (नमः) जान्वोः ॥ "जिन्वति" (नमः) पादयोः ॥ इति पदन्यासाः ॥

अथ ध्यानम् ॥ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः ॥ चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः ॥ इति ध्यात्वा मानसोपचारैः सम्पूजयेत् ॥ लं पृथिव्यात्मकं भौमाय नमः गन्धं परि० ॥ आकाशात्मकं भौमाय नमः पुष्पं परि० ॥ यं वाय्वात्मकं भौमाय नमः धूपं परि० ॥ रं वह्न्यात्मकं भौमाय नमः दीपं परि० ॥ सं सोमात्मकं भौमाय नमः ताम्बूलं परि० ॥ इति सम्पूज्य मालाया मेरुं गन्धाक्षतपुष्पैः सम्पूज्य प्रार्थयेत् ॥ मां माले महामाले सर्वशक्तिस्वरूपिणि । चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मां सिद्धिदा भव ॥ इति प्रार्थयित्वा वार्तालापं वर्जयित्वा यजमानस्याभिष्टं चिन्तयन् मन्त्रं जपेत् ॥

अथ भौममन्त्रः–(ॐ क्राँ क्रीँ क्रौँ स्वः ॐ भूर्भुवः स्वः) ॐ अ॒ग्निर्म्मू॒र्द्धादि॒वः क॒कुत्पति॑ꣳ पृ॒थिव्याऽअ॒यम् ॥ अ॒पा॒ꣳ रेता॑ꣳसि जिन्वति (ॐ स्वः भुवः भूः ॐ सः क्रौँ क्रीँ क्राँ ॐ भौमाय नमः) ॥ १२/३ ॥ ततः षडङ्गन्यासान् कृत्वा जपनिवेदनं कुर्यात् ॥

॥ इति भौममन्त्रस्य न्यासाः ॥

अथ बुधमन्त्रस्य न्यासाः ।।

जपकर्ता आचमनं प्राणायामञ्च कृत्वा ।। "श्रीमन्महा० इत्यारभ्य सर्वकार्यार्थसिद्धये" इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ।। विष्णुर्विष्णुर्विष्णुः ।। श्रीमद्भग० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम जन्मराशितो नामराशितो वा चतुर्थाष्टमद्वादशस्थानान्यतमस्थानस्थितस्य बुधस्य सर्वारिष्टशान्त्यर्थम् अमुकसङ्ख्याकं जप (ब्राह्मणद्वारा वा) महं करिष्ये ।। पुनर्जलं गृहीत्वा । मम बुधमन्त्रस्य जपकर्तृत्वाधिकारसिद्ध्यर्थं न्यासान् करिष्ये ।। पुनर्जलं गृहीत्वा। अस्य उद्बुध्यस्वाग्ने० इति मन्त्रस्य अग्निर्ऋषिः। पङ्क्तिश्छन्दः। बुधो देवता। बुधप्रीतये न्यासे विनियोगः ।।

अथ ऋष्यादिन्यासाः ।। "अग्निऋषये" नमः शिरसि ।। "पङ्क्तिश्छन्दसे" नमो मुखे ।। "बुधदेवतायै" नमो हृदये ।। "बुधप्रीतये जपे विनियोगाय". नमः सर्वाङ्गे ।।

अथ करादिन्यासाः ।। "ॐ उद्बुध्यस्वाग्ने०" अङ्गुष्ठाभ्यां नमः ।। "प्रतिजागृहित्त्वमिष्टापूर्त्ते" तर्जनीभ्यां नमः ।। "सृजेथामयञ्च" मध्यमाभ्यां नमः ।। "अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्मिन्" अनामिकाभ्यां नमः ।। "विश्वे देवा यजमानश्च" कनिष्ठिकाभ्यां नमः ।। "सीदत" करतलकरपृष्ठाभ्यां नमः ।।

अथ हृदयादिन्यासाः ॥ "ॐ उद्बुद्ध्यस्वाग्ने" हृदयाय नमः ॥ "प्रतिजागृहित्त्वमिष्टापूर्त्ते" शिरसे स्वाहा ॥ "सृजेथामयञ्च" शिखायै वषट् ॥ "अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्मिन्" कवचाय हुम् ॥ "विश्वेदेवायजमानश्च" नेत्रत्रयाय वौषट् ॥ "सीदत" अस्त्राय फट् ॥

अथ पदन्यासाः ॥ "ॐ उत्" (नमः) शिरसि ॥ "बुद्ध्यस्व" (नमः) भ्रुवोः ॥ "अग्ने" (नमः) नेत्रयोः ॥ "प्रति" (नमः) कर्णयोः ॥ "जागृहि" (नमः) नासिकयोः ॥ "त्वम्" (नमः) कपोलयोः ॥ "इष्टापूर्त्ते" (नमः) मुखे ॥ "सं" (नमः) ग्रीवायाम् ॥ "सृजेथां" (नमः) दक्षिणबाहवे ॥ "अयञ्च" (नमः) वामबाहवे ॥ "अस्मिन्" (नमः) हृदये ॥ "सधस्त्थे" (नमः) पृष्ठे ॥ "अद्ध्युत्" (नमः) कुक्षौ ॥ "उत्तरस्मिन्" (नमः) उदरे ॥ "विश्वे" (नमः) गुह्ये ॥ "देवाय" (नमः) ऊर्वोः ॥ "यजमानः" (नमः) जान्वोः ॥ "च सीदत" (नमः) पादयोः ॥ इति पदन्यासाः ॥

अथ ध्यानम् ॥ पीतमाल्याम्बरधरः कर्णिकारसमन्वितः । खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य दक्षिणहस्ते गोमुखीं गृहीत्वा मालाया मेरुं सम्पूज्य प्रार्थयित्वा यजमानस्याभिष्टं चिन्तयन्वार्तालापं वर्जयित्वा बुधमन्त्रं जपेत् ॥

अथ बुधमन्त्रः ॥ (ॐ ब्राँ ब्रीं ब्रौं सः ॐ भूर्भुवः स्वः) ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते सᳬं सृजेथामयञ्च । अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ॥६१/१८॥ (ॐ स्वः भुवः भूः ॐ सः ब्रौँ ब्रीँ ब्राँ ॐ बुधाय नमः) ॥ ततः षडङ्गन्यासान् कुर्यात् ॥

इति बुधमन्त्रस्य न्यासाः ॥

अथ बृहस्पतिमन्त्रजपविधिः ॥

जपकर्ता आचमनं प्राणायामञ्च कृत्वा शान्तिसूक्तं पठित्वा ॥ "श्रीमन्महा० इत्यारभ्य सर्वकार्यार्थसिद्धये" इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम जन्मराशितो नामराशितो वा चतुर्थाष्टमद्वादशान्यतमस्थानस्थितस्य बृहस्पतिमन्त्रस्य सर्वारिष्टशान्त्यर्थं बृहस्पतिमंत्रस्य अमुकसंख्याकं जप (ब्राह्मणद्वारा वा) महं करिष्ये ॥ पुनर्जलं गृहीत्वा । मम ॐ बृहस्पतिमंत्रस्य जपकर्तृत्वाधिकारसिद्ध्यर्थं न्यासान् करिष्ये ॥ पुनर्जलं गृहीत्वा । अस्य "ॐबृहस्पते०" इति मन्त्रस्य गृत्समद ऋषि । त्रिष्टुप्छन्दः । बृहस्पतिर्देवता । बृहस्पतिप्रीतये न्यासे विनियोगः ॥

अथ ऋष्यादिन्यासाः ॥ ॐ "गृत्समदऋषये" नमः शिरसि । "त्रिष्टुप्छन्दसे" नमो मुखे । "बृहस्पतिदेवतायै"

नमो हृदये । "बृहस्पतिप्रीतये" जपे विनियोगाय नमः सर्वाङ्गे ॥

अथ करादिन्यासाः ॥ "ॐ बृहस्प्पतेऽअतियदर्य्यः" अङ्गुष्ठाभ्यां नमः । "अर्हाद्द्युमद्विभाति" तर्जनीभ्यां नमः ॥ "ऋतुमज्जनेषु" मध्यमाभ्यां नमः । "यद्दीदयच्छवस" अनामिकाभ्यां नमः । "ऋतप्प्रजाततदस्म्मासु" कनिष्ठिकाभ्यां नमः । "द्रविणं धेहिचित्रं" करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादिन्यासाः ॥ "ॐ बृहस्प्पतेऽअतियदर्य्यः" हृदयाय नमः । "अर्हाद्द्युमद्विभाति" शिरसे स्वाहा । "ऋतुमज्जनेषु" शिखायैषट् ॥ "यद्दीदयच्छवस" कवचाय हुम् । "ऋतप्प्रजाततदस्म्मासु" नेत्रत्रयाय वौषट् ॥ "द्रविणं धेहि चित्रम् अस्त्राय फट् ॥

अथ पदन्यासाः ॥ "बृहस्प्पते" (नमः) शिरसि । "अति" (नमः) भ्रुवोः ॥ "यत्" (नमः) नेत्रयोः । "अर्य्यः" (नमः) कर्णयोः । "अर्हात्" (नमः) नासिकयोः । "द्युमत्" (नमः) कपोलयोः ॥ "विभाति" (नमः) मुखे । "ऋतुं" (नमः) ग्रीवायाम् ॥ "अत्" (नमः) दक्षिणबाहुमूले । "जनेषु" (नमः) वामबाहुमूले । "यत्" (नमः) पृष्ठे । "दीदयत्" (नमः) दक्षिणस्तने । "शवसा" (नमः) वामस्तने । "ऋत" (नमः) दक्षिणकटि । "प्रजात" (नमः) वामकटि । "तत्" (नमः) हृदये । "अस्मासु"

(नमः) गुह्ये । “द्रविणं” (नमः) ऊर्वोः ॥ “धेहि” (नमः) जान्वोः । “चित्रं” (नमः) पादयोः ॥ इति पदन्यासाः ॥

अथ ध्यानम् ॥ दण्डी पीतश्चतुर्बाहुर्वरदोऽभयदस्तथा । अक्षसूत्रधरो देवः कमण्डलुधरः सदा ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य दक्षिणहस्ते गोमूखीं गृहीत्वा मालाया मेरुं गन्धाक्षतपुष्पैः सम्पूज्य मालां “मां माले०” इति ध्यात्वा यजमानस्याभीष्टं चिन्तयन्वार्तालापं वर्जयित्वा बृहस्पतिमन्त्रं जपेत् ॥

अथ बृहस्पतिमन्त्रः । (ॐ ह्राँ ह्रीँ ह्रौँ सः ॐ भूर्भुवः स्वः) बृह॑स्प्पते॒ऽअति॒यद॒र्य्योऽअर्हा॑द्द्यु॒मद्वि॒भाति॒क्क्रतु॑म॒ज्जने॑षु । यद्दी॒दय॒च्छ॑वसऽऋतप्प्रजात॒तद॒स्म्मासु॒द्द्रवि॑णंधेहिचि॒त्रम् ॥ (ॐ स्वः भुवः भूः ॐ सः ह्रौँ ह्रीँ ह्राँ ॐ बृहस्पतये नमः) ॥$\frac{३}{३६}$॥ पुनः षडङ्गन्यासान् कृत्वा जपनिवेदनं कुर्यात् ॥

इति बृहस्पतिमन्त्रजपविधिः ॥

अथ शुक्रमन्त्रजपविधिः ॥

जपकर्ता प्राङ्मुख उदङ्मुखो वोपविश्याचमनं प्राणायामञ्च कृत्वा शान्तिसूक्तं पठित्वा “श्रीमन्महा० इत्यारभ्य सर्वकार्यार्थसिद्ध्ये” इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ॥ ॐ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम जन्मराशितो नामराशितो वा चतुर्था-

ष्टमद्वादशान्यतमस्थानस्थितस्य शुक्रस्य सर्वारिष्टशान्त्यर्थम् (ब्राह्मणद्वारा वा) अमुकसङ्ख्याकं जपमहं करिष्ये ॥ पुनर्जलं गृहीत्वा ॥ मम शुक्रमन्त्रस्य जपकर्तृत्वाधिकारसिद्ध्यर्थं शुक्रमन्त्रस्य न्यासान् करिष्ये ॥ पुनर्जलं गृहीत्वा । अस्य "अन्नात्परिस्रुत" इति श्रीशुक्रमन्त्रस्य विश्वेदेवा ऋषिः । त्रिष्टुप्छन्दः । शुक्रो देवता । शुक्रप्रीतये न्यासे विनियोगः ॥

अथ ऋष्यादिन्यासाः ॥ विश्वेदेवा ऋषये नमः शिरसि । त्रिष्टुप्छन्दसे नमो मुखे । शुक्रदेवतायै नमो हृदये । शुक्रप्रीतये जपे विनियोगाय नमः सर्वाङ्गे ॥

अथ करादिन्यासाः ॥ "ॐअन्नात्त्परिस्रुतं" अङ्गुष्ठाभ्यां नमः । "रसं ब्रह्मणा व्यपिबत्" तर्जनीभ्यां नमः । "क्षत्रं पयः सोमं प्रजापतिः" मध्यमाभ्यां नमः । "ऋतेन सत्त्यमिन्द्रियं विपानꣳशुक्रमन्धसः" अनामिकाभ्यां नमः । "इन्द्रस्येन्द्रियमिदं" कनिष्ठिकाभ्यां नमः । "पयोमृतं मधु" करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादिन्यासाः ॥ "ॐअन्नात्त्परिस्रुतः" हृदयाय नमः । "रसं" तर्जनीभ्यां नमः । "ब्रह्मणा व्यपिबत्" शिरसे स्वाहा । "क्षत्रं पयः सोमं प्रजापतिः" शिखायै वषट् ॥ "ऋतेन सत्यमिन्द्रियं विपानꣳशुक्रमन्धसः" कवचाय हुम् । "इन्द्रस्येन्द्रियमिदं" नेत्रत्रयाय वौषट् । "पयोमृतं मधु" अस्त्राय फट् ॥

अथ पदन्यासाः ॥ "ॐ अन्नात्" (नमः) शिरसि । "परि" (नमः) भ्रुवोः । "स्रुतः" (नमः) दक्षिणनेत्रे । "रसं" (नमः) वामनेत्रे । "ब्रह्मणा" (नमः) दक्षिणकर्णे "वि" (नमः) वामकर्णे । "अपिबत्" (नमः) दक्षिणनसि "क्षत्रं" (नमः) वामनसि । "पयः" (नमः) मुखे । "सोमं" (नमः) कण्ठे । "प्रजा" (नमः) बाहुमूलयोः । "पतिः" (नमः) कूर्परयोः। "ऋतेन" (नमः) मणिबन्धयोः॥ "सत्यं" (नमः) हस्ताङ्गुलिमूलयोः । "इन्द्रियं" (नमः) हस्ताङ्गुल्यग्रयोः । "वि" (नमः) हृदये । "पानं" (नमः) पृष्ठे । "शुक्रं" (नमः) कुक्षौ । "अन्धसः" (नमः) उदरे । "इन्द्रस्य" (नमः) गुह्ये । "इन्द्रियं" (नमः) पादमूलयोः । "इदं" (नमः) जान्वोः । "पयः" (नमः) गुल्फयोः । "अमृतं" (नमः) पादाङ्गुलिमूलयोः । "मधु" (नमः) पादाङ्गुल्यग्रयोः ॥ इति पदन्यासाः ॥

अथ ध्यानम् ॥ दण्डी दैत्यगुरुः स्वामी शुक्रः श्वेतश्चतुर्भुजः । वरदोऽभयहस्तश्च कमण्डलुधरः सदा ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य दक्षिणहस्ते गोमुखीं गृहीत्वा मालायाः मेरुं गन्धाक्षतपुष्पैः सम्पूज्य यजमानस्याभीष्टं ध्यायन् वार्तालापं वर्जयित्वा शुक्रमंत्रं जपेत् ॥

अथ शुक्रमन्त्रः ॥ (ॐ द्राँ द्रीँ द्रौँ सः ॐ भुर्भुवः स्वः) ॐ अन्नात्परि॒स्रुतो॒ रस॒म्ब्रह्म॑णा॒ व्य॑पिबत्क्ष॒त्रम्पय॒ꣳसोम॑-

म्प्र॒जाप॑तिꣳ । ऋ॒तेन॑स॒त्त्यमि॑न्द्रि॒यंवि॒पान॑ꣳशु॒क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒ऽमृत॒म्मधु॑ ॥ ७५/१९ ॥ (ॐ स्वः भुवः भूः ॐ सः द्रौँ द्रीँ द्राँ ॐ शुक्राय नमः) पुनः षडङ्गन्यासान् कृत्वा जपनिवेदनं कुर्यात् ॥

इति शुक्रमन्त्रजपविधिः ॥

अथ शनिमन्त्रजपविधिः ॥

जपकर्ता पूर्वाभिमुख उदङ्मुखो वोपविश्य आचमनं प्राणायामञ्च कृत्वा "श्रीमन्महा॰ इत्यारभ्य सर्वकार्यार्थसिद्धये" इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् । विष्णुर्विष्णुर्विष्णुः । श्रीमद्भगवतो॰ एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम जन्मराशितो नामराशितो वा चतुर्थाष्टमद्वादशान्यतमस्थानस्थितस्य शनेः सर्वारिष्टशान्त्यर्थम् (ब्राह्मणद्वारा वा) अमुकसङ्ख्याकं जपमहं करिष्ये ॥ पुनर्जलं गृहीत्वा। करिष्यमाणे शनिमन्त्रजपकर्मणि मम जपकर्तृत्वाधिकारसिद्ध्यर्थं शनिमन्त्रस्य न्यासान् करिष्ये ॥

पुनर्जलं गृहीत्वा । अस्य "ॐ शन्नोदेवी" इति शनिमन्त्रस्य दध्यङ्ङाथर्वणऋषिः । गायत्रीच्छन्दः । आपो देवता । शनिप्रीतये जपे विनियोगः ॥

अथ ऋष्यादिन्यासाः ॥ दध्यङ्ङाथर्वणऋषये नमः शिरसि । गायत्रीच्छन्दसे नमो मुखे । आपो देवतायै नमो हृदये । शनिप्रीतये जपे विनियोगाय नमः सर्वाङ्गे ॥

अथ करादिन्यासाः ॥ “ॐ शन्नोदेवी” अङ्गुष्ठाभ्यां नमः । “अभिष्टये” तर्जनीभ्यां नमः । “आपो भवन्तु” मध्यमाभ्यां नमः । “पीतये” अनामिकाभ्यां नमः । “शँय्योरभि” कनिष्ठिकाभ्यां नमः । “स्रवन्तु नः” करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादिन्यासाः ॥ “ॐशन्नोदेवी” हृदयाय नमः । “अभिष्टये” शिरसे स्वाहा । “आपो भवन्तु” शिखायै वषट् । “पीतये” कवचाय हुम् । “शंय्योरभि” नेत्रत्रयाय वौषट् । “स्रवन्तु नः” अस्त्राय फट् ॥

अथ पदन्यासाः ॥ “ॐ शं” (नमः) शिरसि । “नः” (नमः) भ्रुवोः । “देवीः” (नमः) दृशोः । “अभिष्टये”(नमः) वक्त्रे । “आपः” (नमः) ग्रीवायाम् । “भवन्तु” (नमः) वाह्वोः । “पीतये” (नमः) हृदये । “शं” (नमः) उदरे । “यः”(नमः) गुह्ये । अभि (नमः) ऊर्वोः ॥ “स्रवन्तु”(नमः) जान्वोः । “नः” (नमः) पादयोः ॥ इति पदन्यासाः ॥

अथ ध्यानम् ॥ दण्डी नीलद्युतिः शूली वरदो गृध्रवाहनः । बाणहस्तधनुर्धारी भक्तानामभयप्रदः ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य गोमुखीं गृहीत्वा मालाया मेरुं गन्धाक्षतपुष्पैः सम्पूज्य यजमानस्याभीष्टं ध्यायन् वार्तालापं वर्जयित्वा शनिमन्त्रं जपेत् ॥

अथ शनिमंत्रः ॥ (ॐ खाँ खीँ खौँ सः ॐ भूर्भुवः

स्वः) ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तु पीतये । शँय्यो रभिस्रवन्तुनः ॥ $\frac{१२}{३६}$ ॥ (ॐ स्वः भुवः भूः ॐ सः खौँ खीँ खाँ ॐ शनैश्चराय नमः) ॥ पुनः षडङ्गन्यासान् कृत्वा जपनिवेदनं कुर्यात् ॥

॥ इति शनिमन्त्रजपविधिः ॥

अथ राहुमन्त्रजपविधिः ॥

जपकर्ता प्राङ्मुख उदङ्मुखो वोपविश्य आचमनं प्राणायामञ्च विधाय "श्रीमन्महा॰ इत्यारभ्य सर्वकार्यार्थे॰" इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो॰ एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम जन्मराशितो नामराशितो वा चतुर्थाष्टमद्वादशान्यतमस्थानस्थितस्य राहोः सर्वारिष्टशान्त्यर्थम् (ब्राह्मणद्वारा वा) अमुकसङ्ख्याकं जपमहं करिष्ये ॥ पुनर्जलं गृहीत्वा । मम राहुमन्त्रस्य जपकर्तृत्वाधिकारसिद्धये राहुमन्त्रस्य न्यासान् करिष्ये ॥ पुनर्जलं गृहीत्वा । अस्य "कयानश्चित्रऽआ॰" इति राहुमन्त्रस्य वामदेव ऋषिः । गायत्रीच्छन्दः । राहुदेवता । राहुप्रीतये न्यासे विनियोगः ॥

अथ ऋष्यादिन्यासाः ॥ वामदेव ऋषये नमः शिरसि । गायत्रीच्छन्दसे नमो मुखे । राहुदेवतायै नमो हृदि । राहुप्रीतये जपे विनियोगाय नमः सर्वाङ्गे ॥

अथ करादिन्यासाः ॥ "कयानश्चित्र" अङ्गुष्ठाभ्यां नमः । "आभुवदूती" तर्जनीभ्यां नमः ॥ "सदावृधः" मध्यमाभ्यां नमः । "सखा" अनामिकाभ्यां नमः । "कयाशचिष्ठया" कनिष्ठिकाभ्यां नमः । "वृता" करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादिन्यासाः ॥ "ॐ कयानश्चित्र" हृदयाय नमः । "आभुवदूती" शिरसे स्वाहा । "सदावृधः" शिखायै वषट् । "सखा" कवचाय हुम् । "कयाशचिष्ठया" नेत्रत्रयाय वौषट् । "वृता" अस्त्राय फट् ॥ इति हृदयादिन्यासाः ॥

अथ पदन्यासाः ॥ "कया" (नमः) शिरसि । "नः" (नमः) भ्रुवोः । "चित्रः" (नमः) दृशोः । "आ" (नमः) वक्त्रे । "भुवत्" (नमः) ग्रीवायाम् । "ऊती" (नमः) बाह्वो । "सदा" (नमः) हृदये । "वृधः" (नमः) उदरे । "सखा" (नमः) गुह्ये । "कया" (नमः) ऊर्वोः । "शचिष्ठया" (नमः) जान्वोः । "वृता" (नमः) पादयोः ॥ इति पदन्यासाः ॥

अथ ध्यानम् ॥ करालवदनः खड्गचर्मशूलवरप्रदः । नीलसिंहासनस्थश्च राहुस्तन्त्रे प्रशस्यते ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य दक्षिणहस्ते गोमुखीं गृहीत्वा मालाया मेरुं गन्धाक्षतपुष्पैः सम्पूज्य यजमानस्याभीष्टं चिन्तयन् वार्तालापं वर्जयित्वा राहुमन्त्रं जपेत् ॥

अथ राहुमन्त्रः ॥ (ॐ भ्राँ भ्रीँ भ्रौँ सः ॐ भूर्भुवः स्वः) ॐ कया॑नश्चि॒त्रऽआभु॑वदू॒तीस॒दावृ॑ध॒ः सखा॑ । कया॒शचि॑ष्ठया वृ॒ता ॥ (ॐ स्वः भुवः भूः ॐ सः भ्रौँ भ्रीँ भ्राँ ॐ राहवे नमः) पुनः षडङ्गन्यासान् कृत्वा जपनिवेदनं कुर्यात् ॥

॥ इति राहुमन्त्रजपविधिः ॥

अथ केतुमन्त्रन्यासाः ॥

जपकर्ता प्राङ्मुख उदङ्मुखो वोपविश्य आचमनं प्राणायामञ्च विधाय "श्रीमन्महा० इत्यारभ्य सर्वकार्यार्थे०" इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम जन्मराशितो नामराशितो वा चतुर्थाष्टमद्वादशान्यतमस्थानस्थितस्य केतोः सर्वारिष्टशान्त्यर्थम् (ब्राह्मणद्वारा वा) अमुकसङ्ख्याकं जपमहं करिष्ये ॥ पुनर्जलं गृहीत्वा । अस्य राहुमंत्रस्य मम जपकर्तृत्वाधिकारसिद्धये केतुमन्त्रस्य न्यासान्करिष्ये ॥ पुनर्जलं गृहीत्वा । अस्य "केतुंकृण्वन्" इति मंत्रस्य मधुच्छन्दाऋषिः । गायत्रीच्छन्दः । केतुदेवता । केतुप्रीतये न्यासे विनियोगः ॥ मधुच्छन्दऋषये नमः शिरसि । गायत्रीछन्दसे नमो मुखे । केतुदेवतायै नमो हृदये । केतुप्रीतये जपे विनियोगाय नमः सर्वाङ्गे ॥

अथ करन्यासाः ॥ "केतुकृण्वन्" अङ्गुष्ठाभ्यां नमः । "अकेतवे" तर्जनीभ्यां नमः । "पेशोमर्य्या" मध्यमाभ्यां नमः। "अपेशसे" अनामिकाभ्यां नमः। "समुषद्भिः" कनिष्ठिकाभ्यां नमः । "अजायथाः" करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादिन्यासाः ॥ ॐ केतुकृण्वन् हृदयाय नमः । ॐ केतवे शिरसे स्वाहा । पेशोमर्या शिखायै वषट् । अपेशसे कवचाय हुम् । समुषद्भिः नेत्रत्रयाय वौषट् । अजायथाः अस्त्राय फट् ॥

अथ पदन्यासाः ॥ "केतुं" (नमः) शिरसि । "कृण्वन्" (नमः) भ्रुवोः ॥ "अकेतवे" (नमः) दृशोः । "अपेशे" (नमः) वक्त्रे । "अमर्या" (नमः) कण्ठे । "अपेशसे" (नमः) हृदये । "सः" (नमः) नाभौ । "उषत्" (नमः) ऊर्वोः । "अद्भिः" (नमः) जान्वोः । "अजायथाः" जान्वोः ॥ इति पदन्यासाः ॥

अथ ध्यानम् ॥ एकोत्तरशतं केतुर्दिव्यं भूम्यन्तरे स्थितः । एतेषां च ग्रहाणाञ्च शान्तिमिच्छन्तु ते सदा ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य दक्षिणहस्ते गोमुखीं गृहीत्वा मालाया मेरुं गन्धाक्षतपुष्पैः सम्पूज्य यजमानस्याभीष्टं चिन्तयन् वार्तालापं वर्जयित्वा केतुमन्त्रं जपेत् ॥

अथ केतुमन्त्रः ॥ (ॐ प्राँ प्रीँ प्रौँ सः ॐ भूर्भुवः स्वः) ॐ के॒तुङ्कृ॒ण्वन्न॑के॒तवे॒पेशोँ॑मर्य्या॑ऽअपे॒शसेँ॑ ॥ समु॒षद्भि॑रजा-

यथा६ ॥ (ॐ स्वः भुवः भूः ॐ सः प्रौँ प्रीँ प्राँ ॐ केतवे नमः ॥) पुनः षडङ्गन्यासान्कृत्वा जपनिवेदनं कुर्यात् ॥

इति केतुमन्त्रन्यासाः ॥

इति नवग्रहमन्त्रन्यासाः ॥

अथ[1] (ग्रहमन्त्रजपार्थं) पुराणोक्तं नवग्रहस्तोत्रम् ॥

श्रीगणेशाय नमः ॥ जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् । तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥१॥ दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् । नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ॥ २ ॥ धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम् । कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥३॥ प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् । सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ४ ॥ देवानां च ऋषीणाञ्च गुरुं काञ्चनसन्निभम् । बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥ ५ ॥ हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् । सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥६॥ नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् । छायामार्तंडसंभूतं तं नमामि शनैश्चरम् ॥ ७ ॥ अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् । सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम् ॥ ७ ॥ पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् । रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥९॥ इति व्यासमुखोद्गीतं यः पठेत् सुसमाहितः । दिवा वा यदि वा रात्रौ

---

[1] अनुपनीतानां पुराणोक्तमन्त्रजपार्थं ग्रहाणामेते श्लोका एव मन्त्रा उक्ताः ॥

विघ्नशान्तिर्भविष्यति ॥ १० ॥ नरनारीनृपाणां च भवेद्दुःस्वप्ननाशनम् । ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम् ॥ ११ ॥ ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः । ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥ १२ ॥

॥ इति श्रीव्यासविरचितं नवग्रहस्तोत्रं संपूर्णम् ॥

अथ महामृत्युञ्जय (मृतसञ्जीवन) जपविधिः ॥

जपकर्ता आचमनं प्राणायामञ्च कृत्वा "श्रीमन्महा० इत्यारभ्य सर्वकार्यार्थसिद्धये" इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम (यजमानस्य वा) आत्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्तिपूर्वकं शरीरे सञ्जातानां तापाद्यखिलमहारोगाणामुपशमनार्थं सर्वारिष्टशान्त्यर्थञ्च [1]षट्प्रणवसंयुक्तस्य श्रीमहामृत्युञ्जय (मृतसञ्जीवन) मन्त्रस्य अमुकसङ्ख्याकं जप (ब्राह्मणद्वारा वा) महं करिष्ये ॥ पुनर्जलं गृहीत्वा ॥ सङ्कल्पः—अस्य श्रीमृत्युञ्जयमन्त्रस्य वसिष्ठ ऋषिः । श्रीमृत्युञ्जयरुद्रो देवता । अनुष्टुप्छन्दः । हौं बीजम् । जूं शक्तिः । सः कीलकम् । श्रीमृत्युञ्जयप्रीतये मम (यजमानस्य वा) अभीष्टसिद्ध्यर्थे जपे विनियोगः ॥

---

[1] अत्र चतुर्दशप्रणवमंत्रजपे चतुर्दशप्रणवसंयुक्तस्य इति पदं वाच्यम् ॥

[2] जपानन्तरं होमादिकर्तव्ये "मया कृतस्य अमुकमंत्रस्य जपकर्मणः साङ्गतासिद्ध्यर्थं तन्मंत्रजपदशांशेन होमं तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि च करिष्ये" इति सङ्कल्पं कृत्वा तत्सर्वं विधेयम् ॥

अथ ऋष्यादिन्यासाः—वसिष्ठऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमो मुखे। श्रीमृत्युञ्जयरुद्रदेवतायै नमो हृदये। हौं बीजाय नमो गुह्ये। जूं शक्तये नमः पादयोः। सः कीलकाय नमः सर्वाङ्गेषु॥

अथ करादिन्यासाः—ॐ त्र्यम्बकम् अङ्गुष्ठाभ्यां नमः। ॐ यजामहे तर्जनीभ्यां नमः। ॐ सुगंधिंपुष्टिवर्धनं मध्यमाभ्यां नमः। ॐ उर्वारुकमिव बन्धनात् अनामिकाभ्यां नमः। ॐ मृत्योर्मुक्षीय कनिष्ठिकाभ्यां नमः। ॐ मामृतात् करतलकरपृष्ठाभ्यां नमः।

अथ हृदयादिन्यासाः—ॐ त्र्यम्बकं हृदयाय नमः। ॐयजामहे शिरसे स्वाहा। ॐसुगन्धिं पुष्टिवर्धनं शिखायै वषट्। ॐ उर्वारुकमिव बन्धनात् कवचाय हुम्। ॐ मृत्योर्मुक्षीय नेत्रत्रयाय वौषट्। ॐ मामृतात् अस्त्राय फट्॥

अथ ध्यानम्—चन्द्रोद्भासितमूर्धजं सुरपतिं पीयूषपात्रं महद्धस्ताब्जेन दधन्सुदिव्यममलं हस्तास्यपङ्केरुहम्॥ सूर्येन्द्वग्निविलोचनं करतलैः पाशाक्षसूत्राङ्कुशाम्भोजं बिभ्रतमक्षयं पशुपतिं मृत्युञ्जयं संस्मरे॥ इति ध्यात्वा। मानसोपचारैः सम्पूज्य मालाञ्च सम्पूज्य जपं कुर्यात्॥

अथ षट्प्रणवसंयुक्तः श्रीमृत्युञ्जयमन्त्रः—ॐ हौं जूं सः ॐभूर्भुवः स्वः ॐत्र्यं॑म्बकँय्यजामहेसुग॒न्धिम्पुष्टि॒व॑र्द्धनम्। उ॒र्वा॒रु॒कमिं॑व॒बन्धनान्मृ॒त्त्योर्म्मुं॑क्षीयमा॒मृता॑त्॥ ॐस्वः भुवः भूः ॐ सः जूं हौं ॐ॥ जपानन्तरं पूर्ववन्न्यासान्कृत्वा

हस्ते जलं गृहीत्वा । अनेन अमुकसङ्ख्याककृतेन श्रीमहामृत्युञ्जयमन्त्रजपकर्मणा श्रीमहामृत्युञ्जयः प्रीयताम् ॥ इति जलं समर्प्य ॥ ततः प्रार्थयेत् ॥ मृत्युञ्जय महादेव त्राहि मां शरणागतम् । जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥ तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड । इति विज्ञाप्य देवेशं जपेन्मन्त्रं तु त्र्यम्बकम् ॥

चतुर्दशप्रणवसंयुक्तो मन्त्रो यथा—ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्य॑म्बकँय्यजामहेसुग॒न्धिं पु॒ष्टि॒वर्द्ध॑नम् । उ॒र्वा॒रु॒कमि॑व॒बन्ध॑नान्मृ॒त्त्योर्म्मु॑क्षीय॒मामृता॑त् ॥ ॐ स्वः ॐ भुवः ॐ भूः ॐ सः ॐ जूं ॐ हौं ॐ ॥

अथ पुराणोक्तमन्त्रः—मृत्युञ्जय महादेव त्राहि मां शरणागतम् । जन्ममृत्युजराव्याधिपीडितं कर्मबन्धनैः ॥

॥ इति मृत्युञ्जय (मृतसञ्जीवन) जपविधिः ॥

अथ श्रेयोदानविधिः ॥

ब्राह्मणः सपत्नीकं यजमानं प्राङ्मुखमुपवेश्य भाले तिलकं कृत्वा शान्तिसूक्तं पठित्वा आचमनं प्राणायामञ्च कारयित्वा “श्रीमन्महा० इत्यारभ्य सर्वकार्यार्थे०” इत्यन्तं पठित्वा सङ्कल्पं कारयेत् ॥

सङ्कल्पः—विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भग० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मया ब्राह्मणद्वारा कृतस्य अमुककर्मणः साङ्गतासिद्ध्यर्थं श्रेयोग्रहणं करिष्ये ॥

ततो हस्ते जलं गृहीत्वा ब्राह्मणः सङ्कल्पं कुर्यात् ॥ अद्येत्यादि० शुभपुण्यतिथौ मया भवन्नियोगेन कृतस्य अमुककर्मणः साद्गुण्यार्थं श्रेयोदानं करिष्ये ॥ इति सङ्कल्पं कृत्वा यजमानः पत्न्या सह श्रेयोग्रहणार्थं स्थितश्चेत् तस्य पत्नी पत्युरञ्जलेरधस्तात् स्वाञ्जलिं धारयेत् ॥ ब्राह्मणो सपत्नीकस्य यजमानस्याञ्जलौ सुप्रोक्षितादिकं कुर्यात् ॥

तद्यथा—शिवा आपः सन्तु, सन्तु शिवा आपः । सौमनस्यमस्तु, अस्तु सौमनस्यम् । अक्षतं चारिष्टञ्चास्तु, अस्त्वक्षतमरिष्टञ्च । गन्धाः पान्तु, सौमङ्गल्यं चास्तु । अक्षताः पान्तु, आयुष्यमस्तु । पुष्पाणि पान्तु, सौश्रियमस्तु ॥ ततो ब्राह्मणो हस्ते जलं गृहीत्वा "यत्पापमरोगमशुभमकल्याणं तद्दुरे प्रतिहतमस्तु" इति वदन् यजमानस्याञ्जल्युपरि प्रदक्षिणं जलं कारयित्वाऽधः प्रक्षिपेत् ॥ पुनर्द्विवारमेवं वदन् जलं प्रदक्षिणं कारयित्वाऽधः प्रक्षिपेत् ॥

ततो यजमानः स्वाञ्जलौ सुप्रोक्षितं पुष्पादिकं पात्रे निक्षिप्य पूर्ववदञ्जलिं बद्ध्वा श्रेयोग्रहणं कुर्यात् ॥

ब्राह्मणः एकस्मिन्पात्रे जलं नालिकेरादिकञ्च गृहीत्वा ॥ अद्येत्यादि० शुभपुण्यतिथौ "भवन्नियोगेन मया यत्कृतम्

---

१ ग्रहशान्तिकर्म ॥ अमुकग्रहस्यामुकसङ्ख्याकजपकर्म अथवा अमुकग्रहस्य जपेन सह तत्तद्दशांशेन होमादिकं कर्म । श्रीसाम्बशिवप्रीतये अभिषेकात्मकरुद्राभिषेककर्म, लघुरुद्राभिषेककर्म, महारुद्रकर्म वा । यदि अन्यैर्ब्राह्मणैः सह वा तत्तत्कर्म कृतञ्चेत् "एभिर्ब्राह्मणैः सह" इति पदं तत्र विशेषतया देयम् ॥

अमुककर्म तत्कर्मणो यदुत्पन्नं श्रेयः तत् सजलेन सफलेन च तुभ्यमहं सम्प्रददे तेन श्रेयसा त्वं श्रेयस्वी भव" ॥ इति जलं नालिकेरादिकम् अञ्जलौ दद्यात् ॥ "भवामि" इति यजमानो वदेत् । ततो यजमानो ब्राह्मणाय दक्षिणाप्रदानं कुर्यात् ॥ ततो ब्राह्मणः सपत्नीकाय आशीर्वादं प्रयच्छेत् ।

इति श्रेयोदानविधिः ॥

अथ गोपालसन्तानमन्त्रजपविधिः ॥

कर्ता आचमनं प्राणायामञ्च कृत्वा गणपत्यादिदेवान्स्मृत्वा सङ्कल्पं कुर्यात् ॥ विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो० इत्यादिकं पठित्वा एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममात्मनः (मम यजमानस्य वा) श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं मम गृहे (ममामुकयजमानस्य गृहे वा) पुत्रसन्ततिप्राप्त्यर्थं लक्षात्मकं श्रीगोपालसन्तानमंत्रस्य जपानुष्ठानाख्यं कर्म करिष्ये ॥ इति प्रधानसङ्कल्पं कृत्वा पुनः प्रत्यहं पूर्ववद्देशकालौ सङ्कीर्त्य सङ्कल्पं कुर्यात् ॥

नित्यसङ्कल्पः—अद्येत्यादि० शुभपुण्यतिथौ मया कृतस्य गोपालसन्तानमंत्रस्य जपकर्मणः साङ्गतासिद्ध्यर्थं तत्संख्यापरिपूर्त्तये अमुकसंख्याकं जपमहं करिष्ये ॥ इति सङ्कल्प्य पुनर्जलं गृहीत्वा विनियोगसङ्कल्पं कुर्यात् ।

अस्य श्रीगोपालसन्तानमन्त्रस्य । नारद ऋषिः । अनुष्टु-

च्छन्दः । सन्तानप्रदः श्रीकृष्णो देवता । मम (यजमानस्य वा) पुत्रप्राप्त्यर्थं जपे विनियोगः ॥

अथ षडङ्गन्यासाः ॥ "ॐ देवकीसुत" अङ्गुष्ठाभ्यां नमः । "गोविन्द" तर्जनीभ्यां नमः । "वासुदेव" मध्यमाभ्यां नमः । "जगत्पते" अनामिकाभ्यां नमः । "देहि मे तनयं कृष्ण" कनिष्ठिकाभ्यां नमः । "त्वामहं शरणं गतः" इति करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादिन्यासाः ॥ "ॐ देवकीसूत" हृदयाय नमः "गोविन्द" शिरसे स्वाहा । "वासुदेव" शिखायै वषट् ॥ "जगत्पते" कवचाय हुम् । "देहि मे तनयं कृष्ण" नेत्रत्रयाय वौषट् । "त्वामहं शरणं गतः" अस्त्राय फट् ॥

अथ ध्यानम् ॥ विजयेन युतो रथस्थितः प्रसमानीय समुद्रमध्यतः । प्रददौ तनयान्द्विजन्मनः स्मरणीयो वसुदेवनन्दनः ॥ इति ध्यात्वा मानसोपचारैः सम्पूज्य मालाञ्च सम्पूज्य मनसा (यजमानस्य) अभीष्टं चिन्तयन् मंत्रं जपेत् ॥ अथ मन्त्रः ॥ देवकीसूत गोविन्द वासुदेव जगत्पते । देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ जपसमाप्तौ पुनर्हृदयादिषडङ्गन्यासान्कृत्वा जपनिवेदनं कुर्यात् ॥ अनेन श्रीगोपालसन्तानमन्त्रस्य असुकसङ्ख्याजपकर्मणा मन्त्राधिष्ठितः श्रीकृष्णः प्रीयतां न मम ॥ एवं लक्षजपं समाप्य तद्दशांशेन मधुरप्लुतैस्तिलैर्हवनं तद्दशांशेन तर्पणादिकञ्च कुर्यात् ॥

इति गोपालसन्तानमन्त्रजपविधिः ॥

॥ श्रीमहिम्नस्तोत्रम् ॥

महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः । अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्ममाप्येषः स्तोत्रे हर ! निरपवादः परिकरः ॥ १ ॥ अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि । स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २ ॥ मधुस्फीता वाचः परमममृतं निर्मितवतस्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् । मम त्वेतां वाणीं गुणकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मिन्पुरमथन बुद्धिर्व्यवसिता ॥ ३ ॥ तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तं तिसृषु गुणभिन्नासु तनुषु । अभव्यानामस्मिन्वरद रमणीयामरमणीं विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥ ४ ॥ किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं किमाधारो धाता सृजति किमुपादान इति च । अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५ ॥ अजन्मानो लोकाः किमवयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिरनादृत्य भवति । अनीशो वा कुर्याद्भुवनजनने कः परिकरो यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥ त्रयी सांख्यं योगः पशुपतिमतं वैष्णव-

मिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च । रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ ७ ॥ महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः कपालं चेतीयत्तव वरद तन्त्रोपकरणम् । सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥ ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये । समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव स्तुवन्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥ ९ ॥ तवैश्वर्यं यत्नाद्यदुपरि विरञ्चिर्हरिरधः परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः । ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥ १० ॥ अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् । शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥ ११ ॥ अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः । अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः ॥ १२ ॥ यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनः । न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयोर्न कस्या उन्नत्यै भवति शिरसस्त्वय्य-

नवतिः ॥ १३ ॥ अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः । स कल्माषः कण्ठे तव न कुरुते न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥ १४ ॥ असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्त्तन्ते नित्यं जगति जयिनो यस्य विशिखाः । स पश्यन्नीश त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः ॥ १५ ॥ मही पादाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् । मुहुर्द्यौर्दौःस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥ १६ ॥ वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते । जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥ १७ ॥ रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति । दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥ १८ ॥ हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् । गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥ १९ ॥ क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म प्रध्वस्तं फलति पुरुषा-

राधनमृते । अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः ॥ २० ॥ क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः । क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥ २१ ॥ प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा । धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥ २२ ॥ स्वलावण्याशंसाघृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि । यदि स्त्रैणं देवी यमनिरत देहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥ २३ ॥ श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः । अमङ्गल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तृणां वरद परमं मङ्गलमसि ॥ २४ ॥ मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः । यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥ २५ ॥ त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वसु धरणिरात्मा त्वमिति च । परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि

॥ २६ ॥ त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति । तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥ २७ ॥ भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहाँस्तथा भीमेशानाविति यदभिधानाष्टकमिदम् । अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते ॥ २८ ॥ नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः । नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥ २९ ॥ बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः प्रबलतमसे तत्संहारे हराय नमो नमः । जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥ ३० ॥ कृशपरिणति चेतः क्लेशवश्यं क्व चेदं क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः । इति चकितममन्दीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥ ३१ ॥ असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी । लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश पारं न याति ॥ ३२ ॥ असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य । सकलगणवरिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥ ३३ ॥

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्पठति परमभक्त्या शुद्धचित्तः पुमान्यः । स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र प्रचुरतरधनायुःपुत्रवान्कीर्तिमांश्च ॥ ३४ ॥ महेशान्नापरो देवो महिम्नो नापरा स्तुतिः । अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥ ३५ ॥ दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः । महिम्नः स्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥ ३६ ॥ कुसुमदशननामा सर्वगन्धर्वराजः शिशुशशिधरमौलेर्देवदेवस्य दासः । स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥ ३७ ॥ सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः । व्रजति शिवसमीपं किंनरैः स्तूयमानः स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥ ३८ ॥ आसमासमिदं स्तोत्रं पुण्यं गन्धर्वभाषितम् । अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ॥ ३९ ॥ इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः । अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥ ४० ॥ तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर । यादृशोऽसि महादेव तादृशाय नमो नमः ॥४१॥ एककालं द्विकालं वा त्रिकालं यः पठेन्नरः । सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥ ४२ ॥ श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण । कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति तपभूतिर्महेशः ४३॥

॥ इति श्रीमहिम्नः स्तोत्रं सम्पूर्णम् ॥

अथ पुराणोक्तं पुरुषसूक्तम् ॥

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ॥ नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥१॥ देवानां दानवानाञ्च सामान्यमधिदैवतम् ॥ सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ॥२॥ एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा ॥ अव्यक्तश्चानुमन्ता च गुणमायासमावृतः ॥ ३ ॥ संसारसागरं घोरमनन्तं क्लेशभाजनम् ॥ त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ॥ ४ ॥ न ते रूपं न चाकारो नायुधानि न चास्पदम् ॥ तथापि पुराषाकारो भक्तानां त्वं प्रकाशसे ॥५॥ नैव किंचित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचित् ॥ नैव किंचिदसाध्यं ते न च साध्योऽसि कस्यचित् ॥ ६ ॥ कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ॥ योगिनां परमा सिद्धिः परमं ते पदं विदुः ॥ ७ ॥ अहं भीतोऽस्मि देवेश संसारेऽस्मिन्भयावहे ॥ त्राहि मां पुंडरीकाक्ष न जाने परमं पदम् ॥ ८ ॥ कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ॥ शरीरे च गतौ चापि वर्तते मे महद्भयम् ॥ ९ ॥ त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ॥ विज्ञानं यदिदं प्राप्य यदिदं ज्ञानमर्जितम् ॥ १० ॥ जन्मान्तरेऽपि मे देव मा भूदस्य परिक्षयः ॥ दुर्गतावपि जातस्य त्वद्गतो मे मनोरथः ॥ ११ ॥ यदि नाथं च विंदेत तावतास्मिन् कृती सदा ॥ कामये विष्णुपादौ तु सर्वजन्मसु केवलम् ॥१२॥ पुरुषस्य हरेः सूक्तं स्वर्ग्यं धन्यं यशस्करम् ॥ आत्मज्ञानमिदं पुण्यं योगध्यानमिदं परम् ॥ १३ ॥ ध्येयः

सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ॥ केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ १४ ॥ एतत्तु यः पठति केवलमेव सूक्तं नारायणस्य चरणावभिवन्द्यवन्द्यौ ॥ पाठेन तेन परमेण सनातनस्य स्थानं जरामरणवर्जितमेति विष्णोः ॥ ॥ १५ ॥ हविषाग्नौ जले पुष्पैर्ध्यानेन हृदये हरिम् ॥ यजन्ति सूरयो नित्यं जपेच्च रविमण्डले ॥ १६ ॥ बिल्वपत्रं शमीपत्रं पत्रं भृङ्गारकस्य च ॥ मालतीकुशपद्मं च सद्यस्तुष्टिकरं हरेः ॥ १७ ॥ यन्नोपपद्यते किञ्चिद्ध्यानेन मनसैव तु ॥ सम्पद्यते प्रसादात्तु देवदेवस्य चक्रिणः ॥१८॥ पत्रैश्च पुष्पैश्च फलैश्च तोयैरक्रीतलब्धैश्च सदैव सत्सु ॥ भक्त्यैकलभ्ये पुरुषे पुराणे मुक्त्यै किमर्थं क्रियते न यत्नः ॥ १९ ॥ इत्येवमुक्तः पुरुषस्य विष्णोरर्चाविधिर्विष्णुकुमारनाम्ना ॥ मुक्त्यैकमार्गप्रतिबोधनाय दृष्ट्वा विधानं त्विह नारदोक्तम् ॥ २० ॥ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ २१ ॥ लक्ष्मीकलत्रं शतपत्रनेत्रं पूर्णेन्दुवक्त्रं पुरुषोत्तमं च ॥ कारुण्यपात्रं कमनीयगात्रं वन्दे पवित्रं वसुदेवसुनुम् ॥ २२ ॥ स्तुतिपाठः ॥ वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते, दैत्यान्दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ॥ पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

॥ इति पुराणोक्तं पुरुषसूक्तं समाप्तम् ॥

अथ 'गणेशाथर्वशीर्षम्'—ॐ नमस्ते । गणपतये त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्त्तासि । त्वमेव केवलं धर्त्तासि । त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यम् । ऋतं वच्मि । सत्यं वच्मि । अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् । त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि । सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति ॥ सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक् पदानि ॥ त्वं गुणत्रयातीतः । त्वमवस्थात्रयातीतः । त्वं देहत्रयातीतः । त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवः स्वरोम् । गणादीन्पूर्वमुच्चार्य वर्णादींस्तदनन्तरम् । अनुस्वारः परतरः । अर्धेन्दुलसितम् ।

तारेण रुद्धम् । एतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम् । नादः सन्धानम् । सꣳहिता सन्धिः । सैषा गणेशविद्या । गणक ऋषिः निचृद्गायत्री छन्दः । गणपतिर्देवता ॐ गं गणपतये नमः । एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्ती प्रचोदयात् । एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदञ्च वरदं रदं हस्तैर्बिभ्राणं मूषकध्वजम् । रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् । भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतञ्च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् । एवं ध्यायति यो नित्यं स योगी योगिनां वरः । नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्त्तये नमः । एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते स सर्वतः सुखमेधते । स पञ्चमहापापात्प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायम्प्रातः प्रयुञ्जानो अपापो भवति । सर्वत्राधीयानोऽपविघ्नो भवति । धर्ममर्थं कामं मोक्षञ्च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद्दास्यति । स पापीयान् भवति । सहस्रावर्त्तनाद्यं यं काममधीते । तं

तमनेन साधयेत् । अनेन गणपतिमभिषिञ्चति । स वाग्मी भवति । चतुर्थ्यामनश्नञ्जपति । स विद्यावान् भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति । यो दूर्वाङ्कुरैर्यजति । स वैश्रवणोपमो भवति । यो लाजैर्यजति । स यशोवान् भवति । स मेधावान् भवति । यो मोदकसहस्रेण यजति । स वाञ्छितफलमवाप्नोति । यः साज्यसमिद्भिर्यजति । स सर्वं लभते स सर्वं लभते । अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा । सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा । सिद्धमन्त्रो भवति । महाविघ्नात्प्रमुच्यते । महादोषात्प्रमुच्यते । महाप्रत्यवायात्प्रमुच्यते । स सर्वविद्भवति । स सर्वविद्भवति ॥ य एवं वेद । इत्युपनिषत् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ इति गणेशाथर्वशीर्षम् ॥

अथ 'नारायणाथर्वशीर्षम्'—अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति । नारायणात्प्राणो जायते । मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी । नारायणाद्ब्रह्मा जायते । नारायणाद्विष्णुर्जायते । नारायणाद्रुद्रो जायते । नारायणादिन्द्रो जायते । नारायणात्प्रजापतिः प्रजायते । नारायणाद्द्वादशादित्या रुद्रा वसवः सर्वाणि छन्दांसि । नारायणाद्देवाः समुत्पद्यन्ते । नारायणात्प्रवर्तन्ते । नारायणे प्रलीयन्ते । अथादित्यो

नारायणः । ब्रह्मा नारायणः । शिवश्च नारायणः । शक्रश्च नारायणः । कालश्च नारायणः । दिशश्च नारायणः । ऊर्ध्वं च नारायणः । अधश्च नारायणः । अन्तर्बहिश्च नारायणः । नारायण एवेदꣳसर्वं यद्भूतं यच्च भाव्यम् । निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् । य एवं वेद । स विष्णुरेव भवति । ॐ इत्यग्रे व्याहरेत् । नम इति पश्चात् । नारायणायेत्युपरिष्टात् । ॐ इत्येकाक्षरम् । नम इति द्वे अक्षरे । नारायणायेति पञ्चाक्षराणि । एतद्वै नारायणस्याष्टाक्षरं पदम् । यो ह वै नारायणस्याष्टाक्षरं पदमध्येति । अनुपब्रतः सर्वमायुरेति । विन्दते प्रजां रायस्पोषं गोपत्यम् । ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति । प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम् । अकार उकारो मकार इति । तानेकधा संयोज्य तदेव तदोमिति । यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् । ॐ नमो नारायणायेति मन्त्रोपासको वैकुण्ठभुवनं गच्छति । तदिदं परमं पुण्डरीकं विज्ञानघनम् । तस्मात्तडिदाभमात्रम् । ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः । सर्वभूतस्थमेकं वै नारायणम् । कारणरूपं परब्रह्मकम् । एतदथर्वशीर्षं योऽधीते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो अपापो

भवति । मध्यन्दिनमादित्याभिमुखोऽधीयानः सद्यः पञ्चमहापातकोपपातकेभ्यो मुच्यते । सर्ववेदपारायणपुण्यं लभते । श्रीनारायणसायुज्यमवाप्नोति । य एवं वेद । इत्युपनिषत् ॥ इति नारायणाथर्वशीर्षम् ॥

अथ 'शिवाथर्वशीर्षम्–'(शिर उपनिषत्)– ॐ देवा ह वै स्वर्गलोकमायंस्ते रुद्रमपृच्छन् को भवानिति । सोऽब्रवीदहमेकः प्रथममासोद्वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इति । सोऽन्तरादन्तरं प्राविशद्दिशश्चान्तरं प्राविशत्सोऽहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्मा ब्रह्माहं प्राञ्चः प्रत्यञ्चोऽहं दक्षिणाञ्च उदञ्चोऽहमधश्चोर्ध्वश्चाहं दिशश्च प्रतिदिशश्चाहं पुमानपुमान् स्त्रियश्चाहं सावित्र्यहं गायत्र्यहं त्रिष्टुब्जगत्यनुष्टुप् चाऽहं छन्दोऽहं सत्योऽहं गार्हपत्यो दक्षिणाग्निराहवनीयोऽहं गौरहं गौर्यहमृगहं यजुरहं सामाहमथर्वाङ्गिरसोऽहं ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमास्वरों नम इति ॥ ६ ॥ य इदमथर्वशिरो ब्राह्मणोऽधीते । अश्रोत्रियः श्रोत्रियो भवति । अनुपनीत उपनीतो भवति । सोऽग्निपूतो भवति । स वायुपूतो भवति । स सूर्यपूतो भवति । स सोमपूतो भवति । स सत्यपूतो भवति । स सर्वैर्देवैर्ज्ञातो भवति । स सर्वैर्वेदैरनुध्यातो भवति । स सर्वेषु तीर्थेषु स्नातो भवति । तेन सर्वैः ऋतुभिरिष्टं भवति । गायत्र्याः षष्टिसहस्राणि जप्तानि

भवन्ति । प्रणवानामयुतं जप्तं भवति । स चक्षुषः पङ्क्तिं पुनाति । आसप्तमात् पुरुषयुगान्पुनातीत्याह भगवानथर्वशिरः सकृज्जप्त्वैव शुचिः स पूतः कर्मण्यो भवति । द्वितीयं जप्त्वा गणाधिपत्यमवाप्नोति । तृतीयं जप्त्वैवमेवानुप्रविशत्यों सत्यमों सत्यमों सत्यम् । इत्यथर्ववेदे शिवाथर्वशीर्षम् ॥ (इति शिर उपनिषत्) ॥

अथ 'सूर्याथर्वशीर्षम्'—अथ सूर्याथर्वाङ्गिरसं व्याख्यास्यामः । ब्रह्मा ऋषिः । आदित्यो देवता । गायत्री छन्दः । हंसाद्यग्निनारायणयुक्तं बीजम् । हृल्लेखा शक्तिः । द्विपदादिसर्गसंयुक्तं कीलकम् । धर्मार्थकाममोक्षेषु जपे विनियोगः । षट्स्वरारूढबीजेन षडङ्गं रक्ताम्बुजसंस्थितं सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं च श्रीसूर्यनारायणं यऽएवं वेद स वै ब्राह्मणः ॥ ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः । ॐ जनः । ॐ तपः । ॐ सत्यम् । ॐ तत्सवि० । परोरजसेसावदोम् । ॐ आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् । सूर्य आत्मा जगतस्तस्थुषश्च । सूर्याद्वै खल्विमानि भूतानि जायन्ते । सूर्याद्यज्ञाः पर्जन्योऽन्नमात्मा । नमस्ते आदित्याय त्वमेव केवलं कर्त्तासि । त्वमेव प्रत्यक्षं विष्णुरसि । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं रुद्रोऽसि । त्वमेव प्रत्यक्षमृगसि । त्वमेव प्रत्यक्षं यजुरसि । त्वमेव प्रत्यक्षं सामासि । त्वमेव

प्रत्यक्षमथर्वासि । त्वमेव सर्वं छन्दोसि । आदित्याद्वायुर्जायते । आदित्याद्भूमिर्जायते । आदित्यादापो जायन्ते । आदित्याज्ज्योतिर्जायते । आदित्याद्व्योम दिशो जायन्ते । आदित्याद्वेदा जायन्ते । आदित्याद्देवा जायन्ते । आदित्यो वा एष एतन्मण्डलं तपति । असावादित्यो ब्रह्म । आदित्योऽन्तःकरणमनोबुद्धिचित्ताहङ्काराः । आदित्यो वै व्यानसमानोदानापानप्राणाः । आदित्यो वै श्रोत्रत्वक्चक्षूरसनानासाः । आदित्यो वै वाक्पाणिपादोपस्थपायूनि । आदित्यो वै शब्दस्पर्शरूपरसगन्धाः ॥ आदित्यो वै वचनादानगमनानन्दविसर्गाः । आनन्दमयो ज्ञानमयो विज्ञानमय आदित्यः । नमो मित्राय भानवे मृत्योर्मा पाहि भ्राजिष्णवे विश्वहेतवे नमः । सूर्यो नो दिवस्पातु वातो अन्तरिक्षात् । अग्निर्नः पार्थिवेभ्यः । सूर्याद्भवन्ति भूतानि । सूर्येण पालितानि तु । सूर्ये लयं प्राप्नुवन्ति । यः सूर्यः सोहमेव च । चक्षुर्नो देवः सविता । चक्षुर्न उत पर्वतः । चक्षुर्धाता दधातु नः । आदित्याय विद्महे सहस्रकराय धीमहि । तन्नः सूर्यः प्रचोदयात् । सविता पश्चात्तात् । सविता पुरस्तात् । सवितोत्तरात्तात् । सविताधरात्तात् । सविता नः सुवतु सर्वतातिम् । सवितानो रासतां दीर्घमायुः । ओमित्येकाक्षरं ब्रह्म । घृणिरिति द्वे अक्षरे । सूर्य इत्यक्षरद्वयम् । आदित्य इति त्रीण्यक्षराणि । एतद्वै

सूर्यस्याष्टाक्षरं मनुम् । यः सदाऽहरहर्जपति । सो ब्रह्मण्यो ब्राह्मणो भवति । सूयाभिमुखं जप्त्वा महाव्याधिभयात्प्रमुच्यते । अलक्ष्मीर्नश्यति । अभक्ष्यभक्षणात्पूतो भवति । अपेयपानात्पूतो भवति । अगम्यागमनात्पूतो भवति । ब्रात्यसम्भाषणात्पूतो भवति । मध्याह्ने सूर्याभिमुखः पठेत् । सद्यः पञ्चमहापापात्प्रमुच्यते । सैषा सावित्री विद्या न कस्यचित्प्रशंसेत् । एतन्महोभागः प्रातः पठति स भाग्यवान् जायते । पशून् विन्दति वेदार्थं लभते । त्रिकालं जप्त्वा क्रतुशतफलं प्राप्नोति । हस्तादित्ये जपति स महामृत्युं तरति । य एवं वेद । इत्युपनिषत् ॥ इति सूर्याथर्वशीर्षम् ॥

अथ 'देव्यथर्वशीर्षम्—ॐ सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवी ॥ साब्रवीदहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् । शून्यं चाशून्यं च अहमानन्दानानन्दौ अहं विज्ञानाविज्ञाने अहं ब्रह्माब्रह्मणी द्वे ब्रह्मणी वेदितव्ये । इति वाऽथर्वणी श्रुतिः । अहं पञ्चभूतानि अहं पञ्चतन्मात्राणि अहमखिलं जगत् । वेदोहमवेदोहम् विद्याहमविद्याहम् अजाहमनजाहम् अधश्चोर्ध्वं च तिर्यक्चाहम् अहꣳरुद्रेभिर्वसुभिश्चरामि अहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणावुभौ बिभर्मि अहमिन्द्राग्नी अहमश्विना उभौ । अहꣳ सोमं त्वष्टारं पूषणं भगं दधामि अहं विष्णुमुरुक्रमं ब्रह्माणमुतप्रजापतिं दधामि अहं दधामि द्रविणꣳ हविष्मते

सुप्राव्ये यजमानाय सुव्रते। अहꣳ राज्ञी सङ्गमनी वसूनाम्। चिकितुषी प्रथमा यज्ञियानाम्। अहꣳ सुवे पितरमस्य मूर्द्धन्मम योनिरप्स्वान्तः समुद्रे। य एवं वेद सदैवीꣳ सम्पदमाप्नोति। ते देवा अब्रुवन्। नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥ तामग्निवर्णां तपसा ज्वलन्तीं वरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देवीं शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै ते नमः। देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। सानो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु॥ कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम्। सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम्॥ महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि। तन्नो देवी प्रचोदयात्। अदितिर्ह्यजनिष्ट दक्षया दुहिता तव। तां देवा अन्वजायन्त भद्रा अमृतबन्धवः॥ कामे योनिः कमला वज्रपाणिर्गुहाहंसा मातलिश्वाभ्रमिन्द्रः। पुनर्गुहा सकला मायया चापृथक्क्लेशा विश्वमातादिविद्याः॥ एषात्मशक्तिः। एषा विश्वमोहिनी पाशाङ्कुशधनुर्बाणधरा। एषा श्रीमहाविद्या। य एवं वेद स शोकं तरति। नमस्ते भवगति मातरस्मान्पाहि सर्वतः। सैषा वैष्णवा वसवः सैवैकादश रुद्राः सैषा द्वादशादित्याः सैषा विश्वेदेवाः सोमपा असोमपाश्च सैषा यातुधाना असुरा रक्षांसि पिशाचयक्षसिद्धाः सैषा

ग्रहनक्षत्रज्योतिष्कलाकाष्ठादिविश्वरूपिणी तामहं प्रणौमि नित्यम् । पापापहारिणी देवी भुक्तिमुक्तिप्रदायिनी । अनन्तां विजयां शुद्धां शरण्यां सर्वदा शिवाम् ॥ वियदाकारसंयुक्तं वीतिहोत्रसमन्वितम् । अर्द्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम् ॥ एवमेकाक्षरं मन्त्रं यतयः शुद्धचेतसः । ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः ॥ वाङ्मया ब्रह्मभूस्तस्मात् षष्ठवक्त्रसमन्वितम् ॥ सूर्यो वामश्रोत्रबिन्दुसंयुक्ताष्टतृतीयकम् ॥ नारायणेन संमिश्रो वायुश्चाधारयुक्तयः । विच्चे नवार्णकोणस्य महानानन्ददायकः ॥ हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम् । पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम् ॥ त्रिनेत्रां रक्तवसनां भक्तकामदुहं भजे । भजामि त्वां महादेवि महाभयविनाशिनि ॥ महादारिद्र्यशमनी महाकारुण्यरूपिणी । यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्ता । यस्या लक्षं नोपलक्ष्यते तस्मादुच्यते अलक्षा । यस्या जननं नोपलक्ष्यते तस्मादुच्यते अजा । एकैव सर्वत्र वर्त्तते तस्मादुच्यते एका । एकैव विश्वरूपिणी तस्मादुच्यतेऽनेका । अत एवोच्यतेऽज्ञेयाऽनन्तालक्षाजैकानेका । मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी । ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी ॥ यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्त्तिता । तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् ॥ नमामि भव-

भीतोऽहं संसारार्णवतारिणीम् ॥ इदमथर्वशीर्षं योऽधीते । स पञ्चाथर्वशीर्षफलमाप्नोति । इदमथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति । शतलक्षं प्रजप्त्वाऽपि नार्चासिद्धिं च विन्दति । शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः । दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते । महादुर्गाणि तरति महादेव्याः प्रसादतः ॥ सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो अपापो भवति । निशीथे तुरीयसन्ध्यायां जप्त्वा वाक्सिद्धिर्भवति । नूतनायां प्रतिमायां जप्त्वा देवतासान्निध्यं भवति । भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति स महामृत्युं तरति । य एवं वेद इत्युपनिषत् ॥ इति देव्यथर्वशीर्षम् ॥

'श्रीसूक्तम्'—ॐ हिर॑ण्यवर्णां॒ हरि॑णीं सुव॒र्ण॑रज॒तस्र॑जाम् । च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒माव॑ह ॥ १ ॥ तां म॒ऽआव॑ह जातवेदो ल॒क्ष्मीमन॑पगा॒मिनी॑म् । यस्यां हिर॑ण्यं वि॒न्देयं॒ गाम॑श्वं॒ पुरु॑षान॒हम् ॥ २ ॥ अ॒श्व॒पू॒र्णां॑[1] र॑थम॒ध्यां ह॒स्तिना॑दप्र॒मोदि॑नीम् । श्रियं॑ दे॒वीमुप॑ह्वये॒ श्रीर्मा॑ दे॒वीर्जु॑षताम् ॥ ३ ॥ काँ॒सो॒स्मि॒तां हिर॑ण्यप्रा॒कारा॑मा॒र्द्रां ज्वल॑न्तीं तृ॒प्तां त॒र्पय॑न्तीम् । प॒द्मे स्थि॒तां प॒द्मव॑र्णां॒ तामि॒होप॑ह्वये श्रिय॑म् ॥ ४ ॥ च॒न्द्रां प्र॑भा॒सां य॒शसा॒ ज्वल॑न्ती॒ं श्रियं॑

---

[1] अत्र "अश्वपूर्वाम्" इत्यपि पाठः ॥

लोके देवजुष्टामुदाराम् । तां पद्मनेमिं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥ ५ ॥ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसानुदन्तु मायांतरायाश्च बाह्याऽअलक्ष्मीः ॥६॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतो सुराष्ट्रेऽस्मिन् कीर्तिं वृद्धिं ददातु मे ॥७॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ ८ ॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥ मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥ कर्दमेन प्रजाभूता मयि सम्भ्रम कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥ आपः स्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे । नीच देवीं मातरं श्रियं वासय मे कुले ॥१२॥ आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥१३॥ आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥१४॥ तां मऽआवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतिं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥ १५ ॥ यः शुचिः प्रयतो भूत्वा

---

१ अत्र "म आवह" इत्यपि पाठः ॥

जुहुयादाज्यमन्वहम् । सूक्तं पञ्चदशर्चञ्च श्रीकामः सततं जपेत् ॥ १६ ॥ सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे । भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १७ ॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ॥ धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्विनौ ॥ १८ ॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा । सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ १९ ॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ २० ॥ पद्मानने पद्मऊरू पद्माक्षी पद्मसम्भवे । तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥ २१ ॥ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् । विष्णुप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ २२ ॥ महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥ २३ ॥ पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि । विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥ २४ ॥ आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः । ऋषयः श्रियपुत्राश्च मयि श्रीर्देवी देवता ॥ २५ ॥ ऋणरोगादि दारिद्र्यं पापञ्च ह्यपमृत्यवः । भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥ २६ ॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ २७॥ इति श्रीसूक्तम् ॥

पं० प्रेम दत्त शास्त्री

जहांगीराबाद २.२३६४

जनन्य (शक्त्य) पराधक्षमायाचनास्तोत्रम् ।

रचयिता-आचार्य अमृतलाल त्रीकमजी शास्त्री (जामनगरनिवासी)

यदाऽऽसन्ते गर्भे जननि ! तत आरभ्य नियमा धृता मद्वृद्ध्यर्थं सुखमपि विहायैव सकलम् ॥ मया तु त्वत्कुक्षिज्वलनपरितापेन लुठता प्रहाराः क्षन्तव्या बत जननि ! पद्भ्यां बहु कृताः ॥ १ ॥ सदा विण्मूत्राद्यैः स्वपिषि शयने मे परिवृते ह्यनल्पे तल्पे स्वे गदजनिभिया शाययसि माम् ॥ रुदन्तं श्रुत्वा मां क्षणमपि न निद्रां श्रितवती गृहीत्वा स्वोत्सङ्गे त्वमपि निशि जागर्षि जननि ! ॥ २ ॥ कदाचिद्व्याधिर्मे श्लथयति शरीरं यदि तदा परीता त्वं दुःखैः सकलगृहकृत्यं विसृजसि ॥ सपर्यां देवानां विविधविधिबल्यादिसहितां तथाऽन्योपायाँश्चाप्यनशनमपि त्वं प्रकुरुषे ॥ ३ ॥ यदा मां पत्न्या त्वं सह परिवृतं पश्यसि तदा सुखौघैः सम्पूर्णा त्रिभुवनसुखं त्वञ्च मनुषे ॥ कदाचिन्मां जाता नहि नियतिदोषेण तनयास्तदानीं त्वं धत्से पितृगणसपर्याञ्च विविधाम् ॥ ४ ॥ मदीया पत्नी त्वां गणयति कदाचिन्न हि तदा स्वकीयं गृह्णासि ह्युत नियतिदोषञ्च मनसा ॥ कदाचिच्चोक्तानि श्रवणकटुवाक्यान्यपि मया तदा तु त्वं मूका भवसि नहि किञ्चित्प्रवदसि ॥ ५ ॥ परित्यक्त्वा सौख्यं सकलधनसंपत्तिसहितं त्वयोपायास्ते ते मम सुखसमृद्ध्यै च विहिताः ॥ न विस्मर्तुं योग्या अपि मम तु वर्षायुतगणैः कथं कुर्यां तेषां जननि ! कथय प्रत्युपकृतिम् ॥ ६ ॥ यथेयं मेऽम्बाऽऽस्ते त्वमपि जनयित्री त्रिजगतां त्वयाऽतोऽहं त्यक्तुं नहि नहि सुयोग्यो भगवति ॥ भवानि ! स्यान्मे त्वच्चरणयुगलं क्वब्धितरणे सुपुत्रं दुष्पुत्रं त्यजति नहि माता क्वचिदपि ॥ ७ ॥ भवाब्धौ मग्नानां सकलविबुधेष्वग्र्यपदभाक् समुद्धर्तुं ह्येका जगति कथिता त्वं भगवति ! ॥ महामाये ! मातस्त्वमपि यदि मां पश्यसि नहि क्व गन्ताऽहं त्वं तत् कथय भुवि कं देवि ! शरणम् ॥ ८ ॥ पिता त्वं माता त्वं विधिहरिहरेन्द्रास्त्वमपि मे तथा बन्धुश्चाप्तस्त्वमसि मम सर्वञ्च जगति ॥ न सेवेऽन्यं देवं कथमपि न जानेऽन्यशरणं यथायोग्यं यत्तज्जननि ! कुरु चाप्तोऽस्मि पदयोः ॥ ९ ॥ स्तोत्रमेतन्मया प्रीत्यै मातस्ते रचितं शुभम् ॥ प्रसादस्ते सदा भूयाज्जपतां प्रीतिपूर्वकम् ॥ १० ॥

इति नित्य-नैमित्तिककर्मसमुच्चयस्य प्रथमो भागः समाप्तः ॥

प० प्रेम दत्त शास्त्री
जहांगीराबाद

नित्य-नैमित्तिकसमुच्चयः ॥

नैमित्तिको द्वितीयो भागः ।

पं० प्रेम दत्त शास
जहांगीराबाद २०२३६
बुलन्दशहर (उ०प्र०)

अथ श्रावणीप्रयोगः ॥

आचार्यः स्वशिष्यैः सह ग्रामाद्बहिः प्राच्यामुदिच्यां वा नद्यादौ गत्वा सङ्कल्पपूर्वकं श्रावणीकर्म कुर्यात् ॥ स्नानार्थं वस्त्रोपवस्त्रे धृत्वा नद्यादौ हस्तौ पादौ प्रक्षाल्य शुभासने प्राङ्मुख उदङ्मुखो वा उपविश्य पवित्रं धृत्वा आचमनं प्राणायामं कुर्यात् ॥ ॐ केशवाय नमः स्वाहा ॥ ॐ नारायणाय नमः स्वाहा ॥ ॐ माधवाय नमः स्वाहा ॥ ॐ गोविन्दाय नम इति हस्तं प्रक्षाल्य ॥ ॐ भूः ॐ भुवः० इति मन्त्रेण प्राणायामं कुर्यात् ॥

सङ्कल्पः— विष्णुर्विष्णुर्विष्णुः । श्रीमद्भगवतो० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ अधीतानामध्येष्यमाणानां चाध्यायानां स्थापनविच्छेदक्रोशघोषणदन्तविवृतदुर्वृत्तद्रुतोच्चारितवर्णानां पूर्वसवर्णानां गलोपलम्बितविवृतोच्चारितवर्णानां श्लिष्टास्पृष्टवर्णविघट्टनादिभिः पठितानां श्रुतीनां यद्यातयामत्वं तत्परिहारार्थं तथाच अष्टत्रिंशदनध्यायाध्ययने रथ्याः सञ्चरतः शूद्रस्य शृण्वतोऽध्ययने म्लेच्छान्त्यजादेः शृण्वतोऽध्ययने अशुचिदेशेऽध्ययने आत्मनोऽशुचित्वेऽध्ययने अक्षरस्वरानुस्वारपदच्छेदकण्डिका-

पं० प्रेम दत्त शास्त्री

व्यञ्जनह्रस्वदीर्घप्लुतकण्ठतालुमूर्धन्यौष्ठ्यदन्त्यनासिकानुनासिकरेफजिह्वामूलीयोपध्मानीयोदात्तस्वरितादीनां व्यत्ययेनोच्चारे माधुर्याक्षरव्यक्तिहीनत्वाद्यनेकप्रत्यवायपरिहारपूर्वकं सर्वस्य वेदस्य सवीर्यत्वसम्पादनद्वारा यथावत्फलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं (सशिष्योऽहं) यजुर्वेदोत्सर्गोपाकर्माहं करिष्ये ॥

ततो गुरोरभिवादनम् ॥ ॐउभाकवी युवा यो नो धर्मः परापतत् ॥ परिसख्यानि धर्मिणो विसख्यानि विसृजामहे ॥

पुनः सङ्कल्पः— अद्येत्यादि० शुभपुण्यतिथौ अध्यायोत्सर्गकर्मनिमित्तं गणस्नानमहं करिष्ये ॥

पुनर्जलं गृहीत्वा ॥ इषेत्वादिखंब्रह्मान्तेषु दशप्रणवसहितेषु याः क्रियास्तत्र विवस्वान् ऋषिः। सर्वाणि छन्दांसि। प्रजापतिर्लिङ्गोक्ता देवता । स्नानादिकर्मसु विनियोगः । इति सङ्कल्प्य नद्या जलं ताम्रपात्रे वा जलं प्रपूर्य प्रार्थयेत् ॥ तीक्ष्ण दंष्ट्रमहाकाय कल्पान्त दहनोपम। भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ १ ॥ नमामि गङ्गे तव पादपङ्कजं सुरासुरैर्वन्दितदिव्यरूपम्। भुक्तिं च मुक्तिश्च ददासि नित्यं भावानुसारेण सदा नराणाम् ॥ २॥ (एवं मन्त्रान्पठित्वादौ तीर्थे स्नानं समाचरेत् । अन्यथाऽर्धफलं तस्य ध्रुवं गृह्णाति तीर्थराट्) पुनः प्रार्थयेत् ॥ उत्तिष्ठन्तु महाभूता ये भूता भूमिवासिनः ॥ भूतानामविरोधेन स्नानकर्म समाचरेत् ॥

अपसर्पन्तु ये भूता ये भूतास्तीर्थदूषकाः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा । आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥ अपामधिपतिस्त्वं च तीर्थेषु वसतिस्तव । वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे ॥ अधिष्ठात्र्यश्च तीर्थानां तीर्थेषु वसतिस्तव । वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ इति सम्प्रार्थ्य तीर्थाभिमन्त्रणादिः नद्यादावुक्तः नित्यस्नानप्रयोगो[1] हेमाद्रिसङ्कल्पश्चात्र[2] कार्यः ॥

एवं देहशुद्धिं कृत्वा धौते वस्त्रोपवस्त्रे धृत्वा कुशकम्बलाद्यन्यतरास्तृते शुभासने प्राङ्मुख उदङ्मुखो वोपविश्य भस्म धृत्वा यथावकाशं (९६ पृष्ठोक्तां) मध्याह्नसन्ध्यां विधाय तथैव तदनन्तरं (९९ पृष्ठोक्तं) सूर्योपस्थानं तदनन्तरं (१०४ पृष्ठोक्तः) ब्रह्मयज्ञप्रयोगः (१०८ पृष्ठोक्तः) देवर्षिमनुष्यपितृतर्पणप्रयोगश्च कृत्वा ऋषिपूजनं कुर्यात् ॥

अथ[3] अरुन्धतीसहितसप्तर्षिपूजनप्रयोगः ॥

काष्ठपीठे श्वेतं वस्त्रं प्रसार्य तण्डुलैरष्टदलं कृत्वा तदु-

---

[1] अयं प्रयोगः नित्यकर्मणः प्रथमे भागे पृ. १५ द्रष्टव्यः ॥ [2] हेमाद्रिसङ्कल्पं कुर्यात् स च २६ पृष्ठे द्रष्टव्यः ॥ [3] कश्यपोऽथ भरद्वाजो गौतमश्चात्रिरेव च ॥ जमदग्निर्वसिष्ठश्च विश्वामित्रो महामनाः ॥ एते देवर्षयः सप्त साध्वी चैवाप्यरुन्धती ॥ अस्मिन्पूजने याज्ञवल्क्यमृषिं स्वगोत्रप्रवर्तकमृषिञ्च पूजयन्ति बहवः ॥

परि अपामार्गमिश्रितैस्त्रिभिस्त्रिभिः कुशैः पृथक् पृथक् गायत्रीमन्त्रं पठित्वा निर्मितान्सप्तर्षीन् अरुन्धतीं स्वगोत्रप्रवर्तकमृषिञ्च स्वसमीपे निधाय विष्णुमपि स्थापयित्वा शान्तिसूक्तं पठित्वा आचमनं प्राणायामं कुर्यात् ॥

आचमनम्—ॐ केशवाय नमः स्वाहा । ॐ नारायणाय नमः स्वाहा । ॐ माधवाय नमः स्वाहा । ॐ गोविन्दाय नम इति हस्तं प्रक्षाल्य ॥ ॐ भूः ॐ भुवः० इति मन्त्रेण प्राणायामं कृत्वा सङ्कल्पं कुर्यात् ॥

सङ्कल्पः—विष्णुर्विष्णुर्विष्णुः । श्रीमद्भगवतो० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ यजुर्वेदोत्सर्गोपाकर्माङ्गभूतम् अरुन्धतीसहितकश्यपादिसप्तर्षिपूजनं करिष्ये ॥

तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं करिष्ये ॥ तत्रादौ दिग्रक्षणं कलशार्चनं शङ्खघंटाद्यर्चनञ्च करिष्ये ॥ इति सङ्कल्प्य (७३ पृष्ठे उक्तं दिग्रक्षणादि कृत्वा) षोडशोपचारैः गणपतिपूजनं विधाय सप्तर्ष्यावाहनं कुर्यात् ॥

हस्ते अक्षतान् गृहीत्वा सप्तर्षीन् आवाहयेत् । तद्यथा—ॐभूर्भुवः स्वः कश्यपाय नमः कश्यपम् आवा० स्थाप० । भो कश्यप इहागच्छ इह तिष्ठ ॥१॥ ॐभूर्भुवः स्वः भरद्वाजाय नमः भरद्वाजम् आवा० स्थाप० । भो भरद्वाज इहागच्छ इह तिष्ठ ॥ २ ॥ ॐ भूर्भुवः स्वः गौतमाय नमः गौतमम् आवा० स्थाप० । भो गौतम इहागच्छ इह तिष्ठ ॥ ३ ॥

ॐ भू० अत्रये नमः अत्रिम् आवा० स्था०। भो अत्रे इहागच्छ इह तिष्ठ ॥ ४ ॥ ॐ भूर्भुवः स्वः जमदग्नये नमः जमदग्निम् आवा० स्थाप० । भो जमदग्ने इहागच्छ इह तिष्ठ ॥ ५ ॥ ॐ भूर्भुवः स्वः वसिष्ठाय नमः वसिष्ठम् आवा० स्थाप० । भो वसिष्ठ इहागच्छ इह तिष्ठ ॥६॥ ॐ भूर्भुवः स्वः विश्वामित्राय नमः विश्वामित्रम् आवा० स्थाप० । भो विश्वामित्र इहागच्छ इह तिष्ठ ॥ ७ ॥ ॐ भूर्भुवः स्वः अरुन्धत्यै नमः अरुन्धतीमावा० स्थाप० । भो अरुन्धति इहागच्छ इह तिष्ठ ॥८॥ ॐ भूर्भुवः स्वः याज्ञवल्क्याय नमः याज्ञवल्क्यमावा० स्थाप० । भो याज्ञवल्क्य इहागच्छ इह तिष्ठ ॥ ९ ॥ ॐ अस्मत्गोत्रप्रवर्तकाय अमुकऋषये नमः अमुकऋषिम् आवा० स्थाप० ॥ भो अस्मत्गोत्रप्रवर्तक अमुकऋषे इहागच्छ इह तिष्ठ ॥ ॐ इमावेव गौतमभरद्वाजा व्वयमेव गौतमोऽयं भारद्वाजऽइमावेवव्विश्वामित्रजमदग्नीऽअयमेव व्विश्वामित्रोऽयं जमदग्निरिमावेवव्वसिष्ठकश्श्यपा व्वयमेव व्वसिष्ठोऽयं कश्श्यपोव्वागेवात्रिर्व्वाचा ह्यन्नमद्यतेत्तिर्हवैनामैतद्यदत्रिरिति सर्व्वस्यात्ता भवति सर्व्वस्यान्नम्भवति यऽएवं वेद ॥ ४ ॥

‘ध्यानम्’— ॐ सप्तऽऋषयःप्प्रति हिताः शरीरे सप्त रक्षन्तिसदमप्प्रमादम् । सप्तापःस्वपतो लोकमीयुस्तत्र जागृतोऽअस्वप्नजौ सत्रसदौ च देवौ ॥५५/३४॥ इदं व्विष्णु-

विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा ॥१५/५॥ ॐ सहस्रशी० ॥ १/३१ ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः ध्यानपूर्वकमावाहनं समर्पयामि ॥ 'आसनम्'—सुवर्णघट्टितं दिव्यं नानारत्नसमन्वितम् । आसनं रुचिरं यच्च गृह्यतां भो मुनीश्वराः ! ॥ ॐ पुरुषऽएवे० ॥ २/३१ ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः आसनं समर्पयामि॥ 'पाद्यम्'—गङ्गाजलं समानीतं गन्धद्रव्येण संयुतम् । पाद्यार्थं प्रतिगृह्णन्तु कश्यपाद्या महर्षयः ॥ ॐ एतावानस्य० ॥३/३१॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः पाद्यं समर्पयामि ॥ 'अर्घम्'— सुवर्णपात्रसंयुक्तं गन्धपुष्पाक्षतैर्युतम् । सप्तर्षयः प्रगृह्णन्तु इदमर्घ्यं मयाऽर्पितम् ॥ ॐ त्रिपादू० ॥४/३१॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः अर्घं समर्पयामि ॥ 'आचमनम्'—कर्पूरवासितं तोयं सुवर्णकलशे स्थितम् । दत्तमाचमनीयं च ऋषीणां प्रीतये सदा ॥ ॐ ततोविराड० ॥५/३१॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः आचमनीयं समर्पयामि ॥ 'स्नानम्'—सुगन्धद्रव्यसंयुक्तं पवित्रं मङ्गलं जलम् । स्नानार्थं वः समानीतं मुनयः प्रतिगृह्यथ ॥ ॐ तस्माद्यज्ञात्सर्व० ॥६/३१॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः स्नानं समर्पयामि ॥

पञ्चामृतस्नानम्'—पयो दधि घृतं चैव मधु च शर्करान्वितम् । पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥ ॐपञ्चनद्यः०॥$\frac{११}{३४}$॥ ॐभूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः पञ्चामृतस्नानं समर्पयामि ॥

पयःस्नानम् ॥ ॐ पयः॑ पृथि॒व्याम्पय॒ऽओष॑धीषु॒पयो॑ दि॒व्यु॒न्तरि॑क्षे॒पयो॑धाः ॥ पय॑स्वतीः॒प्प्र॒दिश॒ः सन्तु॒मह्य॑म् ॥ $\frac{३५}{१८}$ ॥ कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् । पावनं यज्ञहेतु च पयःस्नानार्थमर्पितम् ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः पयःस्नानं सम० । पयःस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥ दधिस्नानम् ॥ ॐ द॒धि॒क्क्राव्ण्णो॑ऽअकारिषञ्जि॒ष्णोरश्व॑स्यवा॒जिनः॑ ॥ सु॒र॒भिनो॒मुखा॑कर॒त्प्रण॒ऽआयू॑ꣳषितारिषत् ॥$\frac{३२}{२३}$॥ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः दधिस्नानं सम० । दधिस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० ॥ घृतस्नानम् ॥ ॐ घृ॒तम्मि॑मिक्षेघृ॒तम॑स्य॒योनि॑र्घृ॒तेश्रि॒तोघृ॒तम्व॑स्य॒धाम॑ ॥ अ॒नु॒ष्व॒धमाव॑ह॒मा॒दय॑स्व॒स्वाहा॑कृतंवृषभवक्षि॒हव्यम् ॥ $\frac{८८}{१७}$ ॥ नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् । घृतं तुभ्यं प्रदास्यामि स्नानार्थं

प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः घृतस्नानं सम० । घृतस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥ मधुस्नानम् ॥ ॐ मधुव्वाताँऽऋतायतेमधुक्क्षरन्तिसिन्धवः ॥ माद्ध्वीर्न्नःसन्त्वोषधीः ॥ २७/१३ ॥ मधुनक्तमुतोसोमधुमत्पार्त्थिवꣳरजः । मधुद्यौरस्तुनःपिता ॥ २८/१३ ॥ मधुमान्नोव्वनस्प्पतिर्म्मधुमाँ२॥ अस्तुसूर्य्यः ॥ माद्ध्वीर्ग्गावोभवन्तुनः ॥ २९/१३ ॥ तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः मधुस्नानं समर्प० । मधुस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० ॥ शर्करास्नानम् ॥ ॐ अपाꣳरसमुद्द्वयसꣳसूर्य्येसन्तꣳसमाहितम् ॥ अपाꣳरसस्ययोरसस्तम्वोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ॥ ३/९ ॥ इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका । मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः शर्करास्नानं सम० । शर्करास्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० । गन्धोदकस्नानम् ॥ ॐ गन्धर्व्वस्त्वाव्विश्वावसुःपरिदधातुविश्वस्यारिष्ट्यैयज-

मानस्यपरिधिरस्यग्निरिडऽईडितः ॥ ३/२ ॥ मलयाचलसम्भूतं चन्दनागरुसंयुतम् । चन्दनं च मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः गन्धोदकस्नानं सम० । गन्धोदकस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० ॥ उद्वर्तनस्नानम् ॥ ॐ अꣳशुनातेऽअꣳशुः पृच्यताम्परुषापरुः ॥ गन्धस्तेसोममवतुमदायरसोऽअच्युतः ॥ २७/२० ॥ नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम् । उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः उद्वर्तस्नानं सम० । उद्वर्तनस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि । सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥ ततो निर्माल्यमुत्तरे विसृज्य पुनः गन्धाक्षतपुष्पैरभ्यर्च्य गन्धमिश्रितैर्जलैः पुरुषसूक्तेनाभिषेकं कुर्यात् ॥ शान्तिः शान्तिः सुशान्तिर्भवतु । ॐ अमृताभिषेकोऽस्तु । ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः अभिषेकस्नानं समर्पयामि ॥

अथ शुद्धोदकस्नानम् ॥ ॐ शुद्धवालःसर्वशुद्धवालोमणिवालस्तऽआश्विनाः श्येतः श्येताक्षोरुणस्तेरुद्रायपशुपतये कर्णायामाऽअवलिप्तारौद्रानभोरूपाःपार्जन्याः ॥ ३/२४ ॥ स्नानार्थं तव देवेश पवित्रं तोयमुत्तमम् । तीर्थेभ्यश्च

समानीतं गृह्णन्तु भो मुनीश्वराः ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥

वस्त्रम्—सूक्ष्माण्यतीव शुभ्राणि वस्त्राणि विविधानि च । ऋषयः प्रतिगृह्णन्तु ह्युष्णशीतनिवारणे । ॐ तस्माद्यज्ञात्० ॥$\frac{७}{३१}$॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः वस्त्रं समर्पयामि ॥ यज्ञोपवीतम्— नानामन्त्रैः समुद्भूतं त्रिवृतं ब्रह्मसूत्रकम् । प्रत्येकं दीयते स्वच्छमृषयः प्रतिगृह्यताम् ॥ ॐ तस्मादश्वा० ॥$\frac{८}{१८}$॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः यज्ञोपवीतानि समर्पयामि ॥ गन्धम्— आत्मसन्तापहारं च सुगन्धिद्रव्यसंयुतम् । चन्दनं तत्प्रयच्छामि ऋषीणां प्रीतिहेतवे ॥ ॐ तँयज्ञ० ॥$\frac{९}{३१}$॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः गन्धं समर्पयामि ॥ अक्षतान्— शुभ्रतन्दुलजाः शुक्लाः शङ्खशुभ्रा मनोरमाः । अक्षतान्सम्प्रयच्छामि गृह्णन्तु मुनिपुङ्गवाः ॥ ॐ अक्षन्नमी० ॥$\frac{५१}{३}$॥ ॐ भूर्भुवः स्वः अरुन्धतीसहिकश्यपादिसप्तऋषिभ्यो नमः अक्षतान् सम० ॥ पुष्पाणि[१]—माल्यादीनि सुगन्धीनि मालत्यादीनि सत्तमाः । मयाऽर्पितानि पुष्पाणि गृह्णन्तु मुनिपुङ्गवाः ॥ ॐ यत्पुरुषं० ॥$\frac{१०}{३१}$॥ ॐ भूर्भुवः स्वः अरुन्धती-

---

(१) तुलसीदलानि बिल्वपत्राणि कमलानि च ऋषिभ्यो विशेषतः समर्प्याणि ।

सहितकश्यपादिसप्तऋषिभ्यो नमः ऋतुकालोद्भवपुष्पाणि समर्पयामि ॥ सौभाग्यद्रव्यम् ॥ हरिद्रां कुङ्कुमं चैव कज्जलं भूषणानि च ॥ कङ्कणं कण्ठसूत्रं च गृहाण परमेश्वर ॥ ॐ अहि॑रिव० ॥५१/२९॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः हरिद्राकुङ्कुमादिसौभाग्यद्रव्याणि समर्पयामि ॥ धूपम्— कृष्णागुरुसमुद्भूतो धूपोऽयं च दशाङ्गकः । सुगन्धः कश्यपादिभ्य ऋषिभ्यो दीयतेऽधुना ॥ ॐ ब्राह्म॒णो॒० ॥११/३१॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः धूपम् आघ्रापयामि ॥ दीपम्— पञ्चवर्तिसमायुक्तः सर्वमङ्गलशोभनः । मया निवेदितो भक्त्या दीपोऽयं प्रतिगृह्यताम् ॥ ॐ च॒न्द्रमा॒मन॑सः० ॥१२/३१॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः दीपं दर्शयामि ॥ नैवेद्यम्— फलमूलसमायुक्तं नानाशाकसमन्वितम् । शर्कराघृतसंयुक्तं नैवेद्यं प्रतिगृह्यताम् ॥ ॐ नाभ्या॑ऽआसीद्॒० ॥१२/३१॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः नैवेद्यं निवेदयामि ॥ नैवेद्यमध्ये पानीयं समर्पयामि । उत्तरापोशनं हस्तप्रक्षालनं मुखप्रक्षालनं करोद्वर्तनार्थे गन्धं च समर्पयामि ॥

अथ फलम्— नारिकेलं च कूष्माण्डं कदलीकर्कटीफलम् । ऋतुकालोद्भवं चान्यद्दीयतेऽद्य मुनीश्वराः ॥ ॐ याः फ॒लिनी॒० ॥८९/१२॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः पूगीफलं समपर्यामि ॥

ताम्बूलम्— पूगीफलं सकर्पूरं नागवल्लीदलैर्युतम् । एलालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐ यत्पुरुषेण० ॥ $\frac{१४}{३१}$ ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः ताम्बूलं समर्पयामि । अथ दक्षिणाम्—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ ॐ हिरण्यगर्भः१० ॥ $\frac{४}{१३}$ ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः दक्षिणां समर्पयामि ॥ कर्पूरारार्तिक्यम्— ब्रह्मिष्ठा ब्रह्मरूपाश्च कश्यपाद्या महर्षयः । ब्रह्मप्रज्ञादिदातारः सन्तु मे कीर्तिदाः सदा ॥ ॐ इद१ हविः० ॥ $\frac{४}{९}$ ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः कर्पूरारार्तिक्यं समर्पयामि ॥ प्रदक्षिणा— यानि कानि च पापानि जन्मान्तरकृतानि । तानि तानि विनश्यन्ति प्रदक्षिणपदे पदे ॥ ॐ सप्तास्या० ॥ $\frac{१५}{३१}$ ॥ ॐ भूर्भु० अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः प्रदक्षिणां समर्पयामि ॥

अथ मन्त्रपुष्पाञ्जलिम्— शरणागतदीनार्तपरित्राणपरायणाः । रक्षन्तु मुनयः सर्वे भवतां शरणागतम् ॥ सप्तर्षयः शुभाः श्रेष्ठाः सर्वेषां च शुभप्रदाः । पुष्पाञ्जलिं मया दत्तां गृह्णन्तु मुनिसत्तमाः ॥ ॐ यज्ञेनयज्ञ० ॥ $\frac{१६}{३१}$ ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ॥ ततः प्रार्थयेत्— मन्त्रहीनं

क्रियाहीनं भक्तिहीनं मुनीश्वराः । यत्पूजितं मया सर्वं परिपूर्णं तदस्तु मे ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः प्रार्थनां समर्पयामि ॥ अर्पणम्—अनेन मया वेदोत्सर्जनाङ्गत्वेन कृतेन ध्यानावाहनादिषोडशोपचारादिपूजनेन अरुन्धतीसहितकश्यपादिसप्तर्षयः प्रीयन्तां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥

इति सप्तर्षिपूजनं समाप्तम् ॥

॥ अथ नूतनयज्ञोपवीतधारणप्रयोगः ॥

आदौ [१]स्वपितृभ्यो यज्ञोपवीतदानम्—अमुकगोत्रेभ्य अस्मत्पितृपितामहप्रपितामहेभ्यः । तथा अमुकगोत्रेभ्य अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्यः । तथा कव्यवाडनलादिदिव्यपितृभ्यश्चेमानि यज्ञोपवीतानि स्वधा सम्पद्यन्ताम् ॥ इति ऋष्युपरि समर्प्य स्वयं धारयेत् ॥

आचमनं प्राणायामञ्च कृत्वा जलं गृहीत्वा सङ्कल्पं कुर्यात् । सङ्कल्पः—अद्येत्यादि० शुभपुण्यतिथौ मम श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थं (अमुककर्माङ्गत्वेन) यज्ञोपवीतधारणमहं करिष्ये ॥ सूत्रत्रिगुणीकरणम्—ॐ इदंविष्णुर्वि० यज्ञोपवीतप्रक्षालनम्—ॐ आपोहिष्ठा० इति त्रिभिर्मन्त्रैर्यज्ञोपवीतानि प्रक्षाल्य दशगायत्रीमन्त्रैरभिमन्त्र्य तन्तु-

---

[१] जीवत्पितृकैरपि पितुः पित्रादिभ्यो मातामहादिभ्यश्च यज्ञोपवीतानि देयानि । ततः सव्यं कृत्वा सर्वान्ब्राह्मणान् गन्धादिना सम्पूज्य तेभ्यो यज्ञोपवीतानि दत्त्वा पश्चात् सर्वैः सह स्वयमपि धारयेत् ॥

देवानां ग्रन्थिदेवानाञ्चावाहनं कुर्यात् ॥ प्रथमतन्तौ- ॐकाराय नमः ॐकारम् आवा० स्था० ॥ द्वितीयतन्तौ- ॐ अग्निन्दूतं० ॥ ॐ अग्नये नमः अग्निम् आवा० स्था० ॥ तृतीयतन्तौ- ॐनमोस्तुसर्प्पेभ्यो० इति ॐसर्पेभ्यो नमः सर्पान् आवा० स्थाप० ॥ चतुर्थतन्तौ- ॐ व्वयꣳसोम० इति ॐ सोमाय नमः सोमम् आवा० स्थाप० ॥ पञ्चमतन्तौ- ॐ उदीरता० इति ॐ पितृभ्यो नमः पितृन् आवा० स्थाप० ॥ षष्ठतन्तौ- ॐ प्रजापतेनत्त्वदेतान्यन्न्योविश्वारूपाणिपरिताबभूव । यत्त्कामास्तेजुहुमस्त्तनोऽअस्तुव्वयꣳस्यामपतयोरयीणाम् ॥ ६५/२३ ॥ इति ॐ प्रजापतये नमः प्रजापतिम् आवा० स्थाप० ॥ सप्तमतन्तौ- ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहि यज्ञम् ॥ व्वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्त्तिभिःसदानः ॥ ३८/२७ ॥ इति ॐ अनिलाय नमः अनिलम् आवा० स्थाप० ॥ अष्टमतन्तौ- ॐ सुगावोदेवाःसदनाऽअकर्म्मयऽआजग्मेदꣳसवनञ्जुषाणाः ॥ भरमाणाव्वहमानाहवीꣳष्ष्यस्म्मेधत्तवसवोवसूनिस्वाहा ॥ १८ ॥ इति ॐ यमाय नमः यमम् आवा० स्थाप० ॥ नवमतन्तौ- ॐ विश्वेदेवास० इति ॥ ॐ विश्वेभ्यो देवेभ्यो नमः विश्वान्देवान् आवा० स्थापयामि ॥

यज्ञोपवीतग्रन्थिदेवतानामावाहनम् ॥ ग्रन्थिमध्ये ॥ ॐब्रह्मजज्ञानं० ॥ इति ॐ ब्रह्मणे नमः ब्रह्माणम् आवा०

स्थाप० ॥ ग्रन्थिमध्ये ॥ ॐ इदंविष्णुर्विचक्र० ॥ इति ॐ विष्णवे नमः विष्णुम् आवा० स्थाप० ॥ ग्रन्थिमध्ये ॥ ॐ त्र्यंम्बकं० ॥ ॐ रुद्राय नमः रुद्रम् आवा० स्थाप० ॥ प्रणवाद्यावाहितदेवताभ्यो नमः यथास्थानं न्यसामि ॥ गन्धाक्षतपुष्पैः सम्पूज्य ॥ अथ ध्यानम्-प्रजापतेर्यत्सहजं पवित्रं कार्पाससूत्रोद्भवब्रह्मसूत्रम् ॥ ब्रह्मत्वसिद्ध्यै च यशः प्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्रम् ॥ यज्ञोपवीतधारणम् ॥ ॐ यज्ञोपवीतमिति मन्त्रस्य परमेष्ठी ऋषिः । त्रिष्टुप्छन्दः । लिङ्गोक्ता देवताः । यज्ञोपवीतधारणे विनियोगः ॥ ॐ यज्ञोपवीतं परमं पवित्रं पजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं पतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ॥ दक्षिणबाहुमूर्द्धं कृत्वा धारयेत् । तत आचम्य पुनर्द्वितीयं पुनराचम्य तृतीयम् । एवं पृथक्पृथग्यज्ञोपवीतानि धृत्वा जीर्णसूत्रत्यागः ॥ एतावद्दिनपर्यन्तं ब्रह्मत्वं धारितं मया । जीर्णत्वात्त्वत्परित्यागो गच्छ सूत्र यथासुखम् ॥ इति मन्त्रेण जीर्णयज्ञोपवीतं शिरोमार्गेण निःसार्य शुद्धभूमौ त्यक्त्वा यथाशक्ति गायत्रीमन्त्रं जपेत् ॥ हस्ते जलं गृहीत्वा ॥ अर्पणम्— अनेन नूतनयज्ञोपवीतधारणाङ्गीभूतगायत्रीजपकर्मणा सूर्यनारायणः प्रीयतां न मम ॥

इति नूतनयज्ञोपवीतधारणप्रयोगः ॥

अथोत्सर्गतर्पणम्— आचम्य प्राणानायम्य अद्येत्यादि० शुभपुण्यतिथौ छन्दसां क्वचिदनध्यायादिकाले पठनादनधिकारिभिः श्रवणाच्च प्राप्तमालिन्यस्य निरासार्थमुत्सर्गाख्यतर्पणमहं करिष्ये इति सङ्कल्प्य ॥ पात्रे जलं पूरयित्वा गन्धाक्षतपुष्पाणि प्रक्षिप्य देवानामावाहनार्थं यवान् गृहीत्वा ॥ ॐ विश्श्वे॑देवास॒ऽआग॑त शृ॒णु॒ताम॑ऽइ॒मꣳ हव॑म् । एदम्ब॒र्हिर्न्निषी॑दत ॥ ३४/७ ॥ व्विश्श्वे॑देवाꣳशृ॒णु॒तेमꣳहव॑म्मे॒येऽ अ॒न्तरि॑क्षे॒यऽउप॒द्द्यवि॒ष्ठ । ये ऽअ॑ग्निजि॒ह्वाऽउ॒तवा॒यज॑त्त्राऽ आ॒सद्द्या॒स्स्मिन्म॑ऽब॒र्हिषि॑मादयद्ध्वम् ॥ ५३/३३ ॥ इति मन्त्राभ्यां देवानावाह्य तर्पयेत् । ॐ देवास्तृप्यन्ताम् । ॐ छन्दाꣳसि तृप्यन्ताम् । ॐ वेदास्तृप्यन्ताम् । ॐ ऋषयस्तृप्यन्ताम् । ॐ पुराणाचार्यास्तृप्यन्ताम् । ॐ गन्धर्वास्तृप्यन्ताम् । ॐ इतराचार्यास्तृप्यन्ताम् । ॐ संवत्सरः सावयवस्तृप्यताम् । [अथ क्षेपकम्—केचित्संवत्सरावयवान्पृथक्त्वेन तर्पयन्ति । तद्यथा—ॐ अहोरात्रास्तृप्यन्ताम् । ॐ अर्धमासास्तृप्यन्ताम् । ॐ मासास्तृप्यन्ताम् । ॐ ऋतवस्तृप्यन्ताम् । ॐ संवत्सरः सावयवस्तृप्यताम् ॥ इति क्षेपकम् ॥] ॐ पितरस्तृप्यन्ताम् । ॐ आचार्यास्तृप्यन्ताम् ॥ ततः सव्यं जान्वाच्य दक्षिणाभिमुखोऽपसव्येन तिलमिश्रितं जलमञ्जलौ गृहीत्वा ॥ अमुकगोत्रा अस्मत्पितर अमुकशर्माणो वसुरूपास्तृप्यध्वं स्वधा नमः । अमुकगोत्रा अस्मत्-

पितामहा अमुकशर्माणो रुद्ररूपास्तृप्यध्वं स्वधा नमः ॥ अमुकगोत्रा अस्मत्प्रपितामहा अमुकशर्माण आदित्यरूपास्तृप्यध्वं स्वधा ॥ ततः अमुकगोत्रा अस्मदाचार्यस्य पितर अमुकशर्माणस्तृप्यध्वं स्वधा । एवमाचार्यस्य पितामह–प्रपितामहानामपि तर्पणं कार्यम् ॥

अथ वंशानां ब्रुवणम् ॥

ततः आचमनं प्राणायामञ्च कृत्वा ॥ वंशानां ब्रुवणम्–अ॒थ वꣳश॒ऽंसमान॒मासाञ्जीवीपु॒त्रात्त्सा॒ञ्जीवी पुत्रो मा॒ण्डूकायनेर्म्मा॒ण्डूकायनिर्म्मा॒ण्डव्यान्मा॒ण्डव्यꣳ कौ॒त्त्सात्कौ॒त्त्सोमा॒हित्थेर्म्मा॒हित्थिर्वा॒मकक्षायणा॒द्वामकक्षायणो वात्स्याद्वा॒त्स्यऽं शा॒ण्डिह्ल्याच्छा॒ण्डिह्ल्यऽ कु॒श्रेꣳ कु॒श्रिर्यज्ञवचसो राजस्तम्बा॒यनाद्यज्ञ॒वचा राजस्तम्बा॒यनस्तुरात्का॒वषेयात्तुरऽंका॒वषेयꣳप्रजा॒पतेऽं प्रजा॒पतिर्ब्र॒ह्मणो ब्र॒ह्म स्वय॒म्भुब्र॒ह्मणे॒ नमऽं ॥१॥ वंशोक्ताः[1]ऋषयस्तृप्यन्ताम् । अ॒थ वꣳशस्त॒दि॒दं वयꣳशौ॒र्पणाय्यच्छौ॒र्पणाय्यो गौ॒तमाद्गौतमो वा॒त्स्याद्वा॒त्स्यो वा॒त्स्याच्च पा॒राशर्य्या॒च्च पा॒राशर्य्यऽं सा॒ङ्कृत्याच्च भा॒रद्वाजाच्च भा॒रद्वाज ऽऔदवाहे॒श्च शा॒ण्डिल्याच्च शा॒ण्डिल्यो वै॒जवापाच्च गौतमा॒च्च गौतमो वै॒जवापायनाच्च वैष्ठपुरेया॒च्च वै॒ष्ठपुरेयꣳशा॒ण्डिल्याच्च रौहिणायना॒च्च रौ॒हिणायनꣳशौ॒नकाच्चात्रेया॒च्च रैभ्या॒च्च रै॒भ्यꣳपौ॒तिमाख्यायणाच्च कौण्डिन्यायना॒च्च कौण्डिन्यायनꣳ कौ॒ण्डिन्यात्कौ॒ण्डिन्यꣳ

---

[1] एवं ऋष्युपरि उदकं क्षिपेत् ॥

कौ॒ण्डिन्यात्कौ॒ण्डिन्यꣳ कौ॒ण्डिन्या॒च्चाग्निवेश्या॒च्च ॥ २ ॥ आग्निवेश्यꣳ सै॒तवात् सै॒तवꣳ पा॒राशर्य्यात्पा॒राशर्य्यौ जा॒तूकर्ण्याज्जा॒तूकर्ण्यौ भा॒रद्वाजाद्भा॒रद्वाजो भारद्वाजा॒च्चासुरायणा॒च्च गौतमा॒च्च गौ॒तमो भा॒रद्वाजाद्भा॒रद्वाजो वैजवापायना॒द्वैजवापायन॒ꣳ कौ॒शिकायनेꣳ कौशिकायनि॒र्घृतकौशिका॒द्घृतकौशिकः पा॒राशर्य्यायणात्पा॒राशर्य्यायणꣳ पा॒राशर्य्यात्पा॒राशर्य्यौ जा॒तूकर्ण्याज्जा॒तूकर्ण्यौ भा॒रद्वाजाद्भा॒रद्वाजो भारद्वाजा॒च्चासुरायणा॒च्च यास्का॒च्चासुरायणस्त्रै॒वणेस्त्रै॒वणिरौ॒पजन्धने रौ॒पजन्धनिरा॒सुरेरा॒सुरिर्भा॒रद्वाजाद्भा॒रद्वाजऽआत्रेया॒त् ॥ ३ ॥ आत्रेयो॒ माण्टेर्मा॒ण्टिगौ॒तमाद्गौ॒तमो गौ॒तमाद्गौ॒तमो वा॒त्स्याद्वा॒त्स्यꣳ शा॒ण्डिल्याच्छा॒ण्डिल्यꣳ कै॒शोर्य्यात्का॒प्यात्कै॒शोर्य्यꣳकाप्यꣳकुमारहा॒रिता॒त्कुमारहा॒रितो॒ गालवा॒द्गालवो॒ विदर्भीकौण्डिन्या॒द्विदर्भीकौण्डिन्यो॒ वत्स॒नपातो बा॒भ्रवाद्व॒त्सनपाद्बाभ्रवꣳ पथꣳसौ॒भरोसौभरात्पथाꣳया॒स्यादाङ्गिरसा॒दया॒स्यऽ आङ्गिरस ऽआभूतेस्त्वा॒ष्ट्राद्दा॒भूतिस्त्वा॒ष्ट्रो विश्व॒रूपात्त्वा॒ष्ट्राद्विश्व॒रूपस्त्वा॒ष्ट्रोश्वि॒ऽभ्यामश्वि॒नौदधी॒चाथार्वणा॒द्दध्य॒ङ्ङाथर्वणो दै॒वाद॒थर्वा दैवो मृत्यो॒ꣳप्राध्व॒ꣳसनान्मृत्यु॒ꣳप्राध्व॒ꣳसनꣳप्राध्व॒ꣳसनात्प्राध्व॒ꣳसनऽएकर्षे॒रेकर्षि॒र्विप्र॒जितेर्विप्र॒जितिर्व्यष्टे॒र्व्यष्टिꣳसना॒रोꣳसना॒रुꣳसना॒त॒नात्सनात॒नꣳस॒नगात्स॒नगꣳ परमेष्ठि॒नꣳ परमेष्ठी ब्र॒ह्मणो ब्र॒ह्मस्वय॒म्भु ब्र॒ह्मणे॒ नमऽ ॥ ४ ॥ वंशोक्ता ऋषयस्तृप्यन्ताम् ॥

अथ वंशस्त॒दिदं व॒यꣳ शौ॒र्पणाय्याच्छौ॒र्पणाय्यो गौ॒तमाद्गौ॒तमो वा॒त्स्याद्वा॒त्स्यो वा॒त्स्या॒च्च पा॒राशर्य्या॒च्च पा॒राशर्य्यꣳ सा॒ङ्कृत्याच्च भा॒रद्वाजाच्च भा॒रद्वाजऽऔदवाहे॒श्च शा॒ण्डिल्याच्च शा॒ण्डिल्यो वै॒जवापाच्च गौतमा॒च्च गौ॒तमो वै॒जवापायनाच्च वैष्टपुरेया॒च्च वै॒ष्टपुरेयꣳ शा॒ण्डिल्याच्च रौहिणायना॒च्च रौ॒हिणायनꣳ शौ॒नकाच्च जैवन्तायना॒च्च रै॒भ्या॒च्च रै॒भ्य॒ꣳ पौ॒तिमाष्यायणाच्च कौण्डिन्यायना॒च्च कौ॒ण्डिन्यायनꣳ कौ॒ण्डिन्याभ्यां कौ॒ण्डिन्याऽऔर्णवा॒भेभ्य ऽऔ॒र्णवाभाꣳ कौ॒ण्डिन्यात्कौ॒ण्डिन्यꣳ कौ॒ण्डिन्यात्कौ॒ण्डिन्यꣳ कौ॒ण्डिन्या॒च्चाग्निवेश्या॒च्च ॥ ५ ॥ आ॒ग्निवेश्यꣳ सै॒तवात्सै॒तवꣳ पा॒राशु॒र्य्यात्पा॒राशर्य्यो जा॒तूकर्ण्याज्जा॒तूकर्ण्यो भा॒रद्वाजाद्भा॒रद्वाजो भारद्वाजा॒च्चासुरायणा॒च्च गौतमा॒च्च गौ॒तमो भ॒रद्वाजाद्भा॒रद्वाजो बलाकाकौशिका॒द्बलाकाकौशिकु॒ꣳ काषायणा॒त्काषायण॒ꣳ सौकरायणा॒त्सौकरायणस्त्रै॒वणे॒स्त्रै॒वणि रौ॒पजन्धने रौ॒पजन्धनि॒ꣳ सायकायना॒त्सायकायन॒ꣳ कौशिकायने॒ꣳ कौशिकायनि॒र्घृतकौशिका॒द्घृतकौशिकꣳ पा॒राशर्य्यायणात्पा॒राशर्य्यायणꣳ पा॒राशर्य्यात्पा॒राशर्य्यो जा॒तूकर्ण्याज्जा॒तूकर्ण्यो भा॒रद्वाजाद्भा॒रद्वाजो भारद्वाजा॒च्चासुरायणा॒च्च यास्का॒च्चासुरायणस्त्रै॒वणेस्त्रै॒वणि रौ॒पजन्धने रौ॒पजन्धनिरा॒सुरेरा॒सुरिर्भा॒रद्वाजाद्भा॒रद्वाजऽआत्रेया॒त् ॥ ६ ॥ आत्रेया॒दात्रेयोमा॒ण्टेर्मा॒ण्टिर्गौ॒तमाद्गौ॒तमोगौ॒तमाद्गौ॒तमो वा॒-

त्स्याद्वा॒त्स्यꣳशा॒ण्डिल्याच्छा॒ण्डिल्यꣳकै॒शोर्य्यात्का॒प्यात्कै॒शोर्य्यꣳ काप्य॒ꣳ कुमारहारिता॒त्कुमारहारितो॒ गालवा॒द्गालवो॒ विदर्भीकौण्डिन्या॒द्विदर्भीकौण्डिन्यो॒ वत्स॒नपातो बा॒भ्रवा॒द्वत्स॒नपा॒द्बा॒भ्रवꣳ पथꣳ सौ॒भरात्पन्थाꣳ सौ॒भरोऽया॒स्यादाङ्गिरसा॒दया॒स्यऽआङ्गिरसऽआ॒भूतेस्त्वा॒ष्ट्राद॒ाभूतिस्त्वा॒ष्ट्रोविश्व॒रूपात्त्वा॒ष्ट्राद्विश्व॒रूपस्त्वा॒ष्ट्रोश्वि॒भ्यामश्वि॒नौ दधी॒चऽअथर्वणाद्दध्य॒ङ्ङाथर्वणो॒ दै॒वाद॒थर्वादै॒वोमृत्यो॒ꣳ प्राध्व॒ꣳसनान्मृत्युꣳ प्राध्व॒ꣳसनात् प्राध्व॒ꣳसनऽएकर्षे॒रेकर्षिर्विप्र॒जितेर्विप्र॒जितिर्व्यष्टे॒र्व्यष्टिꣳसना॒रोꣳ सना॒रुꣳ सनात॒नात्सनात॒नꣳ स॒नगात्स॒नगꣳ परमेष्ठि॒नꣳ परमेष्ठी ब्र॒ह्मणो॒ ब्र॒ह्मस्वय॒म्भु ब्र॒ह्मणे॒ नमꣳ ॥ ७ ॥ वंशोक्ता ऋषयस्तृप्यन्ताम् ।

अ॒थ वꣳशस्तदि॒दं वयꣳभा॒रद्वाजीपु॒त्राद्भा॒रद्वा॒जीपु॒त्रो वा॒त्सीमाण्डवीपु॒त्राद्वा॒त्सीमाण्डवीपु॒त्रꣳ पा॒राशरीपु॒त्रात्पा॒राशरीपु॒त्रो गा॒र्गीपु॒त्राद्गा॒र्गीपु॒त्रꣳ पा॒राशरीकौण्डिनीपु॒त्रात्पा॒राशरीकौण्डिनीपु॒त्रो गा॒र्गीपु॒त्राद्गा॒र्गीपु॒त्रो गा॒र्गीपु॒त्राद्गा॒र्गीपु॒त्रो बा॒डेयीपु॒त्राद्बा॒डेयीपु॒त्रो मौ॒षिकीपु॒त्रान्मौ॒षिकीपु॒त्रो हा॒रिकर्णीपु॒त्राद्धा॒रिकर्णीपु॒त्रोभा॒रद्वाजीपु॒त्राद्भा॒रद्वा॒जीपु॒त्रꣳ पै॒ङ्गीपु॒त्रात्पै॒ङ्गीपु॒त्रꣳ शौ॒नकीपु॒त्राच्छौ॒नकीपु॒त्रꣳ ॥ ८ ॥ का॒श्यपीबालाक्यामाठरीपु॒त्रात्का॒श्यपीबालाक्यामाठरीपु॒त्रꣳ कौ॒त्सीपु॒त्रात्कौ॒त्सीपु॒त्रो बौ॒धीपु॒त्राद्बौ॒धीपु॒त्रꣳ

शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रो वार्षगणीपुत्राद्वार्षगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्रऽआत्रेयीपुत्रादात्रेयीपुत्रोगौतमीपुत्राद्गौतमीपुत्रो वात्सीपुत्राद्वात्सीपुत्रोभारद्वाजीपुत्राद्भारद्वाजीपुत्रꣳ पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्रऽआर्तभागीपुत्रादार्तभागीपुत्रꣳ शौङ्गीपुत्राच्छौङ्गीपुत्रꣳसाङ्कृतीपुत्रात्साङ्कृतीपुत्रꣳ ॥९॥ आलम्बीपुत्रादालम्बीपुत्र ऽआलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रोमाण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्मण्डूकीपुत्रꣳ शाण्डिलीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रꣳक्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रो वैदभृतीपुत्राद्वैदभृतीपुत्रो भालुकीपुत्राद्भालुकीपुत्रꣳ प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रꣳ साञ्जीवीपुत्रात्साञ्जीवीपुत्रꣳ कार्शकेयीपुत्रात्कार्शकेयीपुत्रꣳ ॥ १० ॥

प्राश्नीपुत्रादासुरिवासिनꣳ । प्राश्नीपुत्रऽआसुरायणादासुरायणऽआसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्य ऽउद्दालकादुद्दालकोरुणादरुणऽउपवेशेरुपवेशिꣳ कुश्रेꣳ कुश्रिर्वाजश्रवसोवाजश्रवाजिह्वावतो बाध्योगाज्जिह्वावान्बाध्योगोसिताद्वार्षगणादसितो वार्षगणो हरितात्कश्यपाद्धरितꣳ कश्यपꣳ शिल्पात्कश्यपाच्छिल्पꣳ कश्यपꣳकश्यपान्नैर्ध्रुविर्वाचोवागम्भिण्याऽअम्भिण्यादित्यादादित्यानीमानिशुक्लानियजूꣳषिवाजसनेयेनयाज्ञवल्क्येनाख्यायन्ते ॥ ११ ॥

वंशोक्ता ऋषयस्तृप्यन्ताम् ॥ ॐतत्त्सवितु० इति चतुर्वारं गायत्रीं पठेत् ॥ इति प्रतिवंशवंशोक्तानामृषीणां तर्पणम् ॥

अध्यायाः—इषे त्त्वा ॥ १ ॥ कृष्ण्णोसि ॥ २ ॥ समिधाग्निम् ॥ ३ ॥ एदम् ॥ ४ ॥ अग्नेस्त्तनूꣳ ॥५॥ देवस्य त्त्वा ॥ ६ ॥ व्वाचस्प्पतये ॥ ७ ॥ उपयामगृहीतोसि ॥ ८ ॥ देव सवितꣳ ॥ ९ ॥ अपो देवाः प्प्रथमम् ॥१०॥ युञ्जानः प्प्रथमम् ॥११॥ दृशानो रुक्मः ॥१२॥ मयिगृह्ण्णामि ॥ १३ ॥ ध्रुवक्षितिर्ध्रुवयोनिꣳ ॥ १४ ॥ अग्नेजातान् ॥१५॥ नमस्त्ते ॥१६॥ अश्म्मन्नूर्ज्जम् ॥१७॥ व्वाजश्च ॥१८॥ स्वादीन्त्वा ॥ १९ ॥ क्षत्रस्य योनिः ॥ २० ॥ इमम्मे ॥ २१ ॥ तेजोसि ॥ २२ ॥ हिरण्ण्यगर्ब्भःसम् ॥ २३ ॥ अश्वस्तूपरः ॥२४॥ शादन्दद्भिꣳ ॥२५॥ अग्निश्च ॥ २६ ॥ समास्त्वा ॥ २७ ॥ होतायक्षत् ॥ २८ ॥ समिद्धोऽअञ्जन् ॥ २९ ॥ देव सवितꣳ ॥ ३० ॥ सहस्रशीर्षापुरुषꣳ ॥३१॥ तदेव ॥ ३२ ॥ अस्याजरासः ॥३३॥ यज्जाग्ग्रतꣳ ॥३४॥ अपेतꣳ ॥३५॥ ऋचं वाचम् ॥३६॥ देवस्य त्त्वा ॥३७॥ देवस्य त्त्वा ॥३८॥ स्वाहाप्प्राणेब्भ्यः ॥ ३९ ॥ ईशा व्वास्यम् ॥ ४० ॥ ॐ हिरण्ण्मयेन पात्त्रेण सत्त्यस्यापिहितम्मुखम् । योसावादित्त्ये पुरुषꣳ सोसावहम् ॥१७/४०॥ ॐ ३ म् खम्ब्रह्म । अध्यायोक्ता ऋषयस्तृप्यन्ताम् ॥

अथ ‘कण्डिकाः’—व्व्रतमुपैष्यन् ॥ १ ॥ सवैकपाल-

न्ये॒वान्यतर॒ऽउपद॒धाति ॥ २ ॥ सवैस्रु॒चꣳ सं॒मार्ष्टि ॥ ३ ॥ हिङ्कृत्या॒न्वाह ॥ ४ ॥ सवै॒ प्रवराया॒श्रावयति ॥ ५ ॥ ऋत॒वो हवै॒ देवे॒षु यज्ञे भाग॒मीषिरे ॥ ६ ॥ सवै॒ पर्णशाख॒या वत्सानपा॒करोति ॥ ७ ॥ म॒नवे हवै॒ प्रातꣳ ॥ ८ ॥ स यत्रा॒ ह ॥ ९ ॥ स सयद्वा॒ इत॒श्चेतश्च सम्भरति ॥ १० ॥ उद्धृत्याहवनी॒यम्पूर्णाहुतिं॒ जुहोति ॥ ११ ॥ सूर्य्योहवा॒ऽ अग्निहोत्रम् ॥ १२ ॥ अ॒थ हु॒तेग्निहोत्रमु॒पतिष्ठते ॥ १३ ॥ प्रजा॒पतिर्हवा इदम॒ग्र ऽए॒कऽए॒वा स ॥ १४ ॥ पित्रा महाहवि॒षाहवै॒ देवा॒ वृत्रं॒ जघ्नुꣳ ॥ १५ ॥ देवय॒जनं सोषयन्ते ॥ १६ ॥ द॒क्षिणेनाहवनी॒यं प्राची॒नग्रीवे कृष्णाजिने ऽउ॒पस्तृणाति ॥ १७ ॥ सप्त॒पदा॒न्यनुनि॒ःक्रामति ॥ १८ ॥ शि॒रो वै॒ यज्ञस्यातिथ्यं॒ बाहूप्रायणीयोदयनी॒यौ ॥ १९ ॥ तद्य॒ ऽएष॒ पूर्वा॒र्ध्यो द्वा॒र्षिष्ठ स्थूणराजो भ॒वति ॥ २० ॥ उद॒रमे॒वास्य स॒दꣳ ॥ २१ ॥ अ॒भ्रिमा॒दत्ते ॥ २२ ॥ तद्य॒त्रैतत्प्र॒वृतो हो॒ता होतृष॒दन ऽउपविश॒ति ॥ २३ ॥

प्रजा॒पतिर्वै॒ प्रजा॒ꣳ स सृजानो॒ रिरिचान॒ ऽइवामन्यत ॥२४॥ प्राणो॒ हवा॒ ऽअस्योपाꣳ शुꣳ ॥२५॥ च॒क्षुषी हवा॒ ऽअस्य॒शुक्रा॒मन्थि॒नौ ॥२६॥ भक्षयित्त्वा॒ समु॒पहूताꣳ स्मऽइ॒त्युक्त्वोत्तिष्ठति ॥२७॥ म॒नो हवा॒ऽअस्य सविता ॥२८॥ आदित्त्ये॒न चरु॒णोदयनी॒येन प्र॒चरति ॥ २९ ॥ प्रजा॒पतिर्वोऽएष य॒दꣳशुꣳ ॥ ३० ॥ देवा॒श्च वा॒ऽअ॒सुराश्च ॥ ३१ ॥

अथ स्रुवञ्चाज्यविलापनीं चादाय ॥ ३२ ॥ अरण्योरग्नी समारोह्य ॥ ३३ ॥ केशवस्य पुरुषस्य ॥ ३४ ॥ आग्नेयोष्टा कपालꣳ पुरोडाशो भवति ॥ ३५ ॥ असद्वा ऽइदमग्रऽ आसीत् ॥ २६ ॥ प्रजापतिरग्निरूपाण्यभ्यध्यायत् ॥ ३७ ॥ एतद्धैदेवाऽअब्रुवन् ॥ ३८ ॥ अथैनमतꣳ खनत्येव ॥ ३९ ॥ पर्णकषाय निष्पक्वा ऽएताऽआपो भवन्ति ॥ ४० ॥ भूयाꣳसि हवीꣳषि भवन्ति ॥ ४१ ॥ रुक्मम्प्रतिमुच्य बिभर्ति ॥ ४२ ॥ वनीबाह्येताग्निं बिभ्रदित्याहुꣳ ॥ ४३ ॥ गार्हपत्यं चेष्यन्पलाशशाखया व्युदूहति ॥ ४४ ॥ अथातो नैर्ऋतीर्हरन्ति ॥ ४५ ॥ चितोगार्हपत्यो भवति ॥ ४६ ॥ आत्मन्नग्निं गृह्णीतेचेष्यन् ॥४७॥ कूर्म्ममुपदधाति ॥ ४८ ॥ प्राणभृतऽउपदधाति ॥ ४९ ॥ द्वितीयां चितिमुपदधाति ॥ ५२ ॥ पञ्चमीं चितिमुपदधाति ॥ ५३ ॥ नाकसदऽ उपदधाति ॥५४॥ ऋतव्याऽउपदधाति ॥ ५५ ॥ अथातꣳ शतरुद्रियं जुहोति ॥ ५६ ॥ उपवसथीये हन् प्रातरुदित ऽआदित्ये ॥ ५७ ॥ अथातो वैश्वानरं जुहोति ॥ ५८ ॥ अथातो राष्ट्रभृतो जुहोति ॥ ५९ ॥ अथातꣳ पयो व्रततायै ॥ ६० ॥ अग्निरेष पुरस्ताच्चीयते ॥ ६१ ॥ प्रजापतिꣳ स्वर्गँल्लोकमजिगाꣳसत् ॥ ६२ ॥ प्राणो गायत्री ॥ ६३ ॥ प्रजापतिं विस्रस्तम् ॥ ६४ ॥ तस्य वाऽएतस्याऽग्नेꣳ ॥६५॥ अथ हैतेरुणे ॥६६॥ संवत्सरो वै यज्ञꣳ प्रजापतिꣳ ॥६७॥

त्रिर्हवै पुरुषो जायते ॥ ६८ ॥ वाग्घवा ऽएतस्याग्निहोत्रस्याग्निहोत्री ॥ ६९ ॥ उद्दालको हारुणिꣳ ॥ ७० ॥ उर्वशी हाप्सराꣳ ॥ ७१ ॥ भृगुर्हवै वारुणिꣳ ॥ ७२ ॥ पशुबन्धेन यजते ॥ ७३ ॥ तद्यथा हवै ॥ ७४ ॥ अयं वै यज्ञो योयं पवते ॥ ७५ ॥ समुद्रं वाऽएते प्रचरन्ति ॥७६॥ श्रद्धा लोके ॥७७॥ दीर्घसत्रꣳ हवाऽएतऽउपयन्ति ॥७८॥ तदाहुर्यदेष दीर्घसत्री ॥७९॥ सोमो वै राजा यज्ञꣳ ॥८०॥ विश्वरूपं वै त्वाष्ट्रमिन्द्रोऽहन् ॥८१॥ इन्द्रस्य वै सत्र ॥८२॥ एतस्माद्वै यज्ञात्पुरुषो जायते ॥८३॥ ब्रह्मौदनं पचति ॥८४॥ प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत् ॥ ८५ ॥ प्रजापते रक्षस्व सत् ॥ ८६ ॥ प्रजापतिरकामयत ॥ ८७ ॥ अथ प्रातर्गौतमस्य ॥ ८८ ॥ पुरुषो ह नारायणो कामयत ॥८९॥ ब्रह्म वै स्वयम्भु तपोतप्यत ॥ ९० ॥ अथास्मै श्मशानं कुर्वन्ति द्यौः शान्तिः ॥ ९१ ॥ देवा हवै सत्रं निषेदुꣳ ॥ ॥९२॥ अथातो रौहिणौ जुहोति ॥९३॥ सवै तृतीयेऽहन् ॥ ९४ ॥ द्वया ह प्राजापत्याꣳ ॥ ९५ ॥ दृप्तबालाकिर्हानूचानो गार्ग्यऽआस ॥ ९६ ॥ जनको ह वैदेहꣳ ॥९७॥ जनकः ह वैदेहं याज्ञवल्क्यो जगाम ॥ ९८ ॥ पूर्णमदꣳ पूर्णमिदम् ॥ ९९ ॥ श्वेतकेतुर्हवाऽआरुणेयꣳ ॥ १०० ॥ प्राश्नीपुत्रादासुरिवासिनꣳ ॥ चतुर्दशकाण्डेष्वध्यायोक्ता ऋषयस्तृप्यन्ताम् ॥

अथ शतस्थानानि—ॐ इ॒षे त्वा॑ ॥ १ ॥ परि॑ते ॥ २ ॥ अग्ने॒नय॑ ॥ ३ ॥ उ॒प॒या॒मगृ॑हीतोसि सु॒शर्म्मा॑सि ॥ ४ ॥ (प्रथमा) सोम॑स्य॒त्त्विषि॑ः ॥ ५ ॥ पर॑स्या॒ऽअधि॑ ॥ ६ ॥ अ॒न्याव॑÷ ॥७॥ राज्ञ्य॑सि ॥८॥ नमो॒ हिर॑ण्यबाहवे ॥९॥ इन्द्रे॒मम् ॥ १० ॥ इ॒मौते॑ ॥ ११ ॥ अन्ना॑त्परि॒स्रुत॑÷ ॥१२॥ अ॒श्विना॒ तेज॑सा ॥ १३ ॥ पृथि॒व्यै स्वाहा॑ ॥ १४ ॥ प्र॒जाप॑तये च ॥ १५ ॥ तेऽअ॑स्य ॥ १६ ॥ त॒नून॒पात्प॒थꣳ ॥ १७ ॥ अ॒यमि॒ह ॥ १८ ॥ अनु॑नꣳ ॥ १९ ॥ इयत्त्यग्ग्रे॑ ॥ २० ॥ (शेषं पञ्चसप्ततिः) ॥ हि॒र॒ण्मये॑न॒ पात्रे॑ण० । ॐ खम्ब्रह्म । शतोक्ता ऋषयस्तृप्यन्ताम् ॥

व्रत॒मुपैष्यन् ॥ १ ॥ तद्य॒देवं॒ पिन॒ष्टि ॥ २ ॥ अथा॒ज्यलिप्ताभ्यां पवि॒त्राभ्याम् ॥ ३ ॥ बृह॒च्छोचाय विष्ठ्ये॒ति ॥ ४ ॥ व॒सूनाꣳरातौ॒ स्याम ॥ ५ ॥ अग्निर्वै॒ देवा॒नामद्धा॒तमाम् ॥ ६ ॥ तद्य॒था यो॒नौ रे॒तꣳ सिञ्चेत् ॥ ७ ॥ ता वै प्रा॒श्नन्त्ये॒व ॥ ८ ॥ अ॒थ वे॒दपत्नी वि॒स्रꣳसयति ॥ ९ ॥ अयं वै॒ यज्ञो॒ यो॒ऽयं प॒वते ॥ १० ॥ अ॒थ य॒दस्तमे॒ति ॥ ११ ॥ रे॒वतीर॒मध्वमि॒ति ॥ १२ ॥ स वा॒ऽआग्नेयोऽष्टा॒कपालꣳ पुरोडा॒शो भवति ॥ १३ ॥ तद्ये सो॒मेनेजानाꣳ ॥ १४ ॥ अथो॒त्तरेण शा॒लां प॒रिश्रयन्ति ॥ ॥ १५ ॥ अथो॒ ह्लिखति ॥ १६ ॥ सा या॒ बभ्रुꣳ पिङ्गाक्षी सा॒ सोमक्र॒यणी स्यात् ॥ १७ ॥ प्रथमं ते॒ देवाꣳ ॥ १८ ॥

इन्द्रघोषꣳ प्रोक्षणीरध्वर्युरादत्ते ॥ १९ ॥ सा हा कद्रूरुवाच ॥ २० ॥ तद्यऽ एतऽ उच्छ्रूता देवा हवै यज्ञन्तन्वानाꣳ ॥ २१ ॥ अथ पार्श्वेन वासिना वा प्रयौति ॥२२॥ सजुहोति शृणोत्वाग्निः समिधा हुवं म ऽइति ॥ २३ ॥ इसꣳहवाऽउपाꣳ शुꣳ ॥ २४ ॥ तस्यासावेव ध्रुवऽआयुः ॥ २५ ॥ यत्र द्यावा पृथिव्यꣳ शस्यते ॥ २६ ॥ सऽ आज्यस्योपस्तीर्य द्विश्वरोरवद्यति ॥ २७ ॥ इन्द्रो ह वै षोडशी ॥ २८ ॥ तासां द्वादश गर्भाꣳ ॥ २९ ॥ तद्धे हस्म पुरा वाजपेयेन यजते ॥ ३० ॥ अथ दिशोनुवीक्षमाणो जपति ॥ ३१ ॥ सवै दीक्षते ॥ ३२ ॥ अथैतमभिषेकं कृष्णविषाणया नु विमृष्टे ॥ ३३ ॥ षडेवोत्तरे चरवꣳ ॥ ३४ ॥ अथोऽआहुꣳ ॥ ३५ ॥ अमावास्यायां दीक्षते ॥ ३६ ॥ अश्वस्य पदे जुहोति ॥ ३७ ॥ अथैनां धूपयति ॥ ३८ ॥ तमुपरिनाभि बिभर्ति ॥ ३९ ॥ अथोषान्निवपति ॥४०॥ चतस्रः सीता यजुषा कृषति ॥४१॥ तं प्रत्यञ्चयन्तम् ॥ ४२ ॥ अपाङ्गम्भत्सीदुेति ॥ ४३ ॥ तस्य मनोवैश्वकर्मणमिति ॥ ४४ ॥ तद्वैषा मध्यमा स्वयमातृण्णा ॥ ४५ ॥ एकादशभिरस्तुवतेति ॥४६॥ तावाऽ एता विराडेषा ॥ ४७ ॥ अथ-स्वयमातृण्णामुपदधाति ॥ ॥ ४९ ॥ अथोत्तरार्धेन प्राक् ॥ ४९ ॥ स यꣳ वैश्वानरꣳ ॥ ५० ॥ यास्तेऽअग्ने-सूर्ये रुचꣳ ॥ ५१ ॥ नाम कृत्वा-

थैनमुपतिष्ठते ॥ ५२ ॥ सा वाऽ इयं वेदिꣳ सप्तविधस्य ॥ ५३ ॥ अयमेवाकाशो जू ॥ ५४ ॥ सोयवात्मा त्रेधा विहितऽ एव ॥ ५५ ॥ अथ वृक्शᳲ ॥ ५६ ॥ अथ यामेतामाहुतिं जुहोति ॥ ५७ ॥ अथ यामेतामाहुतिं जुहोति ॥ ५७ ॥ अथ यदनुवाक्यामनूच्य ॥ ५८ ॥ ब्रह्मचार्यसीत्याह ॥ ५९ ॥ स यत्पशुबन्धेन यजते ॥ ६० ॥ दशेति होवाच ॥ ६१ ॥ अथ यत्र स्कन्नꣳ स्यात् ॥ ६२ ॥ अथ यदि प्रप्लुतᳲ ॥ ६३ ॥ सर्वेऽअश्विना भवन्ति ॥ ६४ ॥ प्रजापतिर्यज्ञमसृजत ॥ ६५ ॥ किम्वा वपनं महदिति ॥ ६६ ॥ अथ योस्य निष्कꣳ प्रतिमुक्तो भवति ॥ ६७ ॥ एतेनहेन्द्रोऽतो दैवापः शौनकᳲ ॥ ६८ ॥ चतस्रꣳ सीता यजुषा कृषति ॥ ६९ ॥ अथोत्तरतᳲसिकताऽउपकीर्णा भवन्ति ॥ ७० ॥ अथ रौहिणौ जुहोति ॥ ७१ ॥ ते देवाऽ अब्रुवन् ॥ ७२ ॥ तानि यदा गृह्णाति ॥ ७३ ॥ योग्नौ तिष्ठन् ॥ ७४ ॥ कतमऽ आत्मेति ॥ ७५ ॥ अथ हैनं मनुष्याऽऊचुः ॥ ७६ ॥ अथ यामिच्छेद्गर्भन्दधीतेति ॥ ७७ ॥ सप्तसहस्रषट्शतशेषं चतुर्विंशतिः ॥ प्राश्नीपुत्रादासुरिवासिनᳲ० ॥ ७८ ॥

चतुर्दशकाण्डे शतोक्ता ऋषयस्तृप्यन्ताम् ॥

अथ प्रपाठकाः—व्रत॒मुपैख्यन् ॥ १ ॥ चतुर्धा विहि॒तो ह्वाऽअ॒ग्रेग्नि॒रास ॥ २ ॥ तेवाऽआर्द्रा॒ःस्युः ॥ ३ ॥ स॒ स्रु॒चो॒त्तर॒माघारयिष्यन् ॥ ४ ॥ यज्ञेन वै॒देवाः ॥ ५ ॥ यज्ञे॒न वै॒ देवा दि॒वमपो॒दक्रामन् ॥ ६ ॥ स वै स्रु॒चो॒ व्यूहति ॥ ७ ॥ स यद्वाऽ इत॒श्चेत॒श्च सम्भ॒रति ॥ ८ ॥ च॒रुणो हैन्द्राज्य॒कामऽआ॒दधे ॥ ९ ॥ यत्र वै॒ प्रजा॒पतिः प्रजा॒ः ससृजे ॥ १० ॥ प्रजा॒पतिर्हवा॒ऽएतेना॒ग्ने॒ यज्ञे॒नेजे ॥ ११ ॥ महाहवि॒षा ह वै॒ देवा॒ वृत्रं॒ जघ्नुः ॥ १२ ॥ देवय॒जनं योषयन्ते ॥ १३ ॥ वा॒चं यच्छति ॥ १४ ॥ नीडे॒ कृष्णाजिनमा॒स्तृणाति ॥ १५ ॥ नद्य॒ऽएष॒ पूर्वा॒र्ध्यो व॒र्षिष्ठः थूणाराजो भ॒वति ॥ १६ ॥ विजा॒मानो है॒वास्यधि॒ष्ण्याः ॥ १७ ॥ पा॒शं कृत्त्वा प्र॒तिमुञ्चति ॥ १८ ॥ सोत्युप यजति ॥१९॥ प्राणो॒हवा॒ अस्योपाꣳशुः ॥२०॥ आत्मा॒ हवा॒ऽअस्याग्रयणः ॥ २१ ॥ घ्नन्ति वा॒ऽएत॒द्यज्ञम् ॥ २२ ॥ स वा॒ऽ अवभृथ॒मभ्य॒वैति ॥ २३ ॥ तद्य॒त्रैतद्द्वा॒दशाहे॒न॒ व्यूढश्छन्दसा य॒जते ॥ २४ ॥ देवा॒श्च वाऽअ॒सुराश्च ॥२५॥ बार्हस्पत्ये॒न चरु॒णा प्र॒चरति॒ ॥२६॥ स वा॒ऽअपः सम्भरति ॥ २७ ॥ मैत्रावरुण्या॒पय॒स्यया प्र॒चरति ॥ २८ ॥ अ॒सद्वा ऽइद॒मग्रऽआसीत् ॥ २९ ॥ प्राजापत्यश्च॒रङ्काऽ आ॒लम्भन्ते ॥ ३० ॥ प्र॒दीसाऽ ए॒तेभ्यो भवन्ति ॥ ३१ ॥ तस्या॒ऽएत॒स्याऽआ॒षाढां पूर्वां करोति

॥ ३२ ॥ रुक्म॒ं प्रतिमुच्य बिभर्ति ॥ ३३ ॥ गा॒र्हपत्यञ्चे-
ष्य॒न् पलाशशाख॒या व्यु॒॑दूहति ॥ ३४ ॥ अ॒थ द॒र्भस्तम्भ-
मुपदधाति ॥ ३५ ॥ आत्म॒न्नग्निं गृह्णीतेचेष्यन् ॥ ३६ ॥
कूर्ममुपदधाति ॥ ३७ ॥ प्राणभृ॒तऽउपदधाति ॥ ३८ ॥
अ॒थ विश्व॒ज्योतिषमुपदधाति ॥ ३९ ॥ अथा॒तोन्वावृतम्
॥ ४० ॥ गा॒र्हपत्यमुपदधाति ॥ ४१ ॥ अ॒थातः शतरु-
द्रि॒यं जुहोति ॥ ४२ ॥ प्रत्ये॒त्याग्नि॒ं प्रहरिष्यन् ॥ ४३ ॥
अ॒थैकान्यज्ञक्रतू॒ञ्जुहोति ॥ ४४ ॥ अ॒थ प्रात॒ःप्रातरनुवा-
क॒मुपाकरिष्यन् ॥ ४५ ॥ अग्नि॒रेष॒ पुर॒स्ताच्चीयते ॥ ४६ ॥
अथा॒तश्च॒यनस्यैव ॥ ४७ ॥ संवत्सरो वै॒ प्रजा॒पतिरग्निꣳ
॥ ४८ ॥ नेव वा॒ ऽइदमग्रे॒ स॒दासी॒न्नेव सदासीत् ॥ ४९ ॥
संवत्सरो वै॒ यज्ञꣳ प्रजा॒पतिꣳ ॥ ५० ॥ अपि॒ हवा॒ऽ
एत॒र्हि ॥५१॥ प्रजा॒पतिर्वै॒ प्रजा॒ःसृजा॒मानो तप्यत ॥५२॥
अथा॒तः स्वा॒ध्यायप्रशꣳसा ॥ ५३ ॥ अयं वै॒ यज्ञो योयं
प॒वते ॥५४॥ पुरुषꣳह नाराय॒णं प्रजा॒पतिरुवाच ॥५५॥
सो॒मो वै रा॒जा यज्ञ॒ः प्रजा॒पतिꣳ ॥ ५६ ॥ प्रजा॒पति-
र्य॒ज्ञमसृजत ॥ ५७ ॥ ब्रह्मौदनं पचति ॥ ५८ ॥ नि॒युक्तेषु
प॒शुषु ॥ ५९ ॥ प्रमुच्या॒श्वं द॒क्षिणेन वे॒दिम् ॥ ६० ॥
पुरुषो ह नारा॒यणो कामयत ॥ ६१ ॥ देवा॒ हवै॒ सत्त्रन्नि॒-
षेदुः ॥ ६२ ॥ स यत्रैताꣳहो॒तान्वा॒ह॒ ॥ ६३ ॥ द्व॒या ह
प्राजापत्याः ॥ ६४ ॥ दृप्तबालाकि॒र्हानूचानो गा॒र्ग्यऽ

आस ॥ ६५ ॥ अ॒थ है॒नं भु॒ज्युर्लाह्यायनिꣳ पप्रच्छ ॥६६॥ जन॒क॒ꣳ ह वै॒देहं या॒ज्ञवल्क्यो जगाम ॥ ६७ ॥ भू॒मिरन्त॒रिक्षं द्यौरि॒ति ॥ ६८ ॥ प्राश्नीपुत्रादा॒सुरिवा॒सिनꣳ० ॥६९॥ इति चतुर्दशकाण्डे प्रपाठोक्ता ऋषयस्तृप्यन्ताम् । इति प्रपाठकाः ॥

अ॒थ व्रतं वि॒सृजते स य॒स्मिन्हु॒र्त्तांवमुँल्लोक॒मेत्य॒य निग्राम्याग्यो ग्र॒हान्विगृह्णते॒ऽथगृह॒पतिꣳ सुब्रह्मण्याम॒ाह्वयति ताव॒ाऽएतास्त॒ानि द॒श भवन्ति त॒ा ऽएत॒ाऽअङ्गुलयो म॒ध्यमेव॒ तृतीयां चि॒तिꣳ स॒होवाच॒ाथव॒ꣳशस्त॒स्माऽउहैत॒द्दुवाच स व॒ाऽ एष॒ ऽआ॒त्मैव य॒त्सौत्रामणी मर्यादाया ऽएव॒ लोष्ट॒माहृत्य प्राश्नीपुत्रादा॒सुरिवा॒सिनꣳ० ॥१॥ अन्त्यकाण्डकोक्ता ऋषयस्तृप्यन्ताम् । एवं॒ व्रतं वि॒सृजेत परमाङ्गतिङ्गच्छत॒ीति त॒स्माद्धोतृचमसात् त॒स्मिन् समुप॒हव॒मिष्ट्वा समि॒धोभ्यादधति द्वादश वा त्र॒योदश वा द॒क्षिणा भवन्ति य॒ा वानग्निर्य॒ावत्यस्य सम॒ात्रा त॒ावत्त॒द्भवति त॒स्मात्समान॒सम्बन्धनास्त॒स्मादि॒मे॒ प्राणऽउप॒रिष्टाद॒सञ्छन्नाः संवाद॒नैवार्त्विजो लोका ऽइ॒ति ब्रह्मणो ब्र॒ह्मस्वय॒म्भु ब्र॒ह्मणे नम॒ः कशिन॒ीरे॒वेमाऽ आ॒प्येत॒र्हि प्र॒जा जायन्ते त॒स्मादिम॒ावात्मानमभि॒तो बाहू त॒स्माद्दुहैत॒ज्जीव॒ाश्च पित॒रश्च न॒ संदृश्यन्ते वाजसनेये॒न याज्ञवल्क्ये॒नाख्याय॒न्ते ॥ २ ॥ चतुर्दशकाण्डे अन्त्यफक्किकोक्ता ऋषयस्तृप्यन्ताम् ॥

नमस्कारः—ततः त॒देत॒दृच॒ाभ्युक्तं। नमूषाश्रान्तं सद्वन्ति

देवा ऽइति नहैवैवं विदुषꣳकिञ्चनमृषा श्रान्तं भवति तथो हास्यै तत्सर्वं देवाऽअवन्ति ॥ १ ॥ इति नमस्कारः ।

विसर्जनम्—ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे । उपप्प्रयन्तु मरुतः सुदानवऽइन्द्र प्प्राशूर्भवा सचा ॥ ३/८ ॥ स्वस्वप्रवरान्विसर्जयेत् ॥ जले प्रास्यन्—ॐ समुद्रङ्गच्छ स्वाहान्तरिक्षङ्गच्छस्वाहा देवꣳसवितारङ्गच्छस्वाहा मित्रावरुणौगच्छस्वाहाहोरात्रे गच्छ स्वाहा च्छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञङ्गच्छ स्वाहा सोमङ्गच्छस्वाहा दिव्यन्नभोगच्छस्वाहाग्निवैश्वानरङ्गच्छ स्वाहामनो मेहार्दियच्छदिवन्ते धूमोगच्छतु स्वर्ज्योतिः पृथिवीम्भस्म्मनापृण स्वाहा ॥ ६/२१ ॥ ततो द्विराचमनं कुर्युः ॥

अर्पणम्—अनेनाध्यायोत्सर्गकर्माङ्गत्वेन कृतेन ऋषिपूजनतर्पणादिकर्मणा श्रीभगवान्परमेश्वरः प्रीयतां न मम । ॐ तत्सद्ब्रह्मार्पणमस्तु ॥

इति उत्सर्गप्रयोगः ॥

अथ ऋषिश्राद्धम् ॥

कृताचमनप्राणायामः सङ्कल्पं कुर्यात् । अद्येत्यादि० शुभपुण्यतिथौ उत्सर्गाङ्गभूतमृषिश्राद्धमहं करिष्ये ॥ ॐ इदं विष्णुर्वि० इति मन्त्रेण दिग्बन्धनं कुर्यात् ॥ ततो जलेन "ऋषिश्राद्धस्योपहाराः शुचयो भवन्तु" इत्युपहाराणां

प्रोक्षणम् । देशकालपात्रसम्पदस्तु ॥ अरुन्धतीसहितकश्यपादिसप्तर्षीणामिदमासनं यथा यथा विभागं वः स्वाहा इति दद्यात् ॥

तत आचार्यं सम्पूज्य [1]दक्षिणादानम् ॥ ऋषिश्राद्धसाङ्गतासिद्ध्यर्थं हिरण्यनिष्क्रयीभूतां दक्षिणाम् आचार्याय तुभ्यमहं सम्प्रददे । ॐ कौदा॒त्कस्म्मा॑ऽअदा॒त्कामो॑दा॒त्कामा॑यादात् । कामो॑दा॒ताकाम॑᳚प्प्रतिग्ग्रही॒ताकाम॒ैतत्तै ॥ $\frac{४८}{७}$ ॥ इति मन्त्रम् आचार्यः पठेत् ।

हस्ते जलं गृहीत्वा । कर्मणो न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां दास्ये ॥ इति भूयसीं दद्यात् ॥ तत आचार्यं प्रार्थयेत्—"भो ! आचार्य ! उत्सर्गाङ्गभूतम् ऋषिश्राद्धं परिपूर्णम्" इति । "परिपूर्णम्" इति आचार्यादयः प्रतिवचनं दद्युः । ततः—सहनोऽस्तु सहनोऽवतु सहनऽइदं वीर्यवदस्तु ब्रह्मऽइन्द्रस्तद्वेदयेन यथा न विद्विषामहे इति ॥ पश्चात् "उभाकवी०" इति मन्त्रं पठेत् ॥ इति [2]ऋषिश्राद्धम् ॥

इति श्रावणीपद्धतिः ॥

पारस्करगृह्यसूत्रे अध्यायोपाकर्मसूत्रम् ॥

अथातोऽध्यायोपाकमाषधीनां प्रादुर्भावे श्रवणेन

---

[1] तेभ्यो दक्षिणां दत्त्वा ब्राह्मणेभ्य आशिषो गृह्णीयात् । कृतस्योत्सर्गोपाकर्मकर्मणः साङ्गतासिद्ध्यर्थं यथावकाशेन यथाशक्ति ब्राह्मणान् भोजयिष्यामि इति सङ्कल्पं कुर्यात् ॥ [2] इदम् ऋषिश्राद्धं कृताकृतमस्ति ॥

श्रावण्यां पौर्णमास्याꣳ श्रावणस्य पञ्चम्याꣳ हस्तेन वाज्यंभागाविष्ट्वाज्याहुतीर्जुहोति । पृथिव्या ऽअग्नयऽ इत्यृग्वेदे, ऽन्तरिक्षाय वायवऽइति यजुर्वेदे, दिवे सूर्यायेति सामवेदे, दिग्भ्यश्चन्द्रमसऽ इत्यथर्ववेदे, ब्रह्मणे छन्दोभ्यश्चेति सर्वत्र प्रजापतये देवेभ्यऽ ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतयेऽनुमतये इति चैतदेव व्रतोद्देशेन विसर्गेषु सदसस्पतिमित्यक्षतधानाभिः सर्वेऽनुपठेयुर्हुत्वा हुत्वौदुम्बर्यस्तिस्रस्तिस्रः समिध ऽआदध्युरार्द्राः सपलाशा घृताक्ताः सावित्र्या ब्रह्मचारिणश्च पूर्वकल्पेन शन्नो भवत्वित्यक्षतधानाऽअश्वादन्तः प्राश्नीयुर्दधिक्राव्णइति दधि भक्षेयुः स यावन्तं गणमिच्छेत्तावन्तस्तिलानाकर्षफलकेन जुहुयात्सावित्र्या शुक्रज्योतिरित्यनुवाकेन वा प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्य ॐकारमुक्त्वा त्रिश्च सावित्रीमध्यायादीन्प्रब्रूयादृषिमुखानि बह्वृचानां पर्वाणि छन्दोगानाꣳ सूक्ताभ्यामथर्वणानाꣳ सर्वे जपन्ति सह नोस्तु सह नोवतु सह नऽइदं वीर्यवदस्तु। ब्रह्मऽइन्द्रस्तद्वेद येन यथा न विद्विषामहे इति त्रिरात्रं नाधीयीरँल्लोमनखानामनिकृन्तनमेके प्रागुत्सर्गात् ॥ १३ ॥

अथोपाकर्मप्रयोगः ॥

गुरुः हस्तौ पादौ प्रक्षाल्य द्विराचम्यावसथ्याग्नेर्लौकिकाग्नेर्वा पश्चाच्छिष्यैः सह प्राङ्मुख उपविश्य प्राणायामत्रयं कुर्यात् ।

अद्येत्यादि० शुभपुण्यतिथौ श्रीपरमेश्वरप्रीत्यर्थम् अध्यायोपाकर्मणि पञ्चभूसंस्कारपूर्वकमग्निस्थापनमहं करिष्ये ॥ इति सङ्कल्प्य पञ्चभूसंस्कारान्कुर्यात् । दर्भैः परिसमुह्य ३ । गोमयोदकेनोपलिप्य ३ । स्रुवेणोल्लिख्य ३ । अनामिकाङ्गुष्ठाभ्यामुद्धृत्य ३ । उदकेनाभ्युक्ष्य ३ ॥ ततोऽग्निं प्रतिष्ठाप्य पात्रस्थापनादि कुर्यात् । तत्र पूर्वेण ब्रह्मणो गमनम् । अग्नेरुत्तरतः पात्रासादनम् । पवित्रे द्वे । ताम्रमयी आज्यस्थाली । पालाश्यः समिधः । प्राज्ञावाघारौ । समिद्धतमे आज्यभागौ । सावित्रीमन्त्रेण तिलहोमः । पूर्णपात्रम् दक्षिणा । त्रिरात्रं लोमनखानामनिकृन्तनम् ॥

ऋषिच्छन्ददेवतास्मरणम्—इषेत्त्वेत्यादिकस्य खम्ब्रह्मान्तस्य माध्यन्दिनीयस्य वाजसनेयकस्य यजुर्वेदाम्नायस्य विवस्वानृषिः । वायुर्देवता । गायत्र्यादीनि सर्वाणि छन्दांसि । अध्यायोपाकर्मणि विनियोगः ॥

देवताभिध्यानम्— तत्र प्रजापतिम् । इन्द्रम् । अग्निम् । सोमम् । पृथिवीम् । अग्निम् । ब्रह्माणम् । छन्दा꣡ꣳसि । दिवम् । सूर्य्यम् । ब्रह्माणम् । छन्दाꣳसि । दिशः । चन्द्रमसम् । ब्रह्माणम् । छन्दाꣳसि । प्रजापतिम् । देवान् । ऋषीन् । श्रद्धाम् । मेधाम् । सदसस्पतिम् । अनुमतिम् । एताः प्रधानदेवता आज्येन । सदसस्पतिं धानाभिः । सवितारं तिलैः । अग्निं स्विष्टकृतं धानाशेषेण ।

अग्निम् । वायुम् । सूर्यम् । अग्नीवरुणौ । अग्नीवरुणौ । अग्निम् । वरुणम् । सवितारम् । विष्णुम् । विश्वान्देवान् । मरुतः । स्वर्कान् । वरुणम् । आदित्यम् । अदितिम् । प्रजापतिम् । एता अङ्गप्रधानार्था देवता अस्मिन्कर्मण्यहं यक्ष्ये ॥ ततो ब्रह्मवरणाद्याज्योद्वासनान्तं कर्म कृत्वा तत आज्यावेक्षणं निवृत्याज्यभागं जुहुयात् ॥

सोपयमनं सव्यहस्तमुत्तानं हृदि निधाय पातितदक्षिणजानुर्ब्रह्मणान्वारब्धः दक्षिणहस्तस्थितेन स्रुवेणाज्यहोमः । मनसा— ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ प्रोक्षणीपात्रे संस्रवप्रक्षेपः । ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥

ऋग्वेदे—सप्तविंशत्याहुतयः[1]—ॐ पृथिव्यै स्वाहा इदं पृथिव्यै न मम । ॐ अग्नये स्वाहा इदमग्नये न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ २ ॥ यजुर्वेदे— ॐ अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय न मम । ॐ वायवे स्वाहा इदं वायवे न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ ३ ॥ सामवेदे— ॐ दिवे स्वाहा इदं दिवे न मम । ॐ सूर्याय स्वाहा

---

[1] एताः सप्तविंशत्याहुतयः आज्येन ॥ ततः प्रोक्षितधानाभिघारणम् । स्रुवेण धाना अवदाय । ॐ सदसस्पतिमद्भुतमित्यनेन मन्त्रेण जुहुयात् ॥

इदं सूर्याय न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ ४ ॥ अथर्वणवेदे– ॐ दिग्भ्यः स्वाहा इदं दिग्भ्यो न मम । ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम । ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम । ॐ देवेभ्यः स्वाहा इदं देवेभ्यो न मम । ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यो न मम । ॐ श्रद्धायै स्वाहा इदं श्रद्धायै न मम । ॐ मेधायै स्वाहा इदं मेधायै न मम । ॐ सदसस्पतये स्वाहा इदं सदसस्पतये न मम । ॐ अनुमतये स्वाहा इदम् अनुमतये न मम । ॐसदस॒स्पति॒मद्भु॑तम्प्रि॒यमिन्द्र॑स्य॒काम्म्य॑म् । स॒निम्मे॒धाम॑यासिष॒ꣳ स्वाहा॑ ॥१३/३२॥ इदं सदसस्पतये न मम । गुरुणा पठ्यमानम् इमं मन्त्रं शिष्या अपि सहानुपठेयुः । तत उदुम्बरसमित्त्रितयमभिघार्य हस्ते गृहीत्वा उत्थाय शिष्याः प्राङ्मुखास्तिष्ठन्तः ॐ तत्त्स॑वि॒तुर्व्वरे॑ण्ण्यं॒० ॥३/३०॥ स्वाहा इदमग्नये न मम ॥ एकां समिधमादध्युः । एवमेव मन्त्रं पठित्वा द्वितीयां तथा तृतीयाम् । ततः सर्वे शिष्या उपविशेयुः ।

आचार्यः स्रुवेण धाना अवदाय– ॐ तत्त्स॑वि॒तुर्व्व० ॥३/३०॥ स्वाहा इदमग्नये न मम ॥ द्वितीयां धानाहुतिं पूर्ववत् दद्यात् ॥ ततस्तिस्रोऽपराः समिधो घृतेनाभ्यज्य उत्थाय

प्राङ्मुखास्तिष्ठन्तः—ॐ तत्त्सवितुर्व्वे० स्वाहा ॥३/३०॥ इदमग्नये न मम ॥ एकां समिधमादध्युः। एवं द्वितीयाम् ॐ तत्त्सवितु० स्वाहा ॥ ३/३० ॥ इदमग्नये न मम । एवं तृतीयां ॐ तत्त्सवितुर्व्वे० स्वाहा इदमग्नये न मम ॥ पुनराचार्यो धानाहुतिं जुहुयात् । ॐ सदसस्प्पति० स्वाहा इदं सदसस्पतये न मम ॥ मन्त्रानुपठनं शिष्याणामपि। समित्त्रयं पूर्ववज्जुहुयात्। ॐ तत्त्सवितुर्व्वे० स्वाहा इदमग्नये न मम। एवं द्वितीयां तथा तृतीयाम्। (ब्रह्मचारी तु शिष्योऽहरहरग्निकार्यक्रमेण समिदाधानं कुर्यान्न सावित्र्या) अन्यत्सर्वं समानम् ॥

धानाभक्षणम्—ततो या उपकल्पिता धानास्तिस्त्रस्तिस्रो गृहीत्वा ॐ शन्नो भवन्तु व्वाजिनो हवेषु देवताता मितद्रवः स्वर्क्काः । जम्भयन्तोहिं व्वृकꣳरक्षांꣳसि सनेम्म्यस्म्मद्युयवन्नमीवाः ॥१६/९॥ इति मन्त्रेण दन्तैरस्पृशन्तः सर्वे शिष्याः प्राश्नीयुः ॥ ततो द्विराचमनम् ॥

दधिभक्षणम्—ॐ दधिक्क्राव्णणोऽअकारिषञ्जिष्णणोरश्वस्यव्वाजिनः । सुरभिनोमुखाकरत्त्प्रणऽ आयुꣳषि तारिषत् ॥३२/२३॥ इति मन्त्रेण दधि भक्षेयुः । द्विराचमनम् ॥

तत आचार्यो यावन्तं शिष्यगणम् आत्मन इच्छेत्तावतस्तिलान् गणयित्वा आकर्षफलकेनावदाय—ॐ शुक्क्रज्ज्योतिश्च । चित्त्रज्ज्योतिश्च सत्त्यज्ज्योतिश्च ज्ज्योतिष्म्माँश्च ।

शुक्रश्चोऽऋतपाश्चात्यꣳहाः ॥ इत्याद्यनुवाकेन सावित्र्या चा जुहुयात् । ॐतत्सवितुर्व० ॥ $\frac{२}{३०}$ ॥ इति स्वाहा इदं सवित्रे न मम ॥ संस्रवप्रक्षेपः । ततो धानाभिः स्विष्टकृत् । ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥

भूराद्या नवाहुतयः ॥ तद्यथा— ॐ भूः स्वाहा इदमग्नये न मम ॥ १ ॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥ २ ॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥ ३ ॥ ॐ त्वन्नोऽअग्ग्नेवरुणस्यविद्वान् देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठोवह्नितमःशोशुचानो विश्वाद्वेषाꣳसि प्रमुमुग्ग्ध्यस्म्मत् स्वाहा ॥ $\frac{३}{२१}$ ॥ इदमग्नीवरुणाभ्यां न मम ॥ ४ ॥ ॐसत्वन्नोऽअग्ग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳ सुहवो नऽएधि स्वाहा ॥ $\frac{४}{२१}$ ॥ इदमग्नीवरुणाभ्यां न मम ॥ ५ ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि । अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा (सौरमन्त्रः) । इदमग्नये अयसे न मम ॥ ६ ॥ ॐ येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नोऽअद्य सवितोतविष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा । (सौत्रमन्त्रः) । इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ ७ ॥ ॐउदुत्तमंवरुणपाशमस्म्मदवाधमंविमद्ध्यमꣳ श्रथाय । अथा

व्वयमादित्त्यव्व्रते तवानागसोऽअदितयेस्याम स्वाहा ॥$\frac{१२}{१२}$॥ इदं वरुणायादित्यायादितये च न मम ॥ ८ ॥ उपांशु–ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥९॥ संस्रवप्राशनम् ॥ पवित्राभ्यां मार्जनम् । अग्नौ पवित्रप्रतिपत्तिः ॥ ब्रह्मणे पूर्णपात्रदानम् ॥ तद्यथा कृतस्योपाकर्मणोऽङ्गतया इदं पूर्णपात्रं ब्रह्मन् तुभ्यमहं सम्प्रददे । "ॐ द्यौस्त्वाददातु पृथिवी त्वा प्रतिगृह्णातु" इति ब्रह्मा वदेत् ॥ अग्नेः पश्चात् प्रणीताविमोकः ॥ आपः शिवाः० इति मार्जनम् ॥

ततोऽग्निमुत्तरेण कुशेषु प्रत्यङ्मुखोपविष्टेभ्यः शिष्येभ्यः प्राङ्मुख आचार्यः ओङ्कारमुक्त्वा त्रिश्च सावित्रीमनुब्रूयात् । यथा–ॐ तत्सवि० दयात् ॥ $\frac{२}{३२}$ ॥ इति त्रिः ॥ ततः इषेत्त्वादि ईशावास्यान्तम् । व्रतमुपैष्यन्नित्यादि सर्वमन्त्रब्राह्मणयोरध्यायादि प्रब्रूयात् । बह्वृचाम् ऋषिमुखानि । पर्वाणि छन्दोगानाम् । सूक्तान्यथर्वणानाम् । एवं सर्वं पठित्वा गुरुः शिष्याश्च जपन्ति ॥ ॐ सह नोस्तु सह नोवतु सह नऽइदं वीर्यवदस्तु ब्रह्म । इन्द्रस्तद्वेद येन यथा न विद्विषामहे ॥ इति मन्त्रं जपेयुः ॥ सर्वेषां सङ्कल्पः । त्रिरात्रमध्ययनं लोमनखानामनिकृन्तमवपनं च करिष्यामहे इति ॥ तथैव–प्रागुत्सर्गाद्वा नियमो लोमनखनिकृन्तनम् । उत्सर्गावधि लोमनखानामकृन्तनमहं करिष्ये इति । छन्दसामुत्सर्गात्प्राङ्मन्त्रब्राह्मणयोरध्ययनम् ॥

इत्युपाकर्मप्रयोगः ॥

॥ अथ नवरात्रघटस्थापनविधिः ॥

आचार्यो नवरात्रकर्तारं यजमानं प्राङ्मुखम् उदङ्मुखं वोपवेश्य तस्य भाले "ॐ स्वस्तिनऽ०" इति तिलकं कुर्यात् ॥

ततो यजमान आचमनं प्राणायामञ्च कृत्वा "ॐ श्रीमन्महागणाधिपतये नम इत्यारभ्य सर्वकार्यार्थसिद्धये" इत्यन्तं पठित्वा सङ्कल्पं कुर्यात् ॥

सङ्कल्पः—विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतो० एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलप्राप्त्यर्थं ([१]अप्राप्तलक्ष्मीप्राप्त्यर्थम् इत्यादि०) मम कुटुम्बस्य सपरिवारस्य श्रीमहाकालीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मिकाश्रीदुर्गादेवीप्रीतिद्वारा सर्वापच्छान्तिपूर्वकदीर्घायुर्विपुलधनधान्यपुत्रपौत्राद्यनवच्छिन्नसन्ततिप्राप्तये तथा च द्विपदादिचतुष्पदान्तानां सर्वेषां प्राणिनाम् आयुरारोग्याद्यभिवृद्धये तथा च मम (यजमानस्य) गृहे सन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयादिसमृद्धिपूर्वकं धर्मादिचतुर्विधपुरुषार्थप्राप्तये अद्यारभ्य नवमीपर्यन्तं प्रत्यहं श्रीभगवत्या घटस्वरूपिण्यास्त्रिगुणात्मिकायाः श्रीमहाकालीमहालक्ष्मीमहासरस्वतीस्वरूपिण्या दुर्गादेवतायाः [२]षोडशोपचारैः पूजनसहितम् अखण्डदीपप्रज्वालनं ब्राह्मणद्वारा (प्रत्यहं) [३]सप्तशतीपाठ-

---

[१] इत्यादिपठनीयम् ॥

[२] पात्रासादनपूर्वकं राजोपचारसमन्वितैः ॥

[३] ब्राह्मणद्वारा एकोत्तरवृद्ध्या सप्तशतीपाठसमन्वितम् ॥

कुमारीबटुकपूजनयुतम् उपवासमन्वितञ्च [१]अमुकनवरात्रमहोत्सवाख्यं कर्म करिष्ये ॥

पुनः सङ्कल्पः—तत्रादौ कर्मणो निर्विघ्नतापरिपूर्तये गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्धारापूजनम् आचाराद्वैश्वदेवसङ्कल्पम् आयुष्यमन्त्रजपं नान्दीश्राद्धम् आचार्यवरणञ्च करिष्ये ॥

पुनर्जलं गृहीत्वा । तत्रादौ दिग्रक्षणं कलशार्चनं शङ्खघंटाद्यर्चनञ्च करिष्ये ॥ तत्सर्वम् आचार्यवरणान्तं कर्म कृत्वा भूमौ मृत्तिकाभिः निर्मित्ते पीठे यवाङ्कुरार्थं तत्तद्धान्यानां बीजानि वप्त्वा तस्य समीपे मृत्तिकाघटं भूमौ स्थापयित्वा कलशस्थापनविधिना कलशं स्थापयेत् ॥

अथ कलशस्थापनप्रयोगः ॥

स्वपुरतः शुद्धायां भूमौ पञ्चवर्णैः श्वेतैस्तन्दुलैर्यवैर्वाष्टदलं कृत्वा भूमिं स्पृशेत् ॥ ॐ म॒हीद्यौःपृथि॒वीच॑नऽइ॒मँय्य॒ज्ञम्मिमिक्षताम् ॥ पि॒पृ॒तान्नो॒भरी॑मभिꣳ ॥$\frac{३२}{८}$॥ विश्वाधाराऽसि धरणी शेषनागोपरि स्थिता ॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ तत्र यवप्रक्षेपः ॥ ॐ ओष॑धय॒ꣳ समवदन्त॒सोमे॑नस॒हराज्ञा ॥ यस्मै॑कृ॒णोति॑ब्राह्म॒णस्तꣳ राजन्पारयामसि ॥$\frac{९६}{१२}$॥ कलशं स्पृशेत् ॥ ॐ आजिघ्रक॒लशम्म॒ह्यात्त्वा॑विश॒न्त्विन्द॑वꣳ ॥ पुन॑रू॒र्ज्जानि॑वर्त्तस्व

---

१ (चैत्रे) वासन्तिकनवरात्रोत्सवाख्यम् (आश्विने) शारदीयनवरात्रोत्सवाख्यम् ॥

सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्म्मा विशताद्रयिः ॥ ४२/८ ॥ हेमरूप्यादिसम्भूतं ताम्रजं सुदृढं नवम् । कलशं धौतकल्माषं छिद्रवर्णविवर्जितम् ॥ तत्र कलशे जलपूरणम् ॥ ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनी स्त्थो वरुणस्यऽऋतसदन्न्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ३६/४ ॥ जीवनं सर्वजीवानां पावनं पावनात्मकम् । बीजं सर्वौषधीनां च तज्जलं पूरयाम्यहम् ॥ गन्धप्रक्षेपः ॥ ॐ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्प्पतिः ॥ त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्च्यत ॥ ९८/१२ ॥ केशरागरुकङ्कोलघनसारसमन्वितम् । मृगनाभियुतं गन्धं कलशे प्रक्षिपाम्यहम् ॥ धान्यप्रक्षेपः ॥ ॐ धान्यमसि धिनुहि देवान्प्राणाय त्त्वोदानाय त्त्वा व्यानाय त्त्वा ॥ दीर्ग्घामनुप्प्रसितिमायुषे धान्देवो वः सविता हिरण्यपाणिः प्प्रतिगृब्भ्णात्त्वच्छिद्रेण पाणिना चक्क्षुषे त्त्वा महीनाम्पयोसि ॥ २०/१ ॥ धान्यौषधी मनुष्याणां जीवनं परमं स्मृतम् ॥ निर्मिता ब्रह्मणा पूर्वं कलशे प्रक्षिपाम्यहम् ॥ सर्वौषधीप्रक्षेपः ॥ ॐ याऽओषधीः पूर्व्वा जाता देवेब्भ्यस्त्रियुगम्पुरा ॥ मनै नु बब्भ्रूणामहꣳ शतन्धामानि सप्त च ॥ ७५/१२ ॥ ओषध्यः सर्ववृक्षाणां तृणगुल्मलतास्तु याः । दूर्वासर्षपसंयुक्ताः कलशे प्रक्षिपाम्यहम् ॥ दूर्वाप्रक्षेपः ॥ ॐ

काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥ एवानोदूर्व्वेप्रतनुसहस्रेणशतेनच ॥ २०/१३ ॥ दूर्वे ह्यमृतसम्पन्ने शतमूले शताङ्कुरे । शतं पातकसंहन्त्री कलशे प्रक्षिपाम्यहम् ॥ पञ्चपल्लवप्रक्षेपः ॥ ॐ अश्श्वत्थेवोनिषदनम्पर्णेवोव्वसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥ ७९/१२ ॥ अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः । पञ्चैतान् पल्लवानस्मिन्कलशे प्रक्षिपाम्यहम् ॥ सप्तमृद्प्रक्षेपः ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानꣳशर्म्मसप्रथाꣳ ॥ १३/३६ ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्सङ्गमाद् ह्रदात् । राजस्थानाच्च गोष्ठाच्च मृदमानीय निक्षिपेत् ॥ फलप्रक्षेपः ॥ ॐ याःफलिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीꣳ ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसꣳ ॥ ८९/१२ ॥ पूगीफलमिदं दिव्यं पवित्रं पुण्यदं नृणाम् । हारकं पापपुञ्जानां कलशे प्रक्षिपाम्यहम् ॥ पञ्चरत्नप्रक्षेपः ॥ ॐ परिवाजपतिꣳकविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥ २५/११ ॥ कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम् । एतानि पञ्चरत्नानि कलशे प्रक्षिपाम्यहम् ॥ हिरण्यप्रक्षेपः । ॐ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकऽआसीत् ॥ सदाधार पृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥ ४/१३ ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदं कलशे

प्रक्षिपाम्यहम् ॥ ततो रक्तसूत्रेण वस्त्रेण वा कलशं वेष्टयेत् ॥ ॐ सुजातोज्ज्योतिषासहशर्म्मवरूथमासदत्त्स्वः ॥ वासोऽअग्नेविश्वरूपꣳसंव्ययस्वविभावसो ॥ ४०/११ ॥ ॐ युवासुवासाः परीवीत आगात्स उ श्रेयान्भवति जायमानः ॥ तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥ पा० गृ० का० २ कं० २ मं० ९ ॥ सूत्रं कार्पाससम्भूतं ब्रह्मणा निर्मितं पुरा । येन बद्धं जगत्सर्वं तेनेमं वेष्टयाम्यहम् ॥ कलशस्योपरि पूर्णपात्रं न्यसेत् ॥ ॐ पूर्ण्णादर्व्विपरापतसुपूर्ण्णापुनरापत ॥ व्वस्नेवव्विक्क्रीणावहाऽइषमूर्ज्जꣳशतक्क्रतो ॥ ४९/३ ॥ पिधानं सर्ववस्तूनां सर्वकार्यार्थसाधनम् । सम्पूर्णः कलशो येन पात्रं तत्कलशोपरि ॥ यजमानो हस्तेऽक्षतानादाय तत्र वरुणमावाहयेत् ॥ ॐतत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्ब्भिः ॥ अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ ४९/१८ ॥ ॐ भूर्भुवः स्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् आवाहयामि स्थापयामि ॥ प्रतिष्ठापनम् ॥ ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टꣳय्यज्ञꣳसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ ॥ १३/२ ॥ प्रतिष्ठा सर्वदेवानां मित्रावरुणनिर्मिता । कलशे वरुणस्यास्मिन्प्रतिष्ठां तां

करोम्यहम् ॥ ॐवरुणाय० वरुणः सुप्रतिष्ठितो वरदो भव ॥ ॐ भू० वरुणाय० सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥

ततो हस्ताभ्यां तं घटमुत्थाप्य स्वसमीपे मृत्तिकाभिर्निर्मिते मृत्तिकापीठे स्थापयेत् ॥ ततो हस्तेऽक्षतानादाय तत्र भगवतीं त्रिगुणात्मिकां श्रीदुर्गादेवीम् आवाहयेत् ॥

तद्यथा—आगच्छ वरदे देवि दैत्यदर्पनिषूदिनि ॥ पूजां गृहाण समुखि नमस्ते शङ्करप्रिये ॥ सर्वतीर्थमयं वारि सर्वदेवसमन्विता । इमं घटं समागच्छ तिष्ठ देवगणैः सह ॥ दुर्गे देवि त्वमागच्छ सान्निध्यमिह कल्पय । बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह ॥ कल्याणजननीं सत्यां कामदां करुणाकराम् ॥ अनन्तशक्तिसम्पन्नां दुर्गामावाहयाम्यहम् ॥ ॐ मनोजूति० ॥ ॐ भूर्भुवः स्वः भगवतीं श्रीमहाकालीमहालक्ष्मीमहासरस्वतीस्वरूपिणीं श्रीदुर्गाम् अस्मिन्घटे आवा० स्थाप० ॥ इति अक्षतान् घटे दत्त्वा भो ! दुर्गे सुप्रतिष्ठिता वरदा भव ॥ इति प्रार्थयेत् ॥

तत आवाहनादिमुद्राः प्रदर्शयेत् ॥ मूलमन्त्रं भो दुर्गे त्वम् अस्मिन्घटे [1]आवाहिता भव। भो दुर्गे त्वम् अस्मिन्घटे संस्था[2]पिता भव । भो दुर्गे त्वम् अस्मिन्घटे [3]सन्निहिता भव ॥ भो दुर्गे त्वम् अस्मिन्घटे [1]सन्निरुद्धा भव ॥ भो दुर्गे त्वम् अस्मिन्घटे [2]सम्मुखीकृता भव ॥ भो दुर्गे त्वम् अस्मिन्घटे

---

[1] हस्ताभ्यामञ्जलिं कृत्वाऽनामिकामूलपर्वणोः । अङ्गुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहनी स्मृता ॥ [2] अधोमुखीकृता सैव प्रोक्ता स्थापनकर्मणि ॥ [3] आश्लिष्टमुष्टियुगला प्रोन्नताङ्गुष्ठयुग्मका । सन्निधाने समुद्दिष्टा मुद्रेयं तन्त्रवेदिभिः ॥

षडङ्गेन सकलीकृता[3] भव ॥ भो दुर्गे त्वम् अस्मिन्घटे अवगुण्ठिता[4] भव ॥ भो दुर्गे त्वम् अस्मिन्घटे अमृतीकृता[5] भव । परमीकृता[6] भव ॥ इति मुद्राः प्रदर्श्य पञ्चोपचारैः षोडशोपचारैः पात्रासादनपूर्वकं वा पूजनं कुर्यात् ॥

ततः सङ्कल्पानुसारेण चैकोत्तरवृद्ध्या प्रत्यहमेकं वा सप्तशतीपाठं कुमारिकाबटुकपूजनं स्वयं ब्राह्मणद्वारा वा कुर्यात् ॥

एवं श्रीदुर्गादेव्याः पूजनं कृत्वा नियमग्रहणं कुर्यात् ॥

भगवति त्रिगुणात्मिके घटस्वरूपिणि दुर्गे तव प्रीतये मयाऽद्याऽऽरब्धे अमुक[7]नवरात्रमहोत्सवकर्मणि, "अद्यप्रभृति देवेशि करिष्ये व्रतमुत्तमम् । नवरात्रं करिष्यामि दुःखदारिद्र्यनाशनम् ॥ करिष्ये शास्त्रविधिना निर्विघ्नेन समाप्यताम् ॥ नवदुर्गात्मिके मातर्निर्विघ्नं कुरु मे सदा । नवरात्रं करिष्यामि सर्वभोगविवर्जितः ॥ उपोषणं करिष्यामि त्वमेव शरणं मम । इदं व्रतं मया देवि गृहीतं तव सन्निधौ ॥ ब्रह्मप्रिये महाभागे सत्यव्रतपरायणे । व्रतमेतत्करिष्यामि सौभाग्यमतुलं कुरु ॥ अद्य स्थित्वा निराहारो जितक्रोधो जितेन्द्रियः ॥ नवमे (दशमे) ऽहनि महादेवि करिष्ये पारणं ह्यहम्" इति नियमं गृहीत्वा तथा कुर्यात् ॥

---

१ अङ्गुष्ठतर्जनी सैव सन्निरुद्धा समीरिता ॥ २ उत्तानौ द्वौ करौ मुष्टी सम्मुखीकरणी तथा ॥ ३ आग्नेयादिक्रमेण हृदयादिशिखान्तं न्यस्य पुरः नेत्रं चतुर्दिक्षु अस्त्रञ्च विन्यस्यैवं हृदय-शिरः-शिखा-कवच-नेत्रास्त्रादिषडङ्गन्यासैः सकलीकरणम् ॥ ४ सव्यहस्तकृता मुष्टिर्दीर्घाऽधोमुखतर्जनी। अवगुण्ठनमुद्रेयममितो भ्रामिता सती ॥ ५ अमृतीकरणं कुर्यात्तथा देशिकसत्तमः ॥ अन्योन्यग्रथिताङ्गुष्ठा प्रसारितकराङ्गुली ॥ ६ करसम्पुटेन नमस्कारः परमीकरणम् ॥ ७ वासन्तिक० शारदीय० वा ॥

ततोऽष्टमे नवमेऽहनि वा ब्राह्मणद्वारा कृतस्य सप्तशतीपाठकर्मणो होमादिकं द्विगुणं होमाभावे पाठं वा कृत्वा नवमे दशमेऽहनि वा प्रातःकाले देवीं सम्पूज्य महानैवेद्यं दत्त्वा आरार्तिक्यं कृत्वा व्रतविसर्गं कुर्यात् ॥

तद्यथा—अद्येत्यादि० शुभपुण्यतिथौ "उपोषणं ब्रह्मचर्यं भूशय्या च तथैव हि । पूजनं दीपदानं च चण्डीपाठस्तथैव च ॥ होमं चैव यथाशक्ति चैतत्सर्वं मया कृतम् ॥ तत्सर्वं पूर्णतां यातु प्रसीद जगदीश्वरि ॥ चण्डिके ते घृतास्तुष्ट्यै मया ये नियमा यमाः । भोजयिष्यामि तान्त्यक्त्वा व्रतान्तेऽद्यैव चण्डिके । अनेनोपोषणादिनियमपूर्वककृतेन [१]अमुकनवरात्रकर्मणा भगवती त्रिगुणात्मिका जगद्धात्री परम्बा श्रीदुर्गा प्रीयतां न मम ॥" इति जलम् उत्सृज्य नमस्कृत्य निर्वाणमुद्रया घटस्वरूपिण्या दुर्गादेव्याः शिरसः पुष्पं गृहीत्वा देवीं स्वहृदि विसृज्याक्षतैः परिवारदेवतानां "ॐउत्तिष्ठब्रह्म०" इति विसर्जनं कुर्यात् ॥

तत आचार्यो घटजलेन सपत्नीकं यजमानम् अभिषिञ्चेत् । स्वयं वा तज्जलेनात्मानं सपरिवारम् अभिषिच्य कुमारिकाबटुकसुवासिनीभ्यो यथाशक्ति भोजनं दत्त्वा भोजनं कुर्यात् ।

इति नवरात्रघटस्थापनविधिः समाप्तः ॥

---

[१] अत्र वासन्तिक० इति । शारदीय० इति वा वक्तव्यम् ॥

॥ अथ वास्तुमण्डलदेवतापूजनप्रयोगः ॥

वास्तुमण्डलार्थं[1] चतुःषष्टिकोष्टात्मके वास्तुपीठे पश्चिमत आरभ्य प्रागायता उदक्संस्थाः, दक्षिणत आरभ्य उत्तरायताः प्राक्संस्था नव नव रेखाः कृत्वा तत्र समचतुरस्रेऽर्धसार्धद्विपदादिभिः पञ्चचत्वारिंशत्पदानि निर्माय मध्यचतुःकोष्टकादारभ्य ब्रह्मादिदेवतानाम् आवाहनं कुर्यात् ॥

तत्रादौ सपत्नीको यजमानो वास्तुपीठस्य समीपे पश्चिमाभिमुख उपविश्य आचमनं प्राणायामञ्च कुर्यात् ॥

ततो हस्ते जलं गृहीत्वा ॥ अद्यपूर्वोच्चारित० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ प्रारब्धस्य असुकयागस्याङ्गत्वेन अस्मिश्चतुःषष्टिकोष्टात्मके वास्तुपीठे ब्रह्मादिवास्तुमण्डलदेवतानाम् आवाहनं पूजनञ्च करिष्ये ॥

---

[1] अत्र चतुःषष्टिकोष्टात्मके वास्तुपीठे शिष्टाः "गृहे प्रासादे च शिख्यादिक्रम ईरितः ॥" इति वचनं समाश्रित्य यज्ञादौ शिख्यादीनामावाहनमिच्छन्ति । अयमपि पक्षो मात्स्योक्तः ॥ रुद्रकल्पद्रुमकारैस्तु यज्ञादौ ब्रह्मादीनां स्थापनं विहितम् । अस्माभिरपि तदनुसारमेव स्थापनं विधीयते । तथैव शारदातिलकेऽप्ययमेव पक्षोऽङ्गीकृतः ॥ मण्डपवास्तुपीठं नवरेखात्मकं चतुःषष्टिकोष्टात्मकम् ॥ गृहवास्तुपीठं दश रेखात्मकम् एकाशीतिपदात्मकम् ॥ अस्माकं वास्तुपीठस्य निर्माणविधौ अनेके भेदा उपलब्धाः ॥ परञ्च तेषां मध्ये प्रायः एकं नवरेखाभिः चतुःषष्टिकोष्टात्मकं, द्वितीयं दश रेखाभिः एकाशीतिकोष्टात्मकं वास्तुपीठं विशेषतया प्रसिद्धं दृश्यते ॥ एवं द्वयोर्मध्ये शिष्टैरपि गृहवास्तुकर्मणि एकाशीतिकोष्टात्मकं मण्डपादौ चतुःषष्टिकोष्टात्मकं वास्तुपीठं निर्माय चतुःषष्टिकोष्टात्मके मध्यचतुःकोष्टकादारभ्य ब्रह्मादिवास्तुमंडलदेवतानां तथाचेशानकोणतः आरभ्य शिख्यादीनां वा आवाहनं प्रोक्तम् । एकाशीतिपदे गृहवास्तुमण्डलेऽपि मध्यचतुःकोष्टतो ब्रह्मादीनाम् आवाहनमपि प्रोक्तम् ॥ "ब्रह्माणमादितः कृत्वा शिखिनं वा क्रमेण तु" ॥ इति कारिका ॥ तेन पक्षद्वयम् ॥

वास्तुपीठस्याग्नेयादिक्रमेण शङ्करोपणम् ॥ आग्नेय्याम्—ॐ विशन्तु भूतले नागा लोकपालाश्च सर्वतः । मण्डपेऽत्रावतिष्ठन्तु ह्यायुर्बलकराः सदा ॥ १ ॥ ततो नैर्ऋत्याम्—विशन्तु भूतले नागा लोकपालाश्च सर्वतः । मण्डपेऽत्रावतिष्ठन्तु ह्यायुर्बलकराः सदा ॥ २ ॥ ततो वायव्याम्—विशन्तु भूतले नागा लोकपालाश्च सर्वतः । मण्डपेऽत्रावतिष्ठन्तु ह्यायुर्बलकराः सदा ॥ ३ ॥ तत ऐशान्याम्—विशन्तु भूतले नागा लोकपालाश्च सर्वतः । मण्डपेऽत्रावतिष्ठन्तु ह्यायुर्बलकराः सदा ॥ ४ ॥ एवमाग्नेयादिषु चतुष्कोणेषु शङ्कूनारोप्याऽऽग्नेयादिक्रमेणैव माषभक्तं दध्योदनं वा बलिं दद्यात् ॥ आग्नेय्यां शङ्कुसमीपे बलिं निधाय हस्ते जलं गृहीत्वा । ॐ अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तान्समाश्रिताः ॥ बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ १ ॥ इति जलमुत्सृजेत् ॥ एवं नैर्ऋत्यां शङ्कुसमीपे बलिं निधाय हस्ते जलं गृहीत्वा । ॐ नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः ॥ बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ २ ॥ इति जलमुत्सृजेत् ॥ ततो वायव्यां शङ्कुसमीपे बलिं निधाय हस्ते जलं गृहीत्वा । ॐ नमो वै वायुरक्षेभ्यो ये चान्ये तान्समाश्रिताः ॥ बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ ३ ॥ इति जलमुत्सृजेत् ॥ तत ऐशान्यां शङ्कुसमीपे बलिं निधाय हस्ते जलमादाय । ॐ रुद्रेभ्यश्चैव सर्पेभ्यो ये चान्ये

तान्समाश्रिताः ॥ बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ ४ ॥ इति जलमुत्सृजेत् ॥ तत आग्नेयादिक्रमेण शङ्कुदेवताभ्यो नमो गन्धं पुष्पं धूपं दीपं नैवेद्यञ्च सम० ॥ सर्वोपचारार्थे नमस्कारान् सम० ॥ अनेन शङ्कुरोपणपूर्वकबलिदानेन चतस्र आग्नेयादिविदिग्देवताः प्रीयन्तां न मम ॥

अथ रेखाकरणं पूजनञ्च ॥ वास्तुपीठे श्वेतं वस्त्रं प्रसार्य तदुपरि सुवर्णशलाकया कुशशलाकया वा पश्चिमत आरभ्य प्रागायता उदक्संस्थाः, दक्षिणत आरभ्य उदगायताः प्राक्संस्थाः समचतुरस्रा नव नव रेखा विदध्यात् ॥ प्रथमं पश्चिमत आरभ्य प्रागायता उदक्संस्था नव रेखाः कार्याः ॥ ॐ शान्तायै नमः ॥ १ ॥ ॐ यशोवत्यै नमः ॥ २ ॥ ॐ कान्तायै नमः ॥ ३ ॥ ॐ विशालायै नमः ॥ ४ ॥ ॐ प्राणवाहिन्यै नमः ॥ ५ ॥ ॐ सत्यै नमः ॥ ६ ॥ ॐ सुमनायै नमः ॥ ७ ॥ ॐ नन्दायै नमः ॥ ८ ॥ ॐ [1]सुभद्रायै नमः ॥ ९ ॥ ततो दक्षिणत आरभ्य उदगायताः पूर्वदिक्संस्था नव रेखाः कार्याः ॥ ॐ हिरण्यायै नमः ॥ १ ॥ ॐ सुव्रतायै नमः ॥ २ ॥ ॐ लक्ष्म्यै नमः ॥ ३ ॥ ॐ विभूत्यै नमः ॥ ४ ॥ ॐ विमलायै नमः ॥ ५ ॥ ॐ प्रियायै नमः ॥ ६ ॥ ॐ जयायै नमः ॥ ७ ॥ ॐ कालायै नमः ॥ ८ ॥ ॐ [2]विशोकायै नमः ॥ ९ ॥ हस्तेऽक्षतान्

---

(१) सुरथायै नमः ॥ (२) इडायै नमः ॥ इमे रेखे गृहवास्तुकर्मण्यधिके ज्ञेये ॥

गृहीत्वा ॥ ॐमनोजूतिर्जुषता० ॥१३/२॥ रेखादेवताः सुप्रतिष्ठिता वरदा भवत । ॐ भू० रेखादेवताभ्यो नमः गन्धं पुष्पं धूपं दीपं नैवेद्यञ्च समर्पयामि ॥ सर्वोपचारार्थे नमस्कारान् समर्पयामि ॥ अनेन रेखादेवतानां पञ्चोपचारैः कृतेन पूजनेन ॐ भू० रेखादेवताः प्रीयन्तां न मम ॥

॥ अथ[1] वास्तुमण्डलदेवतास्थापनम् ॥

[2]मध्ये चतुःकोष्टके वास्तोर्हृदये ॥ ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्चयोनिमसतश्चव्विवः ॥ ३/१३ ॥ अक्षमालां स्रुवं दक्षे वामे दण्डकमण्डलू । दधानमष्टनयनं यजेन्मध्येऽम्बुजासनम् ॥ चतुर्मुखोऽरुणो ब्रह्माऽक्षमालास्रुवतोयभृत् । लम्बोदरो हंसस्थितः श्मश्रुलो वास्तुहृत्स्थितः ॥ ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणम् आ० स्था० ॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥१॥ ततो मध्यचतुःकोष्टकस्य पूर्वपदद्वये दक्षिणस्तने ॥ ॐ अर्य्यमणम्बृहस्प्पतिमिन्द्रन्दानाय चोदय ॥ व्वाचं व्विष्णुꣳ सरस्वतीꣳ सवितारञ्च व्वाजिनꣳ स्वाहा ॥ २७/९ ॥ अर्यमा रक्तवर्णस्तु दीप्तिमान्नथ

---

[1] गृहवास्तुकर्मणि देवतास्थापनम्-कुंकुमादिना सुवर्णशलाकया वा प्रत्यगारम्भाः प्रागपवर्गोदक्संस्थाः, ततो दक्षिणारम्भोदग्गताः पूर्वदिक्संस्थाश्च दश दश रेखाः कृत्वा पदानि विभजेत् ॥ तत्र मध्ये नवपदे ब्रह्मणः स्थापनं कुर्यात् ॥

[2] मध्ये नवपदेषु हृन्नाभ्यो-ॐ ब्रह्मणे नमः ब्रह्माणम् आ० स्थापयामि ॥

वाहनः । द्विपद्मसूत्रखट्वांगपाणिर्दक्षस्तनाश्रितः ॥ ॐ भूर्भुवः स्वः अर्यम्णे नमः अर्यमणम् आ० स्था० ॥ भो अर्यमन् इहागच्छ इह तिष्ठ ॥ २ ॥ मध्यचतुःकोष्टकस्य दक्षिणपदद्वये जठरदक्षिणे । ॐ असिं यमोऽअस्यादित्त्योऽअर्व्वन्नसिं त्रितो गुह्येन व्रतेन ॥ असि सोमेन समयाविपृक्तऽआहुस्ते त्रीणि दिवि बन्धनानि ॥ १४/२९ ॥ विवस्वान्द्विभुजः शोणद्युतिर्दण्डी च पङ्कजी । कर्मसाक्षी रथी वास्तोः क्रोडदक्षिणभागतः ॥ ॐ भूर्भुवः स्वः विवस्वते नमः विवस्वन्तम् आ० स्था० ॥ भो विवस्वन् इहागच्छ इह तिष्ठ ॥ ३ ॥ पश्चिमपदद्वये जठरवामभागे ॥ ॐ मित्रस्य चर्षणीधृतोवो देवस्य सानसि । द्युम्नञ्चित्रश्रवस्तमम् ॥ ६२/११ ॥ हलाब्जध्वजवज्राख्यहस्तो मित्रो हरिप्रियः । ऊर्ध्वाधः श्यामलो गौरो

---

[1] ब्रह्मणः— पूर्वपदत्रयेऽर्यमा । तद्दक्षिणे त्रिपदे सविता । ब्रह्मणः पश्चिमायां त्रिपदे विवस्वान् । ब्रह्मण उत्तरस्यां त्रिपदे विबुधाधिपः ॥ ब्रह्मण आग्नेयामेकपदो मित्रः । नैर्ऋत्यामेकपदो राजयक्ष्मा । वायव्यामेकपदो पृथ्वीधरः ॥ ईशान्यामेकपद आपवत्सः ।

२ मध्यनवपदात्पूर्वपदत्रये दक्षिणस्तने—ॐ अर्यम्णे० अर्यमणम् आ० स्था० ॥
३ तद्दक्षिणपदत्रये जठरदक्षिणे—ॐ सवित्रे नमः सवितारम् आ० स्था० ॥
४ तत्पश्चिमपदत्रये जठरवामभागे—ॐ विवस्वते नमः विवस्वन्तम् आ० स्था० ॥
५ तदुत्तरपदत्रये वामस्तने—ॐ विबुधा० विबुधाधि० आ० स्था० ॥
६ तद्दक्षिणाग्नेयकोणैकपदे दक्षिणहस्ते—ॐ मित्राय नमः मित्रम् आ० स्था० ॥
७ तत्पश्चिमनैर्ऋत्यकोणैकपदे वृषणयोः—ॐ राजयक्ष्मणे० राज्ञय० आ० स्था० ॥
८ तदुत्तरवायव्यकोणैकपदे वामहस्ते—ॐ पृथ्वीधराय० पृथ्वीध० आ० स्था० ॥
९ तत्प्रागीशानकोणैकपदे उरसि—ॐ आपवत्साय० आपवत्सम् आ० स्था० ॥

वास्तोर्जठरसंश्रितः ॥ ॐ भूर्भुवः स्वः मित्राय नमः मित्रम् आवा० स्था० ॥ भो मित्र इहागच्छ इह तिष्ठ ॥ ४ ॥ उत्तरे पदद्वये वामस्तने ॥ ॐ सदद्भ्रामे सदरण्ण्ये सत्त्सभायां सदिन्द्रिये ॥ सदेनंश्वकृमा व्वयमिदन्तदवंयजामहे स्वाहा ॥ ४५/३ ॥ सहस्रवदनः श्रीमान् शङ्खचक्राख्यकुम्भभृत् । नीलः पृथ्वीधरो वास्तोर्जठरांशे समाश्रितः ॥ ॐ भूर्भुवः स्वः पृथ्वीधराय नमः पृथ्वीधरम् आ० स्था० ॥ भो पृथ्वीधर इहागच्छ इह तिष्ठ ॥ ५ ॥ आग्नेय्यां सूत्रेण द्विधाकृते ब्रह्मपदसंलग्ने उत्तरार्द्धे दक्षिणहस्ते ॥ ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्रधारणम् ॥ देवस्त्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेणसुप्प्वा कामधुक्क्षः ॥ ३/१ ॥ सावित्रो द्विभुजः पद्मगौरः पद्मासनस्थितः । वेदपाठरतो वास्तोर्दक्षहस्ततलाश्रितः ॥ ॐ भूर्भुवः स्वः सावित्राय नमः सावित्रम् आ० स्था० ॥ भो सावित्र इहागच्छ इह तिष्ठ ॥ ६ ॥ आग्नेय्यां सूत्रेण द्विधाकृते ब्रह्मपदसंलग्ने दक्षिणार्द्धे दक्षिणहस्ते ॥ ॐ उदुत्त्यञ्जातवेद-

---

बाह्यपङ्क्तौ–ईशानकोणादधः एकपदे आपः । आग्नेय्याम्– आग्नेयकोणाधः एकपदः सावित्रः । नैर्ऋत्याम् नैर्ऋत्यकोणाधः एकपदो जयः । वायव्याम्– वायुकोणाधः एकपदो रुद्रः ।

१० तद्दक्षिणेऽग्निखिपदाधःकोणपदे मुखे–ॐ आपाय नमः आपम् आ० स्था० ॥

११ आग्नेयवायुपदाधःकोणपदे दक्षिणहस्ते–ॐसावित्राय० सावित्रम् आ० स्था०

१२ नैर्ऋत्यपितृपदाधःकोणपदे–ॐजयाय नमः जयम् आ० स्थापयामि ॥

१३ वायव्यरोगपदाधःकोणपदे–ॐ रुद्राय नमः रुद्रम् आवाहयामि स्था० ॥

सन्देवं वहन्ति केतवः ॥ दृशे विश्वाय सूर्य्यम् ॥ ३१/३३ ॥ सविता जनिता विश्वं द्विबाहुररुणच्छविः । रथगामी पद्मपाणिर्वास्तोर्क्रोडान्तरस्थितः ॥ ॐ भूर्भुवः स्वः सवित्रे नमः सवितारम् आ० स्था० ॥ भो सवितः इहागच्छ इह तिष्ठ ॥ ७ ॥ नैर्ऋत्यां सूत्रेण द्विधाकृते ब्रह्मपदसंलग्ने दक्षिणार्द्धे वृषणयोः॥ॐसबोधिसूरिर्म्मघवावसुपतेवसुदावन्॥ सुयोदूष्युस्मद्द्वेषाᳬसिविश्श्वकर्म्मणेस्वाहा ॥ ४३/१२ ॥ सहस्राक्षो गजारूढः पीताङ्गो विबुधाधिपः । वज्रोत्पलकरः श्रीमान् वास्तोर्जठरवामगः ॥ ॐ भूर्भुवः स्वः विबुधाधिपाय नमः विबुधाधिपम् आ० स्था० ॥ भो विबुधाधिप इहागच्छ इह तिष्ठ ॥ ८ ॥ नैर्ऋत्यां सूत्रेण द्विधाकृते ब्रह्मपदसंलग्ने उत्तरार्द्धे मेढ्रे ॥ ॐ यदक्रन्दᳬ प्प्रथमञ्जायमानऽउद्यन्त्समु-

---

अथ बाह्यपङ्क्तौ—ईशानादिक्रमेणाग्नेयकोणपर्यन्तम् । ईशान्यां शिखी तद्दक्षिणे एकपदे तत्पङ्क्तौ पर्जन्यः । तस्यामेव पङ्क्तौ द्विपदाः क्रमेण जयन्त—कुलिशायुध—सूर्य—सत्य—भृशाः ॥ तस्यामेव पङ्क्तौ एकपद आकाशः । तस्यामेव पङ्क्तौ आग्नेयामेकपदो वायुः ।

१४ ईशानकोणपदे वास्तोः शिरसि—ॐ शिखिने नमः शिखिनम् आ० स्थाप० ॥
१५ तद्दक्षिणैकपदे दक्षिणनेत्रे—ॐ पर्जन्याय नमः पर्जन्यम् आवा० स्थाप० ॥
१६ तद्दक्षिणपदद्वये दक्षिणश्रोत्रे—ॐ जयन्ताय नमः जयन्तम् आवा० स्था० ॥
१७ तद्दक्षिणपदद्वये दक्षिणांसे—ॐ कुलिशायुधाय० कुलिशायुधम् आ० स्था० ॥
१८ तद्दक्षिणपदद्वये दक्षिणबाहौ—ॐ सूर्याय नमः सूर्यम् आ० स्थापयामि ॥
१९ तद्दक्षिणपदद्वये दक्षिणप्रबाहौ—ॐ सत्याय नमः सत्यं आवा० स्था० ॥
२० तद्दक्षिणपदद्वये दक्षिणकूर्परे—ॐ भृशाय नमः भृशम् आवा० स्थापयामि ॥
२१ तद्दक्षिणैकपदे दक्षिणप्रबाहौ—ॐ आकाशाय० आकाशम् आवा० स्था० ॥
२२ तद्दक्षिणाग्नेयकोणपदे दक्षिणप्रबाहौ—ॐ वायवे नमः वायुम् आ० स्था० ॥

द्रादुतवा पुरीषात् ॥ श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यम्महि जातन्तेऽअर्वन् ॥ $\frac{१३}{२९}$ ॥ जयो वज्रधरो देवो महोग्रोऽतुलविक्रमः । पीतवर्णो गजारूढो वास्तुदेहसमाश्रितः ॥ ॐ भूर्भुवः स्वः जयाय नमः जयम् आ० स्था० ॥ भो जय इहागच्छ इह तिष्ठ ॥९॥ वायव्यां सूत्रेण द्विधाकृते ब्रह्मपदसंलग्ने वायव्यपददक्षिणार्द्धे वामहस्ते ॥ ॐ नाशयित्री बलासस्यार्शसऽउपचितामसि ॥ अथो शतस्य यक्ष्माणाम्पाकारोरसि नाशनी ॥ $\frac{१७}{१२}$ ॥ वरशक्तिधरो ब्रह्मन्वीर्यवान् बर्हिवाहनः । घण्टाकुक्कुटवान् वास्तोर्वृषणांशे समाश्रितः ॥ ॐ भूर्भुवः स्वः राजयक्ष्मणे नमः राजक्ष्माणम् आ० स्था० ॥ भो राजयक्ष्मन् इहागच्छ इह तिष्ठ ॥ १० ॥ वायव्यां सूत्रेण द्विधाकृते ब्रह्मपदसंलग्ने वायव्यपदोत्तरार्द्धे वामहस्ते ॥ ॐ याते रुद्र शिवा तनूरघोरापाप-

---

अथ दक्षिणस्याम्- आग्नेयकोणतो नैर्ऋत्यकोणपर्यन्तम् । वायोः पश्चिमस्यामेकपदः पूषा । तस्याधः क्रमेण वितथ-गृहरक्षक-यम-गन्धर्व-भृङ्गराजाः पञ्च द्विपदाः । तत्पङ्क्तौ तेषामध एकपदो मृगः । तत्पङ्क्तौ नैर्ऋत्यकोणे एकपदः पितृगणः ॥

२३ तत्पश्चिमैकपदे दक्षिणमणिबन्धे-ॐ पूष्णे नमः पूषणम् आ० स्था० ॥
२४ तत्पश्चिमपदद्वये दक्षिणपार्श्वे-ॐ वितथाय नमः वितथम् आ० स्था० ॥
२५ तत्पश्चिमपदद्वये दक्षिणपार्श्वे-ॐ गृहक्षताय नमः गृहक्षतं आ० स्था०
२६ तत्पश्चिमपदद्वये दक्षिणोरुभागे-ॐ यमाय० यमम् आ० स्था० ॥
२७ तत्पश्चिमे पदद्वये दक्षिणजानौ-ॐ गन्धर्वाय नमः गन्धर्वम् आ० स्था० ॥
२८ तत्पश्चिमपदद्वये दक्षिणजङ्घायाम्-ॐ भृङ्गराजाय० भृङ्गराजम् आ० स्था० ।
२९ पश्चिमोपरिस्थितैकपदे दक्षिणस्फिचि-ॐ मृगाय नमः मृगम् आ० स्था० ॥
३० तत्पश्चिमे नैर्ऋत्यकोणपदे-ॐ पितृभ्यो नमः पितॄन् आ० स्था० ॥

काशिनी ॥ तया॑नस्त॒न्वा॒शन्त॑मया॒ गिरी॑शन्ता॒भिचा॑कशीहि ॥ $\frac{२}{१६}$ ॥ रुद्रो गोस्थो जटी त्र्यक्षो मृगाभयहस्तधृक् । शुभकृदम्बरावासो वास्तुदेहसमाश्रितः ॥ ॐ भूर्भुवः स्वः रुद्राय नमः रुद्रम् आ० स्था० ॥ भो रुद्र इहागच्छ इह तिष्ठ ॥ ११ ॥ ईशान्यां सूत्रेण द्विधाकृते ब्रह्मपदसंलग्ने ईशानपदोत्तरार्द्धे उरसि ॥ ॐ आपो॒हिष्ठाम॑यो॒ भुव॒स्तान॑ऽऊ॒र्ज्जे द॑धातन ॥ म॒हेरणा॑य॒ चक्ष॑से ॥ $\frac{५०}{११}$ ॥ आपो नीलाः पीतवस्त्रा धनगाः पद्मभूषणाः । अब्जाक्षपाशपत्राणि बिभ्रन्त्यो वास्तुवक्त्रगाः ॥ ॐ भूर्भुवः स्वः अद्भ्यो नमः अपः आ० स्था० ॥ भो आप इहागच्छत इह तिष्ठत ॥१२॥ ईशान्यां सूत्रेण द्विधाकृते ब्रह्मपदसंलग्ने ईशानपददक्षिणार्द्धे मुखे ॥ ॐ इ॒मम्मे॑ व्वरुणश्रुधीहव॑म॒द्याच॑मृडय ॥ त्वाम॑व॒स्युराच॑के ॥ $\frac{१}{२१}$ ॥ आपवत्सो महातेजा द्विभुजो सिंह-

---

अथ पश्चिमस्याम्–नैर्ऋत्यकोणत उत्तरस्यां तत्पङ्क्तौ एकपदो दौवारिकः । तस्यां पङ्क्तौ द्विपदाः क्रमेण पञ्च सुग्रीव–पुष्पदन्त–वरुण–असुर–शोषाः । तस्यां पङ्क्तौ तेषामुत्तरे एकपदः पापः । तस्योत्तरे वायुकोणे रोगः । एते पश्चिमदिशि ॥

३१ तदुत्तरैकपदे वामस्फिचि–ॐ दौवारिकाय नमः दौवारिकम् आ० स्था० ॥
३२ तदुत्तरपदद्वये वामजङ्घायाम्–ॐ सुग्रीवाय नमः सुग्रीवम् आ० स्थापयामि ॥
३३ तदुत्तरपदद्वये वामजानौ–ॐ पुष्पदन्ताय नमः पुष्पदन्तम् आ० स्था० ॥
३४ तदुत्तरपदद्वये वामोरौ–ॐ वरुणाय नमः वरुणम् आवाह० स्थापयामि ॥
३५ तदुत्तरपदद्वये वामपार्श्वे–ॐ असुराय० असुरम् आवा० स्था० ॥
३६ तदुत्तरपदद्वये वामपार्श्वे–ॐ शोषाय नमः शोषम् आवाहयामि स्था० ॥
३७ तदुत्तरोपरिस्थितैकपदे वाममणिबन्धे–ॐ पापाय नमः पापम् आ० स्था० ॥
३८ तदुत्तरवायव्यकोणपदे वामबाहौ–ॐ रोगाय नमः रोगम् आ० स्था० ॥

वाहनः । घटपाशधरो गौरो वास्तोर्वक्षसि संस्थितः ॥ ॐ भूर्भुवः स्वः आपवत्साय नमः आपवत्सम् आ० स्था० ॥ भो आपवत्स इहागच्छ इह तिष्ठ ॥ १३ ॥ वास्तुमण्डलस्थान्त्यपङ्क्तिगतेशान्याम् ईशानपददक्षिणार्द्धे मुखे ॥ ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहेवयम् ॥ पूषानो यथावेदसामसद्वृधे रक्षितापायुरदब्धहं स्वस्तये ॥ $\frac{१}{२५}$ ॥ शिखी कर्पूरधवलस्त्रिनेत्रो वृषवाहनः । वरंत्रिशूलहस्तश्च वास्तोः शिरसि संस्थितः ॥ ॐ भूर्भुवः स्वः शिखिने नमः शिखिनम् आ० स्था० ॥ भो शिखिन् इहागच्छ इह तिष्ठ ॥ १४ ॥ तद्दक्षिणे सार्धपदे दक्षिणनेत्रे ॥ ॐ महाँ२ऽइन्द्रोयऽओजसापर्ज्जन्यो वृष्टिमाँ २ इव ॥ स्त्तोमैर्व्वत्सस्य वावृधे ॥ उपयामगृहीतोसि महेन्द्रायं त्वैषते योनिर्म्महेन्द्रायंत्त्वा ॥ $\frac{४०}{७}$ ॥ घनस्तडित्वान्पर्जन्यो नानावर्णपरिप्लुतः । ज्योतिर्धूमश्च वातात्मा

अथोत्तरस्यां दिशि- वायुकोणात्पूर्वे एकपदे अहिः । तस्यां पङ्क्तौ तत्पूर्वे द्विपदाः क्रमेण मुख्य-भल्लाट-सोम-सर्प-अदितयः पञ्च ॥ तत्पङ्क्तौ तेषां पूर्वे एकपदा दितिः ।

३९ तत्प्रागेकपदे वामप्रबाहौ-ॐ अहये नमः अहिम् आवा० स्थापयामि ॥

४० तत्प्राक्पदद्वये वामकूर्परे-ॐ मुख्याय नमः मुख्यम् आवाहयामि स्था० ॥

४१ तत्प्राक्पदद्वये वामबाहौ-ॐ भल्लाटाय नमः भल्लाटम् आवा० स्था० ॥

४२ तत्प्राक्पदद्वये वामबाहौ-ॐ सोमाय नमः सोमम् आवाहयामि स्थाप० ॥

४३ तत्प्राक्पदद्वये वामांसे-ॐ सर्पाय नमः सर्पम् आवाहयामि स्थापयामि ॥

४४ तत्प्राक्पदद्वये वामश्रोत्रे-ॐ अदित्यै नमः अदितिम् आवा० स्था० ॥

४५ तत्प्रागुपरिस्थितैकपदे वामनेत्रे-ॐ दित्यै नमः दितिम् आ० स्थाप० ॥

॥ इति पञ्चचत्वारिंशन्मण्डलदेवतास्थापनम् ॥

वास्तोर्दक्षदिशि स्थितः ॥ ॐ भूर्भुवः स्वः पर्जन्याय नमः पर्जन्यम् आ० स्था० ॥ भो पर्जन्य इहागच्छ इह तिष्ठ ॥ १५ ॥ तद्दक्षिणे पदद्वये दक्षिणश्रोत्रे ॥ ॐ उदुत्त्यञ्जातवेदसन्देवं वहन्तिकेतवः ॥ दृशेविश्श्वायसूर्य्यम् ॥ $\frac{३१}{३३}$ ॥ जटिलः श्मश्रुलः शीतः कमण्डल्वक्षसूत्रधृक् । जयन्तोऽब्जासनो गौरो वास्तोर्दक्षे ह्यवस्थितः ॥ ॐ भूर्भुवः स्वः जयन्ताय नमः जयन्तम् आ० स्था० ॥ भो जयन्त इहागच्छ इह तिष्ठ ॥ १६ ॥ तद्दक्षिणपदद्वये दक्षिणांसे ॥ ॐ इन्द्रऽआसान्नेता बृहस्प्पतिर्द्दक्षिणा यज्ञः पुरऽएतु सोमः ॥ देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥$\frac{४०}{१७}$॥ इन्द्र ऐरावतारूढः पीतो दैत्यविमर्दनः । कुलिशाख्यकरो वास्तोर्दक्षिणांससमाश्रितः ॥ ॐ भूर्भुवः

मण्डलाद्बहिः ईशानादिविग्दिक्षु चतसृषु क्रमेण–चरकी-विदारी-पूतना-पापराक्षस्यः ॥

॥ अथ मण्डलाद्बहिः श्वेतपरिधौ देवतास्थापनम् ॥

४६ ईशान्याम्– ॐ चरक्यै नमः चरकीम् आवा० स्थाप० ॥
४७ आग्नेय्याम्– ॐ विदार्यै नमः विदारीम् आवाहयामि स्थापयामि ॥
४८ नैर्ऋत्याम्– ॐ पूतनायै नमः पूतनाम् आवाहयामि स्थापयामि ॥
४९ वायव्याम्– ॐ पापराक्षस्यै नमः पापराक्षसीम् आवाहयामि स्थापयामि ॥

ततः प्राच्यादिचतसृषु दिक्षु क्रमेण–स्कन्द-अर्यमा-जृम्भक-पिलिपिच्छाः ॥

५० मण्डलाद्बहिः पूर्वे–ॐ स्कन्दाय नमः स्कन्दम् आवाहयामि स्थापयामि ॥
५१ दक्षिणे– ॐ अर्यम्णे नमः अर्यमणम् आवाहयामि स्थापयामि ॥
५२ पश्चिमे– ॐ जृम्भकाय नमः जम्भकम् आवाहयामि स्थापयामि ॥
५३ उत्तरे– ॐ पिलिपिच्छाय नमः पिलिपिच्छम् आवाहयामि स्थापयामि ॥

स्वः कुलिशायुधाय नमः कुलिशायुधम् आ० स्था० ॥ भो कुलिशायुध इहागच्छ इह तिष्ठ ॥ १७ ॥ तद्दक्षिणपदद्वये दक्षिणबाहौ ॥ ॐ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविताज्योतिरुदयाँ२ऽअजस्रम् ॥ तस्य पूषाप्रसवेयाति विद्वान्सम्पश्यन्विश्वा भुवनानि गोपाः ॥ ५८/१७ ॥ सूर्यो रक्तो ग्रहाध्यक्षो घृताक्षो द्विभुजः प्रभुः । ससाश्वरथगो वास्तोर्दक्षबाहुसमाश्रितः ॥ ॐ भूर्भुवः स्वः सूर्याय नमः सूर्यम् आ० स्था० ॥ भो सूर्य इहागच्छ इह तिष्ठ ॥१८॥ तद्दक्षिणपदद्वये दक्षिणबाहौ ॥ ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ॥ दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ ३०/१९ ॥ सत्यो भूतहितो धर्मो वरदोऽभयपाणि-

---

ततः पूर्वादिक्रमेण दशदिक्पालाः– इन्द्र-अग्नि-यम-नैर्ऋति-वरुण-वायु-सोम-ईशान-ब्रह्माऽनन्तादयः ॥

॥ अथ मण्डलाद्बहिः द्वितीयरक्तपरिधौ देवतास्थापनम् ॥

५४ पूर्वे– ॐ इन्द्राय नमः इन्द्रम् आवाहयामि स्थापयामि ॥
५५ आग्नेय्याम्– ॐ अग्नये नमः अग्निम् आवाहयामि स्थापयामि ॥
५६ दक्षिणस्याम्– ॐ यमाय नमः यमम् आवाहयामि स्थापयामि ॥
५७ नैर्ऋत्याम्– ॐ निर्ऋतये नमः निर्ऋतिम् आवाहयामि स्थापयामि ॥
५८ पश्चिमे– ॐ वरुणाय नमः वरुणम् आवाहयामि स्थापयामि ॥
५९ वायव्याम्– ॐ वायवे नमः वायुम् आवाहयामि स्थापयामि ॥
६० उत्तरे– ॐ कुबेराय नमः कुबेरम् आवाहयामि स्थापयामि ॥
६१ ईशान्याम्– ॐ ईश्वराय नमः ईश्वरम् आवाहयामि स्थापयामि ॥
६२ पूर्वेशानयोर्मध्ये– ॐ ब्रह्मणे नमः ब्रह्माणम् आवाहयामि स्थापयामि ॥
६३ निर्ऋतिपश्चिमयोर्मध्ये– ॐ अनन्ताय नमः अनन्तम् आवाहयामि स्थाप० ॥

कः । प्रसन्नाब्जासनोऽब्जाभो दक्षदोरूपमूलगः ॥ ॐ भूर्भुवः स्वः सत्याय नमः सत्यम् आ० स्था० ॥ भो सत्य इहागच्छ इह तिष्ठ ॥१९॥ तद्दक्षिणे सार्द्धपदे दक्षिणकूर्परे ॥ ॐ भायैं-दार्व्वाहा॒रम्प्र॒भाया॑ऽअग्न्येध॑म्ब्र॒ध्नस्य॑वि॒ष्टपा॑याभिषे॒क्तार॑ंव॒र्षि॑ष्ठाय॒नाका॑यपरिवे॒ष्टार॑न्देवलो॒काय॑ पेशि॒तार॑म्मनुष्यलो॒काय॑म्प्रकरि॒तार॒ꣳ सर्व्वे॑भ्योलो॒केभ्य॑ऽउपसे॒क्तार॒मव॑ऽऋत्त्यैव॒धायो॑पमन्थि॒तार॒म्मेधा॑यवास॒ꣳ पल्पू॒लीम्प्रका॒माय॑ रजयि॒त्रीम् ॥ १२/३० ॥ भृशः पुष्पविमानस्थः पुष्पज्येक्षुधनुः-

---

पुनः प्राच्यादिदिक्षु क्रमेण-उग्रसेन-डामर-महाकाल-पिलिपिच्छादयः ॥

६४ पूर्वे इन्द्रादुत्तरतः– ॐ उग्रसेनाय नमः उग्रसेनम् आवाहयामि स्थाप० ॥

६५ दक्षिणे यमादुत्तरतः– ॐ डामराय नमः डामरम् आवाहयामि स्थाप० ॥

६६ पश्चिमे वरुणादुत्तरतः– ॐ महाकालाय नमः महाकालम् आवा० स्था० ॥

६७ उत्तरे सोमादुत्तरतः– ॐ पिलिपिच्छाय नमः पिलिपिच्छम् आवा० स्था० ॥

अथ मण्डलाद्बहिः तृतीयकृष्णपरिधौ देवतास्थापनम् ॥

६८ पूर्वे– ॐ हेतुकाय० हेतुकम् आ० स्था० ॥

६९ आग्नेय्याम्– ॐ त्रिपुरान्तकाय नमः त्रिपुरान्तकम् आवाहयामि स्थाप० ॥

७० दक्षिणे– ॐ अग्निवैतालाय नमः अग्निवैतालम् आवाहयामि स्थापयामि ॥

७१ नैर्ऋत्याम्– ॐ असिवैतालाय नमः असिवैतालम् आवाहयामि स्थाप० ॥

७२ पश्चिमे– ॐ कालाय नमः कालम् आवाहयामि स्थापयामि ॥

७३ वायव्याम्– ॐ करालाय नमः करालम् आवाहयामि स्थापयामि ॥

७४ उत्तरे– ॐ एकपादाय नमः एकपादम् आवाहयामि स्थापयामि ॥

७५ ईशान्याम्– ॐ भीमरूपाय नमः भीमरूपम् आवाहयामि स्थापयामि ॥

७६ पूर्वेशानयोर्मध्ये– ॐ खेचराय नमः खेचरम् आवाहयामि स्थापयामि ॥

७७ निर्ऋतिपश्चिमयोर्मध्ये– ॐ तलवासिने नमः तलवासिनम् आ० स्था० ॥

एते गृहवास्तुमण्डलदेवाः ॥

करः । गौरो नादरतः कामी दक्षकूर्परसंस्थितः ॥ ॐ भूर्भुवः स्वः भृशाय नमः भृशम् आ० स्था० ॥ भो भृश इहागच्छ इह तिष्ठ ॥ २० ॥ तद्दक्षिणाग्नेयपदोत्तरार्द्धे दक्षिणप्रबाहौ ॥ ॐ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृत सद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥ २४/१० ॥ शङ्खचक्रधरो नित्यमसितः स्वस्तिकासनः । सशब्दः सर्वगन्तव्यो कूर्पराधःसमाश्रितः ॥ ॐ भूर्भुवः स्वः आकाशाय नमः आकाशम् आ० स्था० ॥ भो आकाश इहागच्छ इह तिष्ठ ॥ २१ ॥ तदाग्नेयपददक्षिणार्द्धे दक्षिणप्रबाहौ ॥ ॐ अप्स्वग्ने सधिष्ट्वसौषधीरनुरुध्यसे ॥ गब्भे सञ्जायसे पुनः ॥ ३६/१२ ॥ वायुधूम्रो मृगारूढो जगत्प्राणश्चलो युवा । ध्वजाङ्कुशे च बिभ्राणो दक्षबाहुसमाश्रितः ॥ ॐ भूर्भुवः स्वः वायवे नमः वायुम् आ० स्था० ॥ भो वायो इहागच्छ इह तिष्ठ ॥ २२ ॥ तत्पश्चिमे सार्धपदे दक्षिणमणिबन्धे ॥ ॐ पूषापञ्चाक्षरेण पञ्चदिशऽउदजयत्ताऽउज्जेषꣳसविताषडक्षरेण षडृतूनुदजयत्तानुज्जेषम्मरुतः सप्ताक्षरेणसप्तग्राम्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम् ॥ ३२/९ ॥ महास्वनः शोणवर्णो द्विभुजोऽब्जकमण्डलुः ॥ पूषा गजासनो दक्षमणिबन्धसमाश्रितः ॥ ॐ भूर्भुवः स्वः पूष्णे नमः पूषणम् आ० स्था० ॥ भो पूषन् इहागच्छ इह तिष्ठ ॥ २३ ॥

तत्पश्चिमपदद्वये दक्षिणपार्श्वे ॥ ॐ सविताप्प्रथमेऽहन्नग्निर्द्वितीयेवायुस्तृतीयऽआदित्त्यश्चतुर्थेचन्द्रमाꣳपञ्चमऽऋतुः षष्ठेमरुतः सप्तमेबृहस्प्पतिरष्टमे मित्रोनवमे वरुणोदशमऽइन्द्रऽएकादशेविश्वेदेवाद्वादशे ॥ ६/३९ ॥ वितथश्चेन्द्रचापाभो कुबेरप्रतिमासमः । मलवासाऽलसो रिक्तकरो दक्षिणपार्श्वगः ॥ ॐ भूर्भुवः स्वः वितथाय नमः वितथम् आ० स्था० ॥ भो वितथ इहागच्छ इह तिष्ठ ॥ २४ ॥ तत्पश्चिमपदद्वये दक्षिणपार्श्वे ॥ ॐ गृहा माबिभीत मावेपद्ध्वमूर्ज्जम्बिब्भ्रतऽएमसि ॥ ऊर्ज्जम्बिब्भ्रद्वꣳ सुमनाꣳ सुमेधागृहानैमिमनसामोदमानꣳ ॥ ४१/३ ॥ गृहरक्षकरक्ताङ्गो गदासिवरचर्मभृत् । पञ्चास्यवाहनः क्रूरो वास्तोर्दक्षकटिस्थितः ॥ ॐ भूर्भुवः स्वः [1]गृहक्षताय नमः गृहक्षतम् आ० स्था० ॥ भो गृहक्षत इहागच्छ इह तिष्ठ ॥ २५ ॥ तत्पश्चिमपदद्वये दक्षिणोरुभागे ॥ ॐ असि यमोऽअस्यादित्त्योऽअर्व्वन्नसि त्रितो गुह्येन व्रतेन ॥ असिसोमेनसमयाविपृक्तऽआहुस्तेत्रीणि दिवि बन्धनानि ॥ १४/२९ ॥ रक्ताक्षो महिषारूढो दण्डपाशधरो यमः । धर्मज्ञो जनसङ्काशो वास्तोर्दक्षोरुसंश्रितः ॥ ॐ भूर्भुवः स्वः यमाय नमः यमम् आवा० स्था० ॥ भो यम इहागच्छ इह तिष्ठ ॥ २६ ॥ तत्पश्चिमपदद्वये दक्षिणजानौ ॥ ॐ गन्धर्व्वस्त्त्वा विश्वावसुꣳपरिदधातुविश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽ

---

[1] गृहरक्षक—इत्यपि पाठः ॥

ईडितः ॥ इन्द्रस्य बाहुरसि दक्षिणोविश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः ॥ मित्रावरुणौत्त्वोत्तरतः परिधत्तान्ध्रुवेण धर्म्मणाविश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः ॥ $\frac{३}{२}$ ॥ मुनिवेशधरो गौरो गन्धर्वो ध्यानवाञ्छुचिः । वीणाकमण्डलुधरो वास्तोर्वै दक्षजानुगः ॥ ॐ भूर्भुवः स्वः गन्धर्वाय नमः गन्धर्वम् आ० स्था० ॥ भो गन्धर्व इहागच्छ इह तिष्ठ ॥ २७ ॥ तत्पश्चिमे सार्धपदे दक्षिणजङ्घायाम् ॥ ॐ कस्त्त्वायुनक्तिसत्त्वायुनक्तिकस्मैत्त्वायुनक्तितस्मैत्त्वायुनक्ति ॥ कर्म्मणे वां वेषायवाम् ॥ $\frac{६}{१}$ ॥ सुनीलांशुर्महाकायः कुङ्कुमारुणविग्रहः। खट्वाखेटधरो वास्तोर्दक्षजङ्घासमाश्रितः॥ॐ भूर्भुवः स्वः भृङ्गराजाय नमः भृङ्गराजम् आ० स्था० ॥ भो भृङ्गराज इहागच्छ इह तिष्ठ ॥ २८ ॥ तत्पश्चिमे नैर्ऋत्यपददक्षिणार्द्धे दक्षिणस्फिचि ॥ ॐ चन्द्रमा मनसोजातश्चक्षोः सूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ ॥ $\frac{१२}{३१}$ ॥ मृगो गौरो भूषिताङ्गो वरदाभयपाणिकः । वरासनश्चारुनेत्रो वास्तोर्दक्षस्फिचि स्थितः ॥ ॐ भूर्भुवः स्वः मृगाय नमः मृगम् आ० स्था० ॥ भो मृग इहागच्छ इह तिष्ठ ॥ २९ ॥ तदुत्तरे नैर्ऋत्यपदोत्तरार्द्धपदे पादयोः ॥ ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यःस्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः

स्वधा॒नम॑ः ॥ अक्ष॑न्पि॒तरोऽमी॑मदन्त पि॒तरोती॑तृपन्त पि॒तर॒ꣳ पित॑र॒ꣳ शुन्ध॑ध्वम् ॥ ३६/१९ ॥ कुशपिण्डधराः स्वच्छाः पितरः श्यामलाः कृशाः । महोदराः सोमलोकवासिनो वास्तुपादगाः ॥ ॐ भूर्भुवः स्वः पितृभ्यो नमः पितॄन् आ० स्था० ॥ भो पितरः इहागच्छत इह तिष्ठत ॥ ३० ॥ नैर्ऋत्यप्रदोत्तरे सार्द्धपदे वामस्फिचि ॥ ॐ आब्रह्म॑न्ब्राह्म॒णोब्रह्मवर्च॒सीजा॑यता॒मारा॒ष्ट्रे रा॑ज॒न्यꣳ शूर॑ऽइष॒व्यो॒ऽतिव्या॒धी म॑हार॒थोजा॑यता॒न्दोग्ध्रीं॑ धे॒नुर्वोढा॑न॒ड्वाना॒शुः सप्ति॒ꣳ पुर॑न्धि॒र्योषा॑ जि॒ष्णूर॑थे॒ष्ठाः स॒भेयो॒ युवा॒स्य य॑जमानस्य वी॒रो जा॑यतान्निका॒मेनि॑कामे नꣳ प॒र्ज्जन्यो॑ वर्षतु॒ फल॑वत्यो न॒ऽओष॑धयꣳ पच्यन्तां योगक्षे॒मो न॑ः कल्पताम् ॥ २२/२२ ॥ दौवारिको वेत्रमुद्राधरो भूतिविभूषितः । मुक्ताभः पादुकारूढो वास्तोर्वामस्फिचि स्थितः ॥ ॐ भूर्भुवः स्वः दौवारिकाय नमः दौवारिकम् आ० स्था० ॥ भो दौवारिक इहागच्छ इह तिष्ठ ॥ ३१ ॥ तदुत्तरे पदद्वये वामजङ्घायाम् ॥ ॐ सुस॑मिद्धाय शो॒चिषे॑ घृ॒तन्ती॒व्रञ्जु॑होतन । अ॒ग्नये॑ जा॒तवे॑दसे ॥ ६/३ ॥ पद्मासनो हेमवर्णः सुग्रीवोऽलङ्कृतः शुभः । द्विभुजः कामदो वास्तोर्वामजङ्घासमाश्रितः ॥ ॐ भूर्भुवः स्वः सुग्रीवाय नमः सुग्रीवम् आ० स्था० ॥ भो सुग्रीव इहागच्छ इह तिष्ठ ॥ ३२ ॥ तदुत्तरे पदद्वये वामजानौ ॥ ॐ नक्ष॑त्रेभ्य॒ꣳ स्वाहा॑ नक्ष॒त्रिये॑भ्य॒ꣳ स्वाहा॑होरा॒त्रेभ्य॒ꣳ स्वाहा॑र्द्धमा॒सेभ्य॒ꣳ

स्वाहा॒ मासे॑भ्य॒ः स्वाह॒ऽऋ॒तुभ्य॒ः स्वाहा॑र्त्त॒वेभ्य॒ः स्वाहा॑ संवत्त्सरा॒यस्वाहा॒द्यावा॑पृथि॒वीभ्या॒ꣳस्वाहा॑च॒न्द्राय॒ स्वाहा॒ सूर्य्या॑य॒ स्वाहा॑ र॒श्मिभ्य॒ः स्वाहा॒ वसु॑भ्य॒ः स्वाहा॑ रु॒द्रेभ्य॒ः स्वाहा॑दि॒त्येभ्य॒ः स्वाहा॑ म॒रुद्भ्य॒ः स्वाहा॒ विश्वे॑भ्यो दे॒वेभ्य॒ः स्वाहा॒ मूले॑भ्य॒ः स्वाहा॒ शाखा॑भ्य॒ः स्वाहा॒ व॒नस्पति॑भ्य॒ः स्वाहा॒ पुष्पे॑भ्य॒ः स्वाहा॒ फले॑भ्य॒ः स्वाहौष॑धीभ्य॒ः स्वाहा॑ ॥$\frac{२८}{२२}$॥ पुष्पदन्तोऽभ्रसंकाशः खगः पक्षविराजितः । महाबलो व्यालहस्तो वास्तोर्वै सव्यजानुगः ॥ ॐ भूर्भुवः स्वः पुष्पदन्ताय नमः पुष्पदन्तम् आ० स्था० ॥ भो पुष्पदन्त इहागच्छ इह तिष्ठ ॥ ३३ ॥ तदुत्तरे पदद्वये वामोरौ ॥ ॐ वरु॑णस्यो॒त्तम्भ॑नमसि॒ वरु॑णस्यस्कम्भ॒सर्ज्ज॑नीस्त्थो॒ वरु॑णस्यऽऋ॒तसद॒न्यसि॒ वरु॑णस्यऽऋ॒तसद॑नमसि॒ वरु॑णस्यऽऋ॒तसद॑न॒मासी॑द ॥$\frac{३६}{४}$॥ वरुणः पाथसीनाथो नक्रस्थः पाटलांशुकः । शङ्खपाशधरः शुभ्रो वास्तोर्वामोरुसंस्थितः ॥ ॐ भूर्भुवः स्वः वरुणाय नमः वरुणम् आ० स्था० ॥ भो वरुण इहागच्छ इह तिष्ठ ॥ ३४ ॥ तदुत्तरे पदद्वये वामपार्श्वे ॥ ॐ ये रू॒पाणि॑प्प्रतिमु॒ञ्चमा॑ना॒ऽअसु॑रा॒ः सन्त॑ः स्व॒धया॒ चर॑न्ति ॥ प॒रा॒पुरो॑ नि॒पुरो॒ ये भर॑न्त्य॒ग्निष्टाँल्लो॒कात्प्रणु॑दात्य॒स्म्मात् ॥ $\frac{३०}{२}$ ॥ असुरो मेचकाभासः करालास्योऽङ्गवर्जितः ॥ सिंहारूढश्चारुणाक्षो वास्तोर्वामकटिस्थितः ॥ ॐ भूर्भुवः स्वः असुराय नमः असुरम् आ० स्था० ॥ भो

असुर इहागच्छ इह तिष्ठ ॥ ३५ ॥ तदुत्तरे सार्द्धपदे वामपार्श्वे ॥ ॐ अस॑वे॒ स्वाहा॒ व॒स॑वे॒ स्वाहा॑ वि॒भुवे॒ स्वाहा॒ वि॒व॑स्वते॒ स्वाहा॑ गण॒श्रिये॒ स्वाहा॑ ग॒णप॑तये॒ स्वाहा॑भि॒भुवे॒ स्वाहाधि॑पतये॒ स्वाहा॑ शू॒षाय॒ स्वाहा॑ सꣳस॒र्प्पा॑य॒ स्वाहा॑ च॒न्द्राय॒ स्वाहा॒ ज्योति॑षे॒ स्वाहा॑ मलिम्लु॒चाय॒ स्वाहा॒ दिवा॑प॒तय॑ते॒ स्वाहा॑ ॥ ३०/२२ ॥ शोषः कृष्णतनुः शूरो वरशूलेषुचापभृत्। गृध्रपक्षः कृशो दीर्घो वास्तोवैं वामपार्श्वगः॥ ॐ भूर्भुवः स्वः शोषाय नमः शोषम् आ० स्था० ॥ भो शोष इहागच्छ इह तिष्ठ ॥ ३६ ॥ तदुत्तरे वायव्यपददक्षिणार्द्धे वाममणिबन्धे ॥ ॐ अग्नैसु॒क्ष्वाहि॑येतवाश्श्वा॑सो देव॒साधर्व॑ः ॥ अर॒ंवह॑न्ति म॒न्यवे॑ ॥ ३६/१३ ॥ पापयक्ष्मा धूम्रवर्णो गदावरदमुद्रितः । कपोतवाहनो वाममणिबन्धसमाश्रितः । ॐ भूर्भुवः स्वः पापाय[1] नमः पापम् आ० स्था० ॥ भो पाप इहागच्छ इह तिष्ठ ॥ ३७ ॥ तदुत्तरे वायव्यां वायव्यपदोत्तरार्द्धे वामबाहौ ॥ ॐ शिरो॑मे॒ श्श्रीर्यश॒ो मुख॒न्त्विषि॒ꣳ केशा॑श्च॒श्श्मश्रू॑णि ॥ राजा॑ मे प्रा॒णोऽअ॒मृत॑ꣳस॒म्राट्ट्चक्षु॑र्वि॒राट्ट्श्रोत्र॑म् ॥ ५/२० ॥ रोगः पाशकरो व्यक्तः क्षयात्मा व्याधिसङ्ग्रहः । दुष्कर्ममर्दनो वास्तोर्वामोपबाहुसंश्रितः ॥ ॐ भूर्भुवः स्वः रोगाय नमः रोगम् आ० स्था० ॥ भो रोग इहागच्छ इह तिष्ठ ॥ ३८ ॥

---

[1] "पापयक्ष्मा" इति

वायव्यपदोत्तरार्द्धस्य प्राक्सार्धपदे वामकूर्परे ॥ ॐ नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ॥ येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः ॥ ६/१३ ॥ अहिराजोऽजगः शुभ्रः फणामणिविराजितः । अक्षकुण्डीधरो वास्तोर्वामोपबाहुसंश्रितः ॥ ॐ भूर्भुवः स्वः अहये नमः अहिम् आ० स्था० ॥ भो अहे इहागच्छ इह तिष्ठ ॥ ३९ ॥ तत्प्राक्पदद्वये वामकूर्परे ॥ ॐ इषेत्त्वोर्ज्जेत्त्वा व्वायवस्थ देवो वः सविता प्प्रार्प्पयतु श्श्रेष्ठतमाय कर्म्मणऽ आप्प्यायद्ध्वमघ्न्या ऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशत माघशꣳसोद्ध्रुवाऽअस्मिन्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्पाहि ॥ १/१ ॥ मुख्यो गौरो विश्वकर्मा कुम्भाक्षः पुस्तसूत्रभृत् । निपुणस्तु लुलायस्थो वामकूर्परसंश्रितः॥ॐभूर्भुवः स्वः मुख्याय नमः मुख्यम् आ० स्था०॥ भो मुख्य इहागच्छ इह तिष्ठ ॥ ४० ॥ तत्प्राक्पदद्वये वामबाहा ॥ ॐ घृताच्यसि जुहूर्न्नाम्न्नासेदम्प्रियेण धाम्न्नाप्प्रियꣳ सदऽआसीद घृताच्यस्युपभृन्नाम्न्नासेदम्प्रियेण धाम्न्नाप्प्रियꣳ सदऽआसीद घृताच्यसि ध्रुवानाम्न्ना सेदम्प्रियेण धाम्न्ना प्प्रियꣳ सदऽआसीद प्प्रियेण धाम्न्ना प्प्रियꣳ सदऽआसीद ॥ ध्रुवाऽअसदन्नृतस्ययोनौ ता व्विष्णो पाहि पाहि यज्ञम्पाहि यज्ञपतिम्पाहिमाँय्यज्ञन्यम् ॥ ६/२ ॥ भल्लाटश्चन्द्रसंकाशो वरमुद्रागदाधरः । हय-

पुत्रो वास्तुपुंसोर्वामबाहुसमाश्रितः ॥ ॐ भूर्भुवः स्वः भल्लाटाय नमः भल्लाटम् आ० स्था० ॥ भो भल्लाट इहागच्छ इह तिष्ठ ॥ ४१ ॥ तत्प्राक्पदद्वये वामबाहौ ॥ ॐ व्वयꣳ सौमव्व्रते तवमनंस्त्तनूषुबिब्भ्रंतꣳ ॥ प्रजावन्तꣳ सचेमहि ॥ $\frac{५६}{३}$ ॥ सोमो नरविमानस्थो वरहस्तो गदाधरः । गौरो महोदरः श्रीमान् वास्तोः सव्यभुजाश्रयः॥ ॐ भूर्भुवः स्वः सोमाय नमः सोमम् आ० स्था० ॥ भो सोम इहागच्छ इह तिष्ठ ॥ ४२ ॥ तत्प्राक्पदद्वये वामांसे ॥ व्विष्णोर्न्नुकं व्वीर्य्याणिप्प्रवोचँय्यः प्रार्त्थिवानि व्विममे रजाꣳसि ॥ योऽअस्क्कभायदुत्तरꣳ सधस्त्थं व्विचक्क्रमाणस्त्रेधोरुगायोव्विष्णवे त्त्वा ॥ $\frac{१८}{५}$ ॥ कुम्भमालाधरां द्वाभ्यां चतुर्बाहुः फणामणिः । सर्पो रक्तभ्रमो वास्तोर्वामांसदेशसंश्रितः ॥ ॐ भूर्भुवः स्वः सर्पाय नमः सर्पम् आ० स्था० ॥ भो सर्प इहागच्छ इह तिष्ठ ॥ ४३ ॥ तत्प्राक्सार्धपदे वामश्रोत्रे ॥ ॐ अदितिर्द्यौरदितिरन्तरिक्क्षमदितिर्म्मातासपितासपुत्रः ॥ व्विश्श्वेदेवाऽअदितिꣳ पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥ $\frac{२३}{२५}$ ॥ सूत्रवज्रांकुशाभीतिबिभ्राणा रत्नभूषिता । अदितिश्चारुगौराङ्गी वास्तोर्वामश्रुतिस्थिता ॥ ॐ भूर्भुवः स्वः अदितये नमः अदितिम् आ० स्था० ॥ भो अदिते इहागच्छ इह तिष्ठ ॥ ४४ ॥ तत्प्रागर्धपदे वामनेत्रे ॥ ॐ ये देवा देवेष्ष्वधि देवत्त्वमायन्न्ये

ब्रह्मणꣳ पुरऽएतारोऽअस्य ॥ येभ्यो नऽऋते पवंते धामकिञ्चन न ते दिवो न पृथिव्याऽअधिस्नुषु ॥ $\frac{१४}{१७}$ ॥ दितिस्तु श्यामवर्णाङ्गी मालात्रिशूलधारिणी । वृषपत्रा वास्तुपुंसोर्वामलोचनसंस्थिता ॥ ॐ भूर्भुवः स्वः दित्यै नमः दितिम् आ० स्था० ॥ भो दिते इहागच्छ इह तिष्ठ ॥ ४५ ॥

[१] मण्डलाद्बहिः ईशानकोणे ॥ ॐ इन्धानास्त्वाशतꣳहिमांद्युमन्तꣳ समिंधीमहि ॥ वयंस्वन्तो वयस्कृतꣳ सहस्वन्तꣳ सहस्कृतंम् ॥ $\frac{१८}{३}$ ॥ कामरूपा विरूपाक्षी कराला चान्त्रभूषणा । कृपाणपात्रं बिभ्राणा मांसरक्तरवप्रिया ॥ ॐ भूर्भुवः स्वः चरक्यै नमः चरकीम् आ० स्था० ॥ भो चरकि इहागच्छ इह तिष्ठ ॥ ४६ ॥ मण्डलाद्बहिः आग्नेयकोणे ॥ ॐ असुंन्वतमयंजमानमिच्छस्तेनस्यत्यामन्विहि तस्कंरस्य ॥ अन्यमस्मदिच्छ सा तंऽइत्या नमो देवि निर्ऋते तुभ्यंमस्तु ॥ $\frac{६२}{१२}$ ॥ ॐ भूर्भुवः स्वः विदार्यै नमः विदारीम् आ० स्था० ॥ भो विदारि इहागच्छ इह तिष्ठ ॥४७॥ वास्तुमण्डलाद्बहिर्नैर्ऋत्यकोणे ॥ ॐकया नश्चित्रऽआभुंवदूतीसदावृधꣳ सखा ॥ कया शचिंष्ठया वृता ॥$\frac{३९}{२७}$॥ ॐभूर्भुवः स्वः पूतनायै नमः पूतनाम् आ० स्था० ॥ भो पूतने इहागच्छ इह तिष्ठ ॥ ४८ ॥ वास्तुमण्डलाद्बहिः वायव्यकोण ॥ ॐइन्द्रंऽआसान्नेताबृहस्पतिर्दक्षिणा यज्ञःपुरऽ-

---

[१] एताः क्षेत्रदेवताः ॥

एतुसोमः । देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्रम् ॥ $\frac{४०}{१७}$ ॥ ॐ भूर्भुवः स्वः पापराक्षस्यै॰ पापराक्षसीम् आ॰स्था॰॥भो पापराक्षसि इहागच्छ इह तिष्ठ॥४९॥

[1]पुनर्वास्तुमण्डलाद्बहिः पूर्वादिचतुर्दिक्षु पूर्वस्याम् ॥ ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषांᳫसिप्रमुमुग्ध्यस्मत् ॥ $\frac{३}{२१}$ ॥ ॐ भूर्भुवः स्वः स्कन्दाय नमः स्कन्दम् आवाह॰ स्थाप॰ ॥ भो स्कन्द इहागच्छ इह तिष्ठ ॥५०॥ मण्डलाद्बहिरुत्तरस्याम् ॥ ॐ यदद्य सूरऽदितेनागामित्रोऽअर्य्यमा ॥ सुवातिसविताभगः ॥$\frac{२०}{३३}$॥ ॐ भूर्भुवः स्वः अर्यमणे नमः अर्यमणम् आ॰ स्था॰ ॥ भो अर्यमन् इहागच्छ इह तिष्ठ ॥ ५१ ॥ मण्डलाद्बहिः पश्चिमस्याम् ॥ ॐ सरोभ्यो धैवरमुपस्थावराभ्यो दाशं वैशन्ताभ्यो बैन्दं नड्वलाभ्यः शौष्कलम्पाराय मार्गारमवाराय कैवर्त्तन्तीर्थेभ्यऽआन्दं विषमेभ्यो मैनालᳫंस्वनेभ्यः पर्णकङ्गुहाभ्यः किरातᳫंसानुभ्यो जम्भकम्पर्वतेभ्यः किम्पूरुषम् ॥ $\frac{६}{३०}$ ॥ ॐ भूर्भुवः स्वः जृम्भकाय गमः जृम्भकम् आ॰ स्था॰ ॥ ॐ जृम्भक इहागच्छ इह तिष्ठ ॥ ५२ ॥ मण्डलाद्बहिः उत्तरस्याम् ॥ ॐ रक्षोहणं वलगहनं वैष्णवीमिदमहन्तं वलगमुत्किरामियम्मेनिष्ट्यो यम-

---

[1] एते क्षेत्रपालाः॥

मात्त्यौं निचखानेदमहन्तं वँलगमुत्त्किरामियम्मे समानो यमसंमानो निचखानेदमहन्तं वँलगमुत्त्किरामियम्मे सबंन्धुरुयमसंबन्धुर्न्निचखानेदमहन्तं वँलगमुत्त्किरामियम्मे सजातो यमसंजातो निचखानोत्त्कृत्त्याङ्किरामि ॥ २२/५ ॥ ॐ भूर्भुवः स्वः पिलिपिच्छाय नमः पिलिपिच्छम् आ० स्था० ॥ भो पिलिपिच्छ इहागच्छ इह तिष्ठ ॥ ५३ ॥

[1]अथ वास्तुमण्डलाद्बहिः पूर्वस्याम् ॥ ॐत्रातारमिन्द्रंमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशुक्क्रम्पुरुहूतमिन्द्रꣳस्वस्त्तिनो मघवाधात्त्विन्द्रः ॥ ५/२० ॥ ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रम् आ० स्था० ॥ भो इन्द्र इहागच्छ इह तिष्ठ ॥५४॥ मण्डलाद्बहिः आग्नेय्याम् ॥ ॐ त्वन्नोऽअग्ने तव देव पायुभिर्म्मघोनो रक्क्ष तन्न्वश्च वन्द्य ॥ त्राताताोकस्य तनये गवामस्यनिमेषꣳ रक्क्षमाणस्त्तवव्व्रते ॥ १३/३४ ॥ ॐ भूर्भुवः स्वः अग्नये नमः अग्निम् आ० स्था० ॥ भो अग्ने इहागच्छ इह तिष्ठ ॥ ५५ ॥ मण्डलाद्बहिः दक्षिणस्याम् ॥ ॐ यमाय त्त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥ १/३८ ॥ ॐ भूर्भुवः स्वः यमाय नमः यमम् आ० स्था० ॥ भो यम इहागच्छ इह तिष्ठ ॥५६॥ मण्डलाद्बहिः नैर्ऋत्याम् ॥ ॐ असुन्न्वन्तमयजमानमिच्छस्त्तेनस्येत्त्यामन्न्विहि तस्क्करस्य ।

---

[1] एते दशदिक्पतयः ॥

अन्यमस्म्मदिच्छसातऽइत्त्यानमो देवि निर्ऋते तुभ्भ्यमस्त्तु ॥ ६२/१२ ॥ ॐ भूर्भुवः स्वः निर्ऋतये नमः निर्ऋतिम् आ० स्था० ॥ भो निर्ऋते इहागच्छ इह तिष्ठ ॥ ५७ ॥ मण्डलाद्बहिः पश्चिमस्याम् ॥ ॐ तत्त्वायामिब्ब्रह्मणावन्दमानस्तदा शास्त्ते यजमानो हविर्ब्भिः ॥ अहेडमानो वरुणेह बोद्ध्युरुशꣳस समानऽआयुꣳप्प्रमोषीꣳ ॥ ३/२१ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः वरुणम् आ० स्था० ॥ भो वरुण इहागच्छ इह तिष्ठ ॥ मण्डलाद्बहिः वायव्याम् ॥ ॐ आनोनियुद्भिः शतिनीभिरद्ध्वरꣳ सहस्त्रिणीभिरुपयाहि यज्ञम् ॥ वायोऽअस्स्मिन्त्सवने मादयस्व यूयम्पात स्वस्त्तिभिꣳ सदानꣳ ॥ ३६/२७ ॥ ॐ भूर्भुवः स्वः वायवे नमः वायुम् आ० स्था० ॥ भो वायो इहागच्छ इह तिष्ठ ॥५९॥ मण्डलाद्बहिः उत्तरस्याम् ॥ ॐ वयꣳ सोमव्व्रते तवमनस्त्तनूषु बिब्भ्रतꣳ ॥ प्प्रजावन्तꣳ सचेमहि ॥ ५६/३ ॥ ॐ भूर्भुवः स्वः सोमाय नमः सोमम् आ० स्था० ॥ भो सोम इहागच्छ इह तिष्ठ ॥ ६० ॥ मण्डलाद्बहिः ईशान्याम् ॥ ॐ तमीशानञ्जगतस्त्तस्त्थुषस्प्पतिन्धियञ्जिन्न्वमवसे हूमहे व्वयम् ॥ पूषानो यथाव्वेदसामसद्द्वृधेरक्क्षिता पायुरदब्ब्धꣳ स्वस्त्तये ॥ ३६/२५ ॥ ॐ भूर्भुवः स्वः ईशानाय नमः ईशानम् आ० स्था० ॥ भो ईशान इहागच्छ इह तिष्ठ ॥ ६१ ॥ मण्डलाद्बहिः ईशानपूर्वयोर्मध्ये ॥ ॐ अस्म्मे रुद्द्रा मेहना-

पर्व्वतासो वृत्रहत्त्ये भरहूतौ सजोषाꣳ ॥ यꣳशꣳसते स्तुवते धायि पज्ज्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँ २ऽअवन्तु देवाः ॥ ५०/३३ ॥ ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणम् आ० स्था० ॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥ ६२ ॥ मण्डलाद्बहिर्निर्ऋतिचरुणयोर्मध्ये ॥ ॐ स्योनापृथिविनो भवानृक्षरानिवेशनी ॥ यच्छानꣳ शर्म्मसप्प्रथाꣳ ॥ १३/३६ ॥ ॐ भूर्भुवः स्वः अनन्ताय नमः अनन्तम् आ० स्था० ॥ भो अनन्त इहागच्छ इह तिष्ठ ॥ ६३ ॥ ॐ मनोजूतिर्ज्जुषता माज्ज्यस्य बृहस्प्पतिर्य्यज्ञ० ॥ १३/२ ॥ ॐ भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवताः सुप्रतिष्ठिता वरदा भवत ॥ हस्ते गन्धाक्षतपुष्पाण्यादाय ॥ ॐ भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवताभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

तदुपरि ताम्रादिपूर्णपात्रसहितं कलशं संस्थाप्य वास्त्वादिमूर्तीनामग्न्युत्तारणपूर्वकप्राणप्रतिष्ठां कुर्यात् ॥

तद्यथा–अद्यपूर्वोच्चारित० एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ अस्या वास्तुमूर्तेः (तथा च अन्यासां योगिनीप्रभृतिमूर्तीनां) निर्माणविधौ अग्निप्रतपनताडनाचघातादिदोषपरिहारार्थम् अग्न्युत्तारणपूर्वकं तत्तद्देवतानां सान्निद्ध्यार्थं तत्तद्देवतानां प्राणप्रतिष्ठां करिष्ये ॥ पात्रे वास्तुमूर्तिं (अन्याश्च मूर्तीः) ॥ निधाय ता घृतेनाभ्यज्य तदुपरि जलधारां कुर्यात् ॥ तत्र मन्त्राः ॥ समुद्रस्यत्त्वावकयाग्ग्ने परिव्ययामसि ॥ पावकोऽअस्म्मभ्यꣳ शिवो-

भव ॥ ४/१७ ॥ हिमस्यत्त्वा जरायुणाग्ने परिव्ययामसि ॥ पावकोऽअस्म्मभ्यꣳ शिवोभव ॥ ३/१७ ॥ उपज्ज्मन्नुपवेतसेऽवतरनदीष्ष्वा ॥ अग्ने पित्तमपामसिमण्डूकिताभिरागहि सेमन्नो यज्ञम्पावकवर्ण्णꣳशिवङ्कृधि ॥ ५/१७ ॥ अपामिदन्न्ययनꣳ समुद्द्रस्य निवेशनम् ॥ अन्न्याँस्तेऽअस्म्मत्तपन्तु हेतयः पावकोऽअस्म्मभ्यꣳशिवोभव ॥ ७/१७ ॥ अग्ने पावकरोचिषामन्द्रयादेवजिह्वया ॥ आदेवान्वक्षियक्षिच ॥ ८/१७ ॥ सनः पावकदीदिवोग्ने देवाँ २ ऽइहावह ॥ उपयज्ञꣳ हविश्च नः ॥ ९/१७ ॥ पावकया यश्चितयन्त्या कृपाक्षामन्रुरुचऽउषसो न भानुना ॥ तूर्वन्नयामन्नेतशस्य नूरणऽआयोघृणे न ततृषाणोऽअजरः ॥ १०/१७ ॥ नमस्त्तेहरसे शोचिषे नमस्त्तेऽअस्त्वर्च्चिषे ॥ अन्न्याँस्तेऽअस्म्मत्तपन्तु हेतयः पावकोऽअस्म्मभ्यꣳशिवोभव ॥ ११/१७ ॥ नृषदेवेडप्सुषदेवेड्बर्हिषदेवेड्वनसदेवेट्स्वर्व्विदेवेट् ॥ १३/१७ ॥ येदेवादेवानांयज्ञियायज्ञियानाꣳसंवत्त्सरीणमुपभागमासते ॥ अहुतादो हविषो यज्ञेऽअस्मिन्त्स्वयंपिबन्तुमधुनोघृतस्य ॥ १३/१७ ॥ ये देवादेवेष्ष्वधिदेवत्त्वमायन्न्येब्रह्मणः पुरऽएतारोऽअस्य ॥ येभ्योनऽऋतेपवतेधामकिञ्चननतेदिवो न पृथिव्याऽअधि स्नुषु ॥ १४/१७ ॥ प्राणदाऽअपानदाव्व्यानदावर्च्चोदावरिवोदाः । अन्न्याँस्तेऽअस्म्मत्तपन्तु हेतयः पावकोऽअस्म्मभ्यꣳ शिवोभव ॥ १५/१७ ॥ एवं जलधारां कृत्वा प्राणप्रतिष्ठां कुर्यात ॥

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ॥ ऋग्यजुःसामानि छन्दांसि ॥ पराशक्तिर्देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । आसु वास्त्वादिसर्वासु मूर्तिषु प्राणप्रतिष्ठापने विनियोगः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ आं ह्रीं क्रों आसां मूर्तीनां प्राणा इह प्राणाः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ आं ह्रीं क्रों आसां मूर्तीनां जीव इह स्थितः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ आं ह्रीं क्रों आसां मूर्तीनां सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ गर्भाधानादिपञ्चदशसंस्कारार्थं पञ्चदश प्रणवावृत्तिं कुर्यात् ॥ अनया प्रणवावृत्या आसां मूर्तीनां पञ्चदश संस्काराः सम्पद्यन्ताम् ॥ हस्तेऽक्षतान्गृहीत्वा ॥ ॐ मनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टँय्यज्ञꣳ समिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ ॥ ॥ $\frac{१}{२}^{३}$ ॥ ॐ एष वै प्रतिष्ठानामयज्ञोयत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितम्भवति ॥ वास्तोष्पतिप्रभृतयः सर्वे देवाः सुप्रतिष्ठिता वरदा भवत ॥ ततो वास्तुमूर्तिम् एकस्मिन्पात्रे स्थापयित्वा हस्तेऽक्षतान् गृहीत्वा ध्यानं कुर्यात् ॥ ॐवास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशोऽअनमीवो भवानः॥ यत्त्वे महे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ॥

ॐ नमो भगवते वास्तुपुरुषाय महाबलपराक्रमाय सर्वदेवाधिवासाश्रितशरीराय ब्रह्मपुत्राय सकलब्रह्माण्डधारिणे भूभारार्पितमस्तकाय पुरपत्तनप्रासादगृहवापीसरःकूपादिसन्निवेशसान्निध्यकराय सर्वसिद्धिप्रदाय विश्वम्भराय परमपुरुषाय शक्रवरदाय वास्तोष्पते नमस्ते नमस्ते ॥ एह्येहि भगवन्वास्तो सर्वदेवैरधिष्ठितः ॥ भगवन्कुरु कल्याणं यज्ञेऽस्मिन्सर्वसिद्धये ॥ १ ॥ जानुनी कूर्परीकृत्य दिशि वातहुताशयोः । आगच्छ भगवन्वास्तो सर्वदेवैरधिष्ठितः ॥ भगवन्कुरु कल्याणं यज्ञेऽस्मिन्सन्निधो भव ॥ २ ॥ इति ध्यात्वा ॐ भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवतासहिताय वास्तुपुरुषाय नमः इति आवाहनादिषोडशोपचारैः पूजनं कुर्यात् ॥

ततः प्रार्थयेत् ॥ ॐ देवेश वास्तुपुरुष सर्वविघ्नविदारण । शान्तिं कुरु सुखं देहि यज्ञेऽस्मिन्मम सर्वदा ॥ ॐ भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवतासहिताय वास्तुपुरुषाय नमः प्रार्थनापूर्वकनमस्कारान्सम० ॥ पूजानिवेदनम् ॥ हस्ते जलं गृहीत्वा ॥ अनेन ध्यानावाहनादिषोडशोपचारैरन्योपचारैश्च कृतेन पूजनेन ॐ भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवतासहितो वास्तुपुरुषः प्रीयतां न मम ॥

ततो वास्तुमण्डलसमीपे एकस्मिन्पत्रावल्यां वास्तुमंडलं निर्माय स्थापितक्रमेण पायसेन तदभावे दध्यक्षतैः कुशपुष्पघृताक्षतैर्दुग्धमिश्रिततण्डुलैर्वा बलिदानं दद्यात् ॥

॥ अथ स्थापनक्रमेण ब्रह्मादीनां पायसबलिदानम् ॥

ॐ ब्रह्मणे नमः पायसबलिं सम० ।
ॐ अर्यम्णे नमः पायसबलिं सम० ।
ॐ विवस्वते नमः पायसवलिं सम० ।
ॐ मित्राय नमः पायसवलिं सम० ।
ॐ पृथ्वीधराय नमः पायसबलिं सम० ।
ॐ सावित्राय नमः पायसवलिं सम० ।
ॐ सवित्रे नमः पायसवलिं सम० ।
ॐ विबुधाधिपाय नमः पायसवलिं स० ।
ॐ जयाय नमः पायसबलिं सम० ।
ॐ राजयक्ष्मणे नमः पायसबलिं सम० ।
ॐ रुद्राय नमः पायसबलिं सम० ।
ॐ अद्भ्यो नमः पायसवलिं सम० ।
ॐ आपवत्साय नमः पायसवलिं स० ।

ॐ शिखिने नमः पायसबलिं सम० ।
ॐ पर्जन्याय नमः पायसबलिं सम० ।
ॐ जयन्ताय नमः पायसबलिं सम० ।
ॐ कुलिशाय नमः पायसबलिं सम० ।
ॐ सूर्याय नमः पायसबलिं सम० ।
ॐ सत्याय नमः पायसवलिं सम० ।
ॐ भृशाय नमः पायसबलिं सम० ।
ॐ आकाशाय नमः पायसबलिं सम० ।
ॐ वायवे नमः पायसबलिं सम० ।
ॐ पूष्णे नमः पायसबलिं सम० ।
ॐ वितथाय नमः पायसबलिं सम० ।
ॐ गृहक्षताय नमः पायसबलिं सम० ।
ॐ यमाय नमः पायसबलिं सम० ।

---

१ वास्तुपीठदेवतानां बलिदाने विशेष उक्तः । यथा–ईशकोणे घृतान्नं तु शिखिने विनिवेदयेत् ॥ होमान्ते भक्ष्यभोज्यैश्च वास्तुदेहे बलिं हरेत् ॥ तथैव–शिखिप्रभृतिदेवतानां भिन्नं भिन्नं बलिदानार्थमन्नमुक्तम् । तत्संभवे तदेव देयम् । असंभवे पायसान्नेनैव बलिर्देयः ॥ तदुक्तम् ॥ "पायसं वापि दातव्यं स्वनाम्ना सर्वतः क्रमात् ॥" स्वानाम्ना–शिख्यादिनाम्ना इत्यर्थः ॥ अथवा शिवविष्णुप्रतिष्ठापद्धतौ–पायसान्नाभावे दध्यक्षतैः कुशपुष्पघृताक्षतैर्वा वलिं दद्यात् ॥ वास्तुदेहे इति पदेन वास्तुमण्डलं विरच्य तत्र बलिदानं ज्ञेयम् ॥ अत्र केचन शिष्टाः पूर्वोक्तरीत्या मण्डपस्य नैर्ऋत्यभागे वास्तुपीठे वास्तुपूजनं विधाय बलिञ्च दत्त्वा वास्तुमण्डलस्य पश्चिमदिशि स्वतंत्रकुण्डे स्थण्डिले वा अग्निं प्रतिष्ठाप्य ब्रह्मोपवेशनाद्याज्यभागान्तं कर्म विधाय "ॐ भूर्भुवः स्वः ब्रह्मणे नमः स्वाहा" इति नाममंत्रैः औदुम्बरतिलाज्यद्र०व्यैः मण्डलदेवताभ्यश्च प्रत्येकं अष्टाविंशति अष्टौ वा आहूतीर्हुत्वा ततो ॐ वास्तोष्पते० इति चतुर्भिर्मन्त्रैश्च घृताहुतीश्च दत्त्वा ॥ "ॐ वास्तोष्पते ध्रुवास्थूणां सत्रं सौम्यानाम् ॥ द्रप्सोभेत्तापुरां शश्वतीनामिन्द्रो मुनीनां सखा० स्वाहा ॥" इति मंत्रेण च पञ्च बिल्वफलानि तद्बीजानि वा हुत्वा उत्तरपूजनं विधाय स्विष्टकृते स्वाहा इत्यारभ्य पूर्णाहुत्यन्तं सर्वं कर्म समाप्य गृहवत् त्रिसूत्र्या योगमण्डपं संवेष्ट्य 'कृणुष्व पाजः०इति रक्षोघ्नमंत्रैर्मण्डपस्य

ॐ गन्धर्वाय नमः पायसबलिं सम० ।
ॐ भृङ्गराजाय नमः पायसबलिं स० ।
ॐ मृगाय नमः पायसबलिं सम० ।
ॐ पितृभ्यो नमः पायसबलिं सम० ।
ॐ दौवारिकाय नमः पायसबलिं सम० ।
ॐ सुग्रीवाय नमः पायसबलिं सम० ।
ॐ पुष्पदन्ताय नमः पायसबलिं स० ।
ॐ वरुणाय नमः पायसबलिं सम० ।
ॐ असुराय नमः पायसबलिं सम० ।
ॐ शोषाय नमः पायसबलिं सम० ।
ॐ पापाय नमः पायसबलिं सम० ।
ॐ रोगाय नमः पायसबलिं सम० ।
ॐ अहये नमः पायसबलिं सम० ।
ॐ मुख्याय नमः पायसबलिं सम० ।
ॐ भल्लाटाय नमः पायसबलिं सम० ।
ॐ सोमाय नमः पायसबलिं सम० ।
ॐ सर्पाय नमः पायसबलिं सम० ।
ॐ अदित्यै नमः पायसबलिं सम० ।
ॐ दित्यै नमः पायबलिं सम० ।
ॐ चरक्यै नमः पायसबलिं सम० ।
ॐ विदार्यै नमः पायसबलिं सम० ।
ॐ पूतनायै नमः पायसबलिं सम० ।
ॐ पापराक्षस्यै नमः पायसबलिं सम० ।
ॐ स्कन्दाय नमः पायसबलिं सम० ।
ॐ अर्यम्णे नमः पायसबलिं सम० ।
ॐ जृम्भकाय नमः पायसबलिं सम० ।
ॐ पिलिपिच्छाय० पायसबलिं सम० ।
ॐ इन्द्राय नमः पायसबलिं सम० ।
ॐ अग्नये नमः पायसबलिं सम० ।
ॐ यमाय नमः पायसबलिं सम० ।
ॐ निर्ऋतये नमः पायसबलिं सम० ।
ॐ वरुणाय नमः पायसबलिं सम० ।
ॐ वायवे नमः पायसबलिं सम० ।
ॐ कुबेराय नमः पायसबलिं सम० ।
ॐ ईश्वराय नमः पायसबलिं सम० ।
ॐ ब्रह्मणे नमः पायसबलिं सम० ।

ॐ अनन्ताय नमः पायसबलिं सम० ।

हस्ते जलं गृहीत्वा । अनेन बलिदानेन ब्रह्मादिवास्तुमण्डलदेवतासहितः वास्तुपुरुषः प्रीयतां न मम ॥

॥ इति वास्तुमण्डलदेवतापूजनप्रयोगः समाप्तः ॥

रक्षां विधाय वास्तुकलशोदकेन सपत्नीकं यजमानमभिषिच्य पुनर्वास्तुमण्डलदेवतानामुत्तरपूजनं विधाय तासां विसर्जनं कुर्वन्ति । अयं मुख्यः पक्षः ॥ परञ्च शारदातिलके यज्ञमण्डपस्य नैर्ऋत्यभागे वास्तुमण्डलदेवतानां स्थापनमुक्तं होमो नोक्तः ॥ अतः सर्वत्र सर्वेऽपि मण्डपस्यान्तो नैर्ऋत्यभागे वास्तुपीठं विधाय तस्य पूजनमेवाचरन्ति ॥ होमादिकं तु यत्र स्वातंत्र्येण वास्तुपूजनं तत्रैवेति रुद्रकल्पद्रुमकाराणामपि मतम् ॥ अतोऽस्माभिरपि तथैव वास्तुपूजनमेवाङ्गीकृतम् ॥ होमस्तु चरमेऽह्नि प्रधानहोमानन्तरं सर्वैः क्रियते तथा भविष्यति॥

[१]अथ चतुःषष्टियोगिनीस्थापनम् ॥

कर्ता प्राङ्मुख उपविश्य आचमनं प्राणायामञ्च कृत्वा हस्ते जलं गृहीत्वा ॥ अद्येत्यादि० शुभपुण्यतिथौ मया प्रारब्धस्य अमुककर्मणोऽङ्गत्वेन अस्मिन्योगिनीपीठे महाकालीमहालक्ष्मीमहासरस्वतीपूर्वकं गजाननादिमृगलोचनान्तानां चतुःषष्टियोगिनीनां स्थापनप्रतिष्ठापूजनानि करिष्ये ।

स्ववामहस्ततः प्रथमकलशपूर्णपात्रे ॥ ॐअम्बेऽअम्बिके म्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥ $\frac{१८}{२३}$ ॥ ॐ भूर्भुवः स्वः महाकाल्यै नमः महाकालीम् आ० स्था० ॥ भो महाकालि ! इहागच्छ इह तिष्ठ ॥ १ ॥ प्रथमकलशाद्दक्षिणे द्वितीयकलशपूर्णपात्रे ॥ ॐ श्रीश्च ते लक्क्ष्मीश्च पत्क्न्यावहोरात्रे पार्श्वेनक्क्षत्राणि रूपमश्श्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मऽ इषाणसर्व्वलोकम्मऽइषाण ॥ $\frac{२२}{३१}$ ॥ ॐ भूर्भुवः स्वः महालक्ष्म्यै नमः महालक्ष्मीमावाहयामि स्थापयामि ॥ भो महालक्ष्मी इहागच्छ इह तिष्ठ ॥ २ ॥ द्वितीयकलशाद्दक्षिणे तृतीयकलशपूर्णपात्रे— ॐ पावकानः सरस्वतीव्वाजेभिर्व्वाजिनीवती ॥ यज्ञंव्वष्टुधियावसुः ॥ $\frac{८४}{२०}$ ॥ ॐ भूर्भुवः स्वः महासरस्वत्यै नमः महासरस्वतीम् आ० स्था० ॥ भो महासरस्वति इहागच्छ इह तिष्ठ ॥ ३ ॥

---

१ इदं योगिनीस्थापनं रुद्रकल्पद्रुमोक्तम् ॥

पीठे स्वदक्षिणहस्ततः पश्चिमतः पूर्वदिगन्तं दक्षिणसंस्थं, दक्षिणत उदगन्तं पूर्वदिक्संस्थं वा अष्टसु पङ्क्तिषु प्रतिपङ्क्ति अष्टौ अष्टौ योगिनीः स्थापयेत् ॥

प्रथमपङ्क्तौ पश्चिमतः पूर्वसंस्थम्– ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥ १८/२५ ॥ ॐ भूर्भुवः स्वः गजाननायै नमः गजाननामा० स्था० । भो गजानने इहागच्छ इह तिष्ठ ॥ १ ॥ तत्पूर्वे– ॐ आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहारथो जायतान्दोग्ध्रीं धेनुर्व्वोढानड्वानाशुः सप्तिः पुरन्धिर्य्योषाजिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतान्निकामे निकामे नः पर्जन्न्यो व्वर्षतु फलवत्यो नऽओषधयः पच्च्यन्तां योगक्षेमोनः कल्प्पताम् ॥ २२/२२ ॥ ॐ भूर्भुवः स्वः सिंहमुख्यै नमः सिंहमुखीमावा०स्था० । भो सिंहमुखि इहागच्छ इह तिष्ठ ॥ २ ॥ तत्पूर्वे– ॐ महाँ२ऽइन्द्रो यऽ ओजसा पर्ज्जन्न्यो वृष्टिमाँ २ऽ इव ॥ स्तोमैर्व्वत्सस्यवावृधे ॥ ४०/७ ॥ ॐ भूर्भुवः स्वः गृध्रास्यायै नमः गृध्रास्यामावाह० स्था० ॥ भो गृध्रास्ये इहागच्छ इह तिष्ठ ॥ ३ ॥ तत्पूर्वे– ॐ सद्यो जातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाः ॥ अस्यहोतुः प्रदिश्यृतस्यवाचिस्वाहाकृतꣳ-

हविरदन्तुदेवाः ॥ ३६/२९ ॥ ॐ भूर्भुवः स्वः काकतुण्डिकायै नमः काकतुण्डिकामा० स्था० ॥ भो काकतुण्डिके इहागच्छ इह तिष्ठ ॥ ४ ॥ तत्पूर्वे—ॐ आदित्त्यङ्गर्ब्भम्पयसासमङ्धिसहस्रस्यप्प्रतिमांविश्श्वरूपम् ॥ परिवृङ्धिहरसामाभिमꣳस्त्थाꣳ शतायुषङ्कृणुहिचीयमानꣳ ॥ ४१/१३ ॥ ॐ भूर्भुवः स्वः उष्ट्रग्रीवायै नमः उष्ट्रग्रीवाम् आ० स्था० ॥ भो उष्ट्रग्रीवे इहागच्छ इह तिष्ठ ॥ ५ ॥ तत्पूर्वे—ॐ स्वर्ण्णघर्म्मः स्वाहास्वर्ण्णार्क्कꣳस्वाहा स्वर्ण्णशुक्क्रः स्वाहास्वर्ण्णज्ज्योतिꣳ स्वाहास्वर्ण्णसूर्य्यꣳ स्वाहा ॥ ५०/१८ ॥ ॐ भूर्भुवः स्वः हयग्रीवायै नमः हयग्रीवामावाह० स्था० ॥ भो हयग्रीवे इहागच्छ इह तिष्ठ ॥ ६ ॥ तत्पूर्वे—ॐ सत्त्यञ्चमेश्श्रद्धाचमेजगच्चमेधनञ्चमेविश्श्वञ्चमेमहश्चमेक्क्रीडाचमेमोदश्चमेजातञ्चमेजनिष्ष्यमाणञ्चमेसूक्क्तञ्चमेसुकृतञ्चमेयज्ज्ञेनकल्प्पन्ताम् ॥ ५/१८ ॥ ॐ भूर्भुवः स्वः वाराह्यै नमः वाराहीमा० स्था० ॥ भो वाराहि इहागच्छ इह तिष्ठ ॥ ७ ॥ तत्पूर्वे—ॐ भायै दार्व्वाहारम्प्रभायाऽअग्न्येधम्ब्रध्नस्यविष्टपायाभिषेक्तारंवर्षिष्ठायनाकायपरिवेष्टारन्देवलोकायपेशितारम्मनुष्यलोकायप्प्रकरितारꣳसर्व्वेब्भ्योलोकेब्भ्यऽउपसेक्तारमवऽऋत्त्यैवधायौपमन्थितारम्मेधायवासꣳपल्प्पूलीम्प्रकामायरजयित्रीम् ॥ १२/३० ॥ ॐ भूर्भुवः स्वः शरभाननायै नमः शरभाननामा० स्था० ॥ भो शरभानने इहागच्छ इह तिष्ठ ॥ ८ ॥

द्वितीयपङ्क्तौ पूर्ववत्—ॐजिह्वामेभद्रंवाङ्महोमनोमन्युः स्वराड्भामः ॥ मोदाःप्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मेसहः ॥ ६/२० ॥ ॐ भूर्भुव स्वः उलूकिकायै नमः उलूकिकामावाह० स्था० ॥ भो उलूकिके इहागच्छ इह तिष्ठ ॥९॥ तत्पूर्वे– ॐ हिङ्कारायस्वाहाहिङ्कृतायस्वाहाक्क्रन्दतेस्वाहावक्क्रन्दायस्वाहाप्प्रोथतेस्वाहाप्प्रप्प्रोथायस्वाहागन्धायस्वाहाग्घ्रातायस्वाहानिविष्टायस्वाहोपविष्टायस्वाहासन्दिताय स्वाहा वल्ग्गते स्वाहासीनाय स्वाहाशयानायस्वाहास्वपतेस्वाहाजाग्ग्रते स्वाहा कूजते स्वाहा प्प्रबुद्धाय स्वाहाविजृम्भमाणायस्वाहाविचृत्तायस्वाहासꣳहानायस्वाहोपस्थिताय स्वाहा यनायस्वाहा प्प्रायणाय स्वाहा ॥७/२२॥ ॐभूर्भुवः स्वः शिवारावायै नमः शिवारावामावा० स्था० । भो शिवरावे इहागच्छ तिष्ठ ॥१०॥ तत्पूर्वे– ॐ अग्निश्चमऽआपश्चमेवीरुधश्चमऽओषधयश्चमेकृष्टपच्याश्चमेकृष्टपच्याश्चमेग्ग्राम्म्याश्चमेपशवऽआरण्ण्याश्चमे वित्तञ्चमे वित्तिश्च मे भूतञ्चमेभूतिश्चमेयज्ञेन कल्पन्ताम् ॥ १४/१८ ॥ ॐ भूर्भुवः स्वः मयूर्यै नमः मयूरीमावाह० स्था० ॥ भो मयूरि इहागच्छ इह तिष्ठ ॥ ११ ॥ तत्पूर्वे– ॐ पूषन्तवव्व्रतेव्वयन्नरिष्येमकदाचन ॥ स्तोतारस्तऽइहस्म्मसि ॥ ४१/३४ ॥ ॐ भूर्भुवः स्वः विकटाननायै नमः विकटाननामावा० स्था० ॥ भो विकटानने इहागच्छ इह तिष्ठ ॥ १२ ॥

तत्पूर्वे- ॐ वेद्यावेदिꣳ समाप्प्यते बर्हिषा बर्हिरिन्द्रियम् ॥ सूर्पेन सूर्पऽ आप्प्यते प्प्रणीतोऽ अग्निरग्निना ॥ १७/१९ ॥ ॐ भूर्भुवः स्वः अष्टवक्रायै नमः अष्टवक्रामावाहयामि स्थापयामि ॥ भो अष्टवक्रे इहागच्छ इह तिष्ठ ॥ १३ ॥ तत्पूर्वे-ॐ अयमग्निः सहस्रिणो वाजस्य शतिनस्प्पतिः ॥ मूर्द्धा कवी रयीणाम् ॥ २१/१५ ॥ ॐ भूर्भुवः स्वः कोटराक्ष्यै नमः कोटराक्षीमावा० स्था० ॥ भो कोटराक्षि इहागच्छ इह तिष्ठ ॥ १४ ॥ तत्पूर्वे- ॐ इमम्मे वरुण श्श्रुधी हवमद्या च मृडय ॥ त्वामवस्युराचके ॥ १/२१ ॥ ॐ भूर्भुवः स्वः कुब्जायै नमः कुब्जामावा० स्था० ॥ भो कुब्जे इहागच्छ इह तिष्ठ ॥ १५ ॥ तत्पूर्वे- ॐ समायत्त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥ १/३८ ॥ ॐ भूर्भुवः स्वः विकटलोचनायै नमः विकटलोचनामावा० स्था० ॥ भो विकटलोचने इहागच्छ इह तिष्ठ ॥ १६ ॥

तृतीयपङ्क्तौ पूर्ववत्- ॐ गन्धर्व्वस्त्वा विश्वावसुꣳ परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः । इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडितः ॥ मित्रावरुणौ त्त्वोत्तरतः परिधत्तान्ध्रुवेण धर्म्मणा विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽ ईडितः ॥ ३/२ ॥ ॐ भूर्भुवः स्वः शुष्कोदर्यै नमः शुष्कोदरीमावाह० स्था० ॥ भो शुष्कोदरि इहागच्छ इह

तिष्ठ ॥ १७ ॥ तत्पूर्वे– ॐ मित्रस्य चर्षणीधृतोवो देवस्य सानसि ॥ द्युम्नञ्चित्रश्रवस्तमम् ॥ ६३/११ ॥ ॐ भूर्भुवः स्वः ललज्जिह्वायै नमः ललज्जिह्वामावाहयामि स्थापयामि ॥ भो ललज्जिह्वे इहागच्छ इह तिष्ठ ॥ १८ ॥

तत्पूर्वे– ॐ अग्नेब्रह्मगृभ्णीष्वधरुणमस्यन्तरिक्षन्दृꣳह ब्रह्मवनित्वाक्षत्रवनिसजातवन्युपदधामिभ्रातृव्यस्यवधाय ॥ धर्त्रमसिदिवन्दृꣳहब्रह्मवनित्वाक्षत्रवनिसजातवन्युपदधामिभ्रातृव्यस्यवधाय ॥ विश्वाभ्यस्त्वाशाभ्यऽउपदधामि चितस्स्थोर्द्ध्वचितो भृगूणामङ्गिरसान्तपसा तप्प्यद्ध्वम् ॥ १८/१ ॥ ॐ भूर्भुवः स्वः श्वदंष्ट्रायै नमः श्वदंष्ट्रामावा० स्था० ॥ भो श्वदंष्ट्रे इहागच्छ इह तिष्ठ ॥१९॥

तत्पूर्वे– ॐ भगप्प्रणेतर्भगसत्त्यराधोभगेमान्धियमुदवाददन्नः ॥ भगप्प्रनोजनयगोभिरश्वैर्भगप्प्रनृभिर्नृवन्तः स्याम ॥ ३६/३४ ॥ ॐ भूर्भुवः स्वः वानराननायै नमः वानराननामा० स्था० ॥ भो वान० ने इहागच्छ इह तिष्ठ ॥२०॥

तत्पूर्वे– ॐ सुपर्णोसिगरुत्मान्पृष्ठेपृथिव्याः सीद ॥ भासान्तरिक्षमापृणज्ज्योतिषादिवमुत्तभानतेजसादिशऽउद्दृꣳह ॥ ७२/१७ ॥ ॐ भूर्भुवः स्वः रुक्षाक्ष्यै नमः रुक्षाक्षीमावाह० स्थाप० ॥ भो रुक्षाक्षि इहागच्छ इह तिष्ठ ॥२१॥

तत्पूर्वे– ॐ उदीरतामवरऽउत्परासऽउन्मद्ध्यमाः पितरः सोम्म्यासः । असुँय्यऽईयुरवृकाऽऋतज्ज्ञास्तेनोवन्तुपितरो

हवैषु ॥ ३९/११ ॥ ॐ भूर्भुवः स्वः केकराक्ष्यै नमः केकराक्षीमावाह० स्था० ॥ भो केकराक्षि इहागच्छ इह तिष्ठ ॥२२॥ तत्पूर्वे—ॐ वरु॑णस्यो॒त्तम्भ॑नमसि॒ वरु॑णस्यस्कम्भ॒सर्ज्ज॑नोस्थो॒ वरु॑णस्यऽऋत॒सद॑न्यसि॒वरु॑णस्यऽऋत॒सद॑नमसि॒वरु॑णस्यऽऋत॒सद॑न॒मासीद ॥ ३६/३३ ॥ ॐ भूर्भुवः स्वः बृहत्तुण्डायै० बृह० आ० स्था० ॥ भो बृहत्तुण्डे इहागच्छ इह तिष्ठ ॥ ॥२३॥ तत्पूर्वे—ॐ वरु॑णꣳ प्प्रावि॒ता भु॑वन्मि॒त्रो विश्श्वा॑भिरू॒तिभि॑ः ॥ कर॑तान्नꣳ सु॒राध॑सꣳ ॥ ४६/३३ ॥ ॐ भूर्भुवः स्वः सुराप्रियायै नमः सुराप्रियामावाहयामि स्थापयामि ॥ भो सुराप्रिये इहागच्छ इह तिष्ठ ॥ २४ ॥

चतुर्थपङ्क्तौ पूर्ववत्— ॐ ह॒ꣳसः॑ शु॑चि॒षद्वसु॑रन्तरिक्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दुरोण॒सत्। नृ॒षद्व॒र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्जा गो॒जाऽऋ॑त॒जाऽअ॑द्रि॒जाऽऋ॒तम्बृ॒हत् ॥ २४/१० ॥ ॐ भूर्भुवः स्वः कपालहस्तायै नमः कपालहस्तामावा० स्था० ॥ भो कपालहस्ते इहागच्छ इह तिष्ठ ॥ २५ ॥ तत्पूर्वे— ॐ सु॒सन्दृश॑न्त्वा व॒यम्मघ॑वन्वन्दिषी॒महि॑ ॥ प्रनू॒नम्पू॒र्णव॑न्धुरस्तु॒तो या॑सि॒ वशा॒ँ २ऽअनु॒ योजा॒न्न्विन्द्र॑ते॒ हरी॑ ॥ ५२/३ ॥ ॐ भूर्भुवः स्वः रक्ताक्ष्यै नमः रक्ताक्षीमावा० स्था० ॥ २६ ॥ तत्पूर्वे—ॐ प्र॒ति॒पद॑सि प्प्रति॒पदे॑ त्त्वानु॒पद॑स्यनु॒पदे॑ त्त्वा स॒म्पद॑सि स॒म्पदे॑ त्त्वा॒ तेजो॑सि॒ तेज॑से त्त्वा ॥ ८/१५ ॥ ॐ भूर्भुवः स्वः शुक्यै नमः शुकीमावा० स्था० ॥ भो शुकि इहागच्छ

इह तिष्ठ ॥ २७ ॥ तत्पूर्वे– ॐ देवीर्द्वारोऽअश्विनाभिषजेन्द्रेसरस्वती ॥ प्राणन्नवीर्य्यन्नसि द्वारो दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥ ४/२१ ॥ ॐ भूर्भुवः स्वः श्येन्यै नमः श्येनीमावा० स्था० ॥ भो श्येनि इहागच्छ इह तिष्ठ ॥ २८ ॥ तत्पूर्वे– ॐ देवस्यत्त्वासवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ सरस्वत्त्यैवाचोयन्तुर्य्यन्त्रियैदधामिबृहस्प्पतेष्ट्वासाम्म्राज्ज्येनाभिषिञ्चाम्म्यसौ ॥ ३०/९ ॥ ॐ भूर्भुवः स्वः कपोतिकायै नमः कपोतिकामा० स्था० ॥ भो कपोतिके इहागच्छ इह तिष्ठ ॥ २९ ॥ तत्पूर्वे–ॐ देवस्य त्त्वा सवितुःप्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ सरस्वत्त्यै वाचो यन्तुर्य्यन्त्रेणाग्नेः साम्म्राज्ज्येनाभिषिञ्चामि ॥ ३७/१८ ॥ ॐ भूर्भुवः स्वः पाशहस्तायै नमः पाशहस्तामावा० स्था० ॥ भो पाशहस्ते इहागच्छ इह तिष्ठ ॥ ३० ॥ तत्पूर्वे–ॐ भुवोयज्ज्ञस्यरजसश्चनेतायत्रानियुद्भिः सचसेशिवाभिः ॥ दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्वामग्नेचकृषेहव्यवाहम् ॥ २३/१५ ॥ ॐ भूर्भुवः स्वः दण्डहस्तायै नमः दण्डहस्तामावा० स्था० ॥ भो दण्डहस्ते इहागच्छ इह तिष्ठ ॥ ३१ ॥ तत्पूर्वे–ॐ कदाचनस्तरीरसिनेन्द्रसश्चसिदाशुषे ॥ उपोपेन्नुमघवन्भूयऽ इन्नु ते दानन्देवस्य पृच्यते ॥ ३४/३ ॥ ॐ भूर्भुवः स्वः प्रचण्डायै नमः प्रचण्डामावा० स्था० ॥ भो प्रचण्डे इहागच्छ इह तिष्ठ ॥ ३२ ॥

पञ्चमपङ्क्तौ— ॐ भद्रङ्कर्ण्णेभिᳪ शृणुयामदेवाभद्रम्पश्येमाक्षभिर्य्यजत्राः॥ स्थिरैरङ्गैस्तुष्टुवाᳪसस्तनूभिर्व्यशेमहिदेवहितँय्यदायुः ॥$\frac{२१}{२५}$॥ ॐ भूर्भुवः स्वः चण्डविक्रमायै नमः चण्डविक्रमामावा० स्था० ॥ भो चण्डविक्रमे इहागच्छ इह तिष्ठ ॥ ३३ ॥ तत्पूर्वे— ॐ इषे त्वोर्ज्जे त्वा वायवस्थ देवो वः सविताप्प्रार्प्पयतु श्श्रेष्ठतमाय कर्म्मणऽआप्प्यायद्ध्वमघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा वस्तेनऽईशतमाघशᳪसोद्ध्रुवाऽअस्मिन्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्पाहि ॥$\frac{१}{१}$॥ ॐ भूर्भुवः स्वः शिशुघ्न्यै नमः शिशुघ्नीम् आ० स्था० ॥ भो शिशुघ्नि इहागच्छ इह तिष्ठ ॥३४॥ तत्पूर्वे—ॐ देवीर्द्यावापृथिवीमखस्यवामद्य शिरोराद्ध्यासन्देवयजनेपृथिव्याः ॥ मखायत्त्वामखस्यत्त्वा शीर्ष्णे॥$\frac{३}{३७}$॥ॐ भूर्भुवः स्वः पापहन्त्र्यै नमः पापहन्त्रीमावा० स्था०॥ भो पापहन्त्रि इहागच्छ इह तिष्ठ ॥३५॥ तत्पूर्वे—ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्त्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छसातऽइत्त्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥$\frac{६२}{१२}$॥ ॐ भूर्भुवः स्वः काल्यै नमः कालीमावा० स्था० ॥ भो कालि इहागच्छ इह तिष्ठ ॥ ३६ ॥ तत्पूर्वे— ॐ विश्श्वानिदेवसवितर्दुरितानिपरा सुव ॥ यद्भद्रन्तन्नऽआसुव ॥$\frac{३}{३९}$॥ ॐ भूर्भुवः स्वः रुधिरपायिन्यै नमः रुधिरपायिनीमावा० स्था० ॥ भो रुधिरपायिनि इहागच्छ इह

तिष्ठ ॥ ३७ ॥ तत्पूर्वे– ॐ अग्निश्चमेघर्म्मश्चमेर्कश्चमेसूर्यश्चमेप्राणश्चमेश्वमेधश्चमेपृथिवीचमेदितिश्चमेदितिश्चमेद्यौश्चमेङ्गुलयꣳ शक्वरयोदिशश्चमे यज्ञेन कल्पन्ताम् ॥ $\frac{३३}{१८}$ ॥ ॐ भूर्भुवः स्वः वसाधयायै० वसाधयामावा० स्था० ॥ भो वसाधये इहागच्छ इह तिष्ठ ॥ ३८ ॥ तत्पूर्वे–ॐ बह्वीनाम्पिता बहुरस्य पुत्रश्चिश्चाकृणोति समनावगत्य ॥ इषुधिःसङ्काꣳपृतनाश्चसर्वाः पृष्टेनिनद्धोजयतिप्रसूतꣳ ॥ $\frac{४३}{२९}$ ॥ ॐ भूर्भुवः स्वः गर्भभक्षायै नमः गर्भभक्षामावा० स्था०॥ भो गर्भभक्षे इहागच्छ इह तिष्ठ ॥ ३९ ॥ तत्पूर्वे–ॐ नमस्ते रुद्रमन्यवऽउतो तऽइषवेनमः ॥ बाहुभ्यामुतते नमः ॥ $\frac{१}{१६}$ ॥ ॐ भूर्भुवः स्वः शवहस्तायै नमः शवहस्तामावा० स्था० ॥ भो शवहस्ते इहागच्छ इह तिष्ठ ॥ ४० ॥

षष्ठपङ्क्तौ–ॐ ऋतवस्त्तेयज्ञंवितन्वन्तुमासारक्षन्तुतेहविः ॥ सँवत्सरस्तेयज्ञन्दधातुनꣳप्रजाश्चपरिपातुनꣳ ॥ $\frac{१४}{२६}$ ॥ ॐ भूर्भुवः स्वः आन्त्रमालिन्यै नमः आन्त्रमालिनीमावा० स्था० ॥ भो आन्त्रमालिनि इहागच्छ इह तिष्ठ ॥ ४१ ॥ तत्पूर्वे– ॐ तेऽआचरन्तीसमनेवयोषामातेवपुत्रम्बिभृतामुपस्थे ॥ अपशत्रून्विद्ध्यताꣳ सँविदानेऽआर्त्नीऽइमेविष्फुरन्तीऽअमित्रान् ॥ $\frac{४१}{२९}$ ॥ ॐ भूर्भुवः स्वः स्थूलकेश्यै नमः स्थूलकेशीमावा० स्था० ॥ भो स्थूलकेशि इहागच्छ इह तिष्ठ ॥ ४२ ॥ तत्पूर्वे– ॐ वेद्या

व्वेदि॒ꣳसमा॑प्प्यतेब॒र्हिषा॑ब॒र्हिरि॑न्द्रि॒यम् ॥ यू॒पे॑न॒यू॒प॑ऽआप्प्यते॒ प्प्रणी॑तोऽअ॒ग्निर॒ग्निना ॥ १७/१९ ॥ ॐ भूर्भुवः स्वः बृहत्कुक्ष्यै नमः बृहत्कुक्षीमावाहयामि स्थापयामि ॥ भो बृहत्कुक्षि इहागच्छ इह तिष्ठ ॥ ४३ ॥ तत्पूर्वे– ॐ पा॒व॒का न॒ꣳ सर॑स्वती॒ व्वाजे॑भिर्व्वा॒जिनी॑वती ॥ य॒ज्ञं व॑ष्टु धि॒याव॑सुꣳ ॥ ८४/२० ॥ ॐ भूर्भुवः स्वः सर्पास्यायै नमः सर्पास्यामावाह० स्थाप० ॥ भो सर्पास्ये इहागच्छ इह तिष्ठ ॥ ४४ ॥ तत्पूर्वे– ॐ अस्क॑न्नम॒द्य दे॒वेब्भ्य॒ऽआज्य॒ꣳसम्भ्रि॑यास॒मङ्घ्रि॑णाव्विष्ण॒ोमात्त्वाव॑क्क्रमिष॒ं व्वसु॑मतीमग्ग्नेतेच्छा॒यामुप॑स्त्थेष॒ंव्विष्ण॒ोस्त्थान॑मसी॒तऽइन्द्रो व्वी॒र्य्य॑मकृणोदू॒र्द्ध्वोद्ध्व॒रऽआस्त्था॑त् ॥ ८/२ ॥ ॐ भूर्भुवः स्वः प्रेतवाहनायै नमः प्रेतवाहनामावाह० स्थाप० ॥ भो प्रेतवाहने इहागच्छ इह तिष्ठ ॥ ४५ ॥ तत्पूर्वे– ॐ य॒मा॒य॒त्त्वाङ्गि॑रस्वतेपितृ॒मते॒ स्वाहा॑ ॥ स्वाहा॑ घ॒र्म्माय॒ स्वाहा॑ घ॒र्म्मः पि॒त्रे ॥ ९/३८ ॥ ॐ भूर्भुवः स्वः दन्दशूककरायै नमः दन्दशूककरामावाह० स्थाप० ॥ भो दन्दशूककरे इहागच्छ इह तिष्ठ ॥ ४६ ॥ तत्पूर्वे– ॐ म॒ही द्यौः पृ॑थि॒वी च॑ न॒ऽ इ॒मँ य॒ज्ञम्मि॑मिक्षताम् ॥ पि॒पृ॒ता॒न्नो॒ भरी॑मभिꣳ ॥ ॥ ३२/८ ॥ ॐ भूर्भुवः स्वः क्रौञ्च्यै नमः क्रौञ्चीमावाह० स्थाप० ॥ भो क्रौञ्चि इहागच्छ इह तिष्ठ ॥ ४७ ॥ तत्पूर्वे– ॐ उ॒प॒या॒मगृ॑हीतोसि॒ हरि॑रसिहारियोज॒नोहरि॑ब्भ्यान्त्वा ॥

हव्यौद्धानास्त्थंसहसौमाऽइन्द्राय ॥ $\frac{२}{७}$ ॥ ॐ भूर्भुवः स्वः मृगशीर्षायै नमः मृगशीर्षामावाह० स्थाप० ॥ भो मृगशीर्षे इहागच्छ इह तिष्ठ ॥ ४८ ॥

सप्तमपङ्क्तौ– ॐ आप्प्यायस्वसमेतुतेव्विश्श्वतः सोमव्वृष्ण्यम् ॥ भवाव्वाजस्यसङ्गथे ॥ $\frac{११२}{१२}$ ॥ ॐ भूर्भुवः स्वः वृषाननायै नमः वृषाननामावाह० स्थाप० ॥ भो वृषानने इहागच्छ इह तिष्ठ ॥ ४९ ॥ तत्पूर्वे– ॐ कार्षिरसि समुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि ॥ समापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः ॥ $\frac{२}{६}$ ॥ ॐ भूर्भुवः स्वः व्यात्तास्यायै नमः व्यात्तास्यामावाह० स्थाप० ॥ भो व्यात्तास्ये इहागच्छ इह तिष्ठ ॥ ५० ॥ तत्पूर्वे– ॐ त्र्यम्बकँयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्त्योर्मुक्षीयमामृतात् ॥ $\frac{६०}{३}$ ॥ ॐ भूर्भुवः स्वः धूमनिःश्वासायै नमः धूमनिःश्वासामावाह० स्थाप० ॥ भो धूमनिःश्वासे इहागच्छ इह तिष्ठ ॥ ५१ ॥ तत्पूर्वे– ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥ $\frac{२२}{३१}$ ॥ ॐ भूर्भुवः स्वः व्योमैकचरणोर्ध्वदृशे नमः व्योमैकचरणोर्ध्वदृशमावाह० स्थाप० ॥ भो व्योमैकचरणोर्ध्वदृक् इहागच्छ इह तिष्ठ ॥५२॥ तत्पूर्वे– ॐ विष्णोरराटमसिविष्णोःश्नप्त्रेस्त्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवेत्त्वा ॥ $\frac{२१}{५}$ ॥ ॐ भूर्भुवः स्वः तापिन्यै

नमः तापिनीमावा० स्था० ॥ भो तापिनि इहागच्छ इह तिष्ठ ॥ ५३ ॥ तत्पूर्वे– ॐ ब्रा॒ह्म॒णम॒द्य वि॑देयम्पि॒तृम॑न्तम्पैतृम॒त्त्यमृषि॑मार्षे॒यꣳ सु॒धातु॑दक्क्षिणम् ॥ अ॒स्म्मद्रा॑ता दे॑व॒त्रा ग॑च्छत प्प्रदा॒तार॒मावि॑शत ॥ ४६/७ ॥ ॐ भूर्भुवः स्वः शोषणीदृष्ट्यै नमः शोषणीदृष्टिमावाह० स्थाप० ॥ भो शोषणीदृष्टे इहागच्छ इह तिष्ठ ॥ ५४ ॥ तत्पूर्वे– ॐ या व्या॒घ्रं विषू॑चिको॒भौ वृक॑ञ्च॒ रक्क्षति ॥ श्ये॒नम्प॑त॒त्रिणꣳसि॒ꣳहꣳहसꣳ ॥ १०/१९ ॥ ॐ भूर्भुवः स्वः कोटर्यै नमः कोटरीमावाह० स्थाप० ॥ भो कोटरि इहागच्छ इह तिष्ठ ॥ ५५ ॥ तत्पूर्वे– ॐ एका॑च मे ति॒स्रश्च॑ मेति॒स्रश्च॑मे॒ पञ्च॑चमे॒ पञ्च॑चमे स॒प्तच॑मेस॒प्तच॑मे॒ नव॑चमे॒ नव॑चम॒ऽएका॑दश चम॒ऽएका॑दश चमे॒त्रयो॑दश चमे॒त्रयो॑दश चमे॒पञ्च॑दश चमे॒पञ्च॑दश चमेस॒प्तद॑श चमेस॒प्तद॑श चमे॒नव॑दश चमे॒नव॑दश चम॒ऽएक॑विꣳशतिश्च म॒ऽएक॑विꣳशतिश्च मे॒त्रयो॑विꣳशतिश्च मे॒त्रयो॑विꣳशतिश्च चमे॒ पञ्च॑विꣳशतिश्च मे॒पञ्च॑विꣳशतिश्च मेस॒प्तवि॑ꣳशतिश्च मेस॒प्तवि॑ꣳशतिश्चमे॒ नव॑विꣳशतिश्च मे॒ नव॑विꣳशतिश्च म॒ऽएकत्रिꣳशच्चम॒ऽएक॑त्रिꣳशच्च मे॒ त्रय॑स्त्रिꣳशच्च मे य॒ज्ज्ञेन॑ कल्प्पन्ताम् ॥ २४/१८ ॥ ॐ भूर्भुवः स्वः स्थूलनासिकायै नमः स्थूलनासिकामावाह० स्था० ॥ भो स्थूलनासिके इहागच्छ इह तिष्ठ ॥ ५६ ॥

अष्टमपङ्क्तौ– ॐ ब्रह्मा॑णिमेम॒तय॒ꣳशꣳसु॒तास॒ꣳशुष्म्म॑ऽइयर्त्ति॒प्प्रभृ॑तोमे॒ऽअद्रिः॑ ॥ आशा॑सते॒प्प्रति॑हर्य्य॑न्त्यु॒क्थे-

माहरींवहतस्त्तानोऽअच्छं ॥ $\frac{७८}{३३}$ ॥ ॐ भूर्भुवः स्वः विद्युत्प्रभायै० विद्युत्प्रभामावा० स्था०॥ भो विद्युत्प्रभे इहागच्छ इह तिष्ठ ॥५७॥ तत्पूर्वे—ॐअग्ग्नेयुक्क्ष्वाहियेतवाश्श्वांसोदेवसाधवं÷ ॥ अरंवहन्तिमन्न्यवे ॥ $\frac{३६}{१३}$ ॥ ॐ भूर्भुवः स्वः बलाकास्यायै० बलाकास्यामावा० स्थाप० ॥ भो बलाकास्ये इहागच्छ इह तिष्ठ ॥ ५८ ॥ तत्पूर्वे— ॐ सुपर्ण्णोसिगरुत्म्मान्पृष्ठेपृथिव्याः सीद ॥ भासान्तरिक्षमापृणज्ज्योतिषादिवमुत्तभानतेजसादिशुऽउद्दृꣳह ॥ $\frac{७२}{१७}$ ॥ ॐ भूर्भुवः स्वः मार्जार्यै नमः मार्जारीमावाह० स्थाप० ॥ भो मार्जारि इहागच्छ इह तिष्ठ ॥ ५९ ॥ तत्पूर्वे— ॐ यातेरुद्र शिवातनूरघोरापापकाशिनी ॥ तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ $\frac{२}{१६}$ ॥ ॐ भूर्भुवः स्वः कटपूतनायै नमः कटपूतनामावाह० स्थाप० ॥ भो कटपूतने इहागच्छ इह तिष्ठ ॥ ६० ॥ तत्पूर्वे— ॐ देवीद्यावापृथिवीमखस्यवामद्य शिरोराद्ध्यासन्देवयजने पृथिव्याः ॥ मखायत्त्वामखस्यत्त्वाशीर्ष्ष्णे ॥ $\frac{३}{३७}$ ॥ ॐ भूर्भुवः स्वः अट्टाट्टहासायै नमः अट्टाट्टहासामावा० स्थाप० ॥ भो अट्टाट्टहासे इहागच्छ इह तिष्ठ ॥ ६१ ॥ तत्पूर्वे—ॐइदंविष्ण्णुर्व्विचक्क्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ $\frac{१५}{५}$ ॥ ॐ भूर्भुवः स्वः कामाक्ष्यै नमः कामाक्षीमावा० स्था० ॥ भो कामाक्षि इहागच्छ इह तिष्ठ ॥ ६२ ॥ तत्पूर्वे—ॐ वृष्ण्णऽऊर्म्मिरसिराष्ट्रदाराष्ट्रम्मे-

देहि॒स्वाहा॒वृष्ण्णं॑ऽऊ॒र्म्मिर॑सिराष्ट्रदारा॒ष्ट्रम॒मुष्म्मै॑देहि॒वृषसे॒नो॒सिराष्ट्रदारा॒ष्ट्रम्मै॑देहि॒स्वाहा॑वृषसे॒नो॒सिराष्ट्रदारा॒ष्ट्रम॒मुष्म्मै॑देहि ॥२/१०॥ ॐ भूर्भुवः स्वः मृगाक्ष्यै नमः मृगाक्षीमावा० स्थाप० ॥ भो मृगाक्षि इहागच्छ इह तिष्ठ ॥ ६३ ॥

तत्पूर्वे—ॐ भायैदार्व्वा॑हा॒रम्प्र॒भाया॑ऽअग्न्ये॒धम्ब्र॒ध्नस्य॑वि॒ष्टपा॑याभिषे॒क्क्तार॒व्वर्षि॑ष्ठाय॒नाका॑यपरिवेष्टार॑न्देवलो॒का॑यपेशि॒तार॑म्मनुष्यलो॒का॑यप्प्रकरि॒तार॒ꣳसर्व्वे॑भ्योलो॒के॑भ्य॑ऽउपसे॒क्क्तार॒मव॑ऽऋत्त्यै॑ब्व॒धायो॑पमन्थि॒तार॒म्मेधा॑यव्वासꣳपल्पूली॑म्प्र॑का॒माय॑रजयि॒त्रीम् ॥१२/३०॥ ॐ भूर्भुवः स्वः मृगलोचनायै नमः मृगलोचनामावा० स्था० ॥ भो मृगलोचने इहागच्छ इह तिष्ठ ॥६४॥ ततः प्रतिष्ठापनम् ॥ ॐ मनोजूतिर्ज्जु० ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीपूर्वकगजाननादिचतुःषष्टियोगिन्यः सुप्रतिष्ठिता वरदा भवत ॥ इति प्रतिष्ठाप्य ॥ ॐ भूर्भुवः स्वः श्रीमहाकालीमहालक्ष्मीमहासरस्वतीपूर्वकगजाननादिचतुःषष्टियोगिनीभ्यो नमः इति मन्त्रेण आवाहनादिषोडशोपचारैः पूजनं कुर्यात् ॥ ततः प्रार्थयेत् ॥ यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः ॥ कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ॥ हस्ते जलं गृहीत्वा ॥ अनेन ध्यानावाहनादिषोडशोपचारैरन्योपचारैश्च कृतेन पूजनेन ॐ भूर्भुवः स्वः श्रीमहाकालीमहालक्ष्मीमहासरस्वतीपूर्वकगजाननादिचतुःषष्टियोगिन्यः प्रीयन्तां न मम ॥

॥ इति योगिनीपूजनप्रयोगः समाप्तः ॥

॥ अथैकपञ्चाशत्क्षेत्रपालदेवतापूजनप्रयोगः[1] ॥

सपत्नीको यजमानः क्षेत्रपालस्य पीठसमीपे उदङ्मुखः पश्चिमाभिमुखो वोपविश्याचमनं प्राणायामं च कुर्यात् ॥

ततो हस्ते जलं गृहीत्वा । अद्यपूर्वोच्चारित० एवंगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मया प्रारब्धस्य अमुककर्मणोऽङ्गतया अस्मिन्क्षेत्रपालपीठे मध्ये क्षेत्रपालपूजनपूर्वकं पूर्वाद्यष्टदलपत्रेषु पूर्वादिक्रमेण पञ्चाशत्क्षेत्रपालदेवानां स्थापनप्रतिष्ठापूजनानि करिष्ये ॥ ततः पीठस्य मध्यकलशे कृताग्न्युत्तारणां सुवर्णनिर्मितां क्षेत्रपालप्रतिमां निधाय तत्र क्षेत्रपालमावाहयेत् ॥

हस्तेऽक्षतान्गृहीत्वा ॥ ॐ नमोस्तुसर्प्पेभ्योयेकेचं पृथिवीमनु ॥ येऽअन्तरिक्क्षेयेदिवि तेभ्यः सर्प्पेभ्यो नमः ॥ $\frac{६}{१३}$ ॥ ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः क्षेत्रपालम् आवा० स्थाप० ॥ भो क्षेत्रपाल इहागच्छ इह तिष्ठ ॥ १ ॥

पूर्वपत्रे प्रादक्षिण्येन—ॐपावकयायश्चितयन्त्याकृपाक्क्षामन्रुरुचऽउषसोनभानुनां ॥ तूर्वन्नयामन्नेतशस्यनूरणऽआयोघृणेनततृषाणोऽअजरः ॥ $\frac{१०}{१७}$ ॥ ॐ भूर्भुवः स्वः अजराय० अजरमावा० स्था० ॥ भो अजर इहागच्छ इह तिष्ठ ॥ १ ॥ ॐ प्रथमा वांᳫंसरथिनांसुवर्णांदेवौपश्यन्तौभुवनानि-

---

[1] रुद्रकल्पद्रुमोक्तः ॥ पूर्वाग्नेयदक्षिणनैर्ऋत्यपश्चिमवायव्यपत्रेषु षण्णां षण्णां देवतानामावाहनमुत्तरेशानयोः पत्रयोः सप्तानां सप्तानां देवतानामावाहनं बोध्यम् ॥

विश्वा ॥ अपिप्प्रयश्चोदनावाम्मिमानाहोताराज्योतिः प्प्रदिशादिशन्ता ॥ ७/२१ ॥ ॐ भूर्भुवः स्वः व्यापकाय नमः व्यापकमावाह० स्थाप० ॥ भो व्यापक इहागच्छ इह तिष्ठ ॥ २ ॥ ॐ इन्द्रस्य वज्ज्रो मरुतामनीकम्मित्रस्यगर्ब्भो वरुणस्यनाभिः ॥ सेमान्नोहव्यदातिञ्जुषाणोदेवरथप्प्रतिहव्यागृभाय ॥ ५४/२१ ॥ ॐ भूर्भुवः स्वः इन्द्रचौराय नमः इन्द्रचौरमावाह० स्थाप० ॥ भो इन्द्रचौर इहागच्छ इह तिष्ठ ॥ ३ ॥ ॐ एवेदिन्द्रंवृषणंवज्ज्रबाहुंवसिष्ठासोऽअभ्यर्च्चन्त्यर्क्कैः ॥ सनस्तुतोवीरवद्धातुगोमद्यूयम्पातस्वस्तिभिꣳ सदानꣳ ॥ ५४/२० ॥ ॐ भूर्भुवः स्वः इन्द्रमूर्तये नमः इन्द्रमूर्तिमावाह० स्था० ॥ भो इन्द्रमूर्ते इहागच्छ इह तिष्ठ ॥४॥ ॐ उक्षासमुद्रोऽअरुणःसुपर्ण्णःपूर्व्वस्य योनिम्पितुराविवेश ॥ मद्ध्ये दिवो निहितꣳ पृश्न्निरश्म्मा विचक्क्रमे रजसस्प्पात्त्यन्तौ ॥ ६०/१७ ॥ ॐ भूर्भुवः स्वः उक्षाय नमः उक्षमावाह० स्थाप० ॥ भो उक्ष इहागच्छ इह तिष्ठ ॥ ५ ॥ ॐ यद्देवादेवहेडनन्देवासश्चकृमावयम् ॥ अग्निर्म्मातस्म्मादेनसोविश्वान्मुञ्चत्वꣳहसꣳ ॥ १४/२० ॥ ॐ भूर्भुवः स्वः कूष्माण्डाय नमः कूष्माण्डमावाहयामि स्थापयामि ॥ भो कूष्माण्ड इहागच्छ इह तिष्ठ ॥ ६ ॥

आग्नेयपत्रे प्रादक्षिण्येन—ॐ इमम्मेवरुणश्श्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ १/२१ ॥ ॐ भूर्भुवः स्वः वरुणाय०

वरुणमावा० स्था० ॥ भो वरुण इहागच्छ इह तिष्ठ ॥७॥ ॐ नहिस्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ॥ एमैनमवृधन्नमृताऽअमर्त्त्यँवैश्वानरङ्क्षैत्रजित्त्यायदेवाः ॥ ६०/३३ ॥ ॐ भूर्भुवः स्वः बटुकाय नमः बटुकमावाह० स्था० ॥ भो बटुक इहागच्छ इह तिष्ठ ॥ ८ ॥ ॐ मुञ्चन्तु मा शपत्थ्यादथो वरुण्ण्यादुत ॥ अथो यमस्य पड्वीशात्त्सर्व्वस्माद्देवकिल्ल्बिषात् ॥ ९०/१२ ॥ ॐ भूर्भुवः स्वः विमुक्ताय नमः विमुक्तमावाह० स्थाप० ॥ भो विमुक्त इहागच्छ इह तिष्ठ ॥ ९ ॥ ॐ कुर्वन्नेवेहकर्म्माणिजिजीविषेच्छतꣳसमाꣳ ॥ एवन्त्वयिनान्न्यथेतोस्त्तिनकर्म्मलिप्प्यतेनरे ॥ ॥ २/४० ॥ ॐ भूर्भुवः स्वः लिप्तकाय नमः लिप्तकमावा० स्थाप० ॥ भो लिप्तक इहागच्छ इह तिष्ठ ॥ १० ॥ ॐ अर्म्मेभ्योहस्त्तिपञ्जवायाश्वपम्पुष्ट्यैगोपालंवीर्य्यायाविपालन्तेजसेजपालमिरायैकीनाशङ्कीलालायसुराकारम्भद्रायगृहपꣳश्रेयसेवित्तधमाद्ध्यक्ष्यायानुक्षत्तारम् ॥ ११/३० ॥ ॐ भूर्भुवः स्वः लीलाकाय नमः लीलाकमावाह० स्थाप० ॥ भो लीलाक इहागच्छ इह तिष्ठ ॥ ११ ॥ ॐ सुपर्ण्णँवस्त्तेमृगोऽअस्यादन्तोगोभिꣳसन्नद्धापततिप्प्रसूता ॥ यत्रानरꣳसञ्चविचद्द्रवन्तितत्रास्म्मभ्यमिषवꣳशर्म्मसꣳसन् ॥ ४८/२९ ॥ ॐ भूर्भुवः स्वः एकदंष्ट्राय नमः एकदंष्ट्रमावाह० स्थाप० ॥ भो एकदंष्ट्र इहागच्छ इह तिष्ठ ॥ १२ ॥ षड्देवताः ॥

दक्षिणदिक्पत्रे प्रादक्षिण्येन— ॐ प्रजापतयेच व्वायवेच गोमृगोव्वरुणायारण्ण्योमेषोयमायकृष्ण्णोमनुष्ष्यराजायमर्क्कटः शार्दूलायरोहिदृषभायंगवयीक्षिप्प्रश्श्येनायव्वर्तिका नीलङ्ङ्गोः क्क्रिमिः समुद्द्रायंशिशुमारोहिमवतेहस्त्ती ॥ ३०/२४ ॥ ॐ भूर्भुवः स्वः ऐरावताय नमः ऐरावतमावाह० स्थाप० ॥ भो ऐरावत इहागच्छ इह तिष्ठ ॥ १३ ॥ ॐ ओषधयः समवदन्तसोमेनसहराज्ञा ॥ यस्म्मैकृणोतिब्राह्मणस्तꣳ राजन्पारयामसि ॥ ९६/१२ ॥ ॐ भूर्भुवः स्वः ओषधिघ्नाय नमः ओषधिघ्नमावा० स्थाप० ॥ भो ओषधिघ्न इहागच्छ इह तिष्ठ ॥१४॥ ॐ त्र्यम्बकँयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्त्योर्मुक्षीयमामृतात् ॥ ६०/३ ॥ ॐ भूर्भुवः स्वः बन्धनाय नमः बन्धनमावाह० स्थाप० ॥ भो बन्धन इहागच्छ इह तिष्ठ ॥ १५ ॥ ॐ देवसवितःꣳ प्प्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय ॥ दिव्योगन्धर्व्वः केतपूः केतन्नःꣳ पुनातु व्वाचस्प्पतिर्व्वाचन्नःꣳ स्वदतु ॥ ७/११ ॥ ॐ भूर्भुवः स्वः दिव्यकाय नमः दिव्यकमावा० स्थाप० ॥ भो दिव्यक इहागच्छ इह तिष्ठ ॥ १६ ॥ ॐ सीसेनतन्त्रम्मनसामनीषिणऽऊर्णासूत्रेण कवयो व्वयन्ति ॥ अश्श्विना यज्ञꣳ सवितासरस्वतीन्द्रस्यरूपंव्वरुणोभिषज्ज्यन् ॥ ८०/१९ ॥ ॐ भूर्भुवः स्वः कम्बलाय नमः कम्बलमावाह० स्थाप० ॥ भो कम्बल इहागच्छ इह तिष्ठ ॥१७॥ ॐ आशुःशिशानो-

वृषभोनभीमोघनाघनः क्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरः शतꣳसेनाऽअजयत्साकमिन्द्रः ॥ ३३/१७ ॥ ॐ भूर्भुवः स्वः भीषणाय नमः भीषणमावाह० स्थाप० ॥ भो भीषण इहागच्छ इह तिष्ठ ॥१८॥ इति षट् देवताः ॥

नैर्ऋत्यपत्रे प्रादक्षिण्येन— ॐ इमꣳसाहस्रꣳशतधारमुत्सं व्यच्यमानꣳसरिरस्यमध्ये । घृतन्दुहानामदितिञ्जनायाग्ने माहिꣳसीः परमेव्योमन् ॥ गवयमारण्यमनुतेदिशामितेन चिन्वानस्तन्वो निषीद ॥ गवयन्तेशुगृच्छतुयन्द्विष्मस्तन्ते शुगृच्छतु ॥४९/१३॥ ॐ भूर्भुवः स्वः गवयाय नमः गवयमावाह० स्थाप० ॥ भो गवय इहागच्छ इह तिष्ठ ॥१९॥ ॐ कुम्भोवनिष्ठुर्जनिताशचीभिर्यस्मिन्नग्रेयोन्याङ्गर्भोऽअन्तः ॥ प्लाशिर्व्यक्तꣳ शतधारऽउत्सोदुहेनकुम्भीस्वधाम्पितृभ्यः ॥ ८७/१९ ॥ ॐ भूर्भुवः स्वः घण्टाय नमः घण्टमावाह० स्थाप० ॥ भो घण्ट इहागच्छ इह तिष्ठ ॥ २० ॥ ॐ आक्रन्दय बलमोजो नऽ आधा निष्टनिहि दुरिता बाधमानः ॥ अपप्प्रोथ दुन्दुभेदुच्छुनाऽइतऽइन्द्रस्य मुष्टिरविसीडयस्व ॥५६/२९॥ ॐ भूर्भुवः स्वः व्यालाय नमः व्यालमावा० स्थाप० ॥ भो व्याल इहागच्छ इह तिष्ठ ॥ २१ ॥ ॐ इन्द्रायाहि चित्रभानो सुताऽ इमे त्वायवः ॥ अण्वीभिस्तना पूतासः ॥ ८७/२० ॥ ॐ भूर्भुवः स्वः अणवे नमः अणुमावा० स्थाप० ॥ भो अणो इहागच्छ इह तिष्ठ ॥२२॥

ॐ चन्द्रमाऽ अप्प्स्वन्तरा सुपर्ण्णो धावते दिवि ॥ रयिम्पिशङ्गम्बहुलम्पुरुस्पृहꣳ हरिरेति कनिक्क्रदत् ॥ $\frac{९०}{३३}$ ॥ ॐ भूर्भुवः स्वः चन्द्रवारुणाय नमः चन्द्रवारुणमावाह० स्थाप० ॥ भो चन्द्रवारुण इहागच्छ इह तिष्ठ ॥ २३ ॥ ॐ स्वाङ्कृतोसि विश्श्वेभ्यऽ इन्द्रियेभ्यो दिव्येभ्यꣳ पार्त्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वासुभवसूर्य्यायदेवेभ्यस्त्वामरीचिपेभ्यो देवाꣳशोयस्म्मैत्त्वेडे तत्सत्त्यमुपरिप्रुताभङ्गेनहतोसौफट्प्राणायत्त्वाव्यानायत्त्वा ॥ $\frac{३}{७}$ ॥ ॐ भूर्भुवः स्वः पटाटोपाय नमः पटाटोपमावाह० स्थाप० ॥ भो पटाटोप इहागच्छ इह तिष्ठ ॥ २४ ॥ इति षट् देवताः ॥

पश्चिमदिक्पत्रे प्रादक्षिण्येन— ॐ उग्रँल्लोहितेनमित्रꣳ सौव्रत्त्येनरुद्रन्दौर्व्रत्त्येनेन्द्रम्प्रक्क्रीडेनमरुतोबलेनसाद्ध्यान्प्रमुदा ॥ भवस्यकण्ठ्यꣳ रुद्रस्यान्तꣳ पार्श्व्यम्महादेवस्य यकृच्छर्वस्यवनिष्ठुः पशुपतेꣳ पुरीतत् ॥ $\frac{९}{३९}$ ॥ ॐ भूर्भुवः स्वः जटालाय नमः जटालमा० स्थाप० ॥ भो जटाल इहागच्छ इह तिष्ठ ॥ २५ ॥ ॐ पवित्रेणपुनीहिमाशुक्क्रेणदेवदीद्यत् ॥ अग्नेक्क्रत्त्वाक्क्रतू१ऽरनु ॥ $\frac{४०}{१९}$ ॥ ॐ भूर्भुवः स्वः क्रतवे नमः क्रतुमावा० स्थाप० ॥ भो क्रतो इहागच्छ इह तिष्ठ ॥ २६ ॥ ॐ आजिघ्रकलशम्मह्यात्त्वाविशन्त्विन्दवꣳ ॥ पुनरूर्ज्जानिवर्त्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्रयिः ॥ $\frac{४२}{८}$ ॥ ॐ भूर्भुवः स्वः घण्टेश्वराय नमः घण्टेश्वरमावाह० स्थाप० ॥ भो घण्टेश्वर

इहागच्छ इह तिष्ठ ॥ २७ ॥ ॐ व्वायौशु॒क्क्रोऽअ॑यामिते॒मद्ध्वो॒ऽअग्ग्र॒न्दिविष्टिषु ॥ आया॑हि॒सोम॑पीतयेस्प्पा॒र्हौदे॑वनि॒युत्त्वता॑ ॥ $\frac{३०}{२७}$ ॥ ॐभूर्भुवः स्वः विटङ्काय नमः विटङ्कमावाह० स्थाप० ॥ भो विटङ्क इहागच्छ इह तिष्ठ ॥ २८ ॥ ॐ दैव्व्या॒होता॑रा भि॒षजेन्द्द्रेणस॒युजा॑सु॒जा ॥ जग॑ती॒च्छन्द॑ऽइन्द्रि॒यम॑न॒ड्वान्गौर्व्वयौदधुः ॥ $\frac{१९}{२१}$ ॥ ॐ भूर्भुवः स्वः मणिमानाय नमः मणिमानमावाह० स्थाप० ॥ भो मणिमान इहागच्छ इह तिष्ठ ॥ २९ ॥ ॐ त्रीणि॑त ऽआहुर्द्दि॒वि॒बन्ध॑नानि॒त्त्रीण्य॒प्प्सुत्त्रीण्य॒न्तः स॑मु॒द्द्रे ॥ उ॒तेव॑मे॒व्वरु॑णच्छन्त्स्यर्व्व॒न्न्यत्त्रा॑तऽआ॒हुः प॑रमञ्ज॒नित्त्र॑म् ॥ $\frac{१५}{२९}$ ॥ ॐ भूर्भुवः स्वः गणबन्धवे नमः गणबन्धुमावाहयामि स्थापयामि ॥ भो गणबन्धो इहागच्छ इह तिष्ठ ॥ ३० ॥ इति षट् देवताः ॥

वायव्यपत्रे प्रादक्षिण्येन– ॐ प्र॒ति॒श्श्रुत्त्का॑याऽअर्त्त॒नङ्घोषा॑यभ॒षमन्ता॑यबहुवा॒दिन॑मन॒न्ताय॒मूक॒ꣳ शब्द्दा॑याडम्बराघा॒तम्महसे॑व्वीणाव॒ादङ्क्क्रोशा॑यतूणव॒द्ध्मम॑वरस्प्प॒राय॑शङ्ख॒द्ध्मं॑व्वना॑यव्व॒नप॒म॒न्न्यतो॑रण्ण्याय दाव॒पम् ॥ $\frac{१९}{३०}$ ॥ ॐभूर्भुवः स्वः डामराय नमः डामरमावाह० स्थाप० ॥ भो डामर इहागच्छ इह तिष्ठ ॥ ३१ ॥ ॐशु॒द्धवा॑लꣳस॒र्व्वशु॑द्धवालोमणि॒वाल॒स्त्तऽआश्श्वि॒नाः श्येत॑ श्येता॒क्क्षोऽरु॒णस्त्ते रु॒द्द्राय॑पशु॒पत॑येक॒र्ण्णाय॒मा ऽअ॑वलि॒प्प्सा रौ॒द्द्रानभो॑रूपाः पार्ज्ज॒न्न्याः ॥ $\frac{२}{२४}$ ॥ ॐ भूर्भुवः स्वः ढुण्ढिकर्णाय० ढुण्ढिकर्णमावाह० स्थाप० ॥

भो ढुण्ढिकर्ण इहागच्छ इह तिष्ठ ॥ ३२ ॥ ॐ बलविज्ञायस्त्थविरᳫंप्प्रवीरᳫंसहस्वाञ्वाजीसहमानऽउग्ग्रः ॥ अभिवीरोऽअभिसत्त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥ ३७/१७ ॥ ॐ भूर्भुवः स्वः स्थविराय नमः स्थविरमावाह० स्थाप० ॥ भो स्थविर इहागच्छ इह तिष्ठ ॥ ३३ ॥ ॐ सुपर्णंव्वस्ते मृगोऽअस्यादन्तोगोभिᳫं सन्नद्धापततिप्प्रसूता ॥ यत्रानरᳫं सञ्चविचद्द्रवन्ति तत्रास्म्मभ्यमिषवᳫंशर्म्मयᳫंसन् ॥ ४८/२९ ॥ ॐ भूर्भुवः स्वः दन्तुराय नमः दन्तुरमावाह० स्थाप० ॥ भो दन्तुर इहागच्छ इह तिष्ठ ॥ ३४ ॥ ॐ अग्ग्नेऽअच्छावदेहनाप्प्रतिनᳫंसुमनाभव ॥ प्रनोयच्छसहस्रजित्त्वᳫंहि धनदाऽअसिस्वाहा ॥ २८/९ ॥ ॐ भूर्भुवः स्वः धनदाय नमः धनदमावाह० स्थाप० ॥ भो धनद इहागच्छ इह तिष्ठ ॥ ३५ ॥ ॐ भद्रङ्कर्ण्णेभिᳫं शृणुयामदेवाभद्रम्पश्श्येमाक्क्षभिर्य्यजत्राᳫं ॥ स्थिरैरङ्गैस्त्तुष्टुवाᳫंसस्त्तनूभिर्व्व्यशेमहिदेवहितंय्यदायुः ॥ २१/२५ ॥ ॐ भूर्भुवः स्वः नागकर्णाय नमः नागकर्णमावाह० स्थाप० ॥ भो नागकर्ण इहागच्छ इह तिष्ठ ॥ ३६ ॥ इति षट् देवताः ॥

उत्तरदिक्पत्रे प्रादक्षिण्येन सप्त—ॐ बाहूमेबलमिन्द्रियᳫं हस्त्तौ मे कर्म्मवीर्य्यम् ॥ आत्क्माक्षत्रमुरोमम ॥ ७/२० ॥ ॐ भूर्भुवः स्वः महाबलाय नमः महाबलमावाह० स्थाप० ॥ भो महाबल इहागच्छ इह तिष्ठ ॥ ३७ ॥ ॐ अपाम्फेनेननमुचेᳫंशिरऽइन्द्रोदवर्त्तयᳫं ॥ विश्श्वायदजयस्पृधः ॥ ७१/१९ ॥

ॐ भूर्भुवः स्वः फेत्काराय नमः फेत्कारमावाह० स्थाप० ॥ भो फेत्कार इहागच्छ इह तिष्ठ ॥ ३८ ॥ ॐ इदꣳ हविः प्प्रजननम्मेऽअस्त्तुदशवीरꣳसर्व्वगणꣳस्वस्त्तये ॥ आत्मसनिप्प्रजासनिपशुसनिलोकसन्न्यभयसनि ॥ अग्निः प्प्रजाम्बहुलाम्मे करोत्त्वन्नम्पयो रेतोऽ अस्म्मासुधत्त ॥ १४/१९ ॥ ॐ भूर्भुवः स्वः चीकराय नमः चीकरमावाह० स्थाप० ॥ भो चीकर इहागच्छ इह तिष्ठ ॥ ३९ ॥ ॐ साव्याघ्रं व्विषूचिकोभौ वृकञ्च रक्षति ॥ श्येनम्पतत्रिणꣳ सिꣳहꣳ सेमम्पात्वꣳहसः ॥ १०/१९ ॥ ॐ भूर्भुवः स्वः सिंहाय नमः सिंहमावाह० स्थाप० ॥ भो सिंह इहागच्छ इह तिष्ठ ॥ ४० ॥ ॐ मृगो नभीमः कुचरोगिरिष्ठाः परावतऽआजगन्थापरस्याः ॥ सृकꣳसꣳशायपविमिन्द्रतिग्ग्मं व्विशत्रून्ताढिव्विमृधोनुदस्व ॥ ७१/१८ ॥ ॐ भूर्भुवः स्वः मृगाय नमः मृगमावाह० स्थाप० ॥ भो मृग इहागच्छ इह तिष्ठ ॥ ४१ ॥ ॐ देवहूर्य्यज्ञऽआचव्वक्षत्त्सुम्म्नहूर्य्यज्ञऽ आचव्वक्षत् ॥ यक्षदग्ग्निर्देवोदेवाँ२ऽआचव्वक्षत् ॥ ६२/१७ ॥ ॐ भूर्भुवः स्वः यक्षाय नमः यक्षमावाह० स्थाप० ॥ भो यक्ष इहागच्छ इह तिष्ठ ॥ ४२ ॥ ॐ जीमूतस्येवभवति प्प्रतीकँयद्द्वर्म्मीयातिसमदामुपस्त्थे ॥ अनाविद्धयातन्न्वा जयत्त्वꣳसत्त्वाव्वर्म्मणो महिमापिपर्त्तु ॥ ३८/२९ ॥ ॐ भूर्भुवः स्वः मेघवाहनाय नमः मेघवाहनमावाह० स्थाप० ॥ भो मेघवाहन इहागच्छ इह तिष्ठ ॥४३॥ इति सप्त देवताः ॥

ईशानपत्रे सप्त—ॐ तीव्रान्घोषान्कृण्वते वृषपाणयोश्वा-
रथैभिः सहव्वाजयन्तः ॥ अवक्क्रामन्तः प्प्रपदैरमित्रा-
न्क्षिणन्ति शत्रूँ१ऽ रनपव्ययन्तः ॥ $\frac{४४}{२९}$ ॥ ॐ भूर्भुवः स्वः
तीक्ष्णोष्ठाय नमः तीक्ष्णोष्ठमावाह० स्थाप० ॥ भो तीक्ष्णोष्ठ
इहागच्छ इह तिष्ठ ॥ ४४ ॥ ॐ व्वायुष्ट्वा पचतैरवत्त्वसि-
तग्ग्रीवश्छागैर्न्यग्ग्रोधश्चमसैः शल्म्मलिर्वृद्ध्या ॥ एषस्य
रात्थ्योवृषापड्भिश्चतुर्ब्भिरेदगन्ब्रह्माकृष्णश्चनोवतु नमो-
ऽग्नये ॥ $\frac{१३}{२३}$ ॥ ॐ भूर्भुवः स्वः अनलाय नमः अनलमावाह०
स्थाप० ॥ भो अनल इहागच्छ इह तिष्ठ ॥ ४५ ॥ ॐ
अदित्त्यास्त्वापृष्ठेसादयाम्म्यन्तरिक्षस्यधर्त्रींविष्टम्भनी-
न्दिशामधिपत्नीम्भुवनानाम् ॥ ऊर्म्मिर्द्रप्सोऽअपामसि
विश्वकर्म्मा तऽऋषिरश्विनाद्ध्वर्य्यूसादयतामिहत्त्वा ॥ $\frac{५}{१४}$ ॥
ॐ भूर्भुवः स्वः शुक्रतुण्डाय नमः शुक्रतुण्डमावाह०
स्थाप० ॥ भो शुक्रतुण्ड इहागच्छ इह तिष्ठ ॥ ॐ द्यौस्ते
पृथिव्यन्तरिक्षंव्वायुश्छिद्रम्पृणातुते ॥ सूर्य्यस्तेनक्षत्रैः
सहलोकङ्कृणोतुसाधुया ॥ $\frac{४३}{२३}$ ॥ ॐ भूर्भुव स्वः सुधाला-
पाय नमः सुधालापमावाह० स्थाप० ॥ भो सुधालाप
इहागच्छ इह तिष्ठ ॥ ४७ ॥ ॐ सम्बर्हिरङ्क्ताꣳहविषा
घृतेन समादित्त्यैर्व्वसुभिः सम्मरुद्भिः ॥ समिन्द्रो विश्व-
देवेभिरङ्क्तान्दिव्यन्नभो गच्छतु यत्स्वाहा ॥ $\frac{२२}{२}$ ॥ ॐ भूर्भुवः
स्वः बर्बरकाय नमः बर्बरकमावाह० स्थाप० ॥ भो बर्ब-

रक इहागच्छ इह तिष्ठ ॥ ४८ ॥ ॐ पवमानꣳसोऽअद्यनꣳ पवित्रेणविचर्षणिꣳ ॥ यꣳपोतासपुनातु मा ॥ $\frac{४३}{१९}$ ॥ ॐ भूर्भुवः स्वः पवनाय नमः पवनमावाह० स्थाप० ॥ भो पवन इहागच्छ इह तिष्ठ ॥ ४९ ॥ ॐ अब्भ्यर्षत सुष्टुतिङ्गव्यमाजिमस्म्मासुभद्राद्द्रविणानि धत्त ॥ इमंयज्ज्ञन्नयतदेवतानोघृतस्यधारामधुमत्तपवन्ते ॥ $\frac{१८}{१७}$ ॥ ॐ भूर्भुवः स्वः पावनाय नमः पावनमावाह० स्थाप० ॥ भो पावन इहागच्छ इह तिष्ठ ॥ ५० ॥ इति सप्त देवताः ॥

ततः प्रतिष्ठापनम् ॥ ॐ मनोजूतिर्जु० ॥ $\frac{१३}{२}$ ॥ ॐ भूर्भुवः स्वः क्षेत्रपालसहिताः अजरादिक्षेत्रपालदेवाः सुप्रतिष्ठिता वरदा भवत ॥ ॐ भूर्भुवः स्वः क्षेत्रपालसहितेभ्यः अजरादिक्षेत्रपालदेवेभ्यो नमः इति आवाहनादिषोडशोपचारैः पूजनं कुर्यात् ॥ ततः स्तुतिपाठः ॥ यं यं यं यक्षरूपं दशदिशि वदनं भूमिकम्पायमानं सं सं संहारमूर्तिं शिरमुकुटजटाशेखरं चन्द्रबिम्बम् ॥ दं दं दं दीप्तकायं विकृतनखमुखं चोर्ध्वरेखाकपालं पं पं पं पापनाशं प्रणतपशुपतिं क्षेत्रपालं नमामि ॥ प्रार्थयेत् ॥ यदङ्गत्वेन भो देवाः पूजिता विधिमार्गतः ॥ कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ॥ हस्ते जलं गृहीत्वा ॥ अनेन यथाशक्ति ध्यानावाहनादिषोडशोपचारैरन्योपचारैश्च कृतेन पूजनेन ॐ भूर्भुवः स्वः क्षेत्रपालसहिता अजरादिक्षेत्रपालदेवाः प्रीयन्तां न मम ॥

॥ इति क्षेत्रपालदेवतापूजनप्रयोगः समाप्तः ॥

अथ जलयात्राप्रयोगः ॥

ततः सपत्नीको यजमानः आचमनं प्राणायामत्रयञ्च कुर्यात् ॥ तत आचार्यो यजमानस्य भाले तिलकं कृत्वा शान्तिसूक्तं पठेत् ॥ ततः "ॐ श्रीमन्महा० इत्यारभ्य विष्णुर्विष्णुर्विष्णुः" इत्यन्तं पठेत् ॥ तत अद्येत्यादि शुभपुण्यतिथौ अमुककर्मणोऽङ्गतया करिष्यमाणे अस्मिञ्जलयात्राकर्मणि निर्विघ्नार्थं चतुर्दिक्षु रक्षाबन्धनपूर्वकं गणपतिपूजनं (स्मरणं वा) करिष्ये ॥ इति सङ्कल्पं विधाय ॥ वामहस्ते सर्षपान्गृहीत्वा दक्षिणकरेणाच्छाद्य पठेत् ॥ ॐ इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातुप्प्रचेतास्त्वा रुद्रैः पश्चात्पातुमनोजवास्त्वा पितृभिर्द्दक्षिणतः पातु विश्वकर्म्मा त्वादित्यैरुत्तरतः पात्विदमहन्तप्तं वार्व्वहिर्द्धा यज्ञान्निःसृजामि ॥ $\frac{११}{५}$ ॥ इति सर्षपान् चतुर्दिक्षु विकीर्य यथाशक्ति गणपतिपूजनं (स्मरणं) विधाय भूमिपूजनं कुर्यात् ॥

अथ कलशस्थापनार्थं कृते मण्डले भूमिपूजनम् ॥

भूमिपूजनम्— भूमिं स्पृष्ट्वा— ॐ भूरसि भूमिर० ॥$\frac{१८}{१३}$॥ आसनम्— ॐ मही द्यौः० ॥$\frac{८}{३२}$॥ ॐ भूर्भुवः स्वः भूम्यै नमः आसनं सम० । पाद्यम्— ॐ पृथिवी च म० ॥$\frac{१}{१८}$॥ ॐ भूर्भुवः स्वः भूम्यै नमः पाद्यं सम० ॥ अर्घम्— ॐ स्योना पृथिवि नो० ॥$\frac{३५}{२१}$॥ ॐ भूर्भुवः स्वः भूम्यै नमः अर्घं सम० ॥ ॐ शन्नो देवीर० । ॐ भूर्भुवः स्वः भूम्यै नमः आचमनीयं सम० ॥ पयःस्नानम्— ॐ पयः पृथिव्यां० $\frac{३६}{१८}$॥ ॐ भूर्भुवः स्वः भूम्यै

नमः पयःस्नानं सम० ॥ **शुद्धोदकस्नानम्**[1]— ॐ इरावतीधेनुमतीहिभूतꣳ सूयवसिनी मनवे दशस्या ॥ व्यस्कभ्नारोदसीविष्णवेतेदाधर्त्थपृथिवीमभितोमयूखैः स्वाहा ॥ १६/५ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः शुद्धोदकस्नानं सम० ॥ **वस्त्रम्**— ॐ यऽ इमे द्यावापृथिवीजनित्रीरूपैरपिꣳशद्भुवनानि विश्श्वा ॥ तमद्यहोतरिषितो यजीयान्देवस्त्वष्टारमिहयक्षिविद्वान् ॥ ३४/२९ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः वस्त्रं सम० ॥ **गन्धम्**— ॐ यदूवध्यमुदरस्यापवातियऽआमस्य क्रविषोगन्धोऽअस्त्ति ॥ सुकृता तच्छमितारः कृण्वन्तूतमेधꣳशृतपाकम्पचन्तु ॥ ३३/२५ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः गन्धं सम० ॥ **अक्षतान्**— ॐ अक्षन्नमीमदन्त० ॥ ५१/३ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः अक्षतान्सम० ॥ **पुष्पाणि**— ॐ श्रीश्च ते लक्ष्मीश्च० ॥ २२/३१ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः पुष्पाणि सम० ॥ **सौभाग्यपरिमलद्रव्याणि**— ॐ अहिरिवभोगैः० ॥ ५१/२९ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः सौभाग्यपरिमलद्रव्याणि सम० ॥ **धूपम्**— ॐ धूरसिधूर्व० ॥ ८/१ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः धूपमाघ्रापयामि ॥ **दीपम्**— ॐ अग्निर्ज्योतिर्ज्योतिरग्निः० ॥ ९/३ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः दीपं दर्शयामि ॥ **नैवेद्यम्**— ॐ अन्न-

---

[1] भूमिपूजने रुद्रकल्पद्रुमकारैस्तु केवलं भूमेः पयःस्नानमेवोक्तम् । अतोऽस्माभिरपि पञ्चामृते दध्यादिस्नानं नोच्यते ॥ कृते पञ्चामृते न काऽपि क्षतिरित्यपि मन्यामहे ॥

पुतेन्नस्य० ॥ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः नैवेद्यं निवेद० ॥ नैवेद्यान्ते आचमनीयम्– ॐ शिवोनामासिस्व० ॥ $\frac{६३}{६}$ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः आचमनीयं सम० ॥ फलम्– ॐ याः फलिनीर्या० ॥$\frac{८९}{१२}$॥ ॐ भूर्भुवः स्वः भूम्यै नमः फलं सम० ॥ ताम्बूलम्[1]– ॐ उतस्मास्यद्रव० ॥ $\frac{१५}{९}$ ॥ ॐ भूर्भुवः स्वः भूम्यै नमः ताम्बूलं सम० ॥ दक्षिणाम्– ॐयद्दत्तँऽयत्त्परादानँऽयत्त्पूर्त्तँऽयाश्चदक्षिणाꣳ ॥ तदग्निर्वैश्वकर्म्मणःस्वर्द्देवेषुनोदधत् ॥$\frac{६४}{१८}$॥ ॐभूर्भुवः स्वः भूम्यै नमः सुवर्णपुष्पदक्षिणां सम० ॥ पुष्पाञ्जलिम्[2]– ॐ धामच्छदग्निरिन्द्रो ब्रह्मादेवो० ॥$\frac{७६}{१८}$॥ ॐ भूर्भुवः स्वः भूम्यै नमः पुष्पाञ्जलिं सम० ॥ नमस्कारान्– शिवोनामासि० ॥$\frac{६३}{३}$॥ ॐ भूर्भुवः स्वः भूम्यै नमः नमस्कारान् सम० ॥ अर्पणम् ॥ हस्ते जलमादाय ॥ अनया पूजया भूमिः प्रीयतां न मम ॥

॥ इति भूमिपूजनम् ॥

अथ रुद्रकल्पद्रुमोक्तः कलशस्थापनपूजनप्रयोगः ॥

भूमिस्पर्शनम्–ॐ भूरसिभूमिरस्यदितिरसि० ॥ $\frac{१८}{१३}$ ॥ तत्र नवकोष्टकेषु धान्यानां पुञ्जकरणम्– ॐ ओषधयꣳसंम० ॥ $\frac{९६}{१२}$ ॥ ततः सप्तभिर्दर्भपवित्रैः कलशानां पवित्रीकरणम्– ॐ चित्त्पतिर्म्मापुनातु० ॥ $\frac{४}{४}$ ॥ ततो मध्यकोष्टकादारभ्य बहिरीशानादिक्रमेण धान्यपुञ्जोपरि

---

[1] नमः पर्णायेति ताम्बूलम् ॥ [2] रुद्रकल्पद्रुमे नीराजनं नोक्तम् ॥

कलशस्थापनम्– ॐ आजि॑घ्रक॒लशं॑म्म॒ह्या० ॥ ४२/८ ॥ **कलशानां स्थिरीकरणम्**– स्थि॒रोभ॑वव्वी॒ड्वङ्गऽआ॒शुर्भ॑वव्वा॒ज्य॑र्व्वन् ॥ पृ॒थुर्भ॑वसु॒षदु॒स्त्वम॒ग्नेः॑पु॑रीष॒वाह॑णꣳ ॥ ४४/११ ॥ **जलपूरणम्**– ॐ म॒हीद्यौः॑० ॥ ३२/८ ॥ **सर्वौषधीप्रक्षेपः**– ॐ याऽओष॑धी॒ꣳ० ॥ ७५/१२ ॥ **तेषु कलशेषु धान्यप्रक्षेपः**– ॐ व्री॒हय॑श्च॒मे॒यवा॑० ॥ १२/१८ ॥ **दूर्वाप्रक्षेपः**– ॐ काण्डा॑त्काण्डात्प्र० ॥ २०/१३ ॥ **पञ्चपल्लवान्**–अ॒श्व॒त्थेवो॑० ॥ ७९/१२ ॥ **सप्तमृद्प्रक्षेपः**– ॐ स्यो॒नापृ॑थिविनो० ॥ १३/३६ ॥ **फलप्रक्षेपः**– ॐ याः॒ फ॒लिनी॒र्या॑० ॥ ८९/१२ ॥ **पञ्चरत्नप्रक्षेपः**– ॐ परि॒वाज॑पतिꣳ० ॥ २५/११ ॥ **हिरण्यम्**– हि॒र॒ण्य॒ग॒र्भः॑० ॥ ४/१३ ॥ **रक्तसूत्रवेष्टनम्**–ॐसुजा॑त॒ोज्ज्योति॑षा० ॥ ४०/११ ॥ **तेषु पूर्णपात्रं निधाय नालिकेरादीनां स्थापनम्**– ॐपू॒र्णाद॑र्व्वि॒परा॑पत॒० ॥ ४९/३ ॥ **ततस्तेषु गङ्गादिनदीनामावाहनम्**– ॐ इ॒मम्मे॑ व्वरुणश्श्रु॒धीहव॑म॒द्याच॑ मृडय ॥ त्वाम॑व॒स्युराच॑के ॥ १/२१ ॥ ॐ पा॒व॒कान॒ꣳ सर॑स्वती॒व्वाजे॑भिर्व्वा॒जिनी॑वती ॥ य॒ज्ञंव॑ष्टुधि॒याव॑सुꣳ ॥ ८४/२० ॥ ॐ अश्वा॑वती॒र्गोम॑तीर्न्नऽउ॒षासो॑व्वी॒रव॑ती॒ꣳ सद॑मुच्छन्तुभ॒द्राः ॥ घृ॒तन्दुहा॑नाव्वि॒श्वत॒ꣳप्रपी॑ता यू॒यम्पा॑तस्व॒स्तिभि॒ꣳ सदा॑ नꣳ ॥ ४०/३४ ॥ ॐ पञ्च॑न॒द्यः० ॥ ११/३४ ॥ **वरुणावाहनम्**– ॐ तत्त्वा॑ यामि॒ ब्रह्म॑णा॒० ॥ ४९/१८ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् आवा० स्थाप० ॥ गङ्गे त्वं सर्वतीर्थानामा-

श्रयासि यतस्ततः ॥ यजमानाभिषेकार्थमेहि पापं विनाशय ॥ सरस्वति नमस्तुभ्यं महेश्वरि हरिप्रिये ॥ यजमानाभिषेकार्थमेहि पापं विनाशय ॥ प्रपद्ये वरुणं देवं यादसांपतिमीश्वरम् ॥ याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥

प्रतिष्ठापनम्— ॐ मनोजूतिर्जुष० ॥ $\frac{१३}{२}$ ॥ ॐ भूर्भुवः स्वः एषु कलशेषु वरुणः सुप्रतिष्ठितो वरदो भव ॥

गन्धम्— ॐ यद्वयद्वंच्च्यमुदरंस्यापुवातिय॑ऽआमस्यक्क्रविषोगुन्धोऽअस्ति ॥ सुकृतातच्छंमितारंकृण्वन्तूतमेधꣳ शृतपाकम्पचन्तु ॥ $\frac{३३}{२५}$ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः गन्धं सम० ॥ **अक्षतान्**— ॐ अक्षन्नमीमदन्त० ॥ $\frac{५१}{३}$ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः अक्षतान्सम० ॥ **पुष्पाणि**— ॐ ओषधीःप्प्रति० ॥ $\frac{९६}{१२}$ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः पुष्पाणि पुष्पमालाश्च सम० ॥ **सौभाग्यपरिमलद्रव्याणि**— ॐ अहिरिवभोगैः ॥ $\frac{५१}{२९}$ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः सौभाग्यपरिमलद्रव्याणि सम० ॥ **धूपम्**— ॐ धूरसि० ॥ $\frac{६}{१}$ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः धूपमाघ्रापयामि ॥ **दीपम्**— ॐ अग्निर्ज्योतिर्ज्योतिर० ॥ $\frac{९}{३}$ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः दीपं दर्शयामि ॥ **नैवेद्यम्**— ॐ अन्नात्परिस्रुतो० ॥ $\frac{११}{१९}$ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः नैवेद्यं निवेदयामि ॥ ॐ प्राणाय स्वाहेत्यादि गन्धं समर्पयामीत्यन्तं निवेद्य नैवेद्यान्ते आचमनीयं समर्पयामि ॥ **फलम्**— ॐ याःफलिनीर्य्याऽ० ॥ $\frac{८९}{१२}$ ॥

ॐ भूर्भुवः स्वः वरुणाय नमः फलं समर्पयामि ॥ ताम्बूलम्– ॐ उत स्मास्य० ॥ १५/९ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः ताम्बूलं सम० ॥ दक्षिणाम्–ॐ हिरण्यगर्ब्भः॥ ४/१३ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः दक्षिणां समर्पयामि ॥ पुष्पाञ्जलिम्[1]– ॐ धामच्छदग्निरिन्द्रो० ॥ ७६/१८ ॥ ॐ भूर्भुवः स्वः वरुणाय नमः पुष्पाञ्जलिं समर्प० ॥ प्रार्थनापूर्वकनमस्कारान्– ॐ कुम्भोवनिष्ठुर्ज्जनिताशचीभिर्य्यस्मिन्नग्ग्रेयोन्न्याङ्गर्ब्भोऽअन्तः ॥ प्लाशिर्व्यक्क्तꣳ शतधारऽउत्सो दुहेनकुम्भीस्वधाम्पितृभ्यः ॥ ८७/१९ ॥ ॐ शङ्खस्फटिकवर्णाभ श्वेतहाराम्बरावृत ॥ पाशहस्त महाबाहो दयाङ्कुरु दयानिधे ॥ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः ॥ विद्याधरेन्द्रामरगीयमान पाहि त्वमस्मान्भगवन्नमस्ते ॥ तीक्ष्णायुधं तीक्ष्णगतिं दिगीशं चराचरेशं वरुणं महान्तम् ॥ प्रचण्डपाशाङ्कुशवज्रहस्तं भजामि देवं कुलवृद्धिहेतोः ॥ ॐ भूर्भुवः स्वः वरुणाय० प्रार्थनापूर्वकं नमस्कारान्सम० ॥

पूजानिवेदनम्–मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ अनया पूजया कलशस्थितो वरुणः साङ्गः सपरिवारः प्रीयतां न मम ॥

॥ इति कलशस्थापनपूजनप्रयोगः ॥

---

[1] अत्रापि रुद्रकल्पद्रुमे नीराजनं नोक्तम् ॥

अथ सप्तानां जल-जीव-स्थलमातृकाणां सागराणाञ्च स्थापनपूजनप्रयोगः ॥

स्वसमीपे श्वेतवस्त्राच्छादिते पीठे निर्मितेष्वक्षतपुञ्जेषु [1]दक्षिणत उदगन्ताः पश्चिमतः पूर्वदिक्संस्थाः प्रतिकोष्टकं सप्त सप्त देवता आवाहयेत् ॥ हस्तेऽक्षतानादाय ॥ तद्यथा–

अथ प्रथमपंक्तौ सप्तपुञ्जेषु दक्षिणत उदगन्तं सप्तानां जल[2]मातृकाणां स्थापनम् ॥

ॐ भूर्भुवः स्वः मत्स्यै नमः मत्सीमावा० स्था० ॥ भो मत्सि इहागच्छ इह तिष्ठ ॥ १ ॥ ॐ भूर्भुवः स्वः कूर्म्यै नमः कूर्मीमावा० स्थाप० ॥ भो कूर्मि इहागच्छ इह तिष्ठ ॥ २ ॥ ॐ भूर्भुवः स्वः वाराह्यै नमः वाराहीमावा० स्थाप० ॥ भो वाराहि इहागच्छ इह तिष्ठ ॥३॥ ॐ भूर्भुवः स्वः माण्डूक्यै० माण्डूकीमा० स्थाप० ॥ भो माण्डूकि इहागच्छ इह तिष्ठ ॥ ४ ॥ ॐ भूर्भुवः स्वः मकर्यै नमः मकरीमा० स्था० ॥ भो मकरि इहागच्छ इह तिष्ठ ॥ ५ ॥ ॐ भूर्भुवः स्वः ग्राहक्यै नमः ग्राहकीमा० स्था० ॥ भो ग्राहकि इहागच्छ इह तिष्ठ ॥ ६ ॥ ॐ भूर्भुवः स्वः क्रौञ्चिक्यै नमः क्रौञ्चिकीमा० स्था० ॥ भो क्रौञ्चिकि० इहागच्छ इह तिष्ठ ॥ ७ ॥ इति जलमातरः ॥

---

[1] पश्चिमतः पूर्वदिक्संस्था दक्षिणत उदगन्ता वा ॥ [2] मत्सी कूर्मी च वाराहीमाण्डूकी मकरी तथा ॥ ग्राहकी क्रौञ्चिकी चैव सप्तैता जलमातरः ॥

तत्पूर्वे द्वितीयपंक्तौ [1]सप्तजीवमातृकाणां स्थापनम् ॥

ॐ भूर्भुवः स्वः कुमार्यै नमः कुमारीमावाह० स्था० ॥ भो कुमारि इहागच्छ इह तिष्ठ ॥ १ ॥ ॐ भूर्भुवः स्वः धनदायै नमः धनदामा० स्था० ॥ भो धनदे इहागच्छ इह तिष्ठ ॥ २ ॥ ॐ भूर्भुवः स्वः नन्दायै नमः नन्दामा० स्था० ॥ भो नन्दे इहागच्छ इह तिष्ठ ॥ ३ ॥ ॐ भूर्भुवः स्वः विमलायै नमः विमलामावा० स्था० ॥ भो विमले इहागच्छ इह तिष्ठ ॥ ४ ॥ ॐ भूर्भुवः स्वः मङ्गलायै नमः मङ्गलामा० स्था० ॥ भो मङ्गले इहागच्छ इह तिष्ठ ॥५॥ ॐ भूर्भुवः स्वः अचलायै नमः अचलामा० स्था० ॥ भो अचले इहागच्छ इह तिष्ठ ॥ ६ ॥ ॐ भूर्भुवः स्वः पद्मायै नमः पद्मामा० स्था० ॥ भो पद्मे इहागच्छ इह तिष्ठ ॥७॥ इति जीवमातरः ॥

तत्पूर्वे तृतीयपंक्तौ [2]सप्तस्थलमातृकाणां स्थापनम् ॥

ॐ भूर्भुवः स्वः ऊर्म्यै नमः उर्मीमा० स्था० ॥ भो ऊर्मि इहागच्छ इह तिष्ठ ॥ १ ॥ ॐ भूर्भुवः स्वः लक्ष्म्यै० लक्ष्मीमा० स्था० ॥ भो लक्ष्मि इहागच्छ इह तिष्ठ ॥२॥ ॐ भूर्भुवः स्वः महामायायै नमः महामायामा० स्था० ॥ भो महामाये इहागच्छ इह तिष्ठ ॥ ३ ॥ ॐ भूर्भुवः स्वः

---

[1] कुमारी धनदा नन्दा विमला मङ्गलाऽचला ॥ पद्मा चेति सुविख्याताः सप्तैता जीवमातरः ॥ [2] ऊर्मी लक्ष्मीर्महामाया पानदेवी तथैव च ॥ वारुणी निर्मला गोधा सप्तैताः स्थलमातरः ॥

पानदेव्यै नमः पानदेवीमा० स्था० ॥ भो पानदेवि इहागच्छ इह तिष्ठ ॥ ४ ॥ ॐ भूर्भुवः स्वः वारुण्यै नमः वारुणीमा० स्था० ॥ भो वारुणि इहागच्छ इह तिष्ठ ॥५॥ ॐ भूर्भुवः स्वः निर्मलायै नमः निर्मलामा० स्था० ॥ भो निर्मले इहागच्छ इह तिष्ठ ॥ ६ ॥ ॐ भूर्भुवः स्वः गोधायै नमः गोधामा० स्था० ॥ भो गोधे इहागच्छ इह तिष्ठ ॥ ७ ॥ इति सप्त स्थलमातरः ॥

तत्पूर्वे चतुर्थपंक्तौ सप्त[1]सागराणां स्थापनम् ॥

ॐ समुद्रादूर्म्मिर्म्मधुमाँ२ऽउदारदुपाᳬंशुनासममृतत्त्वमानट् ॥ घृतस्यनामगुह्यँयदस्तिजिह्वादेवानाममृतस्यनाभिः ॥ $\frac{८९}{१७}$ ॥ ॐ भूर्भुवः स्वः सप्तसागरेभ्यो नमः सप्तसागरानावाह० स्थाप० ॥ भो सप्तसागरा इहागच्छत इह तिष्ठत ॥ प्रतिष्ठापनम्— ॐ मनोजूतिर्जुष० ॥ $\frac{१३}{२}$ ॥ ॐ भूर्भुवः स्वः जलमातृकाद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवत ॥ एकतंत्रेण पूजनम् ॥ ॐ भूर्भुवः स्वः जलमातृकाद्यावाहितदेवताभ्यो नमः इति नाममन्त्रेण षोडशोपचारैः पूजनं कुर्यात् ॥ हस्ते जलं गृहीत्वा ॥ अनया पूजया जलमातृकाद्यावाहिदेवताः प्रीयन्तां न मम ॥

इति जलजीवस्थलमातृकासहितसप्तसागराणां
पूजनप्रयोगः समाप्तः ॥

---

[1] लवण - इक्षु - सुरा - सर्पि - र्दधि - क्षीर- जलाः सप्त सागराः ॥

॥ अथ सक्षेत्रपालेन्द्रादीनां बलिदानप्रयोगः ॥

ततः कलशानां परितो दश दिक्षु इन्द्रादीनां बलिदानार्थं पृथक् पृथक् एकस्मिन्पर्णपुटे वा सदीपं माषभक्तबलिं दध्योदनं वा निधाय तत्तन्मन्त्रपठनपूर्वकं पृथक् पृथक् एकतन्त्रेण वा बलिदानं दत्त्वा क्षेत्रपालाय बलिदानं दद्यात् ॥

हस्ते जलं गृहीत्वा सङ्कल्पः—मया कृतस्य जलयात्राकर्मणः साङ्गतासिद्ध्यर्थं यथाशक्ति पूजनपूर्वकं क्षेत्रपालसमन्वितेन्द्रादिदशदिक्पालेभ्यो बलिदानं करिष्ये ॥ इति सङ्कल्पं कृत्वा इन्द्रादीनां समन्त्रकं बलिदानं दत्त्वा क्षेत्रपालाय बलिदानं दद्यात् ॥

---

१ एकतंत्रेण बलिदानपक्षे हस्ते जलं गृहीत्वा ॥ "अस्य जलयात्राकर्मणः साङ्गतासिध्यर्थं क्षेत्रपालसहितानाम् इन्द्रादिदिक्पालदेवानामेकतंत्रेण बलिदानं करिष्ये" ॥

ॐ प्राच्यैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहा॒दक्षि॑णायैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहा॑प्र॒तीच्यैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहोदी॑च्यैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहो॒र्ध्वायैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहा॑ ॥ अ. २२ मं.२४ ॥

हस्ते गन्धाक्षतपुष्पाण्यादाय क्षेत्रपालसहितान् इन्द्रादिदशदिक्पालदेवान् साङ्गान् सपरिवारान् सायुधान् सशक्तिकान् एभिर्गन्धाद्युपचारैर्वः पूजयामि ॥ ॐभूर्भुवः स्वः क्षेत्रपालसहितेभ्यः इन्द्रादिदशदिक्पालदेवेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः अमुं सदीपं माषभक्तबलिं समर्पयामि ॥ भो भो क्षेत्रपालसहिताः इन्द्रादिदशदिक्पालदेवाः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः अमुं बलिं गृह्णीत ॥ ममाभ्युदयं कुरुत ॥ आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारो निर्विघ्नकर्तारः कल्याणकर्तारो वरदा भवत ॥ अनेन पूजनपूर्वकैकतंत्रेण कृतबलिदानेन क्षेत्रपालसहिता इन्द्रादिदशदिक्पालदेवाः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः प्रीयन्तां न मम ॥

तत्रैकस्मिन्पत्त्रावल्यां सदीपं माषभक्तबलिं निधाय ॐ नहिस्प्पशुमविंद० ॥ $\frac{६०}{३३}$ ॥ डाकिनीशाकिनीभूतप्रेतपिशाचसहितं श्रीक्षेत्रपालम् एभिर्गन्धाद्युपचारैस्त्वामहं पूज० ॥ डाकिनीशाकिनीभूतप्रेतपिशाचसहिताय श्रीक्षेत्रपालाय असुं सदीपं माषभक्तबलिं समर्पयामि ॥ भो भो डाकिनीशाकिनीभूतप्रेतपिशाचसहित क्षेत्रपाल मम यज्ञं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव ॥ हस्ते जलं गृहीत्वा ॥ अनेन पूजनपूर्वकसदीपमाषभक्तबलिदानेन डाकिनीशाकिनीभूतप्रेतपिशाचसहितः क्षेत्रपालः प्रीयतां न मम ॥

॥ इति क्षेत्रपालसहितेन्द्रादिदेवानां बलिदानम् ॥

अथ जलाशयस्थिते जले वरुणावाहनं पूजनञ्च ॥

सपत्नीको यजमानो जलाशयस्य समीपं गत्वा हस्ते अक्षतान्गृहीत्वा जले वरुणावाहनं कुर्यात् ॥ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः ॥ विद्याधरेन्द्रामरगीयमान पाहि त्वमस्मान्भगवन्नमस्ते ॥ तीक्ष्णायुधं तीक्ष्णगतिं दिगीशं चराचरेशं वरुणं महान्तम् ॥ प्रचण्डपाशाङ्कुशपाशहस्तं भजामि देवं कुलवृद्धिहेतोः ॥ आवाहयाम्यहं देवं वरुणं यादसांपतिम् ॥ प्रतीचीशं जगत्प्राणसेवितं पाशहस्तकम् ॥ ॐ उरुᳪहिराजा व्वरुणश्चकार

सूर्य्या॑य॒ पन्था॒मन्वे॑ त॒वाऽउ॑ ॥ अ॒पदे॒ पादा॒प्प्रति॑ धा॒तवे॑ करु॒ताप॑व॒क्ता हृ॑दया॒विध॑श्चित ॥ नमो॒वरु॑णाया॒भिष्ठि॑तो॒वरु॑णस्य॒पाश॑ः ॥ २३/८ ॥ ॐ तत्त्वा॑यामि॒० ॥ ४९/१८ ॥ अस्मिञ्जलाशयस्थिते जले वरुणाय नमः वरुणमावाह० स्थाप० ॥ प्रतिष्ठापनम्— ॐ मनो॒जूति॑र्जुषता॒० ॥ १३/२ ॥ ॐ भूर्भुवः स्वः अस्मिन् जलाशये वरुणः सुप्रतिष्ठितो वरदो भव ॥ ॐ भूर्भुवः स्वः जलाशयस्थितवरुणाय नमः इति नाममंत्रेण षोडशोपचारैः पञ्चोपचारैर्वा पूजयित्वा प्रार्थयेत् ॥

प्रार्थनाम्— एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः ॥ विद्याधरेन्द्रामरगीयमान पाहि त्वमस्मान्भगवन्नमस्ते ॥ १ ॥ तीक्ष्णायुधं तीक्ष्णगतिं दिगीशं चराचरेशं वरुणं महान्तम् ॥ प्रचण्डपाशाङ्कुशपाशहस्तं नमामि देवं कुलवृद्धिहेतोः ॥ २ ॥ नमामि वरुणं देवं यादसांपतिमीश्वरम् ॥ प्रतीचीशं जगत्प्राणसेवितं पाशहस्तकम् ॥ ३ ॥ ॐ भूर्भुवः स्वः जलाशयस्थितवरुणाय नमः प्रार्थनापूर्वकं नमस्कारान् सम० ॥ अनया पूजया जलाशयस्थितवरुणः साङ्गः सपरिवारः प्रीयतां न मम ॥

॥ इति जलाशयस्थितवरुणपूजनम् ॥

अथ जलाशयस्थिते वरुणे घृताहुतयः ॥

ततो जले स्रुवेण घृताहुतीर्दद्यात् ॥ तद्यथा— ॐ अद्भ्यः स्वाहा ॥ इदमद्भ्यो न मम ॥ १ ॥ ॐ वार्भ्यः स्वाहा ॥

इदं वार्भ्यो न मम ॥ २ ॥ ॐ उदकाय स्वाहा ॥ इदमुदकाय न मम ॥ ३ ॥ ॐ तिष्ठन्तीभ्यः स्वाहा ॥ इदं तिष्ठन्तीभ्यो न मम ॥ ४ ॥ ॐ स्रवन्तीभ्यः स्वाहा ॥ इदं स्रवन्तीभ्यो न मम ॥५॥ ॐ स्यन्दमानाभ्यः स्वाहा ॥ इदं स्यन्दमानाभ्यो न मम ॥ ६ ॥ ॐ कूप्याभ्यः स्वाहा ॥ इदं कूप्याभ्यो न मम ॥ ७ ॥ ॐ सूद्याभ्यः स्वाहा ॥ इदं सूद्याभ्यो न मम ॥ ८ ॥ ॐ धार्याभ्यः स्वाहा ॥ इदं धार्याभ्यो न मम ॥ ९ ॥ ॐ अर्णवाय स्वाहा ॥ इदमर्णवाय न मम ॥ १० ॥ ॐ समुद्राय स्वाहा ॥ इदं समुद्राय न मम ॥ ११ ॥ ॐ सरिराय स्वाहा ॥ इदं सरिराय न मम ॥ १२ ॥ ततो वरुणं पुनः प्रार्थयेत् ॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ॥ सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥ इति सम्प्रार्थ्य ॥

जलमातृकाद्यावाहितदेवतानां विसर्जनम् ॥

ततः सपत्नीको यजमानः पुनः स्वासने उपविश्य हस्ते जलं गृह्णीयात् ॥ मया कृतस्य जलयात्राकर्मणः साङ्गतासिद्ध्यर्थं वृतेभ्य आचार्यादिसर्वेभ्य ऋत्विग्भ्यः यथाशक्ति दक्षिणां दास्ये ॥ ततो हस्ते अक्षतान्गृहीत्वा स्थापितदेवतानां विसर्जनं कुर्यात् ॥ ॐस॒मु॒द्रङ्ग॑च्छ॒स्वाहा॒न्तरि॑क्षङ्गच्छ॒स्वाहा॑दे॒वꣳ स॑वि॒तार॑ङ्गच्छ॒स्वाहा॑मि॒त्रावरु॑णौगच्छ॒स्वाहा॑होरा॒त्रेग॑च्छ॒स्वाहा॒च्छन्दा॑ꣳसिगच्छ॒स्वाहा॒द्यावा॑पृथि॒वीग॑च्छ॒स्वाहा॒य॒ज्ञङ्ग॑ -

च्छस्वाहासोमङ्गच्छस्वाहादिव्यन्नभोगच्छस्वाहाग्निँवैश्वानरङ्गच्छस्वाहामनोमेहार्दिँयच्छदिवन्तेधूमोगच्छतुस्वर्ज्योतिः पृथिवीम्भस्म्मनापृणस्वाहा ॥ २१/६ ॥ इति मन्त्रेण जलमातृकादिस्थापितदेवतानां विसर्जनं कृत्वा स्थापितानां वरुणकलशानामुत्त्थापनं कुर्यात् ॥ हस्तेऽक्षतानादाय ॥ ॐउतिष्ठब्रह्मणस्प्पतेदेवयन्तस्त्वेमहे ॥ उपप्प्रयन्तुमरुतः सुदानवऽइन्द्रप्प्राशूर्भवासचा ॥ ३६/३४ ॥ इत्यक्षतान् सर्वेषु कलशेषु निक्षिप्य कलशानुत्त्थाप्य सुवासिनीभ्यः क्रोडे हरिद्रासौभाग्यद्रव्यताम्बूलचणकाँश्च दत्त्वा प्रत्येकम् एकैकं कलशं दद्यात् ॥ ताश्च स्वस्य मस्तके धृत्वा मार्गे शनैः शनैराचार्यादीन् अनुसरन्त्यो मण्डपं प्रत्यागच्छेयुः ॥ आचार्यादयो मार्गे "ॐ यथेमांवाचम्०" इत्यादिशाकुनसूक्तम् "ॐआनोभद्राः०" इत्यादिसूक्तानि च पठेयुः ॥

अर्धमार्गे बलिदानम् ॥

ततो यजमानः अर्धमार्गे गत्वा क्षेत्रपालपूजनपूर्वकं बलिदानं कुर्यात् ॥ तद्यथा— आचार्योऽर्धमार्गे जलेन भूमिं सम्प्रोक्ष्याक्षतपुञ्जोपरि क्षेत्रपालमावाहयेत् ॥ ॐनहिस्प्पशमविद० ॥ ६०/३३ ॥ ॐ भूर्भुवः स्वः क्षेत्रपालाय० क्षेत्रपालमावा० स्थाप० ॥ पूजनम्—ॐभूर्भुवः स्वः क्षेत्रपालाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्प० ॥ ततः क्षेत्रपालाग्रे सदीपं माषभक्तबलिं दध्योदनं वा निधाय ॥ ॐक्षत्रस्योल्ब-

मसिक्ष॒त्रस्यं॑ज॒राय्वं॑सिक्ष॒त्रस्य॒यो॑नि॑रसिक्ष॒त्रस्य॒ना॑भि॑र॒सीन्द्र॑स्य॒वार्त्रं॑घ्नमसिमि॒त्रस्या॑सि॒वरु॑णस्या॑सि॒त्त्वया॒यं॑वृ॒त्रंव॑धेत् ॥ दृ॒वासि॑रु॒जासि॑क्षु॒मासि॑ । पा॒तैन॒म्प्राञ्चं॑म्पा॒तैनं॑म्प्र॒त्त्यञ्चं॑म्पा॒तैनं॑न्ति॒र्य॑ञ्चं॑न्दि॒ग्भ्यश्पा॑त ॥ ८/१० ॥ भगवन् क्षेत्रपाल भासुर त्रिनेत्र ज्वालामुख अवतर अवतर कपिल पिङ्गल ऊर्ध्वकेश जिह्वाललन छिन्दि छिन्दि भिन्धि भिन्धि कुरु कुरु मुरु मुरु चल चल (लं लः) ह्रां ह्रीं ह्रूं ह्रैं ॐ भगवन् क्षेत्रपाल मम यज्ञं रक्ष रक्ष बलिं गृह्ण गृह्ण स्वाहा ॥ ॐ क्षेत्रपालाय नमः सदीपं माषभक्तबलिं सम० ॥ इति जलमुत्सृज्य स्वयं जलस्पर्शं कुर्यात् ॥ ततो यज्ञमण्डपस्य द्वारसमीपं समागत्य शिष्टाचाराद्यजमानस्य सर्वदोषप्रशमनार्थं तत्र द्वारस्य समीपे पुनः क्षेत्रपालस्य पूजनं कृत्वा पूर्ववद्बलिदानं कुर्यात् ॥ तत्र किञ्चिद्भूमिं जलेनोपलिप्य तण्डुलैः पुञ्जं कृत्वा ॥ ॐ नमोऽस्तुस॒र्पेभ्यो॒० ॥ ६/१३ ॥ ॐ न॒हिस्पश॒मवि॑० ॥ ६०/१३ ॥ इति मन्त्रेण वा ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः क्षेत्रपालम् आवा० स्थाप० ॥ इत्यावाह्य हस्ते गन्धाक्षतपुष्पादाण्याय— ॐ भूर्भुवः स्वः क्षेत्रपालाय साङ्गाय सपरिवाराय सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥ इति सम्पूज्य । तत्र सदीपं माषभक्तबलिं निधाय हस्ते जलं गृहीत्वा ॥ भो भो भगवन् क्षेत्रपाल भासुर त्रिनेत्र ज्वालामुख अवतर अवतर कपिल पिङ्गल

ऊर्ध्वकेश जिह्वाललन छिन्दि छिन्दि भिन्धि भिन्धि कुरु कुरु चल चल ह्रां ह्रीं ह्रूं ह्रैं बलिं गृह्ण गृह्ण स्वाहा ॥ इति जलमुत्सृज्य नाराचमुद्रया क्षेत्रपालं विसृज्य स्वयं स्वदक्षिणकर्णे जलमुपस्पृश्य यजमानो सुवासिनीभिराचार्यादिभिश्च वृतो मण्डपस्य पश्चिमद्वारं समागत्य तिष्ठेत् ॥

अथ सपत्नीकस्य यजमानस्य नीराजनम् ॥

ततोऽन्या काचन सुवासिनी एकस्मिन्पात्रे कर्पूरं प्रज्वाल्य सपत्नीकस्य यजमानस्य कलशहस्तानां सुवासिनीनाञ्च नीराजनं कुर्यात् । तद्यथा– ॐ अनाधृष्टापुरस्तादग्नेराधिपत्त्यऽआयुर्म्मेदाः पुत्रवतीदक्षिणतऽइन्द्रस्याधिपत्त्ये प्प्रजाम्मे दाः सुषदा पश्चाद्देवस्य सवितुराधिपत्त्ये चक्षुर्म्मेदाऽआश्रुतिरुत्तरतो धातुराधिपत्त्ये रायस्प्पोषम्मे दाः ॥ विधृतिरुपरिष्टाद्बृहस्प्पतेराधिपत्त्यऽओजोमेदा विश्श्वाभ्योमानाष्ट्राभ्यस्प्पाहिमनोरश्श्वासि ॥ $\frac{१२}{३७}$ ॥ तत आचार्यः यज्ञमण्डपस्य अन्तर्भागे वायव्यां क्षेत्रपालपीठस्य सन्निधौ श्वेतवस्त्राच्छादिते तण्डुलैर्विनिर्मिते वारुणयन्त्रे कृताष्टदले वा स्नानपीठे कलशान् स्थापयेत् ॥

ततः पत्नीं वामभागे समुपवेश्य प्राङ्मुखोपविष्टस्य सपरिवारस्य यजमानस्य मूर्ध्नि ऋत्विग्भिः परिवृत आचार्यः तेभ्यः कलशेभ्यो जलं गृहीत्वाभिषेकं कुर्यात् ॥ इति रुद्रकल्पद्रुमे ॥

॥ इति जलयात्राप्रयोगः ॥

अथ कुण्डस्थदेवतापूजनपूर्वकाग्निस्थापनप्रयोगः ॥

सपत्नीको यजमानः कुण्डस्य समीपे कुण्डपश्चिमदिग्भागे उपविश्य आचमनं प्राणायामञ्च कृत्वा संकल्पं कुर्यात् । अद्येत्यादि० शुभपुण्यतिथौ मया प्रारब्धस्य सग्रहमखामुकयागकर्मणः साङ्गतासिद्ध्यर्थम् अस्मिन्कुण्डे कुण्डस्थदेवतानाम् आवाहनप्रतिष्ठापूजनानि तथा च कुण्डे पञ्चभूसंस्कारपूर्वकम् अग्निप्रतिष्ठां करिष्ये ॥

तत आचार्यानुज्ञया कश्चिद्विप्र उत्थाय हस्ते कुशान् गृहीत्वा तैः अग्न्यायतनं (कुण्डं) सम्मार्ज्य । ॐ आपो॒हिष्ठाम॑यो॒॰ । ॐ योर्व॑ःशि॒वत॑मो॒॰ । ॐ तस्म्मा॒ऽअर॑ङ्ग॰ ॥ ३५/११ ॥ कुशोदकेन प्रोक्षयेत् ॥ तत आवाहयेत्– आवाहयामि तत्कुण्डं विश्वकर्मविनिर्मितम् । शरीरं यच्च ते दिव्यमग्न्यधिष्ठानमद्भुतम् ॥ ॐ भूर्भुवः स्वः कुण्डाय नमः कुण्डम् आवाह० स्थाप० ॥ प्रार्थयेत्– ये च कुण्डे स्थिता देवाः कुण्डाङ्गे याश्च देवताः । ऋद्धिं यच्छन्तु ते सर्वे यज्ञसिद्धिं ददन्तु नः ॥ इत्यावाह्य कुण्डमध्ये देवान् आवाहयेत्– ॐ वि॒श्व॑कर्म्मन्ह॒विषा॒वर्द्ध॑नेनत्रा॒तार॒मिन्द्र॑मकृणोरव॒द्ध्यम् । तस्म्मै॒विश॒ः सम॑नमन्तपू॒र्वीर॒यमु॒ग्रोवि॒हव्यो॒यथास॑त् । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वावि॒श्वक॑र्म्मणऽए॒षते॒ योनि॒रिन्द्रा॑यत्त्वावि॒श्वक॑र्म्मणे ॥ ४६/८ ॥ कुण्डमध्ये– ॐ भूर्भुवः स्वः विश्वकर्मणे नमः विश्वकर्माणम् आवा० स्थाप० ॥ भो

विश्वकर्मन् इहागच्छ इह तिष्ठ ॥ प्रार्थयेत्—ब्रह्म वक्रं भुजौ क्षत्रमूरू वैश्यः प्रकीर्तितः । पादौ यस्य तु शूद्रो हि विश्वकर्मात्मने नमः । अज्ञानाज्ज्ञानतो वापि दोषाः स्युः खननोद्भवाः ॥ नाशय त्वखिलाँस्ताँस्तु विश्वकर्मन्नमोऽस्तु ते ॥

तत्रादौ मेखलादेवतानाम् आवाहनम्— ॐ इ॒दंविष्णु॒र्वि॑च॑क्रमेत्रे॒धानिद॑धेप॒दम् ॥ समू॑ढमस्यपाꣳसु॒रेस्वाहा॑ ॥$\frac{५}{१५}$॥ विष्णो यज्ञपते देव दुष्टदैत्यनिषूदन ॥ विभो यज्ञस्य रक्षार्थं कुण्डे सन्निहितो भव ॥ उपरिमेखलायां श्वेतवर्णालङ्कृतायां ॐ भूर्भुवः स्वः विष्णवे नमः विष्णुम् आवा० स्थाप० ॥ भो विष्णो इहागच्छ इह तिष्ठ ॥१॥ ॐब्रह्म॑जज्ञा॒नम्प्र॑थ॒मम्पु॒रस्ता॒द्विसी॑म॒तः॒सु॒रुचो॑वे॒नऽआ॑वः ॥ सबु॒ध्न्याऽउप॒माऽअ॑स्यवि॒ष्ठाः॒स॒तश्च॒योनि॒मस॑तश्च॒विव॑ः ॥$\frac{३}{१३}$॥ हंसपृष्ठसमारूढ आदिदेव जगत्पते । रक्षार्थं मम यज्ञस्य मेखलायां स्थिरो भव ॥ मध्यमेखलायां रक्तवर्णालङ्कृतायां ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणम् आवा० स्थाप० ॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥ २ ॥ ॐ नम॑स्तेरुद्रम॒न्यव॑ऽउ॒तोत॒ऽइष॑वे॒नम॑ः ॥ बा॒हुभ्या॑मु॒तते॒नम॑ः ॥$\frac{१}{१६}$॥ गङ्गाधर महादेव वृषारूढ महेश्वर । आगच्छ मम यज्ञेऽस्मिन्रक्षार्थं रक्षसां गणात् ॥ अधो मेखलायां कृष्णवर्णालङ्कृतायां ॐ भूर्भुवः स्वः रुद्राय नमः रुद्रम् आवा० स्थाप० ॥ भो रुद्र इहागच्छ इह तिष्ठ ॥ ३ ॥

अथ योन्यावाहनम्— ॐ क्ष॒त्रस्य॒योनि॑रसिक्ष॒त्रस्य॒नाभि॑रसि ॥ मात्त्वा॑हिꣳसी॒न्मामा॑हिꣳसीः ॥१/२०॥ आगच्छ देवि कल्याणि जगदुत्पत्तिहेतुके ॥ मनोभवयुते रम्ये योनि त्वं सुस्थिरा भव ॥ १ ॥ जगदुत्पत्तिकार्यै मनोभवयुतायै योन्यै नमः योनिमावा० स्थाप० ॥ भो जगदुत्पत्तिके मनोभवयुते योनि इहागच्छ इह तिष्ठ ॥ प्रार्थयेत्—सेवन्ते महतीं योनिं देवर्षिसिद्धमानवाः ॥ चतुरशीतिलक्षाणि पन्नगाद्याः सरीसृपाः ॥ पशवः पक्षिणः सर्वे संसरन्ति यतो भुवि ॥ योनिरित्येव विख्याता जगदुत्पत्तिहेतुका ॥ मनोभवयुता देवी रतिसौख्यप्रदायिनी ॥ मोहयित्री सुराणाञ्च जगद्धात्रि नमोऽस्तु ते । योने त्वं विश्वरूपाऽसि प्रकृतिर्विश्वधारिणी ॥ कामस्था कामरूपा च विश्वयोन्य नमो नमः ॥

अथ कण्ठदेवतावाहनम्— ॐ नील॑ग्ग्रीवाःशिति॒कण्ठा॒दिवꣳरु॒द्राऽउप॑श्रिताः ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥५६/१६॥ नील॑ग्ग्रीवाःशिति॒कण्ठा॑ःश॒र्वाऽअ॒धःक्क्षमाच॒राः ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥ ५७/१६ ॥ कुण्डस्य कण्ठदेशोऽयं नीलजीमूतसन्निभः ॥ अस्मिन्नावाहये रुद्रं शितिकण्ठं कपालिनम् ॥ ॐ भूर्भुवः स्वः कण्ठे रुद्राय नमः रुद्रम् आवा० स्थाप० । भो रुद्र इहागच्छ इह तिष्ठ ॥ प्रार्थयेत्— कण्ठ मङ्गलरूपेण सर्वकुण्डे प्रतिष्ठितः । परितो मेखलास्त्वत्तो रचिता विश्वकर्मणा ॥

अथ नाभ्यावाहनम्—ॐनाभिर्म्मेचित्तंविज्ञानंम्पायुर्म्मेपचितिर्भसत् । आनन्दनन्दावाण्डौमेभगꣳसौभाग्ग्यम्पसः । जङ्घाभ्याम्पद्भ्यांधर्म्मोस्म्मिविशिराजाप्प्रतिष्ठितꣳ ॥ २० ॥ पद्माकाराऽथवा कुण्डसदृशाकृतिबिभ्रती । आधारः सर्वकुण्डानां नाभिमावाहयाम्यहम् ॥ ॐ भूर्भुवः स्वः नाभ्यै नमः नाभिम् आवा० स्थाप० ॥ भो नाभे इहागच्छ इह तिष्ठ ॥ प्रार्थयेत्— नाभे त्वं कुण्डमध्ये तु सर्वदेवैः प्रतिष्ठिता । अतस्त्वां पूजयामीह शुभदा सिद्धिदा भव ॥

अथ कुण्डमध्ये नैर्ऋत्यकोणे वास्तुपुरुषावाहनम्— ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोऽअनमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदे शं चतुष्पदे ॥ पा० गृ० ॥ आवाहयामि देवेशं वास्तुदेवं महाबलम् । देवदेवं गणाध्यक्षं पातालतलवासिनम् ॥ ॐ भूर्भुवः स्वः नैर्ऋत्यकोणे वास्तुपुरुषाय नमः वास्तुपुरुषम् आ० स्था० ॥ भो वास्तुपुरुष इहागच्छ इह तिष्ठ ॥ ततः प्रार्थयेत्— यस्य देहे स्थिता क्षोणी ब्रह्माण्डं विश्वमङ्गलम् । व्यापिनं भीमरूपञ्च सुरूपं विश्वरूपिणम् ॥ पितामहसुतं मुख्यं वन्दे वास्तोष्पतिं प्रभुम् ॥ वास्तुपुरुष देवेश सर्वविघ्नहरो भव । शान्तिं कुरु सुखं देहि सर्वान्कामान्प्रयच्छ मे ॥

एवं कुण्डस्थितान् सर्वान्देवानावाह्यैकतन्त्रेण प्रतिष्ठां कुर्यात् ॥ हस्तेऽक्षतानादाय ॥ ॐ मनोजूतिर्जु०—ॐभूर्भुवः

स्वः विश्वकर्मादिवास्तुपुरुषान्ताः सर्वे कुण्डस्थदेवाः सुप्रतिष्ठिता वरदा भवेयुः ॥ ॐ भूर्भुवः स्वः विश्वकर्मादिवास्तुपुरुषान्तेभ्यः कुण्डस्थदेवेभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥ इति सम्पूज्य । कुण्डाद्बहिः एकस्मिन्पात्रे बलिदानार्थं दध्योदनं संस्थाप्य बलिदानं कुर्यात् ॥ हस्ते जलं गृहीत्वा ॥ ॐ भूर्भुवः स्वः विश्वकर्मादिवास्तुपुरुषान्तेभ्यः कुण्डस्थदेवेभ्यो नमः असुं दध्योदनबलिं सम० ॥ अनेन विश्वकर्मादिवास्तुपुरुषान्तानां कुण्डस्थदेवानां पूजनेन बलिदानेन च विश्वकर्मादिवास्तुपुरुषान्ताः सर्वे कुण्डस्थदेवाः प्रीयन्तां न मम ॥

इति कुण्डस्थदेवतावाहनपूजनम् ॥

अथ कुण्डेऽग्निस्थापनम् ॥

आचार्यः कश्चिद्विप्रो वा दक्षिणहस्ते दर्भपुञ्जं गृहीत्वोत्थाय [1]पश्चिमतः प्रागन्तं दक्षिणत आरभ्योदक्संस्थं त्रिवारं [2]परिसमूहनं कुर्यात् ॥

---

[1] परिसमूहनादिविषये शारदातिलकस्य पञ्चमपटले टीकातः प्रागग्राणां दक्षिणारम्भमुदक्संस्थम् । उदगग्राणां पश्चिमारंभं प्राक्संस्थं वा परिसमूहनादिकमप्यवगम्यते । ताश्च सर्वाः (क्रियाः) प्रादेशमिता (कार्याः) इत्यपि सम्प्रदायः ॥ तदुक्तं सौत्रामणितन्त्रे – प्राचीपूर्वमुदक्संस्थं दक्षिणारंभमालिखेत् । उदगग्रं पूर्वसंस्थं पश्चिमारंभमालिखेत् ॥ अतोऽवबुध्यते परिसमूहनादिक्रियायामपि पक्षद्वयं दक्षिणारंभमुदकसंस्थं प्रागन्तं कार्यम् । अथवा पश्चिमारंभं पूर्वसंस्थमुदगन्तं कार्यम् ॥

[2] कुशकण्डिकाभाष्ये–धृत्वाऽङ्गुष्ठकनिष्ठाभ्यां मूलैः साग्रैः कुशत्रयम् ॥ तदग्रैस्तस्य रजसः पूर्वस्यामपसारणम् ॥ १ ॥ कृमिकीटपतङ्गाद्या विचरन्ति महीतले ॥ तेषां संरक्षणार्थाय परिसमूहनमुच्यते ॥ २ ॥

दर्भैः परिसमूह्य परिसमूह्य परिसमूह्य ॥ [एवं परिसमूहनं विधाय कुण्डाद्बहिः पूर्वस्यामीशान्यां वा दर्भत्यागं कुर्यात् ॥] दक्षिणहस्तेन गोमयमादाय पूर्ववत् पश्चिमतः प्रागन्तं दक्षिणत आरभ्योदक्संस्थं गोमयेनो[1]पलिंपेत् ॥

गोमयेन उपलिप्य उपलिप्य उपलिप्य ।

[एवं त्रिवारम् उपलेपनं कृत्वा हस्तं प्रक्षाल्य दक्षिणहस्तेन स्रुवमादाय पूर्ववत् पश्चिमतः प्रागन्तं दक्षिणत आरभ्योदक्संस्थं स्रुवमूलेन त्रिरुल्ले[2]खनं कुर्यात् ॥]

स्रुवमूलेन उल्लिख्य उल्लिख्य उल्लिख्य । [एवमुल्लेखनं कृत्वाऽनामिकाङ्गुष्ठेन पूर्ववत् कुण्डाद्बहिः पांसूनामुद्धरणम्] ॥

अनामिकाङ्गुष्ठेन उद्धृत्य उद्धृत्य उद्धृत्य । [एवं त्रिवारं पांसूनामुद्धरणं कृत्वा तान् प्राच्यां क्षिप्त्वा पूर्ववत् न्युब्जपाणिना जलेन त्रिवारम् अभ्युक्षणं कुर्यात् ॥]

उदकेन अभ्युक्ष्य अभ्युक्ष्य अभ्युक्ष्य ।

अथाग्निस्थापनम्– [3]बहुपशोर्वैश्यस्य गृहात् श्रोत्रियागारात् सूर्यकान्तसम्भूतात् स्वकीयगृहादरणीसम्भवाद्वा

---

[1] कुशकण्डिकायाम्–पुरा शक्रेण वज्रेण हतो वृत्रो महासुराः ॥ व्यापिता मेदसा पृथ्वी तदर्थमुपलेपनम् ॥ [2] हरिहरस्तु–"प्रागग्रा उदक्संस्थाः स्थण्डिलपरिमाणास्तिस्रो रेखाः कर्तव्या" इति वक्ति ॥ कल्पवल्यामपि– रेखात्रयमुदक्संस्थं प्रागग्रं स्थण्डिलावधि ॥ अथवा तत्प्रकुर्वीत द्वादशाङ्गुलमायतम् ॥ वस्तुतस्तु इदमुल्लेखनं यावत्प्रमाणं स्थण्डिलस्य तावत्प्रमाणं स्रुवमूलेन यज्ञपात्रविशेषेण स्फ्यनामकेन खड्गाकृतिना खादिरेण वा कर्तव्यम् ॥ [3] "बहुपशोर्गृहादग्निमाहृत्य" इति गृह्यसूत्रे

सुवासिन्या स्त्रिया आनीतम् [1]अन्यताम्रादिपात्रेणाच्छादितं निर्धूमम् अग्निं कुण्डस्य आग्नेय्यां दिशि निधाय आच्छादितं पात्रम् उद्घाट्य "हुं फट्" इति क्रव्यादांशम् अग्निं नैर्ऋत्यां दिशि परित्यज्य अग्निं कुण्डस्य उपरि त्रिवारं भ्रामयित्वा । ॐ अ॒ग्निन्दू॒तम्पु॒रोद॑धेह॒व्य॒वाह॒मुप॑ब्रुवे । दे॒वाँ२ऽआसा॑दयादि॒ह ॥$\frac{१७}{२२}$॥ इति मन्त्रं पठन् कुण्डे स्वात्माभिमुखं अग्निं स्थापयेत् ॥ ततोऽग्न्यानीतपात्रे साक्षतोदकं निषिच्य [तत्र शिष्टाचारात्किञ्चिद्यथाशक्ति हिरण्यं रौप्यद्रव्यं वा निक्षिप्य तत् द्रव्यं यजमानपत्न्यै दद्यात् ।]

ततोऽग्नौ आवाहनादिमुद्राः प्रदर्शयेत् ॥ भो अग्ने त्वम् आवाहितो भव । भो अग्ने त्वं [3]संस्थापितो भव । भो अग्ने त्वं [4]सन्निहितो भव । भो अग्ने त्वं [5]सन्निरुद्धो भव । भो अग्ने त्वं [6]सकलीकृतो [2]भव ॥ भो अग्ने त्वम् [7]अवगुण्ठितो

तथाच शारदातिलके-सूर्यकान्तादिसम्भूतं यद्वा श्रोत्रियगेहजम् । आनीय चाग्निं पात्रेण क्रव्यादांशं परित्यजेत् ॥ वसिष्ठसंहितायामपि-श्रोत्रियागारजं वाऽपि सूर्यकान्तोद्भवं तु वा । अरणीसम्भवं वाऽपि क्षिप्तं स्वर्णादिभाजने ॥ "मध्यमः स्वगृहादितः" इति सङ्ग्रहवाक्यात् गृहादप्यग्निप्रणयनं भवति ॥ १ अत्रिस्तु-पात्रान्तरेण पिहिते ताम्रपात्रादिके शुभे । अग्निप्रणयनं कुर्याच्छरावे तादृशेऽपि च ॥ २ विततान ऊर्ध्वाधो व्यापारितोऽञ्जलिः आवाहनीमुद्रा । ३ तथाविधो न्युब्जाञ्जलिः संस्थापिनीमुद्रा । ४ उदङ्गुष्ठयोः अभिसंयोगे सन्निधापिनी । ५ सैव कनिष्ठिकामूलम् अन्तःप्रविष्टाङ्गुष्ठमिथःस्पृष्टनखा सन्निरोधिनी । ६ पूर्णरूपत्वेनावस्थितिः सकलीकरणमुद्रा । ७ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी । अवगुण्ठनमुद्रेयमभितो भ्रामिता सती । इयं मुद्रा हस्तद्वयेनैव विधेया इति सांप्रदायिका आहुः ।

भव । भो अग्ने त्वम् [1]अमृतीकृतो भव । भो अग्ने त्वं [2]परमीकृतो भव ॥ इति तत्तन्मुद्राः प्रदर्श्य । अग्निं ध्यायेत्— ॐ च॒त्त्वारि॒शृङ्गा॒त्रयो॑ऽअस्य॒पादा॒द्वेशी॒र्षेस॒प्तहस्ता॑सोऽअ॒स्य । त्रिधा॑ब॒द्धोवृ॑ष॒भोरो॑रवीतिम॒होदे॒वोमर्त्त्याँ॒२ऽआवि॑वेश ॥१७॥ रुद्रतेजःसमुद्भूतं द्विमूर्धानं द्विनासिकम् ॥ षण्णेत्रं च चतुःश्रोत्रं त्रिपादं सप्तहस्तकम् । याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकम् ॥ स्रुवं स्रुचञ्च शक्तिञ्च ह्यक्षमालाञ्च दक्षिणे । तोमरं व्यजनं चैव घृतपात्रञ्च वामके । बिभ्रतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकम् ॥ याम्यायने चतुर्जिह्वं त्रिजिह्वं चोत्तरे मुखम् । द्वादशकोटिमूर्त्याख्यं द्विपञ्चाशत्कलायुतम् । आत्माभिमुखमासीनं ध्यायेच्चैवं हुताशनम् ॥ गोत्रमग्नेस्तु शाण्डिल्यं शाण्डिल्यासितदेवलाः । त्रयोऽमी प्रवरा माता त्वरणी वरुणः पिता ॥ रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम् । स्वाहास्वधावषट्कारैरङ्कितं मेषवाहनम् ॥ शतमङ्गलनामानं वह्निमावाहयाम्यहम् ॥ त्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते । आगच्छ भगवन्नग्ने कुण्डेऽस्मिन्सन्निधो भव ॥ भो वैश्वानर शाण्डिल्यगोत्र शाण्डिल्यासितदेवलेतित्रिप्रवरान्वित भूमिमातः वरुणपितः मेषध्वज प्राङ्मुख मम सम्मुखो भव ॥ इति ध्यात्वा वाहयेत् । ॐ मनोजूतिर्जु० ॥ ५ ॥ ॐ शतमङ्गलनामाग्ने

---

१ धेनुमुद्रयाऽमृतीकरणम् । २ करसम्पुटेन नमस्कारः परमीकरणम् ॥

सुप्रतिष्ठितो वरदो भव ॥ इति प्रतिष्ठाप्य पूजनं कुर्यात् । ॐ भूर्भुवः स्वः शतमङ्गलनाम्ने वैश्वानराय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० । इति कुण्डस्य नैर्ऋत्यकोणे मध्ये वा अग्निं सम्पूज्य प्रार्थयेत्— अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् । हिरण्यवर्णममलं समिद्धं विश्वतोमुखम् ॥

इति कुण्डस्थदेवतावाहनपूर्वकाग्निप्रतिष्ठापूजनप्रयोगः समाप्तः ॥

[१]अथ ब्रह्मवरणादिकुशकण्डिकाप्रयोगः ॥

[२]अग्नेर्दक्षिणतो ब्रह्मासनमास्तीर्य वायव्यकोणे प्राङ्मुखं ब्रह्माणम् उपवेश्य उदङ्मुखेन यजमानेन अस्मिन्कर्मणि त्वं ब्रह्मा भवेत्युक्ते भवामीति ब्रह्मा वदेत् ॥ ततो ब्रह्मा पूर्वेण दक्षिणदिशि स्वासने गत्वा तत्र स्वासनात्किञ्चित्तृणं नैर्ऋत्यां दिशि निरस्य ब्रह्मा उपविशेत् ॥

ततः प्रणीताप्रणयनार्थम् अग्नेः उत्तरदिशि कौशं पूर्वापरम् आसनद्वयं निदध्यात् ॥ ततो ब्रह्मणानुज्ञातः उत्तरे प्रणीताप्रणयनं कुर्यात् ॥ "ब्रह्मन् अपः प्रणेष्यामि" ॥ "ॐ प्रणय" इति ब्रह्मानुज्ञातः प्रणीतापात्रं वामहस्तेन धृत्वा तस्मिन् दक्षिणहस्तेन जलं प्रपूर्य तत्पात्रं वायव्यकोणे प्रथमासने निधाय दक्षिणकरस्य अनामिकया

---

[१] अत्र वैकल्पिकपदार्थावधारणं देवताभिध्यानञ्चादौ सर्वत्र याज्ञिकाः कुर्वन्ति । किन्तु तत्करणेऽकरणे च विदुषां मतभेदोऽपि दृश्यते यथा—नान्वाधानं गृह्यभाष्ये याजुषां वै प्रकीर्तितम् । श्रौते कर्मणि सर्वत्र देवतान्वाहितिर्भवेत् ॥ अकरणे प्रत्यवायोक्तिरपि ॥ किन्तु बहुधा श्रौते कर्मण्यैवोभयोर्विधिश्रवणान्नात्रावश्यकत्वमुभयोरित्यपि विद्वन्मतम् ॥ अग्निस्थापनानन्तरं देवानां स्थापनम् उक्तम् । तच्च मुख्यदेवतास्थापनमुत ग्रहाणां स्थापनमित्यत्रापाततो विवादः । ग्रहाग्न्योः प्रायः साहचर्य्यं सर्वत्रोपलभ्यमानत्वात् ग्रहस्थापनं दीयते ॥

[२] विस्पष्टप्रतिपत्त्यर्थं बहुषु स्थलेषु सन्धेरभावः कृतः ॥

आलभ्य अग्नेरुत्तरभागे स्थापिते द्वितीयासने निदध्यात् ॥ ततः स्थंडिलस्य प्राक् उदगग्रं, दक्षिणदिशि प्रागग्रम्, पश्चिमदिशि उदगग्रम्, उत्तरदिशि प्रागग्रम् एवं प्रतिदिशं त्रयाणां त्रयाणां कुशानां परिस्तरणं कृत्वा पात्रासादनं कुर्यात् ॥

पात्रासादन्–अग्नेरुत्तरतः प्राक्संस्थम् उदक्संस्थं वा अग्नेः पश्चिमतः प्राक्संस्थम् उदक्संस्थं वा एवं पात्रासादनं कुर्यात् ॥ पवित्रच्छेदनार्थं त्रयो दर्भाः । साग्रे अनन्तगर्भे पवित्रे द्वे । प्रोक्षणीपात्रम् । आज्यस्थाली । चरुस्थाली । सम्मार्गकुशाः पञ्च । उपयमनकुशाः सप्त । ससिधस्तिस्रः । स्रुवः स्रुक् । आज्यम् । त्रिप्रक्षालितास्तंडुलाः । पूर्णपात्रं दक्षिणावरो वा ॥ अन्यान्युपकल्पनीयानि अर्कादिससित्तिलादिहवनीयद्रव्याणि निधाय पवित्रे कुर्यात् ॥ तद्यथा–वामकरस्थितयोः प्रागग्रयोर्द्वयोः पवित्रयोः उपरि दक्षिणकरेण उदगग्राणि त्रीणि पवित्राणि निधाय उपरि प्रादेशमात्रम् अवशेषयित्वा दक्षिणकरेण द्वयोः पवित्रयोः मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य वामकरेण सर्वाणि पवित्राणि युगपद्धृत्वा दक्षिणकराङ्गुष्ठाङ्गुलिपर्वभ्यां उपरि प्रादेशमात्रं छित्त्वा त्रीण्युत्तरतः क्षिपेत् ॥ द्वे ग्राह्ये ॥ ततः प्रणीतोत्तरतः प्रोक्षणीपात्रं निधाय तस्यां सपवित्रेण दक्षिणहस्तेन प्रणीतोदकं चतुर्वारं गृहीत्वा । पवित्रे प्रोक्षण्यां निधाय तत्पात्रं दक्षिणहस्तेन आदाय सव्ये पाणौ धृत्वा दक्षिणहस्तमुत्तानं कृत्वा सपवित्राभ्यां दक्षिणकरस्य मध्यमानासिकाङ्गुल्योर्मध्यपर्वभ्यां प्रोक्षणीस्थानाम् अपां प्रादेशमात्रम् ऊर्ध्वम् उद्दिंगनं तथैव उत्पवनम् ॥ ताभिः प्रणीतास्थिताभिरद्भिः तासां प्रोक्षणीस्थानाम् अपां प्रोक्षणम् । आज्यस्थाल्याः प्रोक्षणम् । चरुस्थाल्याः प्रोक्षणम् । सम्मार्गकुशानां प्रोक्षणम् । उपयमनकुशानां प्रोक्षणम् । ससिधां प्रोक्षणम् । स्रुवस्य प्रोक्षणम् । स्रुचः प्रोक्षणम् । अन्येषाम् आसादितहवनीयद्रव्याणां प्रोक्षणम् । असंचरे प्रणीताग्न्योर्मध्ये प्रोक्षणीपात्रम् आसने निधाय ॥ [1]आज्यस्थाल्याम् आज्यनिर्वापः । चरुस्थाल्यां त्रिप्रक्षालिततंडुलानां प्रक्षेपः । तत्र प्रणीतोदकमासिच्य । दक्षिणे ब्रह्मणा आज्याधिश्रयणम्

---

[1] कुशोपग्रहः सन् ।

आचार्येण आज्यस्योत्तरे चरोरधिश्रयणं युगपत् ॥ ततो[1] गृहीतोल्मुकेनोभयोः आज्यचर्वोः पर्यग्निकरणम् । हस्तस्य इतरथावृत्तिः ॥ अर्धशृते चरौ स्रुवस्य प्रतपनम् । दक्षिणहस्तेन स्रुवमादाय अधोमुखं कृत्वा प्राञ्चं तापयित्वा स्रुवं सव्ये पाणौ धृत्वा दक्षिणहस्तस्थितैः सम्मार्गाग्रैः स्रुवस्य मूलादारभ्य उपरितः स्रुवस्याग्रपर्यन्तं सम्मृज्य ॥ सम्मार्गमूलैः स्रुवस्याग्राधस्तात् स्रुवस्य मूलपर्यंतं सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य । स्रुवं दक्षिणहस्ते गृहीत्वा पुनः प्रतप्य दक्षिणदिशि निदध्यात् । सम्मार्गकुशानाम् अग्नौ उत्तरदिशि वा त्यागः ॥

[2]आज्योद्वासनम्– दक्षिणहस्तेन अग्नेः सकाशात् आज्यं गृहीत्वा चरोः पूर्वेण नीत्वा अग्नेरुत्तरतः प्रोक्षण्याः समीपे क्षणं निधाय अग्नेः पश्चिमदिशि स्थापयेत् ॥ ततश्चरुमुत्थाप्य अग्नेरुत्तरतः प्रोक्षण्याः समीपे क्षणं निधाय आज्यं प्रदक्षिणीकृत्य आज्यस्योत्तरतः स्थापयेत् ॥ ततः वामहस्तधृताग्राभ्यां दक्षिणहस्तधृतमूलाभ्यां पवित्राभ्याम् आज्योत्पवनम् । आज्यावेक्षणम् । अपद्रव्यनिरसनम् । आज्यलिप्ताभ्यां पवित्राभ्यां प्रोक्षण्याः प्रत्युत्पवनम् । पवित्रे प्रोक्षण्यां निधाय ॥ दक्षिणहस्तेन उपयमनकुशानादाय सव्ये पाणौ धृत्वा दक्षिणहस्तेन घृताक्ताः तिस्रः समिधो गृहीत्वा तिष्ठन् "समिधोऽभ्याधाय" इति अग्नौ क्षिपेत् ॥ ततो दक्षिणहस्तेन सपवित्रं प्रोक्षण्युदकं गृहीत्वा ईशानकोणादारभ्य ईशानकोणपर्यन्तम् अग्निं प्रदक्षिणं पर्युक्ष्य पवित्रे प्रणीतायां निधाय हस्तस्य इतरथावृत्तिः ॥

अथ आघारावाज्यभागहोमः ॥

ततो दक्षिणं जान्वाच्य सव्यहस्तेन उपयमनकुशानादाय तद्धस्तं हृदये धृत्वा कुशैः [3]ब्रह्मणान्वारब्धो जुहुयात् ॥

---

[1] त्रिवारं पर्यग्निकरणम् । [2] दक्षिणहस्तेन अग्नेः सकाशादाज्यं गृहीत्वा चरोः पूर्वेण नीत्वा अग्नेरुत्तरतः प्रोक्षण्याः समीपे निदध्यात् । ततः चरुमुत्थाप्य आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः स्थापयेत् । पश्चात् आज्यं गृहीत्वा अग्नेः पश्चिमदिशि आनीय स्थापयेत् । ततः चरुं गृहीत्वा आज्यं प्रदक्षिणीकृत्य आज्यस्योत्तरतः स्थापयेत् । एवमपि आज्यचर्वोरुत्थापनं कथितम् ॥ [3] ब्रह्मणाऽन्वारब्धो जुहुयात् ।

[1]अग्नेरुत्तरप्रदेशे प्राञ्चं सन्ततधारया मनसा। ॐप्रजापतये (स्वाहा)। इदं प्रजापतये न मम ॥ प्रोक्षणीपात्रे संस्रवप्रक्षेपः ॥ इति पूर्वाघारः ॥ [2]पुनः प्राञ्चं सन्ततधारया अग्नेर्दक्षिणप्रदेशे– ॐ इन्द्राय स्वाहा । इदं इन्द्राय न मम ॥ इत्युत्तराघारः ॥ [3]अग्नेः उत्तरपूर्वार्द्धे–ॐ अग्नये स्वाहा । इदमग्नये न मम ॥ अग्नेर्दक्षिणपूर्वार्द्धे–ॐ सोमाय स्वाहा । इदं सोमाय न मम ॥

यजमानस्य द्रव्यत्यागसङ्कल्पः ॥

मया सम्पादितानि यथालाभोपपन्नानि समिच्चरुतिलाज्यहवनीयद्रव्याणि या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तानि न मम ॥ यथादैवतमस्तु ॥

अग्निपूजनम्–ॐ अग्ग्नेनयसु०॥$\frac{३६}{५}$॥ अमुकनामाग्नये नमः गन्धं, पुष्पं, धूपं, दीपं, नैवेद्यं, मुखवासनार्थे पूगीफलं, ताम्बूलं, दक्षिणाञ्च सम० ॥ इति सम्पूज्य ॥

अथ वराहुतिः–ॐ गणानान्त्वा० गर्ब्भधम् स्वाहा ॥$\frac{१९}{२३}$॥

इति ब्रह्मवरणादिकुशकण्डिकाप्रयोगः समाप्तः ॥

विदिशावेके–नैर्ऋत्यकोणादारभ्य ईशानकोणपर्यन्तम् आज्यस्य सन्ततधारया–ॐ प्रजापतये (स्वाहा) इदं प्रजापतये न मम । इति पूर्वाघारः । वायव्यकोणादारभ्य अग्निकोणपर्यन्तं आज्यस्य सन्ततधारया–ॐइन्द्राय स्वाहा इदं इन्द्राय न मम ॥ इत्युत्तराघारः ॥

[1] पश्चिमाभिमुखस्थितस्य अग्नेः वामहस्तसमीपे इत्यर्थः ॥

[2] पश्चिमाभिमुखस्थितस्य अग्नेर्दक्षिणहस्तसमीपे इत्यर्थः ॥ अत्र "मम संमुखो भव" इति लिङ्गम् ॥

[3] समिद्धत्तमे आज्यभागौ– ॐ अग्नये स्वाहा । ॐ सोमाय स्वाहा । इति द्वे आहुती कुण्डस्य मध्ये दद्यात् इत्यर्थः ॥

अथ नवग्रहादिस्थापनपूजनप्रयोगः ॥

ईशान्यां चतुस्त्रिंशदङ्गुलोच्चसमचतुरस्रस्य ग्रहपीठस्य समीपे सपत्नीको यजमानः पश्चिमाभिमुख उपविश्य आचमनं प्राणायामञ्च कुर्यात् । ततो हस्ते जलं गृहीत्वा । मया प्रारब्धस्य असुककर्मणः साङ्गतासिद्ध्यर्थम् अस्मिन् नवग्रहपीठे अधिदेवताप्रत्यधिदेवतापञ्चलोकपालवास्तुक्षेत्रपालदशदिक्पालदेवतासहितानाम् आदित्यादिनवग्रहाणाम् तत्तन्मण्डले स्थापनप्रतिष्ठापूजनानि करिष्ये ॥ इति सङ्कल्प्य । वामहस्ते अक्षतान् गृहीत्वा दक्षहस्तेन तत्तत्स्थाने आदित्यादिदेवतानाम् आवाहनं कुर्यात् ।

तद्यथा— ॐ आकृ॒ष्णेन॒रज॑सा॒वर्त्त॑मानोनिवे॒शय॑न्न॒मृत॒म्मर्त्त्यँ॑श्च । हि॒र॒ण्ययेँनसवि॒तारथे॒नादे॒वोया॑ति॒भुव॑नानि॒पश्य॑न् ॥ ४३/३३ ॥ मध्ये वर्तुले द्वादशाङ्गुले मण्डले प्राङ्मुखं **सूर्यम्**—ॐ भूर्भुवः स्वः सूर्याय नमः सूर्यमावाह० स्थाप० ॥ कलिङ्गदेशोद्भव काश्यपसगोत्र रक्तवर्ण भो सूर्य इहागच्छ इह तिष्ठ ॥ १ ॥ ॐ इ॒मन्दे॑वाऽअसप॒त्नꣳसुव॑द्ध्वम्महु॒तेक्ष॒त्राय॑महु॒तेज्यैष्ठ्या॑यमहु॒तेजान॑राज्या॒येन्द्र॑स्येन्द्रि॒याय॑ । इ॒मम॒मुष्य॑पु॒त्रम॒मुष्यैँ॑पु॒त्रम॒स्यैवि॒शऽए॒षवोऽमी॒राजा॒सोमो॒ऽस्माक॑म्ब्राह्म॒णाना॒ꣳराजा॑ ॥ ४०/९ ॥ आग्नेय्यां दिशि चतुरस्रे चतुर्विंशत्यङ्गुले मण्डले प्रत्यङ्मुखं **चन्द्रम्**—ॐ भूर्भुवः स्वः सोमाय नमः सोममावाह० स्थाप० ॥ यमुना-

तीरोद्भव आत्रेयसगोत्र शुक्लवर्ण भो सोम इहागच्छ इह तिष्ठ ॥ २ ॥ ॐ अ॒ग्निर्म्मू॒र्द्धादि॒वःक॒कुत्पतिः॑पृथि॒व्याऽअ॒यम् ॥ अ॒पाꣳरेता॑ꣳसिजिन्वति ॥ $\frac{१२}{३}$ ॥ दक्षिणस्यां दिशि त्रिकोणे त्र्यङ्गुले मण्डले दक्षिणाभिमुखं भौमम्—ॐ भूर्भुवः स्वः भौमाय नमः भौममावा० स्थाप० ॥ अवन्तिदेशोद्भव भारद्वाजसगोत्र रक्तवर्ण भो भौम इहागच्छ इह तिष्ठ ॥३॥ ॐ उद्बु॑ध्यस्वाग्ने॒प्रति॑जागृहि॒त्त्वमि॑ष्टापू॒र्त्तेसꣳसृ॑जेथाम॒यञ्च॑ ॥ अ॒स्मिन्त्स॒धस्थे॒ऽअद्ध्युत्त॑रस्मि॒न्विश्वे॑देवा॒यज॑मानश्चसीदत ॥ $\frac{६१}{१८}$ ॥ ईशान्यां दिशि बाणाकारे चतुरङ्गुले मण्डले उदङ्मुखं बुधम्— ॐ भूर्भुवः स्वः बुधाय नमः बुधमावाह० स्थाप० ॥ मगधदेशोद्भव आत्रेयसगोत्र पीतवर्ण भो बुध इहागच्छ इह तिष्ठ ॥४॥ ॐ बृह॑स्पते॒ऽअति॒यद॒र्य्योऽअर्हा॑द्द्यु॒मद्वि॒भाति॒क्क्रतु॑म॒ज्जने॑षु ॥ यद्दी॒दय॒च्छव॑सऽऋतप्प्रजात॒तद॒स्म्मासु॒द्द्रवि॑णन्धेहि चि॒त्रम् ॥ $\frac{३}{२६}$ ॥ उत्तरस्यां दिशि दीर्घचतुरस्रे पट्टाकारे षडङ्गुले मण्डले उदङ्मुखं बृहस्पतिम्—ॐ भूर्भुवः स्वः बृहस्पतये नमः बृहस्पतिमावा० स्थाप० ॥ सिन्धुदेशोद्भव आङ्गिरसगोत्र पीतवर्ण भो बृहस्पते इहागच्छ इह तिष्ठ ॥ ५ ॥ ॐ अन्ना॑त्परि॒स्रुतो॒रस॒म्ब्रह्म॑णा॒व्व्य॑पिबत्क्ष॒त्त्रम्पय॒ꣳसोम॑म्प्र॒जाप॑तिः ॥ ऋ॒तेन॑स॒त्त्यमि॑न्द्रि॒यंवि॒पान॑ꣳशु॒क्क्रमन्ध॑स॒ऽइन्द्र॑स्येन्द्रि॒यमि॒दम्पयो॒मृत॒म्मधु॑ ॥ $\frac{७५}{१९}$ ॥ पूर्वस्यां दिशि

पश्चकोणे नवाङ्गुले मण्डले प्राङ्मुखं शुक्रम्—ॐ भूर्भुवः स्वः शुक्राय नमः शुक्रमावा० स्था० ॥ भोजटकदेशोद्भव भार्गवसगोत्र शुक्लवर्ण भो शुक्र इहागच्छ इह तिष्ठ ॥६॥ ॐशन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शँय्योरभिस्रवन्तु नः ॥१२/३६॥ पश्चिमायां दिशि धनुषाकारे द्व्यङ्गुले मण्डले प्रत्यङ्मुखं शनिम्— ॐ भूर्भुवः स्वः शनैश्चराय नमः शनैश्चरमावाह० स्थाप० ॥ सौराष्ट्रदेशोद्भव काश्यपसगोत्र कृष्णवर्ण भो शनैश्चर इहागच्छ इह तिष्ठ ॥ ७ ॥ ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा ॥ कया शचिष्ठयावृता ॥ ४/३६ ॥ नैर्ऋत्यां दिशि शूर्पाकारे द्वादशाङ्गुले मण्डले दक्षिणाभिमुखं राहुम्— ॐ भूर्भुवः स्वः राहवे नमः राहुमावा० स्थाप० ॥ राठिनापुरोद्भव पैठिनसगोत्र नीलवर्ण भो राहो इहागच्छ इह तिष्ठ ॥ ८ ॥ ॐ केतुङ्कृण्वन्न केतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥ ३७/२९ ॥ वायव्यां दिशि ध्वजाकारे षडङ्गुले मण्डले दक्षिणाभिमुखं केतुम्—ॐभूर्भुवः स्वः केतवे नमः केतुमावाह० स्थाप० ॥ अन्तर्वेदिसमुद्भव जैमिनिसगोत्र धूम्रवर्ण भो केतो इहागच्छ इह तिष्ठ ॥९॥ इति आदित्यादिनवग्रहाणां स्थापनम् ॥

अथ अधिदेवतानां स्थापनम् ॥

ॐ त्र्यम्बकँयजामहेसुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्त्योर्म्मुक्षीयमामृतात् ॥६०/३॥ सूर्यदक्षिण-

पार्श्वे— ॐ भूर्भुवः स्वः ईश्वराय नमः ईश्वरमावाह० स्थाप० ॥ भो ईश्वर इहागच्छ इह तिष्ठ ॥ १० ॥ ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ॥ २२/३१ ॥ सोमदक्षिणपार्श्वे— ॐ भूर्भुवः स्वः उमायै नमः उमामावाह० स्थाप० ॥ भो उमे इहागच्छ इह तिष्ठ ॥ ११ ॥ ॐ यदक्क्रन्दᳲप्प्रथमञ्जायमानऽउद्यन्त्समुद्राद्दुतव्वापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यब्बाहूऽउपस्तुत्त्यम्महिजातन्तेऽअर्व्वन् ॥ १२/२१ ॥ भौमदक्षिणपार्श्वे— ॐ भूर्भुवः स्वः स्कन्दाय नमः स्कन्दमावा० स्थाप० ॥ भो स्कन्द इहागच्छ इह तिष्ठ ॥ ११ ॥ ॐ व्विष्णोर्रराटमसिव्विष्णोᳲश्नप्त्रेस्त्थोव्विष्णोᳲस्यूरसिव्विष्णोर्द्ध्रुवोसि ॥ व्वैष्णवमसिव्विष्णवेत्त्वा ॥ २१/५ ॥ बुधदक्षिणपार्श्वे— ॐ भूर्भुवः स्वः विष्णवे नमः विष्णुमावाह० स्थाप० ॥ भो विष्णो इहागच्छ इह तिष्ठ ॥ १३ ॥ ॐ आब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यःशूरऽइषव्व्योतिव्व्याधीमहारथोजायतान्दोग्ग्ध्री धेनुर्व्वोढानड्वानाशुःसप्तिᳲपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यव्वीरोजायतान्निकामेनिकामेनᳲपर्ज्जन्योव्वर्षतुफलवत्त्योनऽओषधयᳲपच्यन्ताँय्योगक्षेमोनःकल्पताम् ॥ ३३/२२ ॥ गुरुदक्षिणपार्श्वे— ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माण-

मावाह० स्थाप० ॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥ १४ ॥ ॐ सजोषाऽइन्द्रसगणोमरुद्भिःसोमम्पिबवृत्रहाशूरविद्वान् ॥ जहिशत्रूँ १ रपमृधोनुदस्वाथाभयङ्कृणुहिविश्वतोनः ॥ ३/७ ॥ **शुक्रदक्षिणपार्श्वे**– ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाह० स्था० ॥ भो इन्द्र इहागच्छ इह तिष्ठ ॥१५॥ ॐसमायुत्त्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्म्मायस्वाहा घर्म्मःपित्रे ॥ ९/३८ ॥ **शनिदक्षिणपार्श्वे**– ॐ भूर्भुवः स्वः यमाय नमः यममावाह० स्थाप० ॥ भो यम इहागच्छ इह तिष्ठ ॥ १६ ॥ ॐ कार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः ॥ २८/६ ॥ **राहुदक्षिणपार्श्वे**– ॐ भूर्भुवः स्वः कालाय नमः ॐ कालमावाह० स्थाप० ॥ भो काल इहागच्छ इह तिष्ठ ॥ १७ ॥ ॐ चित्रावसोस्वस्तितेपारमशीय ॥ १८/३ ॥ **केतुदक्षिणपार्श्वे**–ॐ भूर्भुवः स्वः चित्रगुप्ताय नमः चित्रगुप्तमावाह० स्थाप० ॥ भो चित्रगुप्त इहागच्छ इह तिष्ठ ॥१८॥ इत्यधिदेवतानां स्थापनम् ॥

अथ प्रत्यधिदेवतानां स्थापनम् ॥

ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ२आसादयादिह ॥ १७/२२ ॥ **सूर्यवामपार्श्वे**– ॐ भूर्भुवः स्वः अग्नये नमः अग्निमावाह० स्थाप० ॥ भो अग्ने इहागच्छ इह तिष्ठ ॥ १९ ॥ ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जे-

दधातन ॥ महेरणायचक्षसे ॥ १४/३६ ॥ **सोमवामपार्श्वे**— ॐ भूर्भुवः स्वः अद्भ्यो नमः अप आवा० स्थाप० ॥ भो आप इहागच्छत इह तिष्ठत ॥ २० ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानᳲशर्म्मसप्रथाᳲ ॥ १३/३६ ॥ **भौमवामपार्श्वे**— ॐ भूर्भुवः स्वः पृथिव्यै नमः पृथिवीमावाह० स्थाप० ॥ भो पृथिवि इहागच्छ इह तिष्ठ ॥ २१ ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ १५/५ ॥ **बुधवामपार्श्वे**—ॐभूर्भुवः स्वः ॐ विष्णवे नमः विष्णुमावाहयामि स्थापयामि ॥ भो विष्णो इहागच्छ इह तिष्ठ ॥ २२ ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः ॥ ५०/२० ॥ **गुरुवामपार्श्वे**— ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि ॥ भो इन्द्र इहागच्छ इह तिष्ठ ॥ २३ ॥ ॐ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः ॥ पूषासिघर्म्मायदीष्व ॥ ३/३८ ॥ **शुक्रवामपार्श्वे**— ॐ भूर्भुवः स्वः इन्द्राण्यै नमः इन्द्राणीमावाह० स्थाप० ॥ भो इन्द्राणि इहागच्छ इह तिष्ठ ॥ २४ ॥ ॐप्रजापतेनत्त्वदेतान्यन्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳस्यामपतयोरयीणाम् ॥ ६५/२३ ॥ **शनिवामपार्श्वे**— ॐ भूर्भुवः स्वः प्रजापतये नमः प्रजापतिमावाह० स्थाप० । भो प्रजापते

इहागच्छ इह तिष्ठ ॥ २५ ॥ ॐ नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यः सर्प्पेभ्योनमः ॥ $\frac{६}{१३}$ ॥ **राहुवामपार्श्वे**– ॐ भूर्भुवः स्वः सर्पेभ्यो नमः सर्पानावाह० स्थाप० । भो सर्पा इहागच्छत इह तिष्ठत ॥ २६ ॥ ॐ ब्रह्मजज्ज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः । सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ $\frac{३}{१३}$ ॥ **केतुवामपार्श्वे**–ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाह० स्थाप० । भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥ २७ ॥ इति प्रत्यधिदेवतास्थापनम् ॥

अथ पञ्चलोकपालदेवतानां स्थापनम् ॥

ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम ॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥ $\frac{१९}{२३}$ ॥ **राहोरुत्तरतः**– ॐ भूर्भुवः स्वः ॐ गणपतये नमः गणपतिमावाह० स्थाप० । भो गणपते इहागच्छ इह तिष्ठ ॥२८॥ ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ॥ $\frac{१८}{२२}$ ॥ **शनेरुत्तरतः**– ॐ भूर्भुवः स्वः दुर्गायै नमः दुर्गामावाह० स्थाप० ॥ भो दुर्गे इहागच्छ इह तिष्ठ ॥ २९ ॥ ॐ व्वायोयेतेसहस्त्रिणोरथासस्तेभिरागहि ॥ नियुत्त्वान्त्सोमपीतये ॥$\frac{३२}{२७}$॥ **रवेरुत्तरतः**– ॐ भूर्भुवः स्वः वायवे नमः वायुमावाह०

स्थाप० । भो वायो इहागच्छ इह तिष्ठ ॥ ३० ॥ ॐ घृतङ्घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ॥ दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ॥ १९/६ ॥ **राहोर्दक्षिणे**— ॐ भूर्भुवः स्वः आकाशाय नमः आकाशमावा० स्थाप० । भो आकाश इहागच्छ इह तिष्ठ ॥ ३१ ॥ ॐ याबाङ्कशा मधुमत्त्याश्विना सूनृतावती ॥ तया यज्ञम्मिमिक्षतम् ॥ ११/७ ॥ **केतुदक्षिणे**— ॐ भूर्भुवः स्वः अश्विभ्यां नमः अश्विनावावाह० स्थाप० । भो अश्विनौ इहागच्छतम् इह तिष्ठतम् ॥ ३२ ॥ इति पञ्चलोकपालदेवतास्थापनम् ॥

अथ वास्तोष्पतेः क्षेत्राधिपतेर्दशदिक्पालानाञ्च स्थापनम् ॥

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ॥ **उत्तरे**— ॐ भूर्भुवः स्वः वास्तोष्पतये नमः वास्तोष्पतिमावा० स्थाप० । भो वास्तोष्पते इहागच्छ इह तिष्ठ ॥ ३३ ॥ ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः ॥ एमेनमवृधन्नमृता अमर्त्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ॥ ६०/३३ ॥ **गुरोरुत्तरे**— ॐ भूर्भुवः स्वः क्षेत्राधिपतये नमः क्षेत्राधिपतिमावा० स्थाप० ॥ भो क्षेत्राधिपते इहागच्छ इह तिष्ठ ॥ ३४ ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ॥

ह्वयामि शक्क्रम्पुरुहूतमिन्द्रꣳस्वस्तिनो मघवाधात्त्विन्द्रः ॥ ५०/२० ॥ मण्डलाद्बहिः पूर्वस्याम्—ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाह० स्थाप० । भो इन्द्र इहागच्छ इह तिष्ठ ॥ ३५ ॥ ॐ त्वन्नोऽ अग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्वश्च वन्द्य ॥ त्राता तोकस्य तनये गवामस्यनिमेषꣳरक्षमाणस्तववव्व्रते ॥ १३/३४ ॥ मण्डलाद्बहिः आग्नेय्याम्— ॐ भूर्भुवः स्वः अग्नये नमः अग्निमावाह० स्थाप० । भो अग्ने इहागच्छ इह तिष्ठ ॥ ३६ ॥ ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥ ९/३८ ॥ मण्डलाद्बहिः दक्षिणस्याम्— ॐ भूर्भुवः स्वः यमाय नमः यममावाह० स्थाप० । भो यम इहागच्छ इह तिष्ठ ॥ ३७ ॥ ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्त्यामन्विहितस्क्करस्य ॥ अन्यमस्म्मदिच्छसातऽइत्त्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ६२/१२ ॥ ग्रहमण्डलाद्बहिः नैर्ऋत्याम्— ॐ भूर्भुवः स्वः निर्ऋतये नमः निर्ऋतिमावाह० स्थाप० ॥ भो निर्ऋते इहागच्छ इह तिष्ठ ॥ ३८ ॥ ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः ॥ अहेडमानो वरुणेह बोद्ध्युरुशꣳस मा नऽआयुः प्रमोषीः ॥ ४९/१९ ॥ ग्रहमण्डलाद्बहिः पश्चिमायाम्— ॐ भूर्भुवः स्वः वरुणाय नमः वरुणमावाहयामि स्थाप० ॥ भो वरुण इहागच्छ इह तिष्ठ ॥ ३९ ॥

ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहि
यज्ञम् ॥ वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्ति-
भिःसदानः ॥ $\frac{२}{२७}$ ॥ ग्रहमण्डलाद्बहिः वायव्याम्– ॐ
भूर्भुवः स्वः वायवे नमः वायुमावाह० स्थाप० । भो वायो
इहागच्छ इह तिष्ठ ॥ ४० ॥ ॐ वयꣳसोमव्रतेतवमन-
स्तनूषुबिभ्रतः ॥ प्रजावन्तःसचेमहि ॥ $\frac{५६}{३}$ ॥ ग्रह-
मण्डलाद्बहिः उत्तरस्याम्– ॐ भूर्भुवः स्वः सोमाय नमः
सोममावाह० स्थाप० ॥ भो सोम इहागच्छ इह तिष्ठ
॥ ४१ ॥ ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्व-
मवसेहूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षिता-
पायुरदब्धःस्वस्तये ॥ $\frac{२}{२६}$ ॥ ग्रहमण्डलाद्बहिः ईशान्याम्–
ॐ भूर्भुवः स्वः ईशानाय नमः ईशानमावाह० स्थाप० ॥ भो
ईशान इहागच्छ इह तिष्ठ ॥४२॥ ॐअस्मेरुद्रामेहनापर्वता-
सोवृत्रहत्त्येभरहूतौसजोषाः॥यःशꣳसतेस्तुवतेधायिपज्ज्रऽ
इन्द्रज्ज्येष्ठाऽअस्माँ२ऽअवन्तुदेवाः ॥ $\frac{५०}{३३}$ ॥ ग्रहमण्डला-
द्बहिः ईशानपूर्वयोर्मध्ये ऊर्ध्वायाम्– ॐ भूर्भुवः स्वः ब्रह्मणे
नमः ब्रह्माणमावाह० स्थाप० ॥ भो ब्रह्मन् इहागच्छ इह
तिष्ठ ॥ ४३ ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥
यच्छानःशर्म्मसप्रथाः ॥ $\frac{१३}{३६}$ ॥ ग्रहमण्डलाद्बहिः नैर्ऋत्य-
पश्चिमयोर्मध्येऽधः– ॐ भूर्भुवः स्वः अनन्ताय० अनन्त-
मावा० स्थाप० ॥ भो अनन्त इहागच्छ इह तिष्ठ ॥ ४४ ॥

प्रतिष्ठापनम्— ॐ मनोजूतिर्जु॰ ॥ ॐ भूर्भुवः स्वः सूर्याद्यावाहितनवग्रहमण्डलदेवताः सुप्रतिष्ठिता वरदा भवत ॥ ॐ भूर्भुवः स्वः सूर्याद्यावाहितनवग्रहमण्डलदेवताभ्यो॰ इति नाममन्त्रेण षोडशोपचारैः पूजयेत् ॥ ततो हस्ते जलं गृहीत्वा ॥ अनेन नवग्रहमण्डलस्थसूर्यादिदेवानां पूजनेन ग्रहमण्डलस्थाः सर्वे सूर्यादिदेवताः प्रीयन्तां न मम ॥

इति नवग्रहदेवतास्थापनपूजनप्रयोगः समाप्तः ॥

श्रीहरिहरात्मके त्रयश्चत्वारिंश (४३) द्रेखात्मके द्वादशलिङ्गतोभद्रमण्डले सर्वतोभद्रदेवतास्थापनपूर्वकद्वादशलिङ्गतोभद्रदेवतास्थापनप्रतिष्ठापूजनप्रयोगः ॥

मध्यकुण्डपक्षे मण्डपे ईशान्यां नवग्रहादुत्तरे हस्तद्वयात्मके रुद्रपीठे श्वेतं वस्त्रं प्रसार्य त्रयश्चत्वारिंश (४३) द्रेखासमन्वितं हरिहरात्मकं सर्वतोभद्रसहितं द्वादशलिङ्गतोभद्रं कृत्वा तत्र ब्रह्मादिदेवतावाहनप्रतिष्ठापूजनानि कुर्यात् ॥

पीठसमीपे कर्ता पूर्वाभिमुखः सपत्नीक उपविश्य आचमनं प्राणायामञ्च विधाय सङ्कल्पं कुर्यात् ॥

अद्येत्यादि॰ शुभपुण्यतिथौ मया प्रारब्धस्य असुककर्मणः साद्गुण्यार्थम् अस्मिन् [1]हरिहरात्मकद्वादशलिङ्गतोभद्रे ब्रह्मादिदेवतावाहनप्रतिष्ठापूजनानि करिष्ये ॥ हस्तेऽक्षतादाय ॥

---

[1] विष्णुयागादौ सर्वतोभद्रदेवतास्थापनार्थम् एतत्पदं न वाच्यमपि त्वत्र "सर्वतोभद्रमण्डले" इति वक्तव्यम् ॥

आदौ सर्वतोभद्रदेवतास्थापनम् ॥

ॐ ब्रह्म जज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो व्वेनऽ आवः ॥ सबुध्न्याऽउपमाऽ अस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः ॥ $\frac{३}{१३}$ ॥ मध्ये कर्णिकायाम्– ॐ भूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाह० स्थाप० ॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥ १ ॥ ॐ व्वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः ॥ प्रजावन्तꣳ सचेमहि ॥ $\frac{५६}{३}$ ॥ उत्तरे परिध्यन्तिके वाप्याम्– ॐ भूर्भुवः स्वः सोमाय नमः सोममावाह० स्थाप० ॥ भो सोम इहागच्छ इह तिष्ठ ॥२॥ ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे व्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षिता पायुरदब्धः स्वस्तये ॥ $\frac{१८}{२५}$ ॥ ईशान्याम्– परिध्यन्तः खण्डेन्दौ ॐ भूर्भुवः स्वः ईशानाय नमः ईशानमावाह० स्थाप० ॥ भो ईशान इहागच्छ इह तिष्ठ ॥ ३ ॥ ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥ $\frac{५०}{२०}$ ॥ पूर्वे परिध्यन्तः वाप्याम्–ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावाह० स्थाप० ॥ भो इन्द्र इहागच्छ इह तिष्ठ ॥ ४ ॥ ॐ त्वन्नोऽअग्नेतवदेवपायुभिर्म्मघोनोरक्षतन्वश्चवन्द्य ॥ त्रातातोकस्यतनयेगवामस्यनिमेषꣳ रक्षमाणस्तवव्रते

॥ $\frac{१३}{३४}$ ॥ आग्नेय्यां खण्डेन्दौ– ॐ भूर्भुवः स्वः अग्नये नमः अग्निमावाह० स्था० ॥ भो अग्ने इहागच्छ इह तिष्ठ ॥ ५ ॥ ॐ य॒माय॒त्त्वाङ्गिरस्वते पितृ॒मते॒स्वाहा॑ ॥ स्वाहा॑ घ॒र्म्माय॒ स्वाहा॑ घ॒र्म्मः पि॒त्रे ॥ $\frac{९}{३८}$ ॥ दक्षिणे वाप्याम्– ॐ भूर्भुवः स्वः यमाय नमः यममावाह० स्थाप० ॥ भो यम इहागच्छ इह तिष्ठ ॥ ६ ॥ ॐ असुन्वन्त॒मयजमानमिच्छस्त्ते॒नस्ये॒त्यामन्विहि॒तस्करस्य ॥ अ॒न्यम॒स्मदिच्छ॒सातेऽइ॒त्त्यानमो देविनिर्ऋते॒तुभ्यमस्तु ॥ $\frac{६२}{१२}$ ॥ नैर्ऋत्यां खण्डेन्दौ– ॐ भूर्भुवः स्वः निर्ऋतये नमः निर्ऋतिमावाह० स्थाप० ॥ भो निर्ऋते इहागच्छ इह तिष्ठ ॥ ७ ॥ ॐ तत्त्वायामि॒ब्ब्रह्मणा॒वन्दमान॒स्तदाशास्ते॒यजमानोह॒विर्भि÷ ॥ अहेडमानो वरु॒णेहबो॒द्ध्युरुशꣳस॒मान॒ऽआयुꣳप्रमोषीꣳ ॥ $\frac{४९}{१८}$ ॥ पश्चिमे- वाप्याम्– ॐ भूर्भुवः स्वः वरुणाय नमः वरुणमावाह० स्थाप० ॥ भो वरुण इहागच्छ इह तिष्ठ ॥ ८ ॥ ॐ आनो नि॒युद्भि÷श॒तिनीभिरध्व॒रꣳसहस्रिणीभि॒रुपयाहियज्ञम् ॥ वायोऽअ॒स्मिन्त्सवनेमादयस्वयूयम्पातस्व॒स्तिभि॒ꣳसदानꣳ ॥ $\frac{२८}{२७}$ ॥ वायव्यां खण्डेन्दौ– ॐ भूर्भुवः स्वः वायवे नमः वायुमावाह० स्थाप० ॥ भो वायो इहागच्छ इह तिष्ठ ॥ ९ ॥

ॐसुगावोदेवा॒ःसदनाऽअकर्म्म॒यऽआज॒ग्ग्मेदꣳसवनञ्जु॒षाणाः ॥ भरमाणा॒वहमानाहु॒वीꣳष्य॒स्मेधत्तवसवो॒वसूनि॒स्वाहा ॥ $\frac{१८}{८}$ ॥ वायुसोमयोर्मध्ये भद्रे– ॐ भूर्भुवः स्वः

अष्टवसुभ्यो नमः अष्टवसूनावाह० स्थाप० ॥ भो अष्टवसवः इहागच्छत इह तिष्ठत ॥ १० ॥ ॐ रुद्राःसꣳसृज्यं पृथिवीम्बृहज्ज्योतिꣳसमीधिरे ॥ तेषाम्भानुरजस्रऽइच्छुक्को देवेषुरोचते ॥ ५४/११ ॥ सोमेशानयोर्मध्ये भद्रे—ॐभूर्भुवः स्वः एकादशरुद्रेभ्यो नमः एकादशरुद्रानावाह० स्थाप० ॥ भो एकादशरुद्राः इहागच्छत इह तिष्ठत ॥ ११ ॥ ॐ यज्ञो देवानाम्प्रत्त्यैतिसुम्नमादित्त्यासोभवतामृडयन्तः ॥ आवोर्व्वाचीसुमतिर्व्ववृत्त्यादꣳहोश्चिद्यावरिवोवित्तरासदादित्त्येभ्यस्त्वा ॥ ४/८ ॥ ईशानपूर्वयोर्मध्ये भद्रे— ॐ भूर्भुवः स्वः द्वादशादित्येभ्यो नमः द्वादशादित्यानावाह० स्थाप० ॥ भो द्वादशादित्याः इहागच्छत इह तिष्ठत ॥ १२ ॥ ॐ याव्वाङ्कशामधुमत्त्याश्विनासूनृतावती ॥ तयायज्ञम्मिमिक्षतम् ॥ उपयामगृहीतोस्यश्विभ्यान्त्वैषतेयोनिर्म्माद्ध्वीभ्यान्त्वा ॥ १/७ ॥ इन्द्राग्न्योर्मध्ये भद्रे— ॐ भूर्भुवः स्वः अश्विभ्यां नमः अश्विनौ आवाह० स्थाप० ॥ भो अश्विनौ इहागच्छतम् इह तिष्ठतम् ॥ १३ ॥ ॐ ओमासश्चर्षणीधृतो विश्श्वेदेवासऽआगत ॥ दाश्वाꣳसोदाशुषःसुतम् ॥ उपयामगृहीतोसिविश्श्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्श्वेभ्यस्त्वादेवेभ्यः ॥ ३३/७ ॥ अग्नियमयोर्मध्ये भद्रे—ॐभूर्भुवः स्वः विश्वेभ्यो देवेभ्यो नमः विश्वान्देवानावाह० स्थाप० ॥ भो विश्वेदेवाः इहागच्छत इह तिष्ठत ॥ १४ ॥ ॐ अभि-

त्त्यन्देवꣳसवितारमोण्ण्योःकविक्क्रतुमर्च्चामिसत्त्यसवꣳरत्नधामभिप्प्रियम्मतिङ्कविम् ॥ ऊर्द्ध्वायस्यामतिर्भाऽअदिद्द्युतत्त्सवीमनि हिरण्ण्यपाणिरमिमीत सुक्क्रतुःकृपास्वः ॥ प्रजाब्भ्यस्त्त्वाप्प्रजास्त्त्वानुप्प्राणन्तुप्प्रजास्त्त्वमनुप्प्राणिहि ॥ २५/४ ॥ यमनिर्ऋत्योर्मध्ये भद्रे—ॐ भूर्भुवः स्वः सप्तयक्षेभ्यो नमः सप्तयक्षानावाह० स्थाप० ॥ भो सप्तयक्षाः इहागच्छत इह तिष्ठत ॥ १५ ॥ ॐ भूतायत्त्वानारातयेस्वरभिविक्ख्येषन्दृꣳहन्तान्दुर्य्याꣳपृथिव्व्यामुर्व्वन्तरिक्क्षमन्वेमि पृथिव्व्यास्त्त्वानाभौसादयाम्म्यदित्त्याऽउपस्त्थेग्ग्नेहव्व्यꣳरक्क्ष ॥ ५/१ ॥ निर्ऋतिवरुणयोर्मध्ये भद्रे—ॐ भूर्भुवः स्वः भूतनागेभ्यो नमः भूतनागानावाह० स्थाप० ॥ भो भूतनागाः इहागच्छत इह तिष्ठत ॥ १६ ॥ ॐ ऋताषाडृतधामाग्निर्गन्धर्व्वस्तस्यौषधयोप्प्सरसोमुदोनाम ॥ सन्नऽइदम्ब्रह्मक्षत्रम्पातुतस्म्मैस्वाहावाट्ट्ताब्भ्यꣳस्वाहा ॥ ३८/१८ ॥ वरुणवाय्व्योर्मध्ये भद्रे—ॐ भूर्भुवः स्वः गन्धर्वाप्सरोभ्यो नमः गन्धर्वाप्सरसः आवाह० स्थाप० ॥ भो गन्धर्वाप्सरसः इहागच्छत इह तिष्ठत ॥ १७ ॥ ॐ यदक्क्रन्दꣳप्प्रथमञ्जायमानऽउद्यन्त्समुद्द्रादुत वा पुरीषात् ॥ श्येनस्यपक्क्षा हरिणस्यबाहूऽउपस्तुत्त्यम्महिजातन्तेऽअर्व्वन् ॥ १२/२९ ॥ ब्रह्मसोमयोर्मध्ये वाप्याम्—ॐ भूर्भुवः स्वः स्कन्दाय नमः स्कन्दमावाह० स्थाप० ॥ भो स्कन्द इहागच्छ इह तिष्ठ ॥ १८ ॥

ॐ आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतꣳसेनाऽअजयत्साकमिन्द्रः ॥ ३३/१७ ॥ स्कन्दादुत्तरे– ॐ भूर्भुवः स्वः नन्दिने नमः नन्दिनमावाह० स्थाप० ॥ भो नन्दिन् इहागच्छ इह तिष्ठ ॥ १९ ॥ ॐ उग्रँल्लोहितेनमित्रꣳसौव्रत्त्येनरुद्रन्दौर्व्रत्त्येनेन्द्रम्प्रक्रीडेन मरुतोबलेनसाद्ध्यान्प्रमुदा ॥ भवस्य कण्ठ्यꣳरुद्रस्यान्तꣳपार्श्व्यम्महादेवस्य यकृच्छर्वस्यवनिष्ठुः पशुपतेꣳपुरीतत् ॥ ९/३९ ॥ नन्द्युत्तरे– ॐ भूर्भुवः स्वः शूलमहाकालाभ्यां नमः शूलमहाकालौ आवाह० स्थाप० ॥ भो शूलमहाकालौ इहागच्छतम् इह तिष्ठतम् ॥ २० ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्मातासपितासपुत्रः ॥ विश्वेदेवाऽअदितिꣳपञ्चजनाऽ अदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ २३/२५ ॥ ब्रह्मेशानयोर्मध्ये वह्याम्– ॐ भूर्भुवः स्वः दक्षादिसप्तगणेभ्यो नमः दक्षादिसप्तगणानावाह० स्थाप० ॥ भो दक्षादिसप्तगणाः इहागच्छत इह तिष्ठत ॥ २१ ॥ ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥ १८/२३ ॥ ब्रह्मेन्द्रयोर्मध्ये वाप्याम्– ॐ भूर्भुवः स्वः दुर्गायै नमः दुर्गाम् आवाह० स्थाप० ॥ भो दुर्गे इहागच्छ इह तिष्ठ ॥ २२ ॥ ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्य पाꣳसुरे स्वाहा ॥ १५/५ ॥ दुर्गापूर्वे– ॐ भूर्भुवः स्वः विष्णवे नमः

विष्णुमावा० स्था० ॥ भो विष्णो इहागच्छ इह तिष्ठ ॥२३॥ ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमꣳ प्रपितामहेभ्यꣳस्वधायिभ्यः स्वधानमः ।अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरꣳपितरꣳशुन्धद्ध्वम् ॥ ३६/१९ ॥ ब्रह्माग्न्योर्मध्ये वल्ल्याम्–ॐ भूर्भुवः स्वः स्वधायै नमः स्वधामावाह० स्थाप० ॥ भो स्वधे इहागच्छ इह तिष्ठ ॥ २४ ॥ ॐ परम्मृत्योऽ अनुपरेहिपन्थाँयस्तेऽ अन्यऽइतरोदेवयानात् ॥ चक्षुष्मतेशृण्वते तेब्रवीमि मानःप्रजाꣳरीरिषोमोतवीरान् ॥ ७/३५ ॥ ब्रह्मयमयोर्मध्ये वाप्याम्– ॐ भूर्भुवः स्वः मृत्युरोगाभ्यां नमः मृत्युरोगावावा० स्थाप० ॥ भो मृत्युरोगौ इहागच्छतम् इह तिष्ठतम् ॥ २५ ॥ ॐ गणानान्त्वागणपतिꣳहवामहेप्रियाणान्त्वाप्रियपतिꣳहवामहेनिधीनान्त्वानिधीपतिꣳहवामहेवसो मम ॥ आहमजानिगर्भधमात्त्वमजासिगर्भधम् ॥ १९/२३ ॥ ब्रह्मनिर्ऋत्योर्मध्ये वल्ल्याम्– ॐ भूर्भुवः स्वः गणपतये नमः गणपतिमावाह० स्थाप० ॥ भो गणपते इहागच्छ इह तिष्ठ ॥२६॥ ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये ॥ शँय्योरभिस्रवन्तुनः ॥ १२/३६ ॥ ब्रह्मवरुणयोर्मध्ये वाप्याम्– ॐ भूर्भुवः स्वः अद्भ्यो नमः अप आवाह० स्थाप० ॥ भो आप इहागच्छत इह तिष्ठत ॥२७॥ ॐमरुतोयस्यहिक्षयेपाथादिवोविमहसः ॥ ससुगोपातमोजनः ॥ ३१/८ ॥

ब्रह्मवाय्वोर्मध्ये वह्न्याम्– ॐ भूर्भुवः स्वः मरुद्भ्यो नमः मरुतः आवा० स्थाप० ॥ भो मरुतः इहागच्छत इह तिष्ठत ॥ २८ ॥ ॐ स्योनापृथिविनो भवानृक्षरानिवेशनी ॥ यच्छानꣳ शर्म्मसप्रथाꣳ ॥ $\frac{१३}{३६}$ ॥ ॐ भूर्भुवः स्वः पृथिव्यै नमः पृथिवीमावाह० स्थाप० ॥ भो पृथिवि इहागच्छ इह तिष्ठ ॥२९॥ ॐ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसꣳ ॥ सरस्वती तु पञ्चधासोदेशेभवत्सरित् ॥ $\frac{११}{३४}$ ॥ तत्रैव ब्रह्मणः पादमूले कर्णिकाधः– ॐ भूर्भुवः स्वः गङ्गादिनदीभ्यो नमः गङ्गादिनदीः आवा० स्थाप० ॥ भो गङ्गादिनद्यः इहागच्छत इह तिष्ठत ॥ ३० ॥ ॐ इमम्मेवरुणश्श्रुधीहवमद्याच मृडय ॥ त्वामवस्युराचके ॥ $\frac{१}{२१}$ ॥ ब्रह्मणः पादमूले कर्णिकाऽधः गङ्गाद्युत्तरे– ॐ भूर्भुवः स्वः सप्तसागरेभ्यो नमः सप्तसागरानावाह० स्थाप० ॥ भो सप्तसागराः इहागच्छत इह तिष्ठत ॥ ३१ ॥ ब्रह्मणो मस्तके कर्णिकोपरि– ॐ भूर्भुवः स्वः मेरवे नमः मेरुमावाहयामि स्थापयामि ॥ भो मेरो इहागच्छ इह तिष्ठ ॥ ३२ ॥

मण्डलबाह्ये श्वेतपरिधौ उत्तरादिक्रमेणायुधानि ॥

उत्तरे सोमसमीपे– ॐ भूर्भुवः स्वः गदायै नमः गदामावाह० स्थाप० ॥ भो गदे इहागच्छ इह तिष्ठ ॥ ३३ ॥ ऐशान्याम् ईशानसमीपे– ॐ भूर्भुवः स्वः त्रिशूलाय नमः त्रिशूलमावाह० स्थाप० ॥ भो त्रिशूल इहागच्छ इह तिष्ठ

॥ ३४ ॥ पूर्वे इन्द्रसमीपे– ॐ भूर्भुवः स्वः वज्राय नमः वज्रमावाह० स्थाप० ॥ भो वज्र इहागच्छ इह तिष्ठ ॥३५॥ आग्नेय्याम् अग्निसमीपे– ॐ भूर्भुवः स्वः शक्तये नमः शक्तिमावाह० स्थाप०॥ भो शक्ते इहागच्छ इह तिष्ठ ॥३६॥ दक्षिणे यमसमीपे– ॐ भूर्भुवः स्वः दण्डाय नमः दण्डमावाह० स्थाप० ॥ भो दण्ड इहागच्छ इह तिष्ठ ॥३७॥ नैर्ऋत्यां निर्ऋतिसमीपे– ॐ भूर्भुवः स्वः खड्गाय नमः खड्गमावाह० स्थाप० ॥ भो खड्ग इहागच्छ इह तिष्ठ॥३८॥ पश्चिमे वरुणसमीपे– ॐ भूर्भुवः स्वः पाशाय नमः पाशमावाह० स्थाप० ॥ भो पाश इहागच्छ इह तिष्ठ ॥३९॥ वायव्यां वायुसमीपे–ॐ भूर्भुवः स्वः अङ्कुशाय नमः अङ्कुशमावाह० स्थाप० ॥ भो अङ्कुश इहागच्छ इह तिष्ठ ॥ ४० ॥

मण्डलबाह्ये रक्तपरिधौ उत्तरादिक्रमेण गौतमादीन् ॥

उत्तरे– ॐ भूर्भुवः स्वः गौतमाय नमः गौतममावाह० स्थाप० ॥ भो गौतम इहागच्छ इह तिष्ठ ॥ ४१ ॥ ऐशान्याम्– ॐ भूर्भुवः स्वः भरद्वाजाय नमः भरद्वाजमावाह० स्थाप० ॥ भो भरद्वाज इहागच्छ इह तिष्ठ ॥ ४२ ॥ पूर्वे– ॐ भूर्भुवः स्वः विश्वामित्राय नमः विश्वामित्रमावाह० स्थाप० ॥ भो विश्वामित्र इहागच्छ इह तिष्ठ ॥ ४३ ॥ आग्नेय्याम्– ॐ भूर्भुवः स्वः कश्यपाय नमः कश्यपमावाह० स्थाप० ॥ भो कश्यप इहागच्छ इह तिष्ठ ॥ ४४ ॥

दक्षिणे– ॐ भूर्भुवः स्वः जमदग्नये नमः जमदग्निमावाह० स्थाप० ॥ भो जमदग्ने इहागच्छ इह तिष्ठ ॥ ४५ ॥ नैर्ऋत्याम्–ॐ भूर्भुवः स्वः वसिष्ठाय नमः वसिष्ठमावाह० स्थाप० ॥ भो वसिष्ठ इहागच्छ इह तिष्ठ ॥४६॥ पश्चिमे– ॐ भूर्भुवः स्वः अत्रये० अत्रिमावाह० स्थाप० ॥ भो अत्रे इहागच्छ इह तिष्ठ ॥ ४७ ॥ वायव्याम्– ॐ भूर्भुवः स्वः अरुन्धत्यै० अरुन्धतीमावाह० स्थाप० । भो अरुन्धति इहागच्छ इह तिष्ठ ॥ ४८ ॥

मण्डलबाह्ये कृष्णपरिधौ पूर्वादिक्रमेण ऐन्द्र्यादीन् ॥

पूर्वे– ॐ भूर्भुवः स्वः ऐन्द्र्यै नमः ऐन्द्रीमावाह० स्थाप० ॥ भो ऐन्द्रि इहागच्छ इह तिष्ठ ॥ ४९ ॥ आग्नेय्याम्– ॐ भूर्भुवः स्वः कौमार्यै नमः कौमारीमावाह० स्थाप० ॥ भो कौमारि इहागच्छ इह तिष्ठ ॥ ५० ॥ दक्षिणे– ॐ भूर्भुवः स्वः ब्राह्म्यै नमः ब्राह्मीमावाह० स्थाप० ॥ भो ब्राह्मि इहागच्छ इह तिष्ठ ॥ ५१ ॥ नैर्ऋत्याम्– ॐ भूर्भुवः स्वः वाराह्यै नमः वाराहीमावाह० स्थाप० ॥ भो वाराहि इहागच्छ इह तिष्ठ ॥ ५२ ॥ पश्चिमे– ॐ भूर्भुवः स्वः चामुण्डायै नमः चामुण्डामावाह० स्थाप० ॥ भो चामुण्डे इहागच्छ इह तिष्ठ ॥ ५३ ॥ वायव्याम्– ॐ भूर्भुवः स्वः वैष्णव्यै नमः वैष्णवीमावाह० स्थाप० ॥ भो वैष्णवि इहागच्छ इह तिष्ठ ॥ ५४ ॥ उत्तरे– ॐ भूर्भुवः स्वः माहेश्वर्यै नमः माहेश्वरीमावाह० स्थाप० ॥ भो माहेश्वरि

इहागच्छ इह तिष्ठ ॥ ५५ ॥ ऐशान्याम्— ॐ भूर्भुवः स्वः वैनायक्यै नमः वैनायकीमावाह० स्थाप० ॥ भो वैनायकि इहागच्छ इह तिष्ठ ॥ ५६ ॥

इति सर्वतोभद्रमण्डलदेवताः ॥

अथ द्वादशलिङ्गतोभद्रमण्डलदेवतावाहनम् ॥

पूर्वस्यांमीशानतः प्रथमलिङ्गे—ॐ नम॑ः शम्भ॒वाय॑ च मयोभ॒वाय॑ च॒ नम॑ः शङ्क॒राय॑ च मयस्क॒राय॑ च॒ नम॑ः शि॒वाय॑ च शि॒वत॑राय च ॥ $\frac{४१}{१६}$ ॥ ॐ भूर्भुवः स्वः शिवाय नमः शिवमावाह० स्थाप० ॥ भो शिव इहागच्छ इह तिष्ठ ॥ १ ॥ पूर्वस्यां द्वितीयलिङ्गे—ॐ यत्पुरु॑षं॒ व्यद॑धुः कति॒धा व्य॑कल्पयन् ॥ मुख॒ङ्किम॑स्यासी॒त्किम्बा॒हू किमू॒रू पादा॑ऽ उच्येते ॥ $\frac{१०}{३१}$ ॥ ॐ भूर्भुवः स्वः तत्पुरुषाय नमः तत्पुरुषमावाह० स्थाप० ॥ भो तत्पुरुष इहागच्छ इह तिष्ठ ॥ २ ॥ पूर्वस्यां तृतीयलिङ्गे—ॐ नम॑ः शु॒ङ्गवे॑ च पशु॒पत॑ये च॒ नम॑ऽ उ॒ग्राय॑ च भी॒माय॑ च॒ नमो॑ऽग्रेव॒धाय॑ च दूरेव॒धाय॑ च॒ नमो॑ ह॒न्त्रे च॒ हनी॑यसे च॒ नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यो॒ नम॑स्ता॒राय॑ ॥ $\frac{४०}{१६}$ ॥ ॐ भूर्भुवः स्वः पशुपतये नमः पशुपतिमावाह० स्थाप० ॥ भो पशुपते इहागच्छ इह तिष्ठ ॥ ३ ॥

दक्षिणस्यामाग्नेयकोणतः क्रमेण त्रिषु लिङ्गेषु ॥

दक्षिणस्यां प्रथमलिङ्गे— ॐ उ॒ग्रश्च॑ भी॒मश्च॒ द्ध्वा॒न्तश्च॒ धुनि॑श्च ॥ सा॒स॒ह्वाँश्चा॑भियु॒ग्वा च॑ वि॒क्षिप॒ः स्वाहा॑ ॥ $\frac{७}{३९}$ ॥

ॐ भूर्भुवः स्वः उग्राय नमः उग्रमावाह० स्थाप० ॥ भो उग्र इहागच्छ इह तिष्ठ ॥ ४ ॥ दक्षिणस्यां द्वितीयलिङ्गे—ॐ सा ते॑ रुद्र शि॒वा त॒नूरघो॒रापा॑पकाशिनी ॥ तया॑ नस्त॒न्वा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि ॥ $\frac{२}{१६}$ ॥ ॐ भूर्भुवः स्वः अघोराय नमः अघोरमावा० स्थाप० ॥ भो अघोर इहागच्छ इह तिष्ठ ॥ ५ ॥ दक्षिणस्यां तृतीयलिङ्गे—ॐ नम॑स्ते रुद्र म॒न्यव॑ऽउ॒तोत॒ऽइष॑वे॒ नम॑: ॥ बा॒हुभ्या॑मु॒त ते॒ नम॑: ॥ $\frac{१}{१६}$ ॥ ॐ भूर्भुवः स्वः रुद्राय नमः रुद्रमावाह० स्थाप० ॥ भो रुद्र इहागच्छ इह तिष्ठ ॥ ६ ॥

पश्चिमस्यां नैर्ऋत्यकोणतः क्रमेण त्रिषु लिङ्गेषु ॥

पश्चिमस्यां प्रथमलिङ्गे—ॐ उ॒ग्रँल्लोहि॑तेन मि॒त्रꣳ सौव्र॑त्येन रु॒द्रन्दौव्र॑त्त्ये॒नेन्द्रम्प्र॑क्क्री॒डेन॑ म॒रु॒तो ब॑लेन सा॒द्ध्यान्प्र॒मुदा॑ ॥ भ॒वस्य॒ कण्ठ्य॑ꣳ रु॒द्रस्या॑न्तःपा॒र्श्व्यम्म॑हादे॒वस्य॒ यकृ॑च्छ॒र्वस्य॑ व॒नि॒ष्ठुः पशु॒पतेः॑ पु॒रीतत् ॥ $\frac{९}{२९}$ ॥ ॐ भूर्भुवः स्वः भवाय नमः भवमावाह० स्थाप० ॥ भो भव इहागच्छ इह तिष्ठ ॥ ७ ॥ पश्चिमस्यां द्वितीयलिङ्गे—ॐ स॒द्यो जा॒तो व्य॑मिमीत य॒ज्ञम॒ग्निर्दे॒वाना॑मभवत्पु॒रोगाः ॥ अ॒स्य होतुः॑ प्र॒दिश्यृ॒तस्य॑ वा॒चि स्वाहा॑कृतꣳ ह॒विर॑दन्तु दे॒वाः ॥ $\frac{३६}{२९}$ ॥ ॐ भूर्भुवः स्वः सद्योजाताय नमः सद्योजातमावाह० स्थाप० ॥ भो सद्योजात इहागच्छ इह तिष्ठ ॥ ८ ॥ पश्चिमस्यां तृतीयलिङ्गे—ॐ नम॑: प॒र्ण्णाय॑ च पर्ण्णश॒दाय॑ च॒ नम॑ऽउद्गु॒रमा॑णाय चाभि-

ग्घ्नतेचनमऽआखिदतेचप्प्रखिदतेचनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवᳵकिरिकेभ्यो देवानाꣳहृदयेभ्यो नमो विचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः ॥ ४६/१६ ॥ ॐ भूर्भुवः स्वः सर्वजाताय नमः सर्वजातमावा० स्था० ॥ भो सर्वजात इहागच्छ इह तिष्ठ ॥ ९ ॥

उत्तरस्यां वायव्यकोणतः क्रमेण त्रिषु लिङ्गेषु ॥

उत्तरस्यां प्रथमलिङ्गे— ॐ त्र्यम्बकँऽयजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्त्योर्मुक्षीयमामृतात् ॥ ६०/३ ॥ ॐ भूर्भुवः स्वः महालिङ्गाय नमः महालिङ्गमावाह० स्थाप० ॥ भो महालिङ्ग इहागच्छ इह तिष्ठ ॥१०॥ उत्तरस्यां द्वितीयलिङ्गे— ॐ वाममद्यसवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यꣳ सावीः ॥ वामस्य हिक्षयस्यदेवभूरेरयाधिया वामभाजः स्याम ॥ ६/८ ॥ ॐ भूर्भुवः स्वः वामदेवाय नमः वामदेवमावा० स्थाप० ॥ भो वामदेव इहागच्छ इह तिष्ठ ॥११॥ उत्तरस्यां तृतीयलिङ्गे— ॐ नमो ह्रस्वाय च वामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायचसवृधेचनमोग्र्याय च प्प्रथमाय च ॥ ३०/१६ ॥ ॐ भूर्भुवः स्वः भीमाय नमः भीममावाह० स्थाप०॥ भो भीम इहागच्छ इह तिष्ठ ॥१२॥

पूर्वस्याम् ईशानतः क्रमेण चतसृषु वापीषु ॥

ॐ भूर्भुवः स्वः असिताङ्गभैरवाय नमः असिताङ्गभैरवमावाह० स्थाप० ॥ भो असिताङ्गभैरव इहागच्छ इह

तिष्ठ ॥ १३ ॥ ॐ भूर्भुवः स्वः रुरुभैरवाय नमः रुरुभैरवमावाह० स्थाप० ॥ भो रुरुभैरव इहागच्छ इह तिष्ठ ॥१४॥ ॐ भूर्भुवः स्वः चण्डभैरवाय नमः चण्डभैरवमावाह० स्थाप० ॥ भो चण्डभैरव इहागच्छ इह तिष्ठ ॥ १५ ॥ ॐ भूर्भुवः स्वः क्रोधभैरवाय नमः क्रोधभैरवमावाह० स्था० ॥ भो क्रोधभैरव इहागच्छ इह तिष्ठ ॥ १६ ॥

दक्षिणस्याम् आग्नेयतः क्रमेण चतसृषु वापीषु ॥

ॐ भूर्भुवः स्वः उन्मत्तभैरवाय नमः उन्मत्तभैरवमावाह० स्थाप० ॥ भो उन्मत्तभैरव इहागच्छ इह तिष्ठ ॥ १७ ॥ ॐ भूर्भुवः स्वः कपालीभैरवाय नमः कपालीभैरवमावाह० स्थाप० ॥ भो कपालीभैरव इहागच्छ इह तिष्ठ ॥ १८ ॥ ॐ भूर्भुवः स्वः भीषणभैरवाय नमः भीषणभैरवमावाह० स्थाप० ॥ भो भीषणभैरव इहागच्छ इह तिष्ठ ॥ १९ ॥ ॐ भूर्भुवः स्वः संहारभैरवाय नमः संहारभैरवमावाह० स्थाप० ॥ भो संहारभैरव इहागच्छ इह तिष्ठ ॥ २० ॥

पश्चिमस्यां नैर्ऋत्यतः क्रमेण चतसृषु वापीषु ॥

ॐ भूर्भुवः स्वः भवाय नमः भवमावाह० स्थाप० ॥ भो भव इहागच्छ इह तिष्ठ ॥ २१ ॥ ॐ भूर्भुवः स्वः शर्वाय नमः शर्वमावाह० स्थाप० ॥ भो शर्व इहागच्छ इह तिष्ठ ॥ २२ ॥ ॐ भूर्भुवः स्वः ईशानाय नमः ईशानमावा० स्था० ॥ भो ईशान इहागच्छ इह तिष्ठ ॥२३॥

ॐ भूर्भुवः स्वः पशुपतये नमः पशुपतिमावाह० स्थाप० ॥ भो पशुपते इहागच्छ इह तिष्ठ ॥ २४ ॥

उत्तरस्यां वायव्यतः क्रमेण चतसृषु वापीषु ॥

ॐ भूर्भुवः स्वः रुद्राय नमः रुद्रमावाह० स्थाप० ॥ भो रुद्र इहागच्छ इह तिष्ठ ॥ २५ ॥ ॐ भूर्भुवः स्वः उग्राय नमः उग्रमावाह० स्थाप० ॥ भो उग्र इहागच्छ इह तिष्ठ ॥ २६ ॥ ॐ भूर्भुवः स्वः भीमाय नमः भीममावाह० स्थाप० ॥ भो भीम इहागच्छ इह तिष्ठ ॥२८॥ ॐ भूर्भुवः स्वः महते नमः महान्तमावाह० स्थाप० ॥ भो महन् इहागच्छ इह तिष्ठ ॥ २८ ॥

पूर्वस्यां दिशि भद्रयोः क्रमेण ॥

ईशानेन्द्रयोर्मध्ये भद्रे—ॐ भूर्भुवः स्वः शूलिने नमः शूलिनमावा० स्थाप० ॥ भो शूलिन् इहागच्छ इह तिष्ठ ॥२९॥ इन्द्राग्न्योर्मध्ये भद्रे—ॐ भूर्भुवः स्वः चन्द्रमौलिने० चन्द्रमौलिनमावा० स्था० ॥ भो चन्द्रमौलिन् इहागच्छ इह तिष्ठ॥३०॥

दक्षिणस्यां दिशि भद्रयोः क्रमेण ॥

अग्नियमयोर्मध्ये भद्रे—ॐ भूर्भुवः स्वः चन्द्रमसे नमः चन्द्रमसमावा० स्था० ॥ भो चन्द्रमः इहागच्छ इह तिष्ठ ॥३१॥ यमनिर्ऋत्योर्मध्ये भद्रे— ॐ भूर्भुवः स्वः वृषभध्वजाय नमः वृषभध्वजमावाह० स्थाप० ॥ भो वृषभध्वज इहागच्छ इह तिष्ठ ॥ ३२ ॥

पश्चिमस्यां दिशि भद्रयोः क्रमेण ॥

निर्ऋतिवरुणयोर्मध्ये भद्रे—ॐ भूर्भुवः स्वः त्रिलोचनाय नमः त्रिलोचनमावाह० स्थाप० ॥ भो त्रिलोचन इहागच्छ इह तिष्ठ ॥ ३३ ॥ वरुणवाय्वोर्मध्ये भद्रे— ॐ भूर्भुवः स्वः शक्तिधराय नमः शक्तिधरमावाह० स्थाप० ॥ भो शक्तिधर इहागच्छ इह तिष्ठ ॥ ३४ ॥

उत्तरस्यां दिशि भद्रयोः क्रमेण ॥

वायुसोमयोर्मध्ये भद्रे—ॐ भूर्भुवः स्वः महेश्वराय नमः महेश्वरमावाह० स्थाप० ॥ भो महेश्वर इहागच्छ इह तिष्ठ ॥३५॥ सोमेशानयोर्मध्ये भद्रे— ॐ भूर्भुवः स्वः शूलधारिणे नमः शूलधारिणमावाह० स्थाप० ॥ भो शूलधारिन् इहागच्छ इह तिष्ठ ॥ ३६ ॥

ईशानकोणे द्वे वल्लीदेवते स्थापयेत् ॥

ॐ भूर्भुवः स्वः अनन्ताय० अनन्तमावा० स्था० ॥ भो अनन्त इहागच्छ इह तिष्ठ ॥३७॥ ॐ भूर्भुवः स्वः तक्षकाय० तक्षकमावा० स्था० ॥ भो तक्षक इहागच्छ इह तिष्ठ ॥३८॥

आग्नेयकोणे द्वे वल्लीदेवते स्थापयेत् ॥

ॐ भूर्भुवः स्वः कुलिशाय नमः कुलिशमावाह० स्थाप०॥ भो कुलिश इहागच्छ इह तिष्ठ ॥ ३९ ॥ ॐ भूर्भुवः स्वः कर्कोटकाय नमः कर्कोटकमावाह० स्थाप० ॥ भो कर्कोटक इहागच्छ इह तिष्ठ ॥ ४० ॥

नैर्ऋत्यकोणे द्वे वल्लीदेवते स्थापयेत् ॥

ॐ भूर्भुवः स्वः शङ्खपालाय नमः शङ्खपालमावाह० स्थाप० ॥ भो शङ्खपाल इहागच्छ इह तिष्ठ ॥ ४१ ॥ ॐ भूर्भुवः स्वः कम्बलाय नमः कम्बलमावाह० स्थाप० ॥ भो कम्बल इहागच्छ इह तिष्ठ ॥ ४२ ॥

वायव्यकोणे द्वे वल्लीदेवते स्थापयेत् ॥

ॐ भूर्भुवः स्वः अश्वतराय नमः अश्वतरमावाह० स्थाप० ॥ भो अश्वतर इहागच्छ इह तिष्ठ ॥ ४३ ॥ ॐ भूर्भुवः स्वः पृथिव्यै नमः पृथिवीमावाह० स्थाप० ॥ भो पृथिवि इहागच्छ इह तिष्ठ ॥ ४४ ॥

ईशानकोणे सप्त शृङ्खलादेवताः स्थापयेत् ॥

ॐ भूर्भुवः स्वः भूम्यै नमः भूमिमावाह० स्थाप० ॥ भो भूमे इहागच्छ इह तिष्ठ ॥ ४५ ॥ ॐ भूर्भुवः स्वः हैहयाय नमः हैहयमावाह० स्थाप० ॥ भो हैहय इहागच्छ इह तिष्ठ ॥ ४६ ॥ ॐ भूर्भुवः स्वः माल्यवते नमः माल्यवन्तमावाह० स्थाप० ॥ भो माल्यवन् इहागच्छ इह तिष्ठ ॥ ४७ ॥ ॐ भूर्भुवः स्वः पारिजाताय नमः पारिजातमावा० स्था० ॥ भो पारिजात इहागच्छ इह तिष्ठ ॥४८॥ ॐ भूर्भुवः स्वः दिक्पतये नमः दिक्पतिमावाह० स्थाप० ॥ भो दिक्पते इहागच्छ इह तिष्ठ ॥ ४९ ॥ ॐ भूर्भुवः स्वः महादेवाय नमः महादेवमावाह० स्थाप० ॥ भो महादेव

इहागच्छ इह तिष्ठ ॥५०॥ ॐ भूर्भुवः स्वः विष्णवे नमः विष्णुमावा०स्थाप०॥ भो विष्णो इहागच्छ इह तिष्ठ ॥५१॥

आग्नेयकोणे सप्त शृङ्खलादेवताः स्थापयेत् ॥

ॐ भूर्भुवः स्वः माल्यवते नमः माल्यवन्तमावाह० स्थाप० ॥ भो माल्यवन् इहागच्छ इह तिष्ठ ॥ ५२ ॥ ॐ भूर्भुवः स्वः महारुद्राय नमः महारुद्रमावाह० स्थाप० ॥ भो महारुद्र इहागच्छ इह तिष्ठ ॥ ५३ ॥ ॐ भूर्भुवः स्वः कालाग्निरुद्राय नमः कालाग्निरुद्रमावाह० स्थाप० ॥ भो कालाग्निरुद्र इहागच्छ इह तिष्ठ ॥ ५४ ॥ ॐ भूर्भुवः स्वः द्वादशादित्येभ्यो नमः द्वादशादित्यानावाह० स्थाप० ॥ भो द्वादशादित्याः इहागच्छत इह तिष्ठत ॥ ॥ ५५ ॥ ॐ भूर्भुवः स्वः महेश्वराय नमः महेश्वरमावाह० स्थाप० ॥ भो महेश्वर इहागच्छ इह तिष्ठ ॥ ५६ ॥ ॐ भूर्भुवः स्वः मृत्युरोगाभ्यां नमः मृत्युरोगौ आवाह० स्थाप० ॥ भो मृत्युरोगौ इहागच्छतम् इह तिष्ठतम् ॥ ५७ ॥ ॐ भूर्भुवः स्वः वैनायक्यै नमः वैनायकीमावाह० स्थाप० ॥ भो वैनायकि इहागच्छ इह तिष्ठ ॥ ५८ ॥

नैर्ऋत्यकोणे सप्त शृङ्खलादेवताः स्थापयेत् ॥

ॐ भूर्भुवः स्वः शाकुन्तलेयाय नमः शाकुन्तलेयमावाह० स्थाप० ॥ भो शाकुन्तलेय इहागच्छ इह तिष्ठ ॥ ५९ ॥ ॐ भूर्भुवः स्वः भरताय नमः भरतमावाह० स्थाप० ॥

भो भरत इहागच्छ इह तिष्ठ ॥ ६० ॥ ॐ भूर्भुवः स्वः नलाय नमः नलमावाह० स्थाप० ॥ भो नल इहागच्छ इह तिष्ठ ॥ ६१ ॥ ॐ भूर्भुवः स्वः रामाय० राममावाह० स्थाप० ॥ भो राम इहागच्छ इह तिष्ठ ॥ ६२ ॥ ॐ भूर्भुवः स्वः सार्वभौमाय० सार्वभौममावा० स्था० ॥ भो सार्वभौम इहागच्छ इह तिष्ठ ॥ ६३ ॥ ॐ भूर्भुवः स्वः नैषधाय नमः नैषधमावाह० स्थाप० ॥ भो नैषध इहागच्छ इह तिष्ठ ॥६४॥ ॐ भूर्भुवः स्वः विन्ध्याचलाय० विन्ध्याचलमावा० स्था० ॥ भो विन्ध्याचल इहागच्छ इह तिष्ठ ॥ ६५ ॥

वायव्यकोणे सप्त शृङ्खलादेवताः स्थापयेत् ॥

ॐ भूर्भुवः स्वः हेमकूटाय नमः हेमकूटमावाह० स्थाप०॥ भो हेमकूट इहागच्छ इह तिष्ठ ॥ ६६ ॥ ॐ भूर्भुवः स्वः गन्धमादनाय नमः गन्धमादनमावाह० स्थाप० ॥ भो गन्धमादन इहागच्छ इह तिष्ठ ॥ ६७ ॥ ॐ भूर्भुवः स्वः कुलाचलाय नमः कुलाचलमावाह० स्थाप० ॥ भो कुलाचल इहागच्छ इह तिष्ठ ॥ ६८ ॥ ॐ भूर्भुवः स्वः हिमाचलाय नमः हिमाचलमावाह० स्थाप० ॥ भो हिमाचल इहागच्छ इह तिष्ठ ॥ ६९ ॥ ॐ भूर्भुवः स्वः पृथिव्यै नमः पृथिवीमावाह० स्थाप० ॥ भो पृथिवि इहागच्छ इह तिष्ठ ॥ ७० ॥ ॐ भूर्भुवः स्वः अनन्ताय नमः अनन्तमावाह० स्थाप० ॥ भो अनन्त इहागच्छ इह तिष्ठ ॥७१॥

ॐ भूर्भुवः स्वः कमलासनाय नमः कमलासनमावाह० स्थाप० ॥ भो कमलासन इहागच्छ इह तिष्ठ ॥ ७२ ॥

चतुर्विदिक्षु खण्डेन्दुष्वेकैकदेवता स्थापयेत् ॥

ऐशाने— ॐ भूर्भुवः स्वः अश्विनीकुमाराभ्यां नमः अश्विनीकुमारौ आवाह० स्थाप० ॥ भो अश्विनीकुमारौ इहागच्छतम् इह तिष्ठतम् ॥ ७३ ॥ आग्नेये— ॐ भूर्भुवः स्वः विश्वेभ्यो देवेभ्यो नमः विश्वान्देवानावाह० स्थाप० ॥ भो विश्वेदेवाः इहागच्छत इह तिष्ठत ॥ ७४ ॥ नैर्ऋत्ये— ॐ भूर्भुवः स्वः पितृभ्यो नमः पितृनावाह० स्थाप० ॥ भो पितरः इहागच्छ इह तिष्ठत ॥ ७५ ॥ वायव्ये— ॐ भूर्भुवः स्वः नागेभ्यो नमः नागानावाह० स्थाप० ॥ भो नागाः इहागच्छत इह तिष्ठत ॥ ७६ ॥

बहिः सत्वपरिधौ पूर्वतः प्रादक्षिण्येन ॥

पूर्वे— ॐ भूर्भुवः स्वः इन्द्राय नमः इन्द्रमावा० स्थाप० ॥ भो इन्द्र इहागच्छ इह तिष्ठ ॥ ७७ ॥ आग्नेये— ॐ भूर्भुवः स्वः अग्नये नमः अग्निमावाह० स्थाप० ॥ भो अग्ने इहागच्छ इह तिष्ठ ॥ ७८ ॥ दक्षिणे— ॐ भूर्भुवः स्वः यमाय नमः यममावाह० स्थाप० ॥ भो यम इहागच्छ इह तिष्ठ ॥ ७९ ॥ नैर्ऋत्ये— ॐ भूर्भुवः स्वः निर्ऋतये नमः निर्ऋतिमावाह० स्थाप० ॥ भो निर्ऋते इहागच्छ इह तिष्ठ ॥ ८० ॥ पश्चिमे— ॐ भूर्भुवः स्वः वरुणाय नमः वरुणमावाह०

स्थाप० ॥ भो वरुण इहागच्छ इह तिष्ठ ॥ ८१ ॥ वायव्ये- ॐ भूर्भुवः स्वः वायवे० वायुमावाह० स्थाप० ॥ भो वायो इहागच्छ इह तिष्ठ ॥८२॥ उत्तरे- ॐ भूर्भुवः स्वः कुबेराय० कुबेरमावा० स्था० ॥ भो कुबेर इहागच्छ इह तिष्ठ ॥८३॥ ऐशाने- ॐ भूर्भुवः स्वः ईशानाय० ईशानमावा० स्था० ॥ भो ईशान इहागच्छ इह तिष्ठ ॥ ८४ ॥

रजःपरिधौ पूर्वादिक्रमेण आयुधानि ॥

पूर्वे- ॐ भूर्भुवः स्वः वज्राय नमः वज्रमावाह० स्थाप० ॥ भो वज्र इहागच्छ इह तिष्ठ ॥ ८५ ॥ आग्नेये- ॐ भूर्भुवः स्वः शक्तये नमः शक्तिमावाह० स्थाप० ॥ भो शक्ते इहागच्छ इह तिष्ठ ॥ ८६ ॥ दक्षिणे- ॐ भूर्भुवः स्वः दण्डाय नमः दण्डमावाह० स्थाप० ॥ भो दण्ड इहागच्छ इह तिष्ठ ॥ ८७ ॥ नैर्ऋत्ये- ॐ भूर्भुवः स्वः खड्गाय नमः खड्गमावाह० स्थाप० ॥ भो खड्ग इहागच्छ इह तिष्ठ ॥ ८८ ॥ पश्चिमे- ॐ भूर्भुवः स्वः पाशाय नमः पाशमावाह० स्थाप० ॥ भो पाश इहागच्छ इह तिष्ठ ॥ ८९ ॥ वायव्ये- ॐ भूर्भुवः स्वः अङ्कुशाय० अङ्कुशमावा० स्था० ॥ भो अङ्कुश इहागच्छ इह तिष्ठ ॥ ९० ॥ उत्तरे- ॐ भूर्भुवः स्वः गदायै० गदामावा० स्था० ॥ भो गदे इहागच्छ इह तिष्ठ ॥९१॥ ऐशाने- ॐ भूर्भुवः स्वः त्रिशूलाय० त्रिशूलमावा० स्थाप० ॥ भो त्रिशूल इहागच्छ इह तिष्ठ ॥९२॥

बहिः तमःपरिधौ पूर्वादिक्रमेणाष्टर्षीन् ॥

पूर्वे– ॐ भूर्भुवः स्वः कश्यपाय नमः कश्यपमावाह० स्थाप० ॥ भो कश्यप इहागच्छ इह तिष्ठ ॥ ९३ ॥ आग्नेये– ॐ भूर्भुवः स्वः अत्रये नमः अत्रिमावा० स्था० ॥ भो अत्रे इहागच्छ इह तिष्ठ ॥ ९४ ॥ दक्षिणे– ॐ भूर्भुवः स्वः भरद्वाजाय नमः भरद्वाजमावाह० स्थाप० ॥ भो भरद्वाज इहागच्छ इह तिष्ठ ॥९५॥ नैर्ऋत्याम्– ॐ भूर्भुवः स्वः विश्वामित्राय नमः विश्वामित्रमावाह० स्थाप० ॥ भो विश्वामित्र इहागच्छ इह तिष्ठ ॥ ९६ ॥ पश्चिमे–ॐ भूर्भुवः स्वः गौतमाय नमः गौतममावाह० स्थाप० ॥ भो गौतम इहागच्छ इह तिष्ठ ॥ ९७ ॥ वायव्याम्– ॐ भूर्भुवः स्वः जमदग्नये नमः जमदग्निमावाह० स्थाप० ॥ भो जमदग्ने इहागच्छ इह तिष्ठ ॥ ९८ ॥ उत्तरे– ॐ भूर्भुवः स्वः वसिष्ठाय नमः वसिष्ठमावाह० स्थाप० ॥ भो वसिष्ठ इहागच्छ इह तिष्ठ ॥ ९९ ॥ ईशान्याम्– ॐ भूर्भुवः स्वः भृगवे नमः भृगुमावाह० स्थाप० ॥ भो भृगो इहागच्छ इह तिष्ठ ॥ १०० ॥ प्रतिष्ठापनम्–ॐ मनोजूतिर्जुष० ॥ ॐ भूर्भुवः स्वः हरिहरात्मकमण्डले सर्वतोभद्रमण्डलदेवतासमन्वितद्वादशलिङ्गतोमण्डलदेवताः सुप्रतिष्ठिता वरदा भवत ॥ ॐ भूर्भुवः स्वः (हरिहरात्मकमण्डले) सर्वतोभद्रमण्डलदेवतासमन्वितद्वादशलिङ्गतोभद्रदेवताभ्यो नमः इति नाममन्त्रेण पञ्चोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात् ॥

इति हरिहरात्मकमण्डले देवतास्थापनपूजनप्रयोगः समाप्तः ॥

अथ वास्तुमण्डलदेवतानां[1] होमः ॥

१ ॐ ब्रह्मणे नमः स्वाहा ।
२ ॐ अर्यम्णे नमः स्वाहा ।
३ ॐ विवस्वते नमः स्वाहा ।
४ ॐ मित्राय नमः स्वाहा ।
५ ॐ पृथ्वीधराय नमः स्वाहा ।
६ ॐ सावित्राय नमः स्वाहा ।
७ ॐ सवित्रे नमः स्वाहा ।
८ ॐ विबुधाधिपाय नमः स्वाहा ।
९ ॐ जयाय नमः स्वाहा ।
१० ॐ राजयक्ष्मणे नमः स्वाहा ।
११ ॐ रुद्राय नमः स्वाहा ।
१२ ॐ अद्भ्यो नमः स्वाहा ।
१३ ॐ आपवत्साय नमः स्वाहा ।
१४ ॐ शिखिने नमः स्वाहा ।
१५ ॐ पर्जन्याय नमः स्वाहा ।
१६ ॐ जयन्ताय नमः स्वाहा ।
१७ ॐ कुलिशाय नसः स्वाहा ।
१८ ॐ सूर्याय नमः स्वाहा ।
१९ ॐ सत्याय नमः स्वाहा ।
२० ॐ भृशाय नमः स्वाहा ।
२१ ॐ आकाशाय नमः स्वाहा ।
२२ ॐ वायवे नमः स्वाहा ।
२३ ॐ पूष्णे नमः स्वाहा ।
२४ ॐ वितथाय नमः स्वाहा ।
२५ ॐ गृहक्षताय नमः स्वाहा ।
२६ ॐ यमाय नमः स्वाहा ।
२७ ॐ गन्धर्वाय नमः स्वाहा ।
२८ ॐ भृङ्गराजाय नमः स्वाहा ।
२९ ॐ मृगाय नमः स्वाहा ।
३० ॐ पितृभ्यो नमः स्वाहा ।
३१ ॐ दौवारिकाय नमः स्वाहा ।
३२ ॐ सुग्रीवाय नमः स्वाहा ।
३३ ॐ पुष्पदन्ताय नमः स्वाहा ।
३४ ॐ वरुणाय नमः स्वाहा ।
३५ ॐ असुराय नमः स्वाहा ।
३६ ॐ शोषाय नमः स्वाहा ।
३७ ॐ पापाय नमः स्वाहा ।
३८ ॐ रोगाय नमः स्वाहा ।
३९ ॐ अहये नमः स्वाहा ।
४० ॐ मुख्याय नमः स्वाहा ।
४१ ॐ भल्लाटाय नमः स्वाहा ।
४२ ॐ सोमाय नमः स्वाहा ।
४३ ॐ सर्पाय नमः स्वाहा ।
४४ ॐ अदित्यै नमः स्वाहा ।
४५ ॐ दित्यै नमः स्वाहा ।
४६ ॐ चरक्यै नमः स्वाहा ।
४७ ॐ विदार्यै नमः स्वाहा ।
४८ ॐ पूतनायै नमः स्वाहा ।
४९ ॐ पापराक्षस्यै नमः स्वाहा ।
५० ॐ स्कन्दाय नमः स्वाहा ।

---

[1] नाममन्त्राणां मन्त्रत्वे गारुडोक्तवचनं प्रमाणम्—यथा प्रणवादिनमोन्तं च चतुर्थ्यन्तं च सत्तम । देवतायाः स्वकं नाम नाममन्त्रः प्रकीर्तितः ॥

५१ ॐ अर्यम्णे नमः स्वाहा ।
५२ ॐ जृम्भकाय नमः स्वाहा ।
५३ ॐ पिलिपिच्छाय नमः स्वाहा ।
५४ ॐ इन्द्राय नमः स्वाहा ।
५५ ॐ अग्नये नमः स्वाहा ।
५६ ॐ यमाय नमः स्वाहा ।
५७ ॐ निर्ऋतये नमः स्वाहा ।
५८ ॐ वरुणाय नमः स्वाहा ।
५९ ॐ वायवे नमः स्वाहा ।
६० ॐ कुबेराय नमः स्वाहा ।
६१ ॐ ईशानाय नमः स्वाहा ।
६२ ॐ ब्रह्मणे नमः स्वाहा ।
६३ ॐ अनन्ताय नमः स्वाहा ।

इति वास्तुमण्डलदेवतानां होमः ॥

अथ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीसमन्वित-गजाननादिचतुःषष्टियोगिनीनां होमः ॥

१ ॐ महाकाल्यै नमः स्वाहा ।
२ ॐ महालक्ष्म्यै नमः स्वाहा ।
३ ॐ महासरस्वत्यै नमः स्वाहा ।
४ ॐ गजाननायै नमः स्वाहा ।
५ ॐ सिंहमुख्यै नमः स्वाहा ।
६ ॐ गृध्रास्यांयै नमः स्वाहा ।
७ ॐ काकतुण्डिकायै नमः स्वाहा ।
८ ॐ उष्ट्रग्रीवायै नमः स्वाहा ।
९ ॐ हयग्रीवायै नमः स्वाहा ।
१० ॐ वाराह्यै नमः स्वाहा ।
११ ॐ शरभाननायै नमः स्वाहा ।
१२ ॐ उलूकिकायै नमः स्वाहा ।
१३ ॐ शिवारावायै नमः स्वाहा ।
१४ ॐ मयूर्यै नमः स्वाहा ।
१५ ॐ विकटाननायै नमः स्वाहा ।
१६ ॐ अष्टवक्रायै नमः स्वाहा ।
१७ ॐ कोटराक्ष्यै नमः स्वाहा ।
१८ ॐ कुब्जायै नमः स्वाहा ।
१९ ॐ विकटलोचनायै नमः स्वाहा ।
२० ॐ शुष्कोदर्यै नमः स्वाहा ।
२१ ॐ ललज्जिह्वायै नमः स्वाहा ।
२२ ॐ श्वदंष्ट्रायै नमः स्वाहा ।
२३ ॐ वानराननायै नमः स्वाहा ।
२४ ॐ ऋक्षाक्ष्यै नमः स्वाहा ।
२५ ॐ केकराक्ष्यै नमः स्वाहा ।
२६ ॐ बृहत्तुण्डायै नमः स्वाहा ।
२७ ॐ सुराप्रियायै नमः स्वाहा ।
२८ ॐ कपालहस्तायै नमः स्वाहा ।
२९ ॐ रक्ताक्ष्यै नमः स्वाहा ।
३० ॐ शुक्यै नमः स्वाहा ।
३१ ॐ श्येन्यै नमः स्वाहा ।
३२ ॐ कपोतिकायै नमः स्वाहा ।
३३ ॐ पाशहस्तायै नमः स्वाहा ।
३४ ॐ दण्डहस्तायै नमः स्वाहा ।

३५ ॐ प्रचण्डायै नमः स्वाहा ।
३६ ॐ चण्डविक्रमायै नमः स्वाहा ।
३७ ॐ शिशुघ्न्यै नमः स्वाहा ।
३८ ॐ पापहन्त्र्यै नमः स्वाहा ।
३९ ॐ काल्यै नमः स्वाहा !
४० ॐ रुधिरपायिन्यै नमः स्वाहा ।
४१ ॐ वसाधयायै नमः स्वाहा ।
४२ ॐ गर्भभक्षायै नमः स्वाहा ।
४३ ॐ शवहस्तायै नमः स्वाहा ।
४४ ॐ आन्त्रमालिन्यै नमः स्वाहा ।
४५ ॐ स्थूलकेश्यै नमः स्वाहा ।
४६ ॐ बृहत्कुक्ष्यै नमः स्वाहा ।
४७ ॐ सर्पास्यायै नमः स्वाहा ।
४८ ॐ प्रेतवाहनायै नमः स्वाहा ।
४९ ॐ दन्दशूककरायै नमः स्वाहा ।
५० ॐ क्रौंच्यै नमः स्वाहा ।
५१ ॐ मृगशीर्षायै नमः स्वाहा ।
५२ ॐ वृषाननायै नमः स्वाहा ।
५३ ॐ व्यात्तास्यायै नमः स्वाहा ।
५४ ॐ धूमनिःश्वासायै नमः स्वाहा ।
५५ ॐव्योमैकचरणोर्ध्वदृशे नमः स्वा० ।
५६ ॐ तापिन्यै नमः स्वाहा ।
५७ ॐ शोषणीदृष्ट्यै नमः स्वाहा ।
५८ ॐ कोटर्यै नमः स्वाहा ।
५९ ॐ स्थूलनासिकायै नमः स्वाहा ।
६० ॐ विद्युत्प्रभायै नमः स्वाहा ।
६१ ॐ बलाकास्यायै नमः स्वाहा ।
६२ ॐ मार्जार्यै नमः स्वाहा ।
६३ ॐ कटपूतनायै नमः स्वाहा ।
६४ ॐ अट्टाट्टहासायै नमः स्वाहा ।
६५ ॐ कामाक्ष्यै नमः स्वाहा ।
६६ ॐ मृगाक्ष्यै नमः स्वाहा ।
६७ ॐ मृगलोचनायै नमः स्वाहा ।

इति गजाननादिचतुःषष्टियोगिनीनां होमः ॥

अथैकपञ्चाशत्क्षेत्रपालदेवतानां होमः ॥

१ ॐ क्षेत्रपालाय नमः स्वाहा ।
२ ॐ अजराय नमः स्वाहा ।
३ ॐ व्यापकाय नमः स्वाहा ।
४ ॐ इन्द्रचौराय नमः स्वाहा ।
५ ॐ इन्द्रमूर्तये नमः स्वाहा ।
६ ॐ उक्षाय नमः स्वाहा ।
७ ॐ कूष्माण्डाय नमः स्वाहा ।
८ ॐ वरुणाय नमः स्वाहा ।
९ ॐ बटुकाय नमः स्वाहा ।
१० ॐ विमुक्ताय नमः स्वाहा ।
११ ॐ लिप्तकाय नमः स्वाहा ।
१२ ॐ लिलाकाय नमः स्वाहा ।
१३ ॐ एकदंष्ट्राय नमः स्वाहा ।
१४ ॐ ऐरावताय नमः स्वाहा ।
१५ ॐ ओषधिघ्नाय नमः स्वाहा ।
१६ ॐ बन्धनाय नमः स्वाहा ।
१७ ॐ दिव्यकाय नमः स्वाहा ।
१८ ॐ कम्बलाय नमः स्वाहा ।

१९ ॐ भीषणाय नमः स्वाहा ।
२० ॐ गवयाय नमः स्वाहा ।
२१ ॐ घण्टाय नमः स्वाहा ।
२२ ॐ व्यालाय नमः स्वाहा ।
२३ ॐ अणवे नमः स्वाहा ।
२४ ॐ चन्द्रवारुणाय नमः स्वाहा ।
२५ ॐ पटाटोपाय नमः स्वाहा ।
२६ ॐ जटालाय नमः स्वाहा ।
२७ ॐ क्रतवे नमः स्वाहा ।
२८ ॐ घण्टेश्वराय नमः स्वाहा ।
२९ ॐ विटङ्काय नमः स्वाहा ।
३० ॐ मणिमानाय नमः स्वाहा ।
३१ ॐ गणबन्धवे नमः स्वाहा ।
३२ ॐ डामराय नमः स्वाहा ।
३३ ॐ ढुण्ढिकर्णाय नमः स्वाहा ।
३४ ॐ स्थविराय नमः स्वाहा ।
३५ ॐ दन्तुराय नमः स्वाहा ।
३६ ॐ धनदाय नमः स्वाहा ।
३७ ॐ नागकर्णाय नमः स्वाहा ।
३८ ॐ महाबलाय नमः स्वाहा ।
३९ ॐ फेत्काराय नमः स्वाहा ।
४० ॐ चीकराय नमः स्वाहा ।
४१ ॐ सिंहाय नमः स्वाहा ।
४२ ॐ मृगाय नमः स्वाहा ।
४३ ॐ यक्षाय नमः स्वाहा ।
४४ ॐ मेघवाहनाय नमः स्वाहा ।
४५ ॐ तीक्ष्णोष्ठाय नमः स्वाहा ।
४६ ॐ अनलाय नमः स्वाहा ।
४७ ॐ शुक्लतुण्डाय नमः स्वाहा ।
४८ ॐ सुधालापाय नमः स्वाहा ।
४९ ॐ बर्वरकाय नमः स्वाहा ।
५० ॐ पवनाय नमः स्वाहा ।
५१ ॐ पावनाय नमः स्वाहा ।

इति क्षेत्रपालदेवतानां होमः ॥

अथ सर्वतोभद्रमण्डलदेवतानां होमः ॥

१ ॐ ब्रह्मणे नमः स्वाहा ।
३ ॐ सोमाय नमः स्वाहा ।
२ ॐ ईशानाय नमः स्वाहा ।
४ ॐ इन्द्राय नमः स्वाहा ।
५ ॐ अग्नये नमः स्वाहा ।
६ ॐ यमाय नमः स्वाहा ।
७ ॐ निर्ऋतये नमः स्वाहा ।
८ ॐ वरुणाय नमः स्वाहा ।
९ ॐ वायवे नमः स्वाहा ।
१० ॐ अष्टवसुभ्यो नमः स्वाहा ।
११ ॐ एकादशरुद्रेभ्यो नमः स्वाहा ।
१२ ॐ द्वादशादित्येभ्यो नमः स्वाहा ।
१३ ॐ अश्विभ्यां नमः स्वाहा ।
१४ ॐसपैतृकविश्वेभ्यो देवेभ्यो०स्वा०।
१५ ॐ सप्तयक्षेभ्यो नमः स्वाहा ।
१६ ॐ भूतनागेभ्यो नमः स्वाहा ।

१७ ॐ गन्धर्वाप्सरोभ्यो नमः स्वाहा ।
१८ ॐ स्कन्दाय नमः स्वाहा ।
१९ ॐ नन्दीश्वराय नमः स्वाहा ।
२० ॐ शूलमहाकालाभ्यां नमः स्वाहा
२१ ॐ दक्षादिसप्तगणेभ्यो नमःस्वाहा ।
२२ ॐ दुर्गायै नमः स्वाहा ।
२३ ॐ विष्णवे नमः स्वाहा ।
२४ ॐस्वधासहितपितृभ्योनमःस्वाहा।
२५ ॐ मृत्युरोगाभ्यां नमः स्वाहा ।
२६ ॐ गणपतये नमः स्वाहा ।
२७ ॐ अद्भ्यो नमः स्वाहा ।
२८ ॐ मरुद्भ्यो नमः स्वाहा ।
२९ ॐ पृथिव्यै नमः स्वाहा ।
३० ॐ गङ्गादिनदीभ्यो नमः स्वाहा ।
३१ ॐ सप्तसागरेभ्यो नमः स्वाहा ।
३२ ॐ मेरवे नमः स्वाहा ।
३३ ॐ गदायै नमः स्वाहा ।
३४ ॐ त्रिशूलाय नमः स्वाहा ।
३५ ॐ वज्राय नमः स्वाहा ।
३६ ॐ शक्तये नमः स्वाहा ।
३७ ॐ दण्डाय नमः स्वाहा ।
३८ ॐ खड्गाय नमः स्वाहा ।
३९ ॐ पाशाय नमः स्वाहा ।
४० ॐ अङ्कुशाय नमः स्वाहा ।
४१ ॐ गौतमाय नमः स्वाहा ।
४२ ॐ भरद्वाजाय नमः स्वाहा ।
४३ ॐ विश्वामित्राय नमः स्वाहा ।
४४ ॐ कश्यपाय नमः स्वाहा ।
४५ ॐ जमदग्नये नमः स्वाहा ।
४६ ॐ वसिष्ठाय नमः स्वाहा ।
४७ ॐ अत्रये नमः स्वाहा ।
४८ ॐ अरुन्धत्यै नमः स्वाहा ।
४९ ॐ ऐन्द्र्यै नमः स्वाहा ।
५० ॐ कौमार्यै नमः स्वाहा ।
५१ ॐ ब्राह्म्यै नमः स्वाहा ।
५२ ॐ वाराह्यै नमः स्वाहा ।
५३ ॐ चामुण्डायै नमः स्वाहा ।
५४ ॐ वैष्णव्यै नमः स्वाहा ।
५५ ॐ माहेश्वर्यै नमः स्वाहा ।
५६ ॐ वैनायक्यै नमः स्वाहा ।

इति सर्वतोभद्रमण्डलदेवतानां होमः ॥

त्रयश्चत्वारिंद्रेखात्मकहरिहरमण्डलस्थद्वादशलिङ्गतोभद्रदेवतानां होमः ॥

१ ॐ शिवाय नमः स्वाहा ।
२ ॐ तत्पुरुषाय नमः स्वाहा ।
३ ॐ पशुपतये नमः स्वाहा ।
४ ॐ उग्राय नमः स्वाहा ।
५ ॐ अघोराय नमः स्वाहा ।
६ ॐ रुद्राय नमः स्वाहा ।
७ ॐ शर्वाय नमः स्वाहा ।
८ ॐ सद्योजाताय नमः स्वाहा ।
९ ॐ सर्वजाताय नमः स्वाहा ।
१० ॐ महालिङ्गाय नमः स्वाहा ।

११ ॐ वामदेवाय नमः स्वाहा ।
१२ ॐ भीमाय नमः स्वाहा ।
१३ ॐ असितांगभैरवाये नमः स्वाहा ।
१४ ॐ रुरुभैरवाय नमः स्वाहा ।
१५ ॐ चण्डभैरवाय नमः स्वाहा ।
१६ ॐ क्रोधभैरवाय नमः स्वाहा ।
१७ ॐ उन्मत्तभैरवाय नमः स्वाहा ।
१८ ॐ कपालीभैरवाय नमः स्वाहा ।
१९ ॐ भीषणभैरवाय नमः स्वाहा ।
२० ॐ संहारभैरवाय नमः स्वाहा ।
२१ ॐ भवाय नमः स्वाहा ।
२२ ॐ शर्वाय नमः स्वाहा ।
२३ ॐ ईशानाय नमः स्वाहा ।
२४ ॐ पशुपतये नमः स्वाहा ।
२५ ॐ रुद्राय नमः स्वाहा ।
२६ ॐ उग्राय नमः स्वाहा ।
२७ ॐ भीमाय नमः स्वाहा ।
२८ ॐ महते नमः स्वाहा ।
२९ ॐ शूलिने नमः स्वाहा ।
३० ॐ चन्द्रमौलिने नमः स्वाहा ।
३१ ॐ चन्द्रमसे नमः स्वाहा ।
३२ ॐ वृषभध्वजाय नमः स्वाहा ।
३३ ॐ त्रिलोचनाय नमः स्वाहा ।
३४ ॐ शक्तिधराय नमः स्वाहा ।
३५ ॐ महेश्वराय नमः स्वाहा ।
३६ ॐ शूलधारिणे नमः स्वाहा ।
३७ ॐ अनन्ताय नमः स्वाहा ।
३८ ॐ तक्षकाय नमः स्वाहा ।
३९ ॐ कुलिशाय नमः स्वाहा ।
४० ॐ कर्कोटकाय नमः स्वाहा ।
४१ ॐ शङ्खपालाय नमः स्वाहा ।
४२ ॐ कम्वलाय नमः स्वाहा ।
४३ ॐ अश्वतराय नमः स्वाहा ।
४४ ॐ पृथिव्यै नमः स्वाहा ।
४५ ॐ भूम्यै नमः स्वाहा ।
४६ ॐ हैहयाय नमः स्वाहा ।
४७ ॐ माल्यवते नमः स्वाहा ।
४८ ॐ पारिजाताय नमः स्वाहा ।
४९ ॐ दिक्पतये नमः स्वाहा ।
५० ॐ महादेवाय नमः स्वाहा ।
५१ ॐ विष्णवे नमः स्वाहा ।
५२ ॐ माल्यवते नमः स्वाहा ।
५३ ॐ महारुद्राय नमः स्वाहा ।
५४ ॐ कालाग्निरुद्राय नमः स्वाहा ।
५५ ॐ द्वादशादित्येभ्यो नमः स्वाहा ।
५६ ॐ महेश्वराय नमः स्वाहा ।
५७ ॐ मृत्युरोगाभ्यां नमः स्वाहा ।
५८ ॐ वैनायक्यै नमः स्वाहा ।
५९ ॐ शाकुन्तलेयाय नमः स्वाहा ।
६० ॐ भरताय नमः स्वाहा ।
६१ ॐ नलाय नमः स्वाहा ।
६२ ॐ रामाय नमः स्वाहा ।
६३ ॐ सार्वभौमाय नमः स्वाहा ।
६४ ॐ नैषधाय नमः स्वाहा ।
६५ ॐ विन्ध्याचलाय नमः स्वाहा ।
६६ ॐ हेमकूटाय नमः स्वाहा ।
६७ ॐ गन्धमादनाय नमः स्वाहा ।
६८ ॐ कुलाचलाय नमः स्वाहा ।

६९ ॐ हिमाचलाय नमः स्वाहा ।
७० ॐ पृथिव्यै नमः स्वाहा ।
७१ ॐ अनन्ताय नमः स्वाहा ।
७२ ॐ कमलासनाय नमः स्वाहा ।
७३ ॐअश्विनीकुमाराभ्यां नमः स्वाहा ।
७४ ॐ विश्वेभ्यो देवेभ्यो नमः स्वाहा ।
७५ ॐ पितृभ्यो नमः स्वाहा ।
७६ ॐ नागेभ्यो नमः स्वाहा ।
७७ ॐ इन्द्राय नमः स्वाहा ।
७८ ॐ अग्नये नमः स्वाहा ।
७९ ॐ यमाय नमः स्वाहा ।
८० ॐ निर्ऋतये नमः स्वाहा ।
८१ ॐ वरुणाय नमः स्वाहा ।
८२ ॐ वायवे नमः स्वाहा ।
८३ ॐ कुबेराय नमः स्वाहा ।
८४ ॐ ईशानाय नमः स्वाहा ।
८५ ॐ वज्राय नमः स्वाहा ।
८६ ॐ शक्तये नमः स्वाहा ।
८७ ॐ दण्डाय नमः स्वाहा ।
८८ ॐ खड्गाय नमः स्वाहा ।
८९ ॐ पाशाय नमः स्वाहा ।
९० ॐ अङ्कुशाय नमः स्वाहा ।
९१ ॐ त्रिशूलाय नमः स्वाहा ।
९२ ॐ गदायै नमः स्वाहा ।
९३ ॐ कश्यपाय नमः स्वाहा ।
९४ ॐ अत्रये नमः स्वाहा ।
९५ ॐ भरद्वाजाय नमः स्वाहा ।
९६ ॐ विश्वामित्राय नमः स्वाहा ।
९७ ॐ गौतमाय नमः स्वाहा ।
९८ ॐ जमदग्नये नमः स्वाहा ।
९९ ॐ वसिष्ठाय नमः स्वाहा ।
१०० ॐ भृगवे नमः स्वाहा ॥

इति हरिहरात्मकद्वादशलिङ्गतोभद्रदेवतानां होमः ॥

अथ प्रारब्धस्य कर्मण उत्तरतन्त्रारम्भः ॥

तत्रादावाचारात् फलादीनां होमः ॥

सपत्नीको यजमानः कुण्डस्य पश्चिमभागे उपविश्य आचमनं प्राणायामञ्च कृत्वा हस्ते जलं गृह्णीयात् ॥

अद्येत्यादि० शुभपुण्यतिथौ मया प्रारब्धस्य सग्रहमखामुककर्मणः साङ्गतासिद्ध्यर्थमाचारात् फलहोमं करिष्ये ॥

---

[1] ततो ॐ मण्डुकाय नमः स्वाहा इति पीठदेवतानां होमस्तदनन्तरं प्रारब्धस्य कर्मणो मुख्यदेवस्य यन्त्रदेवानाञ्च होमस्ततो व्याहृतिहोमस्तदनन्तरमुत्तरतन्त्रारम्भः ॥

स्रुचिमध्ये[1] घृतेन सह द्राक्षां निधाय—ॐ आकृष्णेन रजं० ॥ ४३/३१ ॥ ॐ भूर्भुवः स्वः सूर्याय नमः स्वाहा ॥१॥ पुनः स्रुचिमध्ये आज्येन सह इक्षु निधाय—ॐ इमन्देवा० ॥ ४०/९ ॥ ॐ भूर्भुवः स्वः सोमाय नमः स्वाहा ॥ २ ॥ पुनः स्रुचिमध्ये आज्येन सह पूगं निधाय—अग्निर्म्मूर्द्धा० ॥ १२/३ ॥ ॐ भूर्भुवः स्वः भौमाय नमः स्वाहा ॥ ३ ॥ पुनः स्रुचिमध्ये नारिङ्गं निधाय—ॐ उद्बुद्ध्यस्वाग्ने० ॥ ॥ ६१/१८ ॥ ॐ भूर्भुवः स्वः बुधाय नमः स्वाहा ॥ ४ ॥ पुनः स्रुचिमध्ये आज्येन सह जम्बीरं निधाय। ॐ बृहस्प्पतेऽअति०॥३/२५॥ ॐ भूर्भुवः स्वः बृहस्पतये नमः स्वाहा ॥५॥ पुनः स्रुचिमध्ये आज्येन सह बीजपूरकं निधाय—ॐ अन्नात्परि०॥७५/१९॥ ॐ भूर्भुवः स्वः शुक्राय नमः स्वाहा ॥६॥ पुनः स्रुचिमध्ये आज्येन सह उत्ततीं निधाय—ॐ शन्नोदेवी० ॥ १२/३६ ॥ ॐ भूर्भुवः स्वः शनैश्चराय नमः स्वाहा ॥ ७ ॥ पुनः स्रुचिमध्ये आज्येन सह नारिकेलं निधाय—ॐ कयानश्चि० ॥ ४/३६ ॥ ॐ भूर्भुवः स्वः राहवे नमः स्वाहा ॥ ८ ॥ पुनः स्रुचिमध्ये आज्येन सह दाडिमं निधाय—ॐ केतुं कृण्वन्न० ॥३७/२९॥ ॐ भूर्भुवः स्वः केतवे नमः स्वाहा ॥ ९ ॥ इति नवग्रहाणां फलहोमः ॥

---

[1] फलहोमस्यानावश्यकत्वं सर्वैर्बुद्ध्यते, तथाप्याचारात् सर्वत्र सर्वैः क्रियते । अत एवास्माभिरपि प्रदत्तः ॥ सूर्यादीनां क्रमेण होमार्थं फलानि—"द्राक्षेक्षुपूगनारिङ्ग-जम्बीरबीजपूरकम् ॥ उत्तती नारिकेलं च दाडिमं क्रमशः फलम् ॥"

अथ **गुग्गुलहोमः**— हस्ते जलमादाय ॥ अद्येत्याद्युच्चार्यं मम गृहे भूतादिसमग्रदोषपरिहारार्थं त्र्यम्बकमितिमन्त्रेण गुग्गुलहोमं करिष्ये। ॐ त्र्यम्बकँ० स्वाहा ॥ ६०/३ ॥

अथ **सर्षपहोमः**— अद्येत्याद्युच्चार्य मम सर्वारिष्टशान्त्यर्थं शत्रुक्षयार्थञ्च "जातवेदसे०" इतिमन्त्रेण सर्षपहोममहं करिष्ये ॥ ॐ जा॒तवे॑दसेसुनवाम॒सोम॑मरातीय॒तोनिद॑हाति॒वेद॑ः ॥ सनः॑पर्ष॒दति॑दु॒र्ग्गाणि॒विश्वा॑ना॒वेव॒सिन्धुं॑दुरि॒तात्य॒ग्निः ॥ ॐ सर्वाबाधाप्रशमनं० स्वाहा ॥ उदकस्पर्शः ॥

अथ **लक्ष्मीहोमः**— हस्ते जलमादाय अद्येत्याद्युच्चार्य मम गृहे अलक्ष्मीविनाशानार्थं दशविधलक्ष्मीप्राप्त्यर्थञ्च लक्ष्मीहोममहं करिष्ये ॥ ततः सीताफलं क्षीरमाज्यं दाडिमं मधु शर्करां दूर्वां शमीं तण्डुलान् नागवल्लीदलानि कदलीफलानि सर्वाण्येकस्मिन् पात्रे एकीकृत्य जुहुयात् ॥ ॐ सद॑स॒स्प्पति॒मद्भु॑तंप्प्रि॒यमिन्द्र॑स्य॒काम्म्यं॑म् ॥ स॒निम्मे॒धाम॑यासिष॒ꣳस्वाहा॑ ॥ १३/३२ ॥ याम्मे॒धान्दे॑वग॒णाःपि॒तर॑श्चोपास॑ते ॥ त॒यामाम॒द्यमे॒धया॑ग्ने॒मे॒धावि॑नंकुरु॒स्वाहा॑ ॥ १३/३२ ॥ मे॒धाम्मे॒वरु॑णोददातु॒मे॒धाम॒ग्निःप्र॒जाप॑तिः ॥ मे॒धामिन्द्र॑श्चवा॒युश्च॑मे॒धान्धा॒ताद॑दातु॒मेस्वाहा॑ ॥ १५/३२ ॥ इ॒दंमे॒ब्रह्म॑चक्ष॒त्रञ्चो॒भेश्श्रिय॑मश्नुताम् ॥ मयि॑दे॒वाद॑धतु॒श्श्रिय॑मुत्त॒मान्तस्यै॑ ते॒ स्वाहा॑ ॥ १६/३२ ॥ मम गृहे लक्ष्मीः स्थिरा भवतु। इति लक्ष्मीहोमः।

इति फलादीनां होमः ॥

॥ अथ स्थापितदेवतानामुत्तरपूजनम् ॥

हस्ते जलं गृहीत्वा। मया प्रारब्धस्य अमुककर्मणः साङ्गतासिद्ध्यर्थं स्थापितदेवतानां मृडाग्नेश्चोत्तरपूजां करिष्ये ।

आग्नेय्यां गणपतिपूजनम्– ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहे निधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम । आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥ $\frac{१९}{२३}$ ॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहिताय श्रीगजाननाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम०॥

अथ मातृकापूजनम्– ॐ समख्ख्येदेव्याधियासन्दक्षिणयोरुचक्क्षसा । मामऽआयुꣳष्प्रमोषीर्म्मोऽअहन्तवव्वीरंव्विदेयतवदेविसन्दृशि ॥ $\frac{२३}{४}$ ॥ ॐ भूर्भुवः स्वः सगणेशगौर्याद्यावाहितमातृभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ।

अथ सप्तवसोर्धारापूजनम्–ॐ श्रीश्चतेलक्क्ष्मीश्चपत्क्न्यावहोरात्रेपार्श्वेनक्क्षत्राणिरूपमश्श्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्वंलोकम्मऽइषाण ॥ $\frac{२२}{३१}$ ॥ ॐ भूर्भुवः स्वः श्र्यादिवसोर्धारादेवताभ्यो नमः गन्धाक्षतपुष्पाणि सम० ॥

नैर्ऋत्यां वास्तुपुरुषपूजनम्– ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोऽ अनमीवो भवानः । यत्त्वे महे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे ॥ ॐ भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवतासहिताय वास्तुपुरुषाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

आग्नेय्यां गौर्यादीनां दक्षिणभागे योगिनीपूजनम्—ॐ योगे॑योगेत॒वस्त॑रं॒वाजे॑ वाजे हवामहे । सखा॑य॒ऽइन्द्र॑मू॒तये॑ ॥ १४/११ ॥ ॐ भूर्भुवः स्वः श्रीमहाकालीमहालक्ष्मीमहासरस्वतीसहिताभ्यो गजाननादिचतुःषष्टियोगिनीभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥

वायव्यां क्षेत्रपालपूजनम्—ॐ न॒हिस्पश॒मवि॑दन्न॒न्यम॒स्माद्वै॑श्वान॒रात्पु॑रऽए॒तार॑म॒ग्नेः । एमे॑नमवृधन्न॒मृता॒ऽअम॑र्त्यं वैश्वान॒रङ्क्षैत्र॑जित्यायदे॒वाः ॥ ६०/३३ ॥ ॐ भूर्भुवः स्वः क्षेत्रपालसहितेभ्योऽजराद्येकपञ्चाशत्क्षेत्रपालदेवेभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥

अग्निपूजनम्—ॐ अग्ने॒नय॑सु॒पथा॑रा॒येऽअ॒स्मान्विश्वा॑निदेवव॒युना॑निवि॒द्वान् । यु॒यो॒ध्य॒स्मज्जु॑हुरा॒णमेनो॒भूयि॑ष्ठान्ते॒नम॑ऽउक्तिंविधेम ॥ ३६/५ ॥ ॐ भूर्भुवः स्वः अग्नये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥

ब्रह्मपूजनम्—ॐ ब्रह्म॑जज्ञा॒नम्० ॥ ॐ भूर्भुवः स्वः कर्मसाक्षिणे ब्रह्मणे नमः सर्वोप० गन्धाक्षत० सम० ॥

ईशान्यां सूर्यादिनवग्रहमण्डलदेवतापूजनम्—ॐग्रहा॑ऽऊर्ज्जाहुतयो॒व्यन्तो॒विप्रा॑तम॒तिम् । तेषा॒म्विशि॑प्रियाणांवो॒हमिष॒मूर्ज्ज॒ꣳसम॑ग्रभमुपया॒मगृ॑हीतो॒सीन्द्रा॑यत्त्वा॒जुष्ट॑ङ्गृह्णाम्म्ये॒षते॒योनि॒रिन्द्रा॑यत्त्वा॒जुष्ट॑तमम् ॥ ५/८ ॥ ॐ भूर्भुवः स्वः सूर्यादिनवग्रहमण्डलदेवेभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥

मध्ये सर्वतोभद्रमण्डलादिदेवतासहितस्य मुख्यदेवस्य पूजनम्– ॐ ब्रह्म॑जज्ज्ञा॒नम्प्र॑थ॒मम्पु॒रस्ता॒द्विसी॑म॒तः सु॒रुचो॑ वे॒नऽआ॑वः । सबु॒ध्न्याऽउप॒माऽअ॑स्य वि॒ष्ठाः स॒तश्च॒ योनि॒मस॑तश्च॒ विव॑: ॥ $\frac{३}{१३}$ ॥ ॐ भूर्भुवः स्वः सर्वतोभद्रमण्डलदेवतासमन्विताय साङ्गाय सपरिवाराय [1]अमुकदेवाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

ॐ भूर्भुवः स्वः गणपत्यादिस्थापितदेवेभ्यो नमः धूपमाघ्रापयामि । ॐ भूर्भुवः स्वः गणपत्यादिस्थापितदेवेभ्यो नमः दीपं दर्शयामि। ॐ भूर्भुवः स्वः गणपत्यादिस्थापितदेवेभ्यो नमः नैवेद्यं निवेदयामि । ॐ भूर्भुवः स्वः गणपत्यादिस्थापितदेवेभ्यो नमः मुखवासार्थे पूगीफलं ताम्बूलञ्च सम० ॥ ॐ भूर्भुवः स्वः गणपत्यादिस्थापितदेवेभ्यो नमः यथाशक्ति प्रत्येकं महादक्षिणां सम० ॥ ॐ भूर्भुवः स्वः गणपत्यादिस्थापितदेवेभ्यो नमः कर्पूरारार्तिक्यं सम० ॥ ॐ भूर्भुवः स्वः गणपत्यादिस्थापितदेवेभ्यो नमः मन्त्रपुष्पाञ्जलिं सम०॥ ॐ भूर्भुवः स्वः गणपत्यादिस्थापितदेवेभ्यो नमः सफलं विशेषार्घं सम० ॥ हस्ते जलमादाय– अनया पूजया ॐ भू० गणपत्यादिस्थापितदेवाः प्रीयन्तां न मम ॥

इति स्थापितदेवतानां पूजनम् ॥

---

[1] अत्र श्रीमहारुद्राय, श्रीलक्ष्मीनारायणाय, भगवत्यै श्रीदुर्गादेव्यै इत्यादि आरब्धस्य कर्मणो मुख्यदेवस्य नाम वाच्यम् ॥

अथ ब्रह्मणः[1] प्रायश्चिताहुतिः ॥

ब्रह्मा प्रायश्चित्ताहुत्यर्थं हस्ते जलं गृहीत्वा सङ्कल्पं कुर्यात् ॥ अस्मिन्सग्रहमखामुककर्मणि प्रारम्भतः आसमासि देशतः कालतः तन्त्रतो मन्त्रतश्च ज्ञानतोऽज्ञानतश्च तत्तत्कर्मणि प्रधानाङ्गदेवतानाञ्च विहितसमिधादिहवनीयद्रव्याणां न्यूनाधिकान्यथाकरणजनितप्रत्यवायपरिहारार्थं (तथा च) होमद्रव्येषु कृमिकीटादिसम्भवजनितप्रत्य॰ (तथैव च) बहिःसञ्चरतां कृमिकीटादीनामग्नौ पतनजनितप्रत्य॰ (तथा च) होमप्रदानसमयेऽग्नौ स्वाहाकारोत्तराव्यवहिताहुतिप्रक्षेपाभावजनितप्रत्यवायपरिहारार्थं (तथैव) प्रणीताग्न्योर्मध्ये गमनजनितप्रत्य॰ (तथाच) कदाचित् परिस्तरणादीनां दाहजनितप्रत्यवाय॰ (तथाच) होमप्रदाने हवनीयद्रव्याणां कुण्डाद्बहिःपतनजनितप्रत्यवायपरिहारार्थं (तथैव) होमप्रदाने तत्तद्देवतामन्त्राणामुच्चारणे ह्रस्वदीर्घप्लुतस्वरितोदात्तादीनां व्यत्ययोच्चारणजनित-

---

[1] प्रधानसङ्कल्पानन्तरं प्रारब्धे तत्तत्कर्मणि पूर्णाहुतेः प्राक् प्रमादादनवधानतया च मन्त्रोच्चारे, तत्तत्कर्मणि तत्तद्धवनीयद्रव्याणां न्युनाधक्ये, हविःप्रक्षेपनवेलायां मन्त्रोच्चारणाव्यवहिताहुतिप्रक्षेपाभावे, तथैव कर्मणि वृतैर्विप्रैराचार्येण च स्वस्वकर्मणां मानुषदोषेण कृतस्य तत्तत्कर्मवैगुण्यस्य परिहारार्थं कर्मणां फलसम्पत्त्यर्थञ्च स्मार्तकर्मणि ब्रह्मण एव प्रधानाङ्गत्वेन स्वीकाराद्ब्रह्मा प्रायश्चित्तं जुहुयात् इति काशीदीक्षितादिपण्डितप्रवरैः स्वीकाराद्दीयते प्रायश्चित्ताहुतिः ॥ अन्यैरभियुक्तैर्विद्वद्भिर्ब्रह्मणः प्रायश्चित्ताहुतरेनावश्यकत्त्वमुच्यते ॥ "याजुषां सर्वप्रायश्चित्ताहुतौ" तस्यान्तर्भावात् ॥ स्मार्तविधौ रुद्रकल्पद्रुमकारैश्चानुक्तत्वाच्च ॥ अस्मिन्विषये कर्तव्यमाचार्येणोभयं स्वबुद्ध्या विचार्य शास्त्रसम्मतम् ॥

प्रत्यवायपरिहारार्थं कृतस्य सग्रहमखामुककर्मणः साद्गुण्यार्थं प्रायश्चित्तं होष्ये ॥ "ॐ अग्नये स्वाहा" इदमग्नये न मम ॥ इत्येकामाहुतिं दद्यात् ॥

इति ब्रह्मणः प्रायश्चित्ताहुतिः ॥

अथ सर्वप्रायश्चित्ताहुतयः ॥

अथ स्विष्टकृद्धोमः ॥ यजमानो [1]हविःशेषं गृहीत्वा ब्रह्मणाऽन्वारब्धो जुहुयात् ॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥ ततो [1]ब्रह्मणाऽन्वारब्धो नवाहुतीर्जुहुयात् ॥ ॐ भूः स्वाहा इदमग्नये न मम ॥१॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥२॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥ ३ ॥ ॐ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाᳪ ॥ यजिष्ठो वह्नितमᳪशोशुचानोविश्वाद्वेषांᳪसिप्प्रमुमुग्ग्ध्यस्म्मत्स्वाहा ॥ $\frac{३}{२१}$ ॥ इदमग्नीवरुणाभ्यां न मम ॥ ४ ॥ सत्त्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनोवरुणᳪरराणोवीहिमृडीकᳪ-

---

[1] पा. गृ. पञ्चमीकण्डिकायास्तृतीये चतुर्थे पञ्चमे च सूत्रे भगवता गृह्यसूत्रकारेण "अन्वारब्धऽआघारावाज्यभागौ प्राङ्महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यᳪ स्विष्टकृच्चैतन्नित्यᳪसर्वत्र" एतेनैतासु चतुर्दशाहुतिषु ब्रह्मणाऽन्वारब्धो यजमानः अग्नावाहुतीर्जुहुयात् ॥ तथैव यत्राज्याद्धविः अन्यच्चेत्तत्र स्विष्टकृदाहुतिः महाव्याहृतिभ्यः प्राक् देया । यत्र च केवलं घृतमेव हविः स्यात्तत्र तु "ॐ प्रजापतये स्वाहा" इत्याहुतिः प्राक् देया "ॐ स्विष्टकृते स्वाहा" इत्याहुतिश्च पश्चादित्येक "प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः" इत्यस्यार्थनिष्कर्षः ॥

सुहवो नऽएधि स्वाहा ॥ ४/१२ ॥ इदमग्नीवरुणाभ्यां न मम ॥ ५ ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि । अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा ॥ इदमग्नये अयसे न मम ॥ ६ ॥ ॐ येतेशतं वरुण ये सहस्रं यज्ञियाः पाशा विततामहान्तः ॥ तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ ७ ॥ ॐ उदुत्तमं व्वरुणपाशमस्मदवाधमं व्विमध्यमꣳश्रथाय । अथाव्वयमादित्त्यंव्व्रते तवानामसोऽअदितये स्याम स्वाहा ॥ १३/१२ ॥ इदं वरुणायादित्यायादितये च न मम ॥ ८ ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ९ ॥

इति सर्वप्रायश्चित्तनवाहुतयः ॥

अथ दिक्पालादिस्थापितदेवतानां बलिदानम् ॥

यजमानो हस्ते जलं गृहीत्वा । मया प्रारब्धस्य सग्रहमखामुककर्मणः साङ्गतासिद्ध्यर्थं दशदिक्पालदेवतानां तथाच स्थापितदेवतादीनां पूजनपूर्वकबलिदानं करिष्ये ॥

प्राच्याम्– ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनो मघवाधात्विन्द्रः ॥ ५०/२० ॥ **प्राच्यां दिशि**– इन्द्रं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं

पूजयामि । इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं बलिं सम० ॥ भो इन्द्र दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु। आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव ॥ अनेन पूजनपूर्वकबलिदानेन इन्द्रः प्रीयतां न मम ॥ १ ॥ आग्नेय्याम्– ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमः शोशुचानो विश्वाद्वेषाᳬंसिप्रमुमुग्ध्यस्मत् ॥ $\frac{३}{२१}$ ॥ आग्नेय्यां विदिशि– अग्निं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । अग्नये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं बलिं समर्पयामि । भो अग्ने दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु। आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव । अनेन पूजनपूर्वकबलिदानेन अग्निः प्रीयतां न मम ॥ २ ॥ दक्षिणस्याम्– ॐ यमायत्त्वाङ्गिरस्वतेपितृमतेस्वाहा । स्वाहा घर्म्मायस्वाहाघर्म्मःपित्रे ॥ $\frac{१}{३८}$ ॥ दक्षिणस्यां दिशि–यमं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। यमाय साङ्गाय सपरिवाराय सायुधाय सशक्ति-

काय इमं सदीपम् आसादितं बलिं समर्पयामि ॥ भो यम दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु । आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव । अनेन पूजनपूर्वकबलिदानेन यमः प्रीयतां न मम ॥ **नैर्ऋत्याम्**—ॐअसुन्वन्तमयजमानमिच्छस्तेनस्येत्त्यामन्विहितस्करस्य । अन्यमस्मदिच्छसातऽइत्त्यानमोदेवि निर्ऋते तुभ्यमस्तु ॥ ६२/१२ ॥ **नैर्ऋत्यां विदिशि**—निर्ऋतिं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । निर्ऋतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं बलिं सम० । भो निर्ऋते दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु । आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव ॥ अनेन पूजनपूर्वकबलिदानेन निर्ऋतिः प्रीयतां न मम ॥४॥ **पश्चिमायाम्**—ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोद्ध्युरुशꣳसमानऽआयुꣳष्प्रमोषीः ॥ २/२१ ॥ **पश्चिमायां दिशि**—वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । वरुणाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं बलिं सम० ॥

भो वरुण दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु। आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव ॥ अनेन पूजनपूर्वकबलिदानेन वरुणः प्रीयतां न मम ॥ ५ ॥ वायव्याम्—ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳसहस्रिणीभिरुप याहि यज्ञम् । वायोऽअस्मिन्त्सवनेमादयस्व यूयं पातस्वस्तिभिःसदा नः ॥ २८/२७ ॥ वायव्यां विदिशि—वायुं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । वायवे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं बलिं समर्पयामि। भो वायो दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु । आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव । अनेन पूजनपूर्वकबलिदानेन वायुः प्रीयतां न मम ॥ ६ ॥ उत्तरस्याम्—ॐ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तः सचेमहि ॥ ५६/३ ॥ उदीच्यां दिशि सोमं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ सोमाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं बलिं समर्पयामि। भो सोम दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य)

अभ्युदयं कुरु । आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव । अनेन पूजनपूर्वकबलिदानेन सोमः प्रीयतां न मम ॥७॥

ईशान्याम्—ॐतमीशानञ्जगतस्त्तस्थुषस्प्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम् । पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धꣳस्वस्त्तये ॥ $\frac{१८}{२५}$ ॥ **ईशान्यां विदिशि**—ईश्वरं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूज० ॥ ईश्वराय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं बलिं समर्प० ॥ भो ईश्वर दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु । आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव । अनेन पूजनपूर्वकबलिदानेन ईश्वरः प्रीयतां न मम ॥८॥

पूर्वैशानयोर्मध्ये ऊर्ध्वायाम्—ॐ अस्म्मे रुद्रामेहनापर्व्वतासोव्वृत्रहत्त्येभरहूतौसजोषाꣳ ॥ यःशꣳसतेस्तुवतेधायिपज्ज्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँ२ऽअवन्तुदेवाः ॥ $\frac{५०}{३३}$ ॥ **पूर्वैशानयोर्मध्ये ऊर्ध्वायाम्**— ब्रह्माणं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूज० ॥ ब्रह्मणे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं बलिं समर्पयामि ॥ भो ब्रह्मन् दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्यु-

दयं कुरु । आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव । अनेन पूजनपूर्वकबलिदानेन ब्रह्मा प्रीयतां न मम ॥ ९ ॥

निर्ऋतिवरुणयोर्मध्येऽधः– ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानꣳशर्म्मसप्रथाꣳ ॥ $\frac{१३}{३६}$ ॥ निर्ऋतिवरुणयोर्मध्येऽधोदिशि– अनन्तं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । अनन्ताय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं बलिं सम० ॥ भो अनन्त दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव ॥ अनेन पूजनपूर्वकबलिदानेन अनन्तः प्रीयतां न मम ॥ १० ॥

॥ इति दशदिक्पालबलिदानम् ॥

अथ[1] स्थापितदेवतानां बलिदानम् ॥

आग्नेय्यां गणपतिबलिः– ॐ गणानान्त्वा गणपतिꣳ हवामहे प्प्रियाणान्त्वा प्प्रियपतिꣳ हवामहे निधीनान्त्वां निधिपतिꣳहवामहे वसो मम ॥ आहमजानिगर्ब्भधमात्त्वमजासि गर्ब्भधम् ॥ $\frac{१९}{२३}$ ॥ ॐ भूर्भुवः स्वः गणपतिं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं

---

[1] ग्रहाणामादौ बलिदानं दत्त्वा गणपत्यादिदेवानां बलिदानमित्यपि पक्षः ॥

पूज० ॥ गणपतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं बलिं सम० ॥ भो गणपते इमं बलिं गृहाण ॥ मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव । अनेन पूजनपूर्वकबलिदानेन गणपतिः प्रीयतां न मम ॥

तद्दक्षिणे वसोर्धारासमन्वितसगणेशगौर्यादिमातृकाणां बलिः—ॐ स॒म॑क्ख्ये दे॒व्या धि॒या सन्द॑क्षिणयो॒रुच॑क्षसा । माम॒ऽआयु॒ᳬप्प्रमो॑षी॒म्मो॑ऽअ॒हन्तव॑व्वी॒रं॑व्विदे॑य॒तव॑देवि स॒न्दृशि॑ ॥२३/४॥ ॐ भूर्भुवः स्वः वसोर्धारासमन्वितसगणेशगौर्याद्यावाहितमातृः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः एभिर्गन्धाद्युपचारैः (वः) पूजयामि । ॐ भूर्भुवः स्वः वसोर्धारासमन्वितसगणेशगौर्याद्यावाहितमातृभ्यः साङ्गाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदीपम् आसादितं बलिं सम० ॥ भो भो वसोर्धारासमन्वितसगणेशगौर्याद्यावाहितमातरः इमं बलिं गृह्णीत । मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरुत । आयुःकर्त्र्यः क्षेमकर्त्र्यः शान्तिकर्त्र्यः पुष्टिकर्त्र्यः तुष्टिकर्त्र्यो निर्विघ्नकर्त्र्यः कल्याणकर्त्र्यो वरदा भवत । अनेन पूजनपूर्वकबलिदानेन वसोर्धारासमन्वितसगणेशगौर्याद्यावाहितमातरः प्रीयन्तां न मम ॥ नैर्ऋत्यां वास्तोष्पतिबलिः—

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशोऽअनमीवो भवानः। सत्वे महेप्प्रतितन्नो जुषस्व शन्नो भवद्विपदे शं चतुष्पदे ॥ ॐ भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवतासहितं वास्तुपुरुषं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि। ॐ भूर्भुवः स्वः ब्रह्मादिवास्तुमण्डलदेवतासहिताय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय वास्तुपुरुषाय इमं सदीपम् आसादितं बलिं स०॥ भो भो ब्रह्मादिवास्तुमण्डलदेवतासहितवास्तुपुरुष इमं बलिं गृहाण। मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु। आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव। अनेन पूजनपूर्वकबलिदानेन ब्रह्मादिवास्तुमण्डलदेवतासहितः वास्तुपुरुषः प्रीयतां न मम ॥ आग्नेय्यां योगिनीबलिः—ॐ योगेयोगेतवस्तरंवाजेवाजेहवामहे। सखायऽइन्द्रमूतये ॥१४/११॥ ॐ भूर्भुवः स्वः श्रीमहाकालीमहालक्ष्मीमहासरस्वतीसहिता गजाननादिचतुःषष्टियोगिनीः साङ्गाः सपरिवाराः सायुधाः सशक्तिका एभिर्गन्धाद्युपचारैः (वः) अहं पूजयामि ॥ ॐ भूर्भुवः स्वः श्रीमहाकालीमहालक्ष्मीमहासरस्वतीसहिताभ्यः गजाननादिचतुःषष्टियोगिनीभ्यः साङ्गाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदीपम् आसादितं बलिं सम० ॥ भो भो श्रीमहाकालीमहालक्ष्मीमहासरस्वतीसहिता गजाननादिचतुःषष्टियोगिन्यः इमं बलिं

गृह्णीत। मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरुत। आयुःकर्त्र्यः क्षेमकर्त्र्यः शान्तिकर्त्र्यः पुष्टिकर्त्र्यस्तुष्टिकर्त्र्यो निर्विघ्नकर्त्र्यः कल्याणकर्त्र्यो वरदा भवत। अनेन पूजनपूर्वकबलिदानेन श्रीमहाकालीमहालक्ष्मीमहासरस्वतीसहिता गजाननादिचतुःषष्टियोगिन्यः प्रीयन्तां न मम॥ वायव्यां क्षेत्रपालबलिः—ॐ नहिस्प्पशमविदन्नन्यमस्म्माद्वैश्श्वानरात्त्पुरऽएतारमग्ग्नेः।एमैनमवृधन्नमृताऽअमर्त्त्यंवैश्श्वानरङ्क्षैत्त्रजित्त्यायदेवाः ॥$\frac{६०}{३३}$॥ ॐ भूर्भुवः स्वः क्षेत्रपालसहितान् अजराद्येकपञ्चाशत्क्षेत्रपालदेवान् साङ्गान् सपरिवारान् सायुधान्सशक्तिकान् एभिर्गन्धाद्युपचारैः(वः) अहं पूजयामि। ॐ भूर्भुवः स्वः क्षेत्रपालसहितेभ्योऽजराद्येकपञ्चाशत्क्षेत्रपालदेवेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः इमं सदीपम् आसादितं बलिं सम०॥ भो भो क्षेत्रपालसहिता अजराद्येकपञ्चाशत्क्षेत्रपालदेवा इमं बलिं गृह्णीत। मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरुत। आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारो निर्विघ्नकर्तारः कल्याणकर्तारो वरदा भवत। अनेन पूजनपूर्वकबलिदानेन क्षेत्रपालसहिता अजराद्येकपञ्चाशत्क्षेत्रपालदेवाः प्रीयन्तां न मम॥

ईशान्यां नवग्रहबलिः— ॐ ग्रहाऽऊर्ज्जाहुतयोव्यन्तो विप्प्रायमतिम् ॥ तेषांव्विशिप्प्रियाणांव्वोहमिषमूर्ज्जꣳसमग्ग्रभमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनि-

रिन्द्रायत्त्वाजुष्टतमम् ॥४/६॥ ॐ भूर्भुवः स्वः सूर्यादिनवग्रहमण्डलदेवान्साङ्गान् सपरिवारान्सायुधान्सशक्तिकान् एभिर्गन्धाद्युपचारैः (वः) अहं पूजयामि । ॐ भूर्भुवः स्वः सूर्यादिनवग्रहमण्डलदेवेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः इमं सदीपम् आसादितं बलिं सम० । भो सूर्यादिनवग्रहमण्डलदेवाः इमं बलिं गृह्णीत । मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरुत । आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारस्तुष्टिकर्तारो निर्विघ्नकर्तारः कल्याणकर्तारो वरदा भवत । अनेन पूजनपूर्वकबलिदानेन सूर्यादिनवग्रहमण्डलदेवाः प्रीयन्तां न मम ॥

मध्यपीठे प्रधानदेवस्य सपरिवारस्य बलिः— ॐ ब्रह्मजज्ज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ।३/१३। ॐ भूर्भुवः स्वः [1]ब्रह्मादिसर्वतोभद्रमण्डलदेवतासमन्वितं पीठयन्त्रावरणदेवतासहितं भगवन्तं साङ्गं सपरिवारं सायुधं सशक्तिकम् अमुकदेवम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ ॐ भूर्भुवः स्वः ब्रह्मादिसर्वतोभद्रमण्डलदेवतासमन्विताय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय अमुकदेवाय नमः इमं सदीपम् आसादितं बलिं समर्पयामि ॥ भो भो ब्रह्मादिसर्वतोभद्रमण्डलदेवतासमन्वित

---

[1] श्रीमहारुद्रम्, श्रीलक्ष्मीनारायणम्, [2] त्रिगुणात्मिकां भगवतीं श्रीदुर्गादेवीम्

पीठयन्त्रावरणदेवतासहित अमुकदेव इमं बलिं गृहाण । मम सकुटुम्बस्य सपरिवारस्य (यजमानस्य) अभ्युदयं कुरु । आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव । अनेन पूजनपूर्वकबलिदानेन सर्वतोभद्रमण्डलदेवतासमन्वितः पीठयन्त्रावरणदेवतासहितः साङ्गः सपरिवारः सायुधः सशक्तिकः अमुकदेवः प्रीयतां न मम ॥

अथ **महाक्षेत्रपालबलिः**– एकस्मिन्वंशपात्रे यथाशक्ति सर्वं बलिं निधाय मध्ये बृहद्दीपं प्रज्वाल्य मण्डपाद्बहिः बलिदानं कुर्यात् ॥ हस्ते जलं गृहीत्वा । मया प्रारब्धस्य सग्रहमखामुककर्मणः साङ्गतासिद्ध्यर्थं भूतप्रेतपिशाचडाकिनीशाकिनीसमन्वितस्य सपरिवारस्य क्षेत्रपालस्य बलिदानं करिष्ये ॥ ततो गन्धाक्षतपुष्पैर्बलिपात्रे क्षेत्रपालं पूजयेत् ॥ ॐ नहिस्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरएतारमग्नेः ॥ एमैनमवृधन्नमृताऽअमर्त्त्यंवैश्वानरंक्षैत्रजित्त्यायदेवाः ॥ ६०/३३ ॥ ॐ भूर्भुवः स्वः भूतप्रेतपिशाचडाकिनीशाकिनीसहितम् क्षेत्रपालं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । ॐ भूर्भुवः स्वः भूतप्रेतपिशाचडाकिनीशाकिनीसहिताय क्षेत्रपालाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपम् आसादितं महाबलिं सम० ॥ भो भो क्षेत्रपाल इमं बलिं गृहाण । मम सकुटुम्बस्य सपरिवारस्य (यज-

मानस्य) अभ्युदयं कुरु। आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता वरदो भव। प्रार्थयेत्— नमामि क्षेत्रपाल त्वां भूतप्रेतगणावृत। पूजां बलिं गृहाणेमं सौम्यो भवतु सर्वदा ॥ १ ॥ आयुरारोग्यमैश्वर्यं देहि त्वं सर्वदा मम। मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः ॥ २ ॥ सर्वदा सर्वकार्येषु क्षेत्रपालसमन्विताः॥ सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः। ॥३॥ इति सम्प्रार्थ्य। हस्ते जलं गृहीत्वा। अनेन पूजनपूर्वकबलिदानेन भूतप्रेतपिशाचडाकिनीशाकिनीसहितः महाक्षेत्रपालः प्रीयतां न मम ॥ ततः पश्चादनवेक्षमाणः कश्चित् पुरुषो बलिपात्रं गृहीत्वा चतुष्पथे स्थापयेत् ॥ यजमानश्च बलिं नीत्वा गच्छतः पृष्ठभागे “ॐ हिङ्कारायस्वाहा०”इति मन्त्रं पठन् द्वारपर्यन्तं जलं क्षिपेत् ॥ॐ हि॒ङ्का॒राय॒स्वाहा॒ हिङ्कृ॑ताय॒स्वाहा॒ क्रन्द॑ते॒ स्वाहा॑वक्र॒न्दाय॒स्वाहा॒ प्रोथ॑ते॒स्वाहा॑ प्रप्रो॒थाय॒स्वाहा॑ग॒न्धाय॒स्वाहा॑घ्रा॒ताय॒स्वाहा॒ निवि॑ष्टाय॒स्वाहोप॑विष्टाय॒स्वाहा॒ सन्दि॑ताय॒स्वाहा॒ वल्ग॑ते॒स्वाहासी॑नाय॒स्वाहा॒ शया॑नाय॒स्वाहा॒ स्वप॑ते॒स्वाहा॒ जाग्रते॒स्वाहा॒ कूज॑ते॒स्वाहा॒ प्रबुद्धाय॒स्वाहा॑ वि॒जृम्भ॑माणाय॒स्वाहा॒ विवृ॑त्ताय॒स्वाहा॒ सꣳहा॑नाय॒स्वाहोप॑स्थिताय॒स्वाहाय॑नाय॒स्वाहा॒ प्राय॑णाय॒स्वाहा॑ ॥$\frac{७}{२२}$॥ ततः सपत्नीको यजमानः परावृत्य मण्डपाद्बहिः पाणिपादं प्रक्षाल्याचम्य मण्डपं प्रविशेत्॥

इति दिक्पालादिस्थापितदेवतादीनां बलिदानम् ॥

अथ वसोर्धारासमन्वितपूर्णाहुतिहोमः ॥

अथ पूर्णाहुतिहोमः– हस्ते जलं गृहीत्वा । मया प्रारब्धस्य सग्रहमखामुककर्मणः साङ्गतासिद्ध्यर्थं वसोर्धारासमन्वितं पूणाहुतिहोमं करिष्ये ॥ इति सङ्कल्प्य । आचार्यः कश्चिद्विप्रो वा उत्थाय आज्यस्थाल्याम् अन्यदाज्यं निरुप्य आज्यस्थालीम् अग्नौ अधिश्रयेत् । ततो युगपत् स्रुक्स्रुवौ गृहीत्वा पूर्ववत् प्राञ्चौ अधोमुखौ तापयित्वा सम्मार्गकुशैस्तयोः पूर्ववत् संस्कारान्विधाय अग्नेः पश्चिमदिशि निदध्यात् । तत आज्यमुद्वास्य पवित्राभ्यामुत्पूय आज्यमवेक्ष्य अपद्रव्यं निरस्य पवित्रे प्रणीतायां निदध्यात् ॥

ततः स्रुचि मध्ये स्रुवेण चतुर्वारम् आज्यं गृहीत्वा तदुपरि रक्तसूत्रेण वेष्टितं श्रीनारिकेरं निधाय तं गन्धाक्षतपुष्पमालाहरिद्राभिरलङ्कृत्य तदुपरि अधोमुखं स्रुवं निधाय दक्षिणहस्तेन तां गृहीत्वा सपत्नीको यजमान उत्थाय अग्नेः पश्चिमस्यां दिशि तिष्ठन् पूर्णाहुतिं जुहुयात् ॥

ॐ समुद्राद्रूर्म्मिर्म्मधुमाँ२ऽउदारदुपाᳬंशुनासमंमृतत्त्वमांनट् । घृतस्यनामगुह्यँय्यँदस्तिजिह्वादेवानांममृतंस्यनाभिः ॥ $\frac{८९}{१७}$ ॥ व्वयन्नामप्प्रब्ब्रवामाघृतस्यास्मिन्न्यज्ञेधारयामानमोभिः ॥ उपब्ब्रह्माश्शृणवच्छस्यमांनञ्चतुः श्शृङ्गोवमीद्गौर२ऽएतत् ॥ $\frac{९०}{१७}$ ॥ चत्त्वारिश्शृङ्गात्त्रयोऽअस्यपादाद्द्वेशी

षेसप्तहस्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२ऽआविवेश ॥ ९१/१७ ॥ त्रिधाहितम्पणिभिर्गुह्यमानङ्गविदेवासोघृतमन्वविन्दन् ॥ इन्द्रऽएकꣳसूर्य्यऽएकञ्जजानवेनादेकꣳस्वधयानिष्टतक्षुः ॥ ९२/१७ ॥ एताऽअर्षन्तिहृद्यात्समुद्राच्छतव्रजारिपुणानावचक्षे ॥ घृतस्यधाराऽअभिचाकशीमिहिरण्ययोवेतसोमद्ध्यऽआसाम् ॥ ९३/१७ ॥ सम्यक्स्रवन्तिसरितोनधेनाऽअन्तर्हृदामनसापूयमानाः ॥ एतेऽअर्षन्त्यूर्म्मयोघृतस्यमृगाऽइवक्षिपणोरीषमाणाः ॥ ॥ ९४/१७ ॥ सिन्धोरिवप्राद्ध्वनेशूघनासोवातप्रमियःपतयन्तियह्वाः ॥ घृतस्यधाराऽअरुषोनवाजीकाष्ठाभिन्दन्नूर्म्मिभिः पिन्वमानः ॥ ९५/१७ ॥ अभिप्रवन्तसमनेवयोषाःकल्याण्यःस्मयमानासोऽअग्निम् ॥ घृतस्यधाराःसमिधोनसन्तताजुषाणोहर्यतिजातवेदाः ॥ ९६/१७ ॥ कन्याऽइववहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि ॥ यत्रसोमःसूयतेयत्रयज्ञोघृतस्यधाराऽअभितत्पवन्ते ॥ ९७/१७ ॥ अब्भ्यर्षतसुष्टुतिङ्गव्यमाजिमस्मासुभद्राद्रविणानिधत्त । इमँय्यज्ञंनयतदेवतानोघृतस्यधारामधुमत्पवन्ते ॥ ९८/१७ ॥ धामन्तेविश्वम्भुवनमधिश्रितमन्तःसमुद्रेहृद्यन्तरायुषि ॥ अपामनीकेसमिथेयऽआभृतस्तमश्याममधुमन्तन्तऽऊर्म्मिम् ॥ ॥ ९९/१७ ॥ पुनरुत्त्वादित्यारुद्रावसवःसमिन्धताम्पुनर्ब्रह्माणो-

व्वसुनीथय॒ज्ञैः ॥ घृ॒तेन॒त्त्वन्त॒न्वं॑व्वर्द्धयस्वस॒त्त्याःस॑न्तु॒यज॑मानस्य॒कामा॑ꣳ ॥ ४५/१२ ॥ मू॒र्द्धान॑न्दि॒वोऽअ॑र॒तिम्पृ॑थि॒व्याव्वै॑श्वान॒रमृ॒तऽआजा॒तम॒ग्निम् ॥ क॒विꣳस॒म्म्राज॒मति॑थि॒ञ्जना॑नामा॒सन्नापात्त्र॑ञ्जनयन्तदे॒वाः ॥ ८/३३ ॥ पू॒र्ण्णा॑द॒र्व्वि परा॑पत॒सुपू॑र्ण्णा॒पुन॒राप॑त ॥ व॒स्नेव॒व्विक्री॑णावहा॒ऽइष॒मूर्ज॑ꣳशतक्रतो स्वाहा ॥ ४९/३ ॥ इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवतेऽग्नये अद्भ्यश्च न मम ॥ इति प्रोक्षिण्यां संस्रवप्रक्षेपः ॥ इति पूर्णाहुतिहोमः ॥

अथ वसोर्द्धारां[1] जुहुयात् ॥

ॐ स॒प्तते॑ऽअग्नेस॒मिधः॑स॒प्तजि॒ह्वाःस॒प्तऽऋष॑यꣳस॒धाम॑प्प्रि॒याणि॑। सप्तहोत्त्रा॑ꣳसप्त॒धात्त्वा॑यजन्तिस॒प्तयोनी॒रापृ॑णस्वघृ॒तेन॒स्वाहा॑ ॥ ७९/१७ ॥ शु॒क्रज्ज्यो॑तिश्चचि॒त्रज्ज्यो॑तिश्चस॒त्त्यज्ज्यो॑तिश्च॒ज्ज्योति॑ष्माँश्च ॥ शु॒क्रश्च॑ऽऋत॒पाश्चात्त्य॑ꣳहाꣳ ॥ ८०/१७ ॥ ई॒दृङ्चा॑न्या॒दृङ्च॑स॒दृङ्च॒प्प्रति॑सदृङ्च ॥ मि॒तश्च॒सम्मि॑तश्च॒सभ॑राꣳ ॥ ८१/१७ ॥ ऋ॒तश्च॑स॒त्त्यश्च॑ध्रु॒वश्च॑ध॒रुण॑श्च ॥ ध॒र्त्ताच॑व्विध॒र्त्ताच॑व्विधा॒रयः ॥ ८२/१७ ॥ ऋ॒त॒जिच्च स॒त्त्य॒जिच्च॑सेन॒जिच्च॑सु॒षेण॑श्च ॥ अन्ति॑मित्रश्चदू॒रेऽअ॑मित्रश्चग॒णः ॥ ८३/१७ ॥ ई॒दृक्षा॑सऽएता॒दृक्षा॑सऽऊ॒षुणः॑स॒दृक्षा॑-

---

[1] पूर्णाहुत्यनन्तरं वसोर्द्धाराहोमे 'सप्त ते अग्ने' इति दशमंत्राश्चमकानुवाकोऽग्निसूक्तम्, विष्णुसूक्तम्, रुद्रसूक्तम्, इन्दुसूक्तम् इति क्रमशः पठेत्॥

स॒ꣳप्प्रा॑ति॑सह्वक्षास॒ऽएत॑न ॥ मि॒तास॑श्च॒सम्मि॑तासोनोऽअ॒द्यसभ॑रसोमरुतोय॒ज्ञेऽअ॒स्मिन् ॥ $\frac{९४}{१७}$ ॥ स्वत॑वाँश्चप्प्रघा॒सीच॑सान्तप॒नश्च॑गृहमे॒धीच॑ ॥ क्री॒डीच॑शा॒कीचो॑ज्जे॒षी ॥ $\frac{९५}{१७}$ ॥ इन्द्र॒न्दैवी॒र्विशो॑म॒रुतो॑नु॑वर्त्मानोभव॒न्यथेन्द्र॒न्दैवी॒र्विशो॑म॒रुतो॑नु॑वर्त्म॒नोभ॑वन् ॥ ए॒वमि॒मँय्यज॑मान॒न्दैवी॑श्च॒विशो॑मानु॒षीश्चा॑नु॑वर्त्मानोभवन्तु ॥ $\frac{९६}{१७}$ ॥ इ॒मꣳस्तन॒मूर्ज्ज॑स्वन्तन्धया॒पाम्प्रपी॑नमग्नेसरि॒रस्य॒मद्ध्ये॑ ॥ उत्स॑ञ्जुषस्व॒मधु॑मन्तमर्व्वन्त्समु॒द्रिय॒ꣳसद॑न॒माविश॑स्व ॥ $\frac{९७}{१७}$ ॥ घृ॒तम्मि॑मिक्षेघृ॒तम॑स्य॒योनि॑र्घृ॒तेश्श्रि॒तोघृ॒तम्व॑स्य॒धाम॑ । अ॒नु॒ष्व॒धमाव॑ह॒माद॑यस्व॒स्वाहा॑कृतंवृषभवक्षिह॒व्यम् ॥ $\frac{९८}{१७}$ ॥

अथ ॐ [1]वाजश्चमे० इति चमकानुवाकः ॥

ॐ व्वाज॑श्चमे० ॥ १ ॥ प्रा॒णश्च॑मे० ॥ २ ॥ ओज॑श्चमे० ॥ ३ ॥ ज्यैष्ठ्य॑ञ्चम॒० ॥ ४ ॥ स॒त्त्यञ्च॑मे० ॥ ५ ॥ ऋ॒तञ्च॑मे॒० ॥ ६ ॥ स॒न्ताच॑मे० ॥ ७ ॥ शञ्च॑मे॒० ॥ ८ ॥ उर्क्च॑मे ॥ ९ ॥ र॒यिश्च॑मे॒० ॥१०॥ व्वि॒त्तञ्च॑मे॒० ॥११॥ व्व्री॒हय॑श्चमे॒० ॥१२॥ अश्म्मा॑चमे॒ ॥ १३ ॥ अ॒ग्निश्च॑म॒ऽआप॑श्चमे० ॥ १४ ॥ वसु॑चमे० ॥ १५ ॥ अ॒ग्निश्च॑म॒ऽइन्द्र॑श्चमे॒० ॥ १६ ॥ मि॒त्रश्च॑म॒ऽइन्द्र॑श्चमे॒० ॥ १७ ॥ पृ॒थि॒वीच॑म॒ऽइन्द्र॑श्चमे॒० ॥ १८ ॥ अ॒ꣳशुश्च॑मे० ॥ १९ ॥ आ॒ग्र॒य॒णश्च॑मे० ॥ २० ॥ स्रुच॑श्चमे०

---

[1] अयमाध्यायो नित्यकर्मविभागे १५६ पृष्ठे रुद्राष्टाध्याय्यां सप्तमो द्रष्टव्यः ॥

॥२१॥ अग्निश्चमे० ॥२२॥ व्रतञ्चमऽऋतवश्चमे० ॥२३॥
एकाचमे० ॥ २४ ॥ चतस्रश्चमे० ॥ २५ ॥ त्र्यविश्चमे०
॥ २६ ॥ पष्ठवाट्चमे० ॥ २७ ॥ वाजायस्वाहा० ॥२८॥
आयुर्यज्ञेनकल्प्प० ॥ २९ ॥ प्प्रजाऽअभूम वेट्स्वाहा ॥

ततः **अग्निसूक्तम्**– ॐ समास्त्वाग्नऽऋतवोवर्द्धयन्तुसंवत्सराऽऋषयोयानिसत्या ॥ सन्दिव्येनदीदिहिरोचनेनविश्वाऽआभाहिप्प्रदिशश्चतस्रꣳ ॥ $\frac{१}{२७}$ ॥ सञ्चेध्यस्वाग्नेप्प्रचबोधयैनमुच्चतिष्ठमहतेसौभगाय ॥ माचरिषदुपसत्तातेऽअग्नेब्रह्माणस्तेयशसः सन्तुमान्ये ॥ $\frac{२}{२७}$ ॥ त्वामग्नेवृणतेब्राह्मणाऽइमेशिवोऽअग्नेसंवरणे भवानꣳ॥सपत्नहानोऽअभिमातिजिच्चस्वेगयेजागृह्यप्प्रयुच्छन् ॥ $\frac{३}{२७}$ ॥ इहवाग्नेऽअधिधारयारयिम्मात्वानिक्रन्पूर्व्वचितोनिकारिणः ॥ क्षत्रमग्नेसुयममस्तुतुभ्यमुपसत्तावर्द्धतान्तेऽअनिष्टृतꣳ ॥ $\frac{४}{२७}$ ॥ क्षत्रेणाग्नेस्वायुꣳसꣳरभस्वमित्रेणाग्नेमित्रधेयेयतस्व ॥ सजातानाम्मद्ध्यमस्थाऽएधिराज्ञामग्नेविहव्योदीदिहीह ॥ $\frac{५}{२७}$ ॥ अतिनिहोऽअतिस्रिधोत्त्यचित्तिमत्त्यरातिमग्ने ॥ विश्वाह्यग्नेदुरिता सहस्वाथास्मभ्यꣳसहवीराꣳरयिन्दाꣳ ॥ $\frac{६}{२७}$ ॥ अनाधृष्योजातवेदाऽअनिष्टृतोविराडग्नेक्षत्रभृद्दीदिहीह ॥ विश्वाऽआशाꣳप्प्रमुञ्चन्मानुषीर्भियःशिवेभिरद्यपरिपाहिनोवृधे ॥ $\frac{७}{२७}$ ॥ बृहस्पते-

सवितर्व्वोधयैनꣳसꣳशितञ्चित्सन्तराꣳसꣳशिशाधि।व्वर्द्धयैनम्महतेसौभगायव्विश्श्वेऽएनमनुमदन्तुदेवाः ॥ ८/२७ ॥ अमुत्रभूयादधयद्यमस्यबृहस्पतेऽअभिशस्तेरमुञ्चः ॥ प्रत्यौहतामश्विनामृत्युमस्माद्देवानामग्नेभिषजाशचीभिः ॥ ९/२७ ॥

विष्णुसूक्तम्— ॐ व्विष्णोर्न्नुकंव्वीर्य्याणिप्प्रवोचंयः पार्त्थिवानिविममेरजाꣳसि ॥ योऽअस्कभायदुत्तरꣳसधस्त्थंव्विचक्क्रमाणस्त्रेधोरुगायोव्विष्णवेत्त्वा ॥ १८/५ ॥ दिवोव्वाव्विष्णऽउतवापृथिव्यामहोव्वाव्विष्णऽउरोरन्तरिक्षात्॥ उभाहिहस्त्ताव्वसुनापृणस्वाप्प्रयच्छदक्षिणादोतसव्याद्विष्णवेत्त्वा ॥ १९/५ ॥ प्रतद्विष्णुस्त्तवतेव्वीर्य्येणमृगोनभीमः कुचरोगिरिष्ठाः ॥ यस्योरुषुत्रिषुव्विक्क्रमणेष्ष्वधिक्षियन्तिभुवनानिव्विश्श्वा ॥ २०/५ ॥ व्विष्णोरराटमसिव्विष्णोः श्नप्त्रेस्त्थोव्विष्णोःस्यूरसिव्विष्णोर्द्ध्रुवोसि ॥ वैष्णवमसिव्विष्णवेत्त्वा ॥ २१/५ ॥ इदंव्विष्णुर्व्विचक्क्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ १५/५ ॥ त्रीणिपदाव्विचक्क्रमेव्विष्णुर्ग्गोपाऽअदाभ्यः ॥ अतोधर्म्माणिधारयन् ॥ ४३/३४ ॥

॥ इति विष्णुसूक्तम् ॥

अथ ॐ नमस्त्तेरुद्र० इति शतरुद्राध्यायः ॥

ॐ नमस्त्तेरुद्र० ॥ १ ॥ यातेरुद्रशिवा० ॥ २ ॥ यामि-

---

१ नित्यकर्मणः प्रथमे प्रकरणे रुद्राष्टाध्याय्यां पृ. (१४६) पञ्चमो द्रष्टव्यः ॥

षुङ्गिरिशन्त० ॥ ३ ॥ शिवेनवचसा० ॥ ४ ॥ अद्ध्यवोचदधिवक्क्ता० ॥ ५ ॥ असौयस्त्ताम्म्रो०॥ ६ ॥ असौयोवसर्प्पति० ॥७॥ नमोस्त्तुनी० ॥८॥ प्रमुञ्चधन्न्व० ॥९॥ विज्ज्यन्धनुः ॥ १० ॥ यातेहेतिर्म्मी० ॥ ११ ॥ परितेधन्न्वनो० ॥१२॥ अवतत्त्य० ॥१३॥ नमस्त्तऽआ० ॥१४॥ मानोमहान्त० ॥ १५ ॥ मानस्त्तोके० ॥ १६ ॥ नमोहिरण्ण्यबाहवे० ॥ १७ ॥ नमोबब्भ्लुशाय ॥ १८ ॥ नमोरोहिताय० ॥ १९ ॥ नमःकृत्स्नायतया० ॥ २० ॥ नमो वञ्चते० ॥ २१ ॥ नमऽउष्ण्णीषिणे० ॥ २२ ॥ नमोविसृजद्भ्यो० ॥ २३ ॥ नमःसभाब्भ्यः ॥ २४ ॥ नमोगणेब्भ्यो० ॥ २५ ॥ नमꣳसेनाब्भ्यꣳ० ॥ २६ ॥ नमस्त्तक्षब्भ्यो० ॥ २७ ॥ नमꣳश्वब्भ्यꣳ० ॥ २८ ॥ नमःकपर्द्दिने० ॥२९॥ नमोह्रस्वाय० ॥३०॥ नमऽआशवे० ॥३१॥ नमोज्ज्येष्ठाय० ॥ ३२ ॥ नमꣳसोब्भ्याय० ॥ ३३ ॥ नमो वन्न्याय ॥ ३४ ॥ नमोबिल्म्मिने० ॥ ३५ ॥ नमोधृष्ण्णवे० ॥३६॥ नमꣳस्स्रुत्त्याय० ॥३७॥ नमꣳकूप्प्याय० ॥३८॥ नमोवात्त्याय० ॥ ३९ ॥ नमःशुङ्गवे० ॥ ४० ॥ नमःशम्भवाय० ॥ ४१ ॥ नमꣳपार्य्याय० ॥ ४२ ॥ नमःसिकत्त्याय० ॥ ४३ ॥ नमोव्रज्ज्याय० ॥ ४४ ॥ नमꣳशुष्क्क्याय० ॥ ४५ ॥ नमःपर्ण्णाय० ॥ ४६ ॥ द्रापेऽअन्धसस्प्पते० ॥ ४७ ॥ इमारुद्द्राय० ॥ ४८ ॥ याते-

रुद्रशिवातनूः० ॥ ४९ ॥ परिंनोरुद्रस्य० ॥ ५० ॥ मीढुष्टम० ॥ ५१ ॥ विकिरिद्र० ॥ ५२ ॥ सहस्राणि० ॥५३॥ असङ्ख्याता० ॥ ५४ ॥ अस्मिन्मह्न्म० ॥ ५५ ॥ नीलग्रीवाꣳशितिकण्ठादिवꣳ० ॥ ५६ ॥ नीलग्रीवाꣳशितिकण्ठाꣳशर्वा० ॥५७॥ येवृक्षेषु० ॥ ५८ ॥ येभूताना० ॥ ५९ ॥ येपथाम्पथि० ॥ ६० ॥ येतीर्थानि० ॥ ६१ ॥ येन्नेषु० ॥ ६२ ॥ यऽएतावन्तश्च० ॥ ६३ ॥ नमोस्तु रुद्रेभ्योयेदिवि० ॥ ६४ ॥ नमोस्तुरुद्रेभ्योयेन्तरिक्षे०॥६५॥ नमोस्तुरुद्रेभ्योयेपृथिव्यां० ॥६६॥ षाजम्भैदद्ध्मꣳ ॥ ६६/१६ ॥

इन्दुसूक्तम्— ॐ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यम् ॥ भवावाजस्यसङ्गथे ॥ ११२/१२ ॥ सन्तेपयाꣳसिसमुसन्तुवाजाꣳसंवृष्ण्यान्यभिमातिषाहः ॥ आप्यायमानोऽअमृतायसोमदिविश्रवाꣳस्युत्तमानि धिष्व ॥ ११३/१२ ॥ आप्यायस्वमदिन्तमसोमविश्वेभिरꣳशुभिः ॥ भवानꣳसप्रथस्तमꣳसखावृधे ॥ ११४/१२ ॥ ॐ यत्कर्म्मणात्यरीरिचंयद्वान्यूनमिहाकरम् । अग्निꣳस्विष्टकृद्विद्वान्स्विष्टꣳसुहुतं करोतु स्वाहा ॥ नात्र संस्रवप्रक्षेपः । किन्तु यजमानो वदेत्— "इदमग्नये वाजादिभ्योऽग्नये विष्णवे रुद्राय सोमाय वैश्वानराय च न मम ॥" एवं वसोर्धारां हुत्वा यजमानः करसम्पुटं कृत्वा आराध्य देवस्य स्तुतिं[1] कुर्यात् ॥

---

[1] अत्र यस्य देवस्य यागस्तस्य स्तुतिपाठः कार्यः ।

ततः स्वासने उपविश्य भस्मधारणं कुर्यात् ॥ ॐ त्र्यायुषं० ॥ ६३/३ ॥ श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं श्रियं बलम् ॥ तेज आयुष्यमारोग्यं देहि मे हव्यवाहन ॥ भस्मना ललाटे ग्रीवायां दक्षिणेंऽसे हृदि च ॥ एवं भस्मधारणं कृत्वा संस्रवप्राशनम् ॥ कुशपवित्राभ्यां मार्जनम् । अग्नौ पवित्रप्रतिपत्तिः ॥ ततो ब्रह्मणे पूर्णपात्रदानं प्रणीतोदकेन कुर्यात् ॥ यजमानः प्रणीतोदकं गृहीत्वा सङ्कल्पं कुर्यात्—मया कृतस्य सग्रहमखामुककर्मणः साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे ॥ इति सङ्कल्पजलं सहिरण्यं पूर्णपात्रं "प्रतिगृह्यताम्" इति वदन् ब्रह्मणे दद्यात् ॥ ब्रह्मा "प्रतिगृह्णामि" इति वदन् "द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु" इति गृह्णीयात् ॥ ततोऽग्नेः पश्चात् [1]प्रणीताविमोकः ॥ तेन जलेन यजमानशिरसि मार्जनम्—"ॐ आपः शिवाः शिवातमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् इति ॥"

ब्राह्मणभोजनसङ्कल्पः— मया कृतस्य सग्रहमखामुककर्मणः साङ्गतासिद्ध्यर्थं सुवासिनीकुमारिकाबटुकसहितं यथाशक्ति ब्राह्मणभोजनं करिष्ये ॥ तेन अमुकदेवः प्रीयतां न मम ॥

॥ इति वसोर्धारासमन्वितपूर्णाहुतिहोमादिकं समाप्तम् ॥

---

[1] "अग्नेः पश्चात्प्रणीताविमोकः" इति शिष्टाः ॥

अथ श्रेयःसम्पादनादिकम् ॥

तत आचार्यः ऋत्विग्भिः सह सपत्नीकाय यजमानाय श्रेयोदानं कुर्यात् ॥ आचार्यः उदङ्मुखो भूत्वा वृतैः सर्वैर्ब्राह्मणैः सह यजमानहस्ते "ॐ शिवा आपः सन्तु" इति जलं दद्यात् ॥ "ॐ सौमनस्यमस्तु" इति पुष्पाणि दद्यात् । "ॐ गन्धाः पान्तु" इति गन्धं दद्यात् ॥ "ॐ अक्षताः पान्तु" इत्यक्षतान् दद्यात् ॥ तत आचारात् "यत्पापं रोगमशुभम् अकल्याणं तद्दूरे प्रतिहतमस्तु" इति पठन् यजमानहस्तस्योपरि त्रिवारं जलं भ्रामयित्वा अधः क्षिपेत् ॥ तत आचार्यः स्वकीयहस्ते गन्धाक्षतपुष्पफलसहितं जलं गृहीत्वा वदेत्— "भवन्नियोगेन मया एभिर्ब्राह्मणैः सह असुकेऽस्मिन्कर्मणि यत्कृतम् आचार्यत्वं यत्कृतं ब्रह्मत्वं गाणपत्यं सादस्यं तथा च एभिर्ब्राह्मणैः सह यः कृतो जपः यः कृतो होमः, एवं तत्तत्कर्मभ्यो यदुत्पन्नं श्रेयः तत्तुभ्यमहं सम्प्रददे। तेन श्रेयसा त्वं श्रेयस्वी भव ॥" इति वदन् यजमानहस्ते सफलं जलं दद्यात् ॥ यजमानो सफलं जलं गृहीत्वा "भवामि" इति वदन् जलं पीत्वा फलं पत्न्यै दद्यात् । ततो दक्षिणादानम् ॥

तत्र सङ्कल्पः—अद्येत्यादि० शुभपुण्यतिथौ मया कृतस्यामुककर्मणः साङ्गतासिद्ध्यर्थं वृतेभ्य आचार्यादिसमस्तर्त्विग्भ्यो यथाशक्ति दक्षिणाप्रदानं करिष्ये ॥ इति सङ्कल्प्य चरणक्रमेण दक्षिणां दद्यात् ॥

आदौ आचार्याय दक्षिणादानम्— गन्धाक्षतपुष्पैराचार्यं सम्पूज्य । मया कृतस्य अमुककर्मणः साङ्गतासिद्ध्यर्थं इमां वस्त्रोपवस्त्रादिसहितां यथाशक्ति सुवर्णपुष्पदक्षिणां (रजतद्रव्यं वा) तुभ्यमहं सम्प्रददे इति दद्यात् ॥ एवं ब्रह्मणे, गणपतये, सदसस्पतये, द्वारपालादिसर्वेभ्य ऋत्विग्भ्यो ब्राह्मणेभ्यश्च वरणक्रमेण दक्षिणां दद्यात् ॥

[1]दानानि तत्र गोप्रदानम्— द्रव्यं गृहीत्वा । मया कृतस्य अमुककर्मणः साङ्गतासिद्ध्यर्थम् इमां गोनिष्क्रयीभूतां दक्षिणां तुभ्यमहं सम्प्रददे इति आचार्याय दद्यात् ॥ "ॐ स्वस्ति" इति च वदेत् ॥

ततः सुवर्णदानं भूमिदानं तिलदानञ्च दद्यात् ॥ हस्ते जलमादाय इदं सुवर्णदानम् अग्निदैवतम् अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ दानसाङ्गतासिद्ध्यर्थम् इमां दक्षिणाञ्च तुभ्यमहं सम्प्रददे ॥ भूमिदानम्— इमां भूमिं वा तन्निष्क्रयद्रव्यम् अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । दानसाङ्गतासिद्ध्यर्थम् इमां दक्षिणाञ्च तुभ्यमहं सम्प्रददे ॥ तिलपात्रदानम्— इदं तिलपात्रं तिलपूरितं प्रजापतिदैवतम् अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ दानसाङ्गतासिद्ध्यर्थम् इमां दक्षिणाञ्च तुभ्यमहं सम्प्रददे ॥

॥ इति श्रेयसम्पाद्यदानादिदक्षिणादानम् ॥

---

[1] स्वर्णगोभूतिलान् दद्यात् सर्वदोषापनुत्तये ॥

अथ यज्ञान्तो महाभिषेकः ॥

एवं ब्राह्मणेभ्यो दक्षिणाप्रदानं यथाशक्ति गोप्रभृतिदानानि च कृत्वा सपत्नीको यजमानोऽभिषेकार्थं नूतने वस्त्रोपवस्त्रे धृत्वा यज्ञमण्डपे वायव्यां क्षेत्रपालस्य सन्निधौ निर्मिते वारुणमण्डलपीठे (भद्रासने) स्ववामभागे पत्नीं तथा च स्वकीयपुत्रपौत्रादीनपि यथासम्भवमुपवेश्य स्वयं पत्न्या सहितः पूर्वाभिमुख उपविश्याचार्यादिसमस्तर्त्विजः प्रार्थयेत् ॥ तद्यथा– "भो भो ब्राह्मणाः ! भवत्कृपया युष्मत्सहायेन च मयाऽऽचरितस्य अमुककर्मणः साङ्गतासिद्ध्यर्थं कृतस्य कर्मणः सम्पूर्णफलप्राप्त्यर्थं सपरिवारं मां महाभिषेकेन पवित्रीकुर्वन्तु" इति भवतः प्रार्थये ॥ इत्युक्त्वा यथाशक्ति हिरण्यदानेन तान्सन्तोषयेत् ॥ ते च आचार्यादयः सर्वे ऋत्विजः तस्याभ्यर्थनां यथाशक्ति प्रदत्तां दक्षिणाञ्च स्वीकृत्य सर्वेभ्यः कलशेभ्यो मुख्यदेवताकलशाद्वा एकस्मिन्पात्रे जलमादायोदङ्मुखास्तिष्ठन्तः वैदिकैः पौराणिकैर्मन्त्रैश्च सकुटुम्बं तमभिषिञ्चेयुः ॥

तत्रादौ पञ्चवाक्यैः पुण्याहवाचनं कुर्यात् ॥ यजमानो वदेत्– भो ब्राह्मणाः ! मह्यं सकुटुम्बिने महाजनान् नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्याभिषेकस्नानकर्मणः पुण्याहं भवन्तो ब्रुवन्तु ॥ अस्तु पुण्याहम् ॥ एवं त्रिः ॥ भो ब्राह्मणाः० अस्याभिषेक-

स्नानकर्मणः कल्याणं भवन्तो ब्रुवन्तु ॥ अस्तु कल्याणम् । एवं त्रिः ॥ भो ब्राह्मणाः० अस्याभिषेकस्नानकर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ॥ कर्म ऋद्ध्यताम् । एवं त्रिः ॥ भो ब्राह्मणाः० अस्मै अभिषेकस्नानकर्मणे स्वस्ति भवन्तो ब्रुवन्तु ॥ आयुष्मते स्वस्ति ॥ एवं त्रिः ॥ भो ब्राह्मणाः० अस्याभिषेकस्नानकर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु । अस्तु श्रीः । एवं त्रिः ॥ ततोऽभिषेकं कुर्युः ॥

अथाभिषेकमन्त्राः ॥

ॐ आपोहिष्ठा० ॥ ॐ योवःशिवतमो० ॥ तस्माऽअरङ्ग० ॥ $\frac{१४-१६}{३६}$ ॥ त्रातारमिन्द्र० ॥ $\frac{५०}{२०}$ ॥ इमम्मेवरुणश्श्रुधी० ॥ $\frac{१}{२१}$ ॥ तत्त्वायामि० ॥ $\frac{२}{२१}$ ॥ त्वन्नोऽअग्नेवरुणस्य० ॥ $\frac{३}{२१}$ ॥ सत्त्वन्नोऽअग्नेवमोभवो० ॥ $\frac{४}{२१}$ ॥ उदुत्तमंवरुणपाश० ॥ $\frac{१२}{१२}$ ॥ वरुणस्योत्तम्भ० ॥ $\frac{३६}{४}$ ॥ भगप्प्रणेतर्भगसत्त्यराधो भगेमान्धियमुदवाददन्नꣳ ॥ भगप्प्रनोजनयगोभिरश्वैर्भगप्प्रनृभिर्नृवन्तःस्याम ॥ $\frac{३६}{३४}$ ॥ इदमापꣳप्प्रवहतावद्यञ्चमलञ्चयत् । यच्चाभिदुद्रोहानृतँय्यच्चशेपेऽअभीरुणम् । आपोमातस्म्मादेनसꣳपवमानश्च मुञ्चतु ॥ $\frac{१७}{६}$ ॥ पुनन्तुमापितरःसोम्म्यासःपुनन्तुमापितामहाःपुनन्तुप्प्रपितामहाꣳ ॥ पवित्रेण शतायुषा ॥ पुनन्तुमापितामहाःपुनन्तुप्प्रपितामहाꣳ । पवित्रेण शतायुषाविश्वमायुर्व्यश्नवै ॥ $\frac{३७}{१९}$ ॥ अग्नऽआयूꣳषि पवसऽआसुवोर्जमिषञ्चनꣳ ॥ आरेबाधस्व

दुच्छुनाम् ॥ ३८/१९ ॥ पुनन्तुमादेवजनाःपुनन्तुमनसाधियः ॥ पुनन्तुविश्वाभूतानि जातवेदꣳपुनीहिमा ॥ ३९/१९ ॥ पवित्रेण पुनीहिमा शुक्रेणदेवदीद्यत् ॥ अग्ने क्रत्वाक्रतूँ१॥रनु ॥ ४०/१९ ॥ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ॥ ब्रह्म तेन पुनातु मा ॥ ४१/१९ ॥ पवमानꣳ सोऽअद्यनःपवित्रेण विचर्षणिꣳ ॥ यःपोता स पुनातु मा ॥ ४२/१९ ॥ उभाभ्यान्देव सवितꣳ पवित्रेण सवेनच ॥ माम्पुनीहि विश्वतः ॥ ४३/१९ ॥ वैश्वदेवीपुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वोवीतपृष्ठाꣳ ॥ तयामदन्तꣳ सधमादेषु वयꣳस्यामपतयोरयीणाम् ॥ ४४/१९ ॥ आप्यायस्वसमेतु ते विश्वतःसोमवृष्ण्यम् ॥ भवावाजस्य सङ्गथे ॥ ११२/१२ ॥ पञ्चनद्यःसरस्वती० ॥ ११/३४ ॥ चित्पतिर्म्मापुनातु० ॥ ४/४ ॥ शिरोमेश्रीर्यशोमुखन्त्विषिꣳकेशाश्चश्मश्रूणि ॥ राजामेप्राणोऽअमृतꣳसम्राट्चक्षुर्विराट्श्रोत्रम् ॥ ५/२० ॥ जिह्वामेभद्रंवाङ्महोमनोमन्युःस्वराड्भामः ॥ मोदाꣳप्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मेसहः ॥ ६/२० ॥ बाहूमेबलमिन्द्रियꣳहस्तौ मे कर्म्म वीर्यम् ॥ आत्मा क्षत्रमुरो मम ॥ ७/२० ॥ पृष्ठीर्म्मेराष्ट्रमुदरमꣳसाग्रीवाश्चश्रोणी ॥ उरूऽअरत्नीजानुनी विशोमेऽङ्गानिसर्वतः ॥ ८/२० ॥ नाभिर्म्मे चित्तंविज्ञानम्पायुर्म्मेऽपचितिर्भसत् ॥ आनन्दनन्दावाण्डौ मे भगꣳ सौभाग्यम्पसः ॥ जङ्घाभ्याम्पद्भ्यान्धर्म्मोऽस्मिविशि-

राजा प्प्रतिष्ठितꣳ ॥ १/२० ॥ पयꣳ पृथि० ॥ ३६/१८ ॥ देवस्यत्त्वा सवितुः प्प्रसवेश्विनो० ॥ सरस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रियैदधामिबृहस्प्पतेष्ट्वासाम्म्राज्येनाभिषिञ्चाम्म्यसौ ॥ ३०/९ ॥ देवस्यत्त्वा० ॥ सरस्वत्त्यैव्वाचोयन्तुर्य्यन्त्रेणाग्नेः साम्म्राज्येनाभिषिञ्चामि ॥ ३७/१८ ॥ देवस्यत्त्वा० ॥ अश्विनोर्भैषज्ज्येनतेजसेब्ब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्त्यैभैषज्ज्येन व्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणबलायश्श्रियैयशसेभिषिञ्चामि ॥ ३/२० ॥ सोमस्य त्त्वाद्युम्म्नेनाभिषिञ्चाम्म्यग्नेर्ब्भ्राजसासूर्य्यस्यव्वर्च्चसेन्द्रस्येन्द्रियेण । क्षत्राणाङ्क्षत्रपतिरेद्ध्यतिदिद्यून्पाहि ॥ १७/१० ॥ व्विश्वानिदेव० ॥ ३/३० ॥ धामच्छदग्नि० ॥ ७६/१८ ॥ त्वँय्यविष्ठ० ॥ ७७/१८ ॥ अन्नपते० ॥ ८३/११ ॥

पालाशं भवति ॥ तेन ब्राह्मणोभिषिञ्चति ब्रह्म वै पलाशो ब्रह्मणैवैनमेतदभिषिञ्चति ॥ औदुंबरं भवति ॥ तेन स्वोभिषिञ्चत्त्यन्नंव्वाऽऊर्गुदुम्बरऽऊर्ग्वैस्वं यावद्वैपुरुषस्यस्वम्भवति नैव तावदशनायतितेनोस्वंतस्मादौदुम्बरेणस्वोभिषिञ्चति । नैय्यग्रोधपादंभवति । तेनमित्र्यो राजन्योभिषिञ्चति पद्भिर्व्वैन्यग्रोधꣳ प्प्रतिष्ठितोमित्रेणव्वैराजन्यश्श्प्रतिष्ठितस्तस्मान्नैय्यग्रोधपादेन मित्र्यो राजन्योभिषिञ्चति ॥ आश्वत्थं भवति ॥ तेन वैश्योऽभिषिञ्चति सयद्वादोश्वत्थे तिष्ठतऽइन्द्रोमरुतऽउपामन्त्रयत तस्मादाश्वत्थेन वैश्योभिषिञ्चति ॥ सद्देव

क॒ल्पाञ्जुहोति। प्राणा वै क॒ल्पाऽअमृतमु वै॒ प्राणाऽअमृतेनै॒वैनमेत॒दभि॒षिञ्चति ॥ स॒र्व्वेषां वा॒ऽएषव्वे॒दानाꣳर॒सो यत्सा॒म स॒र्व्वेषामे॒वैनमेतद्वेदानाꣳर॒सेनाभि॒षिञ्चति ॥

पौराणिकाः मन्त्राः—सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः । वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥१॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥ आखण्डलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥ २ ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा ॥ ३ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शान्तिः कान्ति स्तुष्टिश्च मातरः ॥ ४ ॥ एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः । आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥५॥ ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयो मुनयो गावो देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ ७ ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ ८ ॥ सरितः सागराः शैलास्तीर्थानि जलदानदाः । ब्रह्मा विष्णुश्च रुद्रश्च मुनयः सकला ग्रहाः ॥ ९ ॥ सौभाग्यं ते प्रयच्छन्तु वेदमन्त्राश्च कल्पकाः ॥ ब्रह्माणी चैव गायत्री सावित्री श्रीरुमा सती ॥ १० ॥ अरुन्धत्यनसूया च तव सन्तु

फलप्रदाः । तीर्थानि सरितः पुण्याः सरांसि पुष्कराणि च ॥ ११ ॥ अचलाश्च चलाश्चैव तव स्वस्तिकराः सदा । वेदव्यासश्च वाल्मीकी रामश्चापि पराशरः ॥ १२ ॥ देवलः पर्वतश्चैव दुर्वासा भार्गवस्तथा ॥ याज्ञवल्क्यश्च जावालिर्जमदग्निः शुचिश्रवाः ॥ १३ ॥ विश्वामित्रः स्थूलशिराश्च्यवनोऽत्रिर्विदूरथः । एकतश्च द्वितश्चैव त्रितो गौतमगालवौ ॥ १४ ॥ शाण्डिल्यश्च भरद्वाजो मौद्गल्यो वेदवाहनः ॥ कात्यायनश्च कण्वश्च वालखिल्यास्तथैव च ॥ १५ ॥ पृथुर्दिलीपो भरतो मान्धाता च पुरूरवाः । अम्बरीषः ककुत्स्थश्च मुचकुन्दोऽथ भूभृतः ॥ १६ ॥ श्वेतश्च शृङ्गवान् मेरुर्विन्ध्याद्रिर्गन्धमादनः । माल्यवान्पारियात्रश्च सर्व एव महीधराः ॥ १७ ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा ॥ १८ ॥ छन्दः शास्त्राणि सर्वाणि पुराणैः सकलैः सह । गायत्री पापशमनी दुर्गादेवी महाशिवः ॥ स्थानानि च समस्तानि पुण्यान्यायतनानि च । लवणः क्षीरतोयश्च घृतमण्डोदकस्तथा ॥ २० ॥ दधिमण्डः सुरोदश्च इक्षुः स्वादूदकस्तथा । पुष्करश्च प्रयागश्च प्रभासं नैमिषं तथा ॥ २१ ॥ गयाशिरो ब्रह्मशिरस्तथैवोत्तरमानसम् । गङ्गाद्वारं कुशावर्तं बिल्वकं नीलपर्वतः ॥ २२ ॥ वाराहं भृगुतुङ्गश्च शालिग्रामसरस्तथा । शूर्पारकं पौण्डरीकं गङ्गासागरसङ्गमः ॥ २३ ॥ धर्मारण्यं फल्गुतीर्थं विमुक्तं मोक्षदं तथा । गङ्गा सरस्वती पुण्या

सरयू गण्डकी तथा ॥ २४ ॥ कौशिकी यमुना क्षिप्रा चन्द्रभागा च गौमती । मन्दाकिनी दशार्णा च तामसी च कुमुद्वती ॥ २५ ॥ रेवा वैतरणी भीमा कृष्णा वेण्या मही तथा । गोदावरी भीमरथी गौतमी चाश्वनद्यपि ॥२६॥ तुङ्गभद्रा ताम्रपर्णी कावेरी नेत्रवत्यपि । नन्दा चालकनन्दा च करतोया च पिप्पला ॥२७॥ सर्वपापशमन्यश्च सर्वलोकस्य मातरः । स्वतोयपूर्णैः कलशैरभिषिञ्चन्तु सर्वदा ॥ २८ ॥ भूराद्याः सप्तलोकाश्च पातालानि चतुर्युगम् । ब्रह्मादिसप्तकल्पाश्च मनवश्च चतुर्दश ॥ २९ ॥ संवत्सराश्च ऋतवो मासपक्षदिनानि च । एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ ३० ॥ सहस्राक्षं शतधारमृषिभिः पावनं कृतम् । तेन त्वाभिषिञ्चामि पावमान्यः पुनन्तु ते ॥ ३१ ॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः । भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥३२॥ यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि । ललाटे कर्णयोरक्ष्णोरापो निघ्नन्तु ते सदा ॥३३॥ शान्तिः शान्तिः सुशान्तिर्भवतु । अमृताभिषेकोऽस्तु ॥ यजमानो हस्ते जलं गृहीत्वा । अभिषेककर्तृकेभ्यो ब्राह्मणेभ्यो यथोत्साहं दक्षिणां दास्ये तेन अमुकदेवः प्रीयतां न मम ॥

॥ इति यज्ञान्तो महाभिषेकः ॥

अथ [1]अवभृथस्नानविधिः ॥

तीर्थे गत्वा अवभृथस्नानार्थं प्रधानदेवताकलशं प्रधान-

---

[1] अयं विधिः श्रौतविधिं पर्यालोच्य स्मार्तकर्माङ्गोपयोगी श्रौतातिदेशः सङ्कलितः ॥

यत्रं कुण्डाद् भस्ममृद्धटं पूजनसामग्रीं गृहीत्वाचार्यादिसमस्तर्त्विग्भिः परिवृतः स्वकीयस्त्रीपुत्रपौत्रादिपरिवारजनैः सह मङ्गलवाद्यघोषपुरःसरं यजमानो जलाशयं गच्छन्नर्धमार्गे क्षेत्रपालाय बलिदानं दद्यात् ॥

भूमिं "ॐ आपोहिष्ठा० इति" सम्प्रोक्ष्य सपत्नीकः तीर्थाभिमुखः उदङ्मुखः पूर्वाभिमुखो वा तिष्ठेत् ॥

तत आचमनं प्राणायामञ्च कृत्वा हस्ते जलं गृहीत्वा—मया कृतस्य सग्रहमखामुककर्मणः सम्पूर्णफलप्राप्त्यर्थं पुत्रपौत्रादिपरिवारजनैः ज्ञातिपौरवासिभिश्च परिवृतः अस्मिन्तीर्थे अवभृथस्नानमहं करिष्ये ॥ इति सङ्कल्पं कुर्यात् ॥

तत आचार्यो गणपतिपूजनं कारयित्वा स्वस्तिपुण्याहवाचनार्थं विरचितस्याष्टदलस्य मध्ये एकं कलशं निधाय पुण्याहवाचनोक्तविधिना कलशस्थापनं कुर्यात् ॥

यजमानस्तत्र कलशे "ॐ तत्त्वायामि०" इति मन्त्रेण वरुणमावाह्य ॐ मनोजूति० इति प्रतिष्ठाप्य प्रार्थयेत्—जलाधिप समागच्छ परिवारसमन्वितः । अस्मिन्कुम्भे करिष्यामि यावत्पूजां स्थिरो भव ॥ इति सम्प्रार्थ्य ॥ तत्राष्टदलस्य पूर्वादितः क्रमेणाऽऽवाहयेत् ॥

ॐ मत्स्यै नमः मत्सीम् आ० स्था० ॥ १ ॥ ॐ कूर्म्यै नमः कूर्मीम् आवा० स्थाप० ॥ २ ॥ ॐ वाराह्यै नमः वाराहीम् आ० स्था० ॥ ३ ॥ ॐ माण्डूक्यै नमः माण्डूकीम् आ० स्था० ॥ ४ ॥ ॐ मकर्यै नमः मकरीम् आ०

स्था० ॥५॥ ॐ ग्राहक्यै नमः ग्राहकीम् आ० स्था०॥६॥ ॐ क्रौञ्चिक्यै नमः क्रौञ्चिकीम् आ० स्था० ॥ ७ ॥ एवमक्षतैः जलमातृः संस्थाप्य "ॐ मनोजूर्ति०" इति प्रतिष्ठाप्य "ॐ मत्स्यादिमातृभ्यो नमः" इत्यनेन यथालब्धोपचारैः आवाहनादिषोडशोपचारैर्वा पूजयेत् ॥

ततो यजमानो जलाशयं गत्वा तीर्थं "ॐ तत्त्वायामि०" इति मन्त्रेण आवाहनादिषोडशोपचारैः सम्पूज्य तस्मिन् स्थितानां मत्स्यादिजीवानां सन्तोषार्थं चणकादींश्च निक्षिप्य तीर्थस्थितानां गङ्गादिदेवतानां प्रीयते पुरुषसूक्तं पठन् दुग्धेनाभिषेकं जले कुर्यात् ॥

ततस्तीर्थजले आज्यस्य स्रुवेण द्वादशाहुतीर्दद्यात् ॥ ॐ अद्भ्यः स्वाहा ॥ इदमद्भ्यो न मम ॥ १ ॥ ॐ वार्भ्यः स्वाहा । इदं वार्भ्यो न मम ॥ २ ॥ ॐ उदकाय स्वाहा । इदम् उदकाय न मम ॥ ३ ॥ ॐ तिष्ठन्तीभ्यः स्वाहा । इदं तिष्ठन्तीभ्यो न मम ॥ ४ ॥ ॐ स्रवन्तीभ्यः स्वाहा । इदं स्रवन्तीभ्यो न मम ॥ ५ ॥ ॐ स्यन्दमानाभ्यः स्वाहा । इदं स्यन्दमानाभ्यो न मम ॥ ६ ॥ ॐ कूप्याभ्यः स्वाहा ॥ इदं कूप्याभ्यो न मम ॥ ७ ॥ ॐ सूद्याभ्यः स्वाहा ॥ इदं सूद्याभ्यो न मम ॥ ८ ॥ ॐ धार्याभ्यः स्वाहा । इदं धार्याभ्यो न मम ॥ ९ ॥ ॐ अर्णवाय स्वाहा । इदम् अर्णवाय न मम ॥ १० ॥ ॐ समुद्राय

स्वाहा । इदं समुद्राय न मम ॥ ११ ॥ ॐ सरिराय स्वाहा । इदं सरिराय न मम ॥ १२ ॥ एवं द्वादशाहुतीर्हुत्वा सपत्नीको यजमानः "ॐ यन्त्राधिष्ठितदेवताभ्यो नमः" इति सम्पूज्य प्रधानयन्त्रं हस्ते गृहीत्वा तीर्थजले निमज्जेत् ॥

तत उन्मज्ज्य प्रधानकलशादर्धं जलं कुण्डादानीतं भस्म च तीर्थे निक्षिप्यार्धजलसमन्वितं कलशं तीर्थजलेन सम्पूर्य किञ्चित् भस्म आदाय स्वकीये शरीरे "ॐ प्रसद्य०" इति पठन्ननुलिप्याचार्यादिभिः पुत्रपौत्रादिभिर्ज्ञातिभिः पौरवासिभिश्च सह तस्मिन्तीर्थे स्नायात् ॥

तत्र मन्त्रः—ॐ अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः॥ अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहिदेवानाᳫंसमिदसि ॥ ३७ ॥ एवं स्नात्वा तदनन्तरं "ॐ आकृष्णेन०" इति सूर्यं "ॐ वरुणस्योत्तम्भनमसि०" इति तीर्थञ्च नमस्कृत्य तीर्थाद्बहिरागत्य नवानि वस्त्राणि धृत्वा धृतान्याचार्याय दत्त्वा तीर्थतटे स्थितेभ्यो ब्राह्मणेभ्य आचार्यादिभ्यश्च दक्षिणया सन्तोष्य सजलं प्रधानकलशं यन्त्रम् अवशिष्टं भस्म आदाय मङ्गलवाद्यघोषपुरःसरं मण्डपमागत्य प्रधानपीठे प्रधानकलशं यन्त्रञ्च संस्थाप्य भस्म पुनः कुण्डे प्रक्षिप्यावशिष्टं कर्म च समापयेत् ॥

॥ इति अवभृथस्नानविधिः ॥

अथ घृतपात्रदानादिकम् ॥

एवं सपत्नीको यजमानो मण्डपमागत्य कुण्डस्य पश्चिमदिशि प्रधानदेवस्य पीठसमीप उपविश्य घृतपूरिते कांस्यपात्रे स्वस्य मुखावलोकनं कुर्यात् ॥ तत्र मन्त्रः– ॐ रूपेणवोरूपमभ्यागान्तुथोवोविश्श्ववेदाविभजतु । ऋतस्यपथाप्प्रेतचन्द्रदक्षिणाविस्वःपश्श्यव्व्युन्तरिक्षँय्यतस्वसदस्यैः॥ $\frac{४५}{७}$ ॥ततः तस्मिन्किञ्चिद्धिरण्यं निधाय हस्ते तत्पात्रमादाय सङ्कल्पं कुर्यात् ॥ "इदम् आज्यपात्रं सकलदोषनिवृत्त्यर्थं सदक्षिणाकम् अमुकगोत्रोत्पन्नाय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥" इति घृतपात्रं दद्यात् ।

पुनर्जलमादाय– न्यूनातिरिक्तदोषपरिहारार्थं नानागोत्रेभ्यो दीनानाथेभ्यश्च यथाशक्ति भूयसीं दास्ये ॥ इति तेभ्यो दक्षिणां दत्त्वा देवताविसर्जनादिकं कुर्यात् ॥

अथ देवताविसर्जनं पीठादिदानञ्च ॥

सपत्नीको यजमानो हस्ते गन्धाक्षतपुष्पाण्यादाय– ॐ उत्तिष्ठब्ब्रह्मणस्प्पते देवयन्तस्त्वेमहे। उपप्प्रयन्तुमरुतः सुदानवऽ इन्द्रप्प्राशूर्भवासचा ॥ $\frac{५६}{३४}$ ॥ यान्तु देवगणाः सर्वे स्वशक्त्या पूजिता मया । इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥ आवाहिताः गणपत्यादिप्रधानान्ताः सर्वे देवाः स्वस्वस्थानं गच्छत। शुभे कार्ये पुनरागमनाय च ॥ इत्युक्त्वा गन्धाक्षतपुष्पाणि स्थापितदेवतानामुपरि क्षिपेत् ॥

ततोऽग्निविसर्जनम्— पुनर्गन्धाक्षतपुष्पाणि गृहीत्वा ॥ ॐ यज्ञ॑ य॒ज्ञं ग॑च्छ य॒ज्ञप॑तिङ्गच्छ॒स्वाँ योनि॑ङ्गच्छ॒स्वाहा॑। ए॒षते॑य॒ज्ञोय॑ज्ञपतेस॒हसू॑क्तवाक॒ꣳसर्व॑वीर॒स्तञ्जु॑षस्व॒स्वाहा॑। ॥ ${}^{२२}_{८}$ ॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ॥ यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥ १ ॥ इति अग्नि विसर्जनम् ॥

ततः यजमानो स्थापितदेवतापीठादिमण्डपान्तं सर्वं ध्वजापताकादिसमन्वितं यावद्यज्ञसम्भारम् आचार्याय दातुं सङ्कल्पार्थं हस्ते जलं गृह्णीयात्— "इमं स्थापित-देवतानां पीठादिसहितं ध्वजापताकादिमण्डपसमन्वितं सर्वोपस्करसहितं यज्ञसम्भारम् आचार्याय तुभ्यमहं सम्प्रददे।" इति आचार्यस्य हस्ते जलं दद्यात् ॥ आचार्यः "ॐदे॒वस्य॑त्त्वा सवि॒तुः०" इति मन्त्रं पठन् "ॐ स्वस्ति" इत्युक्त्वा तज्जलं गृह्णीयात् ॥

ततः कर्मणः सम्पूर्णतावाचनम् । यथा—अञ्जलिं बद्ध्वा प्रार्थयेत्—"भो ब्राह्मणाः ! मया यदेतत्सग्रहमखामुककर्म कृतं तत्कालहीनं कर्महीनं द्रव्यहीनं भक्तिहीनं श्रद्धाहीनं शक्तिहीनं (भवेत्) तत् सर्वं श्रीमतां ब्राह्मणानां वचनात् श्रीप्रधानदेवप्रसादाच्च सर्वं परिपूर्णमस्तु" इति भवन्तो ब्रुवन्तु । "अस्तु परिपूर्णम्" इति द्विजा वदेयुः ॥

अथ प्रैषात्मकं[1] पुण्याहवाचनम् ॥

तत आचार्यः प्रैषात्मकं पुण्याहवाचनं कारयेत् ॥

स्वपुरतः पञ्चवर्णैरष्टदलं कृत्वा तत्र भूमिं स्पृशेत्—ॐ म॒ही द्यौः० ॥ तत्र यवप्रक्षेपः— ॐ ओष॑धय॒ꣳ० ॥ तदुपरि कलशस्थापनम्—ॐ आजि॑घ्र० ॥ तत्र जलपूरणम्—ॐ वरु॑णस्यो॒० ॥ गन्धप्रक्षेपः—ॐ त्वाङ्॑गन्ध॒र्व्वा० ॥ धान्यप्रक्षेपः—ॐ धा॒न्यमसि० ॥ सर्वौषधीप्रक्षेपः— ॐ या॒ऽओष॑धी॒ꣳ० ॥ दूर्वाप्रक्षेपः— ॐ काण्डा॑त्काण्डा० ॥ पञ्चपल्लवप्रक्षेपः—ॐ अ॒श्व॒त्थेवो॑० ॥ सप्तमृद्प्रक्षेपः—ॐ स्यो॒नापृ॑थिवि० ॥ फलप्रक्षेपः—ॐ याः फ॒लिनी॒० ॥ पञ्चरत्नप्रक्षेपः—ॐ परि॒वाज॑० ॥ हिरण्यप्रक्षेपः— ॐ हि॒र॒ण्य॒ग॒र्भः० ॥ रक्तसूत्रवेष्टनम्—ॐ सुजा॑तो॒ज्ज्योति॑० ॥ पूर्णपात्रम्—ॐ पूर्णा॑दर्व्वि॒० ॥ वरुणावाहनम्—ॐ तत्त्वा॑यामि॒० ॥ अस्मिन् कलशे वरुणं साङ्गं० आवा० स्थाप० ॥ प्रतिष्ठापनम्—ॐ मनो॑जू॒तिर्जु॑० ॥ ॐ वरुणाय नमः गन्धं सम० ॥ इत्यादिपञ्चोपचारैः सम्पूज्य ॐ तत्त्वा॑यामि॒० इति पुष्पाञ्जलिं समर्पयेत् ॥ अनेन पूजनेने वरुणः प्रीयताम् ॥ अनामिकया कलशं स्पृष्ट्वा अभिमन्त्रयेत्—कलशस्य० दुरितक्षयकारकाः ॥ "ॐ गायत्र्यादिभ्यो नमः" इत्यनेन पञ्चोपचारैः पुनरभ्यर्च्य कलशं प्रार्थयेत्—

---

[1] पुण्या० सूत्रे—पुण्याहवाचनमृद्धिपूर्तेष्वृद्धिविवाहान्तापत्यसंस्कारेषु प्रतिष्ठोद्यापनादिपूर्तकर्मसु चाद्यन्तयोः कुर्यात् ॥ इति नियमानुसारेण कृते महत्पुण्यम् ॥

देवदानव० सन्निधो भव ॥ यजमानो युग्मविप्रान् गन्धमाल्यवस्त्रदक्षिणाभिः सम्पूज्य तान् उदङ्मुखानुपवेश्य पूजितकलशं कराभ्यामालभ्य वदेत्– मम गृहे ॐ पुण्याहं भवन्तो ब्रुवन्तु ॥ ॐ अस्तु पुण्याहम् इति द्विजाः । एवं त्रिः ॥ मम गृहे ॐ कल्याणं भवन्तो ब्रुवन्तु । ॐ अस्तु कल्याणमिति द्विजाः । एवं त्रिः ॥ मम गृहे ॐ ऋद्धिं भवन्तो ब्रुवन्तु ॥ ॐ कर्म ऋद्ध्यताम् इति द्विजाः । एवं त्रिः ॥ मम गृहे ॐ स्वस्ति भवन्तो ब्रुवन्तु । ॐ आयुष्मते स्वस्ति इति द्विजाः । एवं त्रिः ॥ मम गृहे ॐ श्रीरस्त्विति भवन्तो ब्रुवन्तु । ॐ अस्तु श्रीः इति द्विजाः । एवं त्रिः ॥

॥ इति प्रैषात्मकं पुण्याहवाचनम् ॥

अथ कर्मान्ते महाविष्णुस्मरणम् ॥

ततो मन्त्राशिषो गृहीत्वा प्रार्थयेत् ॥ "प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥" ॐ विष्णवे नमः ॥ ॐ विष्णवे नमः ॥ ॐ विष्णवे नमः ॥

ततो ब्राह्मणान् भोजयित्वा दीनानाथाँश्चान्नादिना सन्तोष्य स्वयं सुहृन्मित्रादियुतः सानन्दो भुञ्जीत ॥

॥ इति नैमित्तिककर्मणो द्वितीयो भागः समाप्तः ॥

इति नित्य-नैमित्तिककर्मसमुच्चयः समाप्तः ॥

परिशिष्टम् ॥

॥ श्रीमद्भगवत्स्तुत्यष्टकम् ॥

रचयिता–आचार्य अमृतलाल त्रिकमजी शास्त्री (जामनगरनिवासी).

माता वा च पिता स्वबन्धुभगिनीभार्याः स्वसम्बन्धिनः सर्वे स्वार्थपराः स्वकार्यकुशला ह्यालोकिताः सर्वतः ॥ तेषां किं कथयामि भूधर! विभो! दुखं मदीयं कियत् दुःस्वप्नं तव देव! पादकमलं प्राप्तोऽस्मि मुक्त्यै ह्यतः ॥ १ ॥ नाधीतश्च विधिं करोमि कमहं ह्येकोऽपि वेदो मया का वार्ता मम गुह्यतान्त्रिकविधौ गुप्तश्च यः सर्वतः ॥ एवं ते विविधार्चनं विलसितं ज्ञातुं न शक्यं ह्यतः सम्प्राप्तश्च तवैव चारु चरणं भक्तिप्रदं मुक्तिदम् ॥ २ ॥ किं वक्ष्ये वचसा ह्यगम्यमहिमा सर्वत्र तेऽस्ति प्रभो! किं कुर्वे सकलं त्वदीयदयया सञ्जृम्भितं भूतले ॥ किं दास्ये द्रविणं त्वदीयकृपया सर्वैः सुलभ्यं नरैः प्राप्तोऽस्मीह भवाब्धिपोत! कुरु यत् कर्तुं सुयोग्यं तव ॥ ३ ॥ माता भ्राता पिता वा स्वजनसुहृदयास्तेऽपि चान्ये न कस्मै स्वल्पं वा भूरि वित्तं वितरति बहुधा याचनाया अभावे ॥ भक्तानां त्वं तु "भक्तिप्रगुणगणसमाबद्ध एवास्मि" मत्वा द्रव्यं वै भूरि तेभ्यो वितरसि भगवन्! चिन्तितं तैर्न चित्ते ॥ ४ ॥ लुण्ठन्तश्चैव नित्यं तव पदकमलाक्रान्तभूमावजस्रं लक्ष्मीं नेच्छन्ति भक्ताः प्रतिदिनममलं त्वच्चरित्रं पठन्तः ॥ कालिन्दीप्रान्तभूमौ करधृतकवलं बालकृष्णस्वरूपं द्रष्टुं त्वत्तोऽपि ते ते कथमपि जगतो नैव वाञ्छन्ति मुक्तिम् ॥ ५ ॥ लोके नैव कदापि कुत्र कथितं केनापि दृष्टं श्रुतं मालीन्यं नहि जायतेऽवयविनां धूलौ समालुण्ठने ॥ लक्ष्मीनाथ! तवैव केवलमहो पादाब्जधूलौ मया पावित्र्यं ह्युत तस्य मुक्तिरवनेरालोकिता लुण्ठतः ॥ ६ ॥ पद्मानि प्रभवन्ति नाथ! सरितो दृष्टं च लोके श्रुतं दृष्टा नैव कदा श्रुता हि बहुधा पद्मोद्भवा वै सरित् ॥ लक्ष्मीनाथ! भुवीह केवलमहो त्वत्पादपद्मोद्भवा गङ्गा नाम सरित् पवित्रसलिला दृष्टा श्रुता पावनी ॥ ७ ॥ धृत्वा ब्रह्मस्वरूपं विसृजसि रजसा सान्वयाँस्त्वं त्रिलोकान् भूत्वा सत्त्वेन विष्णुर्विचरसि जगतां पालनाय त्वमेव ॥ हारं धृत्वा च रूपं हरसि हि तमसा चान्ततस्त्वं त्रिलोकं रूपं धृत्वा त्रिधैवं सृजसि च सकलं पासि चात्सि त्वमेव ॥ ८ ॥ स्तोत्रं चैतद्भवत्प्रीत्यै रचितं भगवन्मया ॥ कल्याणं कुरुताद् भूमन्! भवान् भाववतां नृणाम् ॥ ९ ॥

श्रीपशुपतिक्षमायाचनास्तोत्रम् ॥

प्रसन्नाया यस्या [१]भगिरथमहीपालतपसा पतन्त्या गङ्गायाः प्रसभमभितो ब्रह्मसदनात् ॥ प्रवाहो धम्मिल्ले सकलजनसौख्याय सुधिया त्वयोद्धर्तुं लोकान्विगतभय ! शम्भो ! परिधृतः ॥ १ ॥ पुरा देवा दैत्याः सुहृदहितभेदं प्रकृतिजं विमुच्य क्षीराब्धेः सततममृतोत्पत्तिकरणे ॥ प्रवृत्तास्तत्कालं प्रमथनभवं भूरि गरलं त्वया पीतं शम्भो ! ननु करतलीकृत्य सकलम् ॥ २ ॥ स्वरूपं मोहिन्याः कनकमयसौन्दर्यसहितं धृतं त्वन्मोहार्थं भुवनपतिना तेन विभुना ॥ अवेक्ष्याकृष्टोऽपि प्रचलितदुकूलं कटितटं त्वमेको ह्यन्तेऽभूद्विगतपरिमोहः पशुपते ! ॥ ३ ॥ सहस्रं स्त्रीणां यत् त्रिभुवनपतेः षोडशमहो तथाऽप्येको जातो नहि विधिवशात्तस्य तनयः ॥ कृता लिङ्गार्चा ते विविधविधिभिश्चैव बलिभिस्तदा लब्धाः पुत्रास्तव पशुपते ! ह्येष महिमा ॥ ४ ॥ त्वया सोमः शम्भो ! गुणगणयुतो मूर्ध्नि विधृतस्तथा क्ष्वेडं कण्ठे लघुतरगुणं लोकविधुतम् ॥ इदं ग्राह्यं त्याज्यं नहि तव विभोऽभेदमनसस्तथापि त्वं किं मां तव चरणपद्मं न नयसि ॥ ५ ॥ त्वया स्तोत्रं दत्तं नृपतितनयेभ्यो विरचितं जपन्तस्तेपुस्ते त्रिपदपदलब्ध्यै जलनिधौ ॥ गताः साक्षात्कारं भगवत इमे तेऽतिकृपया सतां सङ्गः शम्भो ! जगति नहि किं किं जनयति ॥ ६ ॥ अहं त्यक्त्वा सर्वान्विधिहरिसुरेन्द्रादिविबुधान् त्वदीये सम्प्राप्तश्चरणकमलेऽघौघहरणे ॥ त्वमेवैकः स्वामी जगति मम नान्यः पशुपते ! गमिष्याम्याजीवं नहि नहि कदाप्यन्यशरणम् ॥ ७ ॥ अजस्योद्धर्तुं ते जननमपि दुःखाब्धिपततां जनानां, त्रैलोक्याः शरणमपि नीताश्च बहवः ॥ कथं मत्तो धत्से त्वमपि भुवि शम्भो ! विमुखतां तदा यास्ये क्वाहं कथय भगवन् ! तत्त्वमपि मे ॥ ८ ॥ अयोग्यो यातुं चेत्तव चरणपद्मेऽशुचिरहं त्वया किं भस्मास्थि स्मरहर ! कपालं नहि धृतम् ॥ न भेदस्ते किञ्चिद्व्यशुचिशुचिजन्यः पशुपते ! तथापि त्वं कस्माच्चरणपतितं पासि नहि माम् ॥ ९ ॥ स्तोत्रमेतत्तव प्रीत्यै रचितं भगवन् ! मया ॥ निवासः सततं भूयाज्जपतस्ते पदाब्जयोः ॥ १० ॥ ॥

---

[१] भगीरथशब्दे गीशब्दो दीर्घत्वमपेक्षते तथापि "अपि माषं मषं" कुर्याच्छन्दोभङ्गं न कारयेदिति न्यायेन ह्रस्वत्वम् ॥

पं० प्रेम दत्त शास्त्री
जहांगीराबाद २०२३६४
बुलन्दशहर (उ०प्र०)

कर्मकाण्डोपयोगिग्रन्थाः ।

शुक्लयजुःशाखीयकर्मकाण्डप्रदीपः— अयं ग्रन्थः परिभाषाप्रकरण-संस्कारप्रकरण-आह्निकप्रकरण-मिश्रप्रयोग-अन्त्येष्टिप्रकरणैर्युक्तः। स च नाशिकनिवासिभिः वे० शा० सं० अण्णाशास्त्रिवारे महोदयैः महता परिश्रमेण सङ्गृहीतः। मूल्यम् ७–०–०

शान्तिकाण्डप्रदीपः— अयमपि शुक्लयजुर्वेदिनां कर्मकाण्डकारयितॄणां ब्राह्मणानामतीवोपयोगी विद्यते, अस्मिन्सर्वाः शान्तयः सङ्गृहीता वर्तन्ते। मूल्यम् २–०–०

पूजासमुच्चयः (पञ्चाधिकशतैर्विषयैर्युक्तः)— अस्मिन्ग्रन्थे भूतशुद्ध्यादिन्यासाः प्रायः प्रतिवर्षं प्रतिकर्म क्रियमाणाः सर्वेषां देवानां पूजाविधयश्च सङ्गृहीताः। तथा च सर्वेषां देवानां सहस्रनामावल्योऽपि प्रदर्शिता एव। पूजोपयोग्यद्यावधि न केनाप्येतादृशः पूजासमुच्चयः प्रकाशितः। मूल्यम् २–०–०

कुण्डार्कः— मरीचिका-दीधिति-पद्मिनी-नौका-मिताक्षराप्रभृतिभिर्व्याख्याभिश्चायं ग्रन्थः कर्मकाण्डकारयितॄणां प्रतिपदं समुपयोगी। अस्मिन् सर्वाणि कुण्डानि वर्तन्ते। पूर्वोक्ताभिर्व्[illegible]भिः समलङ्कृतत्वेन कुण्डादिकरणे सारल्यं स्यात्। मूल्यम् ३–०–०

[illegible] शास्त्री
[illegible] २ २६४
[illegible] (३

निर्णयसागर प्रेस,
२६–२८ कोलभाट स्ट्रीट, मुंबई